

PANDIT JIBANANDA VIDYASAGARA B.A.

SUPERINTENDENT FREE SANSKRIT COLLEGE CALCUTTA

# बालरामायणम् ।

## नाटकम् ।

### प्रथमोऽङ्कः ।

प्रसत्तेर्यः पात्रं तिलकयति यं सूक्तिरचना
य आद्यः स्वादूनां श्रुतिचुलुकलेह्येन मधुना ।
यदात्मानो विद्याः परिणमति यश्चार्थवपुषा
स गुम्फो वाणीनां कविवृषनिषेव्यो विजयते ॥ १ ॥ (क)

(क) ग्रन्थारम्भे प्रारीप्सितपरिसमाप्तिकामो ग्रन्थकृत् विघ्नविघाताय वाग्देवतायाः प्रशस्तिरूपं मङ्गलमाचरति । प्रसत्तेरिति । यः प्रसत्तेः प्रसादगुणस्य । उक्तञ्च दर्पणे, चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः । स प्रसादः समस्तेषु रसेषु रचनासु च इति । पात्रम् आधारः प्रासादगुणपूर्ण इति यावत् सूक्तिरचना शोभना उक्तिरचना वचनपरिपाटी यं तिलकयति अलङ्करोति शोभनवचनरचनालङ्कृत इत्यर्थः, श्रुतिः श्रोत्रेन्द्रियम् एव चुलुकः प्रसृतिः तेन लेह्य लेहनीय तेन मधुना मधुररसेन हेतुना यः स्वादूनां सुस्वाद्यवस्तूनाम् आद्यः प्रथमः अतिसुस्वाद्य इत्यर्थः. विद्याः तत्त्वज्ञानानि यदात्मानः यत्स्वरूपाः तत्त्वज्ञानपूर्ण इति भावः यश्च अर्थवपुषा परिणमति शब्दार्थयोः काव्यशरीरत्वेनोक्तत्वात् यदि च शब्दवैचित्र्यमर्थवैचित्र्यञ्च काव्यत्वप्रयोजकं तथापि शब्दापेक्षया अर्थवैचित्र्यस्य प्राचुर्यात् अर्थरूपेण वपुषा शरीरेण परिणमति परिणतः शोभते इत्यर्थः अर्थवैचित्र्यपूर्ण इति भावः स कविवृषैः कविश्रेष्ठैः निषेव्यः आदरणीयः वाणीनां भारतीनां गुम्फः ग्रन्थनं रचना इत्यर्थः विजयते विशेषेण सर्वोत्कर्षेणेत्यर्थः वर्त्तते इति

नान्द्यन्ते (ख) सूत्रधारः (ग) ससंरम्भं परिक्रम्य पुरोऽवलोक्य सप्रश्रयमञ्जलिं बद्ध्वा भो भो भुजस्तम्भालानितलक्ष्मीकरेणुना (घ) रघुकुलैकतिलकेन महेन्द्रपालदेवेनाधिकृताः सभासदः सर्वानेव वो गुणनिधिर्विज्ञापयति विदितमेव भवताम् । यत् नाट्याचार्येण धूर्त्तिलेन (ङ) प्रतिज्ञातम् ।

वीराद्भुतप्रायरसे प्रबन्धे
लोकोत्तरं कौशलमस्ति यस्य ।
नाट्ये च नृत्ये च परं प्रवीणा-
मसौ सुतां मे परिणेष्यतीति ॥ २ ॥ (च)

---

[illegible] । [illegible] शिखरिणी रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणीति लक्षणात् ।

(ख) नान्दी— देवद्विजनृपादीनामाशीर्वादपरायणा । नन्दन्ति देवता यस्मात्तस्मान्नान्दीति कीर्त्तितेत्युक्तलक्षणा, तस्या अन्ते अवसाने ।

(ग) सूत्रधारः सूत्रं नाट्यसाधनं धारयति इति व्युत्पत्त्या नाट्याङ्गसाधकः नाटकप्रस्तावकः प्रधाननट इत्यर्थः ।

(घ) ससंरम्भं ससम्भ्रममित्यर्थः । सप्रश्रयं सविनयम् । भुजस्तम्भालानितलक्ष्मीकरेणुना । भुजस्तम्भ एव आलानं गजबन्धनस्तम्भः, तदस्य जातमिति भुजस्तम्भालानितः । इतोऽस्य जात इतीतप्रत्ययः । भुजस्तम्भालानिता लक्ष्मीरेव करेणुर्हस्तिनी येन । करेणुरिभ्यां स्त्री नेभे इत्यमरः । बाहुबलविनिर्जितराजलक्ष्मीकेणेत्यर्थः ।

(ङ) धूर्त्तिलेन तदाख्येन नाट्याचार्य्येण अभिनयोपदेष्ट्रा ।

(च) वीरेति । वीराद्भुतप्रायो वीररसाद्भुतरसबहुले नाट्ये अभिनेये नृत्ये च प्रबन्धे यस्य लोकोत्तरम् अलौकिकं परम् अत्यन्तं कौशलं नैपुण्यम् अस्ति असौ मे मम प्रवीणां प्रावीण्यवतीं प्रज्ञाशालिनीमित्यर्थः प्रकृष्टा वीणा प्रवीणा प्रकृष्टवीणावत् मधुरभाषिणी

तत्र दक्षिणापथादागतो रङ्गविद्याधरनामा भरतपुत्रो भवद्भिः परीक्षितो न च निर्व्यूढस्तन्मामपि परीक्षध्वम् । कर्णं दत्त्वाऽऽकाशे किं ब्रूथ ? विलक्षेण मता कर्णाटनटेन तेन निर्मर्यादमिदमुदितम् । यदुताखण्डितप्रसरा हि पुरुषकाराः कर्णाटानां ( छ ) तथाहि ।

अहमेष हरिष्यामि परिणेतुः पुरोऽपि ताम् ।
नारीपरिभवं सोढुं दाक्षिणात्या न शिक्षिताः ॥३॥ (ज)

अञ्जलिं बद्ध्वा तदिदं मयापि निवेद्यते यदि हि परिणयामि ।

अपि द्वीपान्तरादेष हृतां प्रत्याहरामि ताम् ।
कलत्रहरणं पुंसां कियदर्णवलङ्घनम् ॥ ४ ॥ ( झ )

इति ।

---

र्हन्ति या मुनः परिणेष्यति उद्वक्ष्यति इति प्रतिज्ञातमित्यनेन मन्तव्य । अत्र उपजातिवृत्तम् इन्द्रवज्रोपेन्द्रवज्रयोः सम्मेलनात् । तदुक्तम्, अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ता इति । स्यादिन्द्रवज्रा यदि तौ जगौ ग इति, उपेन्द्रवज्रा प्रथमे लघौ सति च ।

( छ ) दक्षिणापथात् दाक्षिणात्यदेशात् । निर्व्यूढ कृतकार्य्यः । विलक्षेण लज्जितेन सर्वसमक्ष प्रतिज्ञाया. पूरणे असामर्थ्यप्रकटनादिति भाव । निर्मर्यादं शिष्टाचारबाह्यम् । उदितम् उक्तम् । उत भो । अखण्डित अनिराकृतः प्रसर गति येषां तादृशाः । कर्णाटानां दाक्षिणात्यदेशविशेषवासिनामित्यर्थ ।

( ज ) अहमिति । परिणेतुं उद्वोढु । नारीपरिभव महिलाजन्यमवमानम् । पथ्यावक्त्रं वृत्तम्, युजोश्चतुर्थतो जेन पथ्यावक्त्रं प्रकीर्तितमिति लक्षणात् ।

( झ ) अपीति एषः अहं द्वीपान्तरादपि हृतां तां पूर्णिमपुनः

विचिन्त्य । किं पुनस्तत् ।

प्रविश्य पारिपार्श्विकः । एदं तम् ( १ ) ।

सूत्रधारः । मारिष ( ञ ) किमिदम् ( २ ) ।

पारिपार्श्विकः । देवादेसपत्तं तं णिरुवेदु भावो ( ट ) ।

सूत्रधारः । सखेदम् । कथमन्यदुपक्रान्तमन्यदापतितं सोऽयमातपार्थिन पयोदाभ्युदयः । विचिन्त्य । सविघ्न-विप्रुष एव कान्तक्रियारम्भाः । विभाव्य । आम् अनि-र्वेदः सिद्धेर्मूलम् । निश्चित्य भवत्वेवं तावत् । प्रकाशम् । मारिष ! रसान्तरेण नावहितं मे चेतः । तद्भवानेव वाचयतु ( ठ ) ।

---

(१) एतत् तत् ।

(२) देवादेशपत्रं तत् निरूपयतु भावः ।

---

जानकीमिति ध्वनिः । प्रत्याहरामि उद्धरामि । कलत्रस्य पत्न्याः हरणे हृतकलत्रस्य प्रत्यानयने इत्यर्थः पुंसाम् अर्णवस्य समुद्रस्य लङ्घनं कियत् तुच्छमिति यावत्, समुद्रमपि लङ्घयित्वा स्वदारप्रत्याहरणं पुंसामवश्य-कर्त्तव्यमिति भावः ।

( ञ ) मारिष । आर्य्य ।

( ट ) देवादेशपत्रं देवानाम् आदेशपत्रम् आज्ञापत्रम् । भावः महाशयः । भावयति विवेचयति सदसद्विशेषान् इति भावशब्दो नाट्ये प्रयोज्यः । निरूपयतु अवधारयतु ।

( ठ ) उपक्रान्तं प्रस्तुतम् । आपतितम् उपस्थितम् । आतपार्थिनः सौरकिरणप्रार्थिनः पयोदस्य मेघस्य अभ्युदयः उदयः । मेघोदये यथा आतपा नश्यन्ति तथा मम कार्य्येषु प्रत्यूहः समुपस्थित इति भावः । सविघ्नविप्रुषः विघ्नलेशसहिताः पृषन्ति बिन्दुरूपतः पुमांसो विप्रुषः

पारिपार्श्विकः । गृहीत्वा वाचयति ।

क्रमवर्द्धमानविलासं रसातले कं करोति कन्दर्पः ? (३) (ड) ।

सूत्रधारः । अये । प्रश्नोत्तरम् । सेयमस्मत्प्रीतिरिति देवादेशः । तत् स्वयमेव वाचयामि गृहीत्वा वाचयति ।

निर्भयगुरुव्यधत्त च वाल्मीकिकथां किमनन्तरत्वम् ॥ ५ ॥ (ढ)

कथं भाषाचित्रकर्मिकालापकं चैतत् स्वगतं सूचनाक्रमोऽपि किमत्र । बालरामायणम् (४) । विमृश्य नाटयितव्यमित्यर्थतोऽभिहितं भवति ।

---

(३) क्रमवर्द्धमानविलासं रसातले कं करोति कन्दर्पः ? ।

(४) बालरामायणम् ।

---

स्त्रियः इत्यमरः । अनिर्वेदः स्वस्य अनवमानता सिद्धेः कार्य्यस्येति शेषः । रसान्तरेण अन्येन रसेन अन्यस्मिन् मनोऽभिनिवेशेन इति भावः । वाचयतु पठतु देवादेशपत्रमिति शेषः ।

(ड) क्रमवर्द्धमानविलासं क्रमेण वर्द्धमानो विलासो यस्य तादृशं रसायाः पृथिव्यास्तले पृथिव्यामित्यर्थः कन्दर्पः कामः पृथिव्यां कं जनं क्रमवर्द्धमानविलासं करोति ? नैव कमपि करोतीत्यर्थः काकुरत्रानुसन्धेयः । न कोऽपि चिरं सुखं लभते इति तात्पर्य्यार्थः । लोकानामुपद्रवकारिणश्चिरसुखिनो रावणस्यानन्तरनाशसूचकमिदमनुसन्धेयम् ।

(ढ) निर्भयस्य राज्ञः महेन्द्रपालस्य गुरुरुपाध्यायः राजशेखरः किम् अनुसृत्य वाल्मीकेः कथां रामायणरूपां व्यधत्त नाटकरूपेण विरचितवान् इत्यर्थः । राजशेखरस्य निर्भयगुरुत्वमुक्तं कर्पूरमञ्जर्याम् । बालकई कइराओ णिब्भअराअस्स तह उवज्झाओ । इय जस्स परम्पराए अप्पा माहप्पमारूढो । संस्कृतम्, बालकवि

पारिपार्श्विकः । अहो अच्चरिअमच्चरिअम् । अस्सं लिहिदं अस्सं पढीअदि (५) ।

सूत्रधारः । सहर्षम् । अनुकूलं हि दैवं सर्वस्मै स्वस्ति करोति यत्प्रस्तुतसंवादी (ग) दैवादेशः ।

पारिपार्श्विकः । दिट्ठिआ कालिन्दीमन्दाइणीसलिलं व विअ पढमं दुधा पवाहिअ पच्छा तं कज्जं एकीभूदम् (६) ।

सूत्रधारः । सहर्षम् । सम्प्रति हि ।

सद्विद्यानं कुलतिलकतां याति दारैरुदारैः

फुल्ला कीर्त्तिर्भ्रमति सुकवेर्दिक्षु यायावरस्य ।

धीरोदात्तं जयति चरितं रामनाम्नश्च विष्णोः

काव्यव्याजात्तदियमपरा काप्यहो कामधेनुः ॥६॥ (घ)

---

(५) आश्चर्यमाश्चर्यम् । अन्यत् लिखितमन्यत् पठ्यते ।

(६) दिष्ट्या कालिन्दीमन्दाकिनीसलिलमिव प्रथमं द्विधा प्रवाह्य पश्चात् तत् कार्यमेकीभूतम् ।

---

कविराजो निर्भयराजस्य तथोपाध्यायः । इति यस्य परम्परया आत्मा माहात्म्यमारूढः ॥

(ग) प्रस्तुतसंवादी—प्रस्तुतस्य प्रस्तावविषयस्य अभिप्रेतार्थस्येत्यर्थः संवादी अनुकूल इत्यर्थः ।

(ष) कालिन्दीमन्दाकिनीसलिलं—कलिन्दस्य सूर्य्यस्य अपत्यं स्त्री कालिन्दी यमुना मन्दाकिनी गङ्गा तयोः सलिलं कृष्णश्वेतमित्यर्थः ।

(घ) सद्विद्यानमिति । सुकवेः यायावरस्य देशाद्देशान्तरगमनशीलस्य नैकत्रस्थायिन इत्यर्थः राजशेखरकवेः सद्विद्यानं कुलतिलकता

पारिपार्श्विकः । वम्मीइणा मुणिवरिट्ठेण दिट्ठणिवन्धणस्स रामचन्दचरिदस्स को उण सो विसेसो जं एस कई दंसईस्सदि (७) ।

सूत्रधारः । मारिष । कश्चित्कश्चित्प्रगल्भते (ध) नहि सर्वः सर्वं जानाति ।

पारिपार्श्विकः । भाव । णं भणामि पच्चक्खीकिदसअलसग्गमहत्थादो तत्थभवदो महेसिणो अदिक्कमिअ किं एस चम्मचक्खू पेक्खिस्सदि (८) ।

---

(७) वाल्मीकिना मुनिवरिष्ठेन दृष्टनिबन्धनस्य रामचन्द्रचरितस्य कः पुनः स विशेषो यमेष कविर्दर्शयिष्यति ।

(८) भाव । ननु भणामि प्रत्यक्षीकृतसकलसर्गमहार्थात् तत्रभवतो महर्षेरतिक्रम्य किमेष चर्मचक्षुः प्रेक्षिष्यते ।

---

याति प्रापयति अन्तर्भूतण्यर्थः कविं तं कुलतिलकं करोतीत्यर्थः । तथा उदारैः महद्भिः विशुद्धचरित्रैरिति भावः दारैः कलत्रैः फुल्ला विकासं गता कीर्त्तिः दिक्षु भ्रमति कविमेनं कीर्त्तिमन्तं करोतीति भावः । तथा रामनाम्नः रामाख्यस्य विष्णोः धीरोदात्तं चरितम् । उक्तञ्च दर्पणे, अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः । स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथित इति । जयति सर्वोत्कर्षेण वर्त्तते । तत् तस्मात् काव्यव्याजात् काव्यच्छलेन काव्यरूपं छलमाश्रित्य इत्यर्थः इयम् अपरा कापि अनिर्वचनीया कामधेनुः अभीष्टदोहिनी धेनुः काव्यादेव अभीष्टसिद्धेरिति भावः । उक्तमत्र मन्दाक्रान्ता—मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्ममिति लक्षणात् ।

(ढ) मुनिवरिष्ठेन मुनिश्रेष्ठेन । दृष्टनिबन्धनस्य दृष्टं ज्ञानचक्षुषा निरूपितं निबन्धनं हेतुभूतो विषयो यस्य तादृशस्य ।

(ध) प्रगल्भते स्फुरते ।

सूत्रधारः। मारिष। मा मैवम्।

वदनेन्दुषु वामदृशामिन्दीवरपत्रसंघटितम्।
रसनासु च सुकवीनां निवसति सारस्वतं चक्षुः॥ ७॥ (न)

पारिपार्श्वकः। प्राप्तश्रायम्। वस्त्वन्तरमतिशयानो हि प्रज्ञाप्रकर्षः। (प) सूत्रधारः। सूक्तमिदं तेनैव महामनस्विपुरुषेण।

उदन्वच्छन्ना भूः स च निधिरपां योजनशतं
सदा पान्थः पूषा गगनपरिमाणं गणयति।
इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः
सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयते॥ ८॥ (फ)

---

(न) वदनेन्दुष्विति। वामदृशां वामे शोभने दृशौ यासां तासां नारीणां वदनेन्दुषु मुखचन्द्रेषु चक्षुः इन्दीवरपत्रैः नीलोत्पलदलैः सङ्घटितं निर्मितं तथा सुकवीनां रसनासु जिह्वासु सारस्वतं सरस्वती वाणी तद्घटितं निवसति। अत्र अप्रस्तुतानां महिलामुखचन्द्राणां प्रस्तुतानाञ्च कविरसनानाम् एकधर्मस्य निवासरूपस्याभिसम्बन्धात् दीपकालङ्कारः। तदुक्तं दर्पणकारैः, अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते। उपगीतिवृत्तम्, आर्या परार्द्धतुल्ये दलद्वये प्राहुरुपगीतिमिति लक्षणात्, आर्यालक्षणन्तु तस्योदाहरणे लिखितत्वान्नात्रोल्लिखितम्।

(प) प्राप्त प्रकृष्टस्थानसम्पन्नः। वस्त्वन्तरं वस्तुविशेषम् अतिशयानः अतिक्रामन् अभिभवन्नित्यर्थः. प्रज्ञाप्रकर्षः बुद्धेरुत्कर्षः।

(फ) उदन्वदिति। भूः पृथिवी उदन्वता समुद्रेण छन्ना वृता, स च अपां निधिः समुद्रः योजनानां शतं शतयोजनपरिमित इत्यर्थः। पूषा सूर्यः पान्थः सन् सदा गगनपरिमाणं गणयति करोति इति इत्थं भावाः पदार्थाः स्फुरन्ती प्रकाशमानानाम् अवधीनां मुद्राभिः चिह्नैः मुकुलिताः वेष्टिताः। अयं पुनः सतां कवीनां प्रज्ञाया

पारिपार्श्विकः । ता णमक्कारो करीअदु (९) ।

सूत्रधारः । ननु नमस्कृतं तेनैव ।

योगीन्द्रश्छन्दसां स्रष्टा रामायणमहाकविः ।
वल्मीकजन्मा जयति प्राच्यः प्राचेतसो मुनिः ॥८॥ (ब)

प्रबन्धोपक्रमे (भ) च स किल कविरेव मुक्तवान् ।

ब्रह्मभ्यः शिवमस्तु वस्तु वितत किञ्चिद्वयं ब्रूमहे
हे सन्तः । शृणुतावधत्त विधृतो युष्मासु सेवाञ्जलिः ।
यद्वा किं विनयोक्तिभिर्मम गिरां यद्यस्ति सूक्तामृतं
माद्यन्ति स्वयमेव तत्स्रु मनसो याञ्चा परं दैन्यभूः ॥१०॥ (म)

---

(९) तन्नमस्कारः क्रियताम् ।

---

उन्मेषः स्फुरणम् असीमा निरवधिः विजयते सर्वोत्कर्षेण वर्त्तते । शिखरिणीवृत्तम् ।

(ब) योगीन्द्र इति । योगिनामिन्द्रः प्रवरः छन्दसां वेदातिरिक्तानां स्रष्टा रचयिता रामायणस्य रामचरितग्रन्थस्य कविः प्रणेता प्राच्यः प्रागभवः पुरातन इत्यर्थः प्रचेतसः वरुणस्य अपत्यं पुमान् प्राचेतसः वल्मीकजन्मा वल्मीकोद्भवः मुनिः जयति सर्वोत्कर्षेण वर्त्तते ।

(भ) प्रबन्धोपक्रमे प्रबन्धस्य ग्रन्थस्य उपक्रमे प्रारम्भे ।

(म) ब्रह्मभ्य इति । ब्रह्मभ्यः ब्राह्मणेभ्यः वेदेभ्यो वा । वेदस्तत्त्वं तपो ब्रह्म इत्यमरः । शिवं कल्याणम् अस्तु । वयं किञ्चित् किमपि विततं विस्तृतं वस्तु ब्रूमहे वदाम. । हे सन्तः । साधवः । शृणुत आकर्णयत, अवधत्त अभिनिविष्टा भवत. युष्मासु सेवाञ्जलिः प्रणामाञ्जलिः विधृतः कृतः । यद्वा अथवा विनयोक्तिभिः विनीत-

तदामुष्यायणस्य महाराष्ट्रचूडामणेरकालजलदस्य चतुर्थो दौर्दुकिः श्रीलवतीसूनुरुपाध्यायश्रीराजशेखर इत्यपरनाम बहुमानेन। (सूत्रधारः नाटयित्वा) अहो ! किमपि कमनीया कवेरात्मश्लाघा च (क)।

प्रायः कर्ता वेदविद्यालतानां
श्रेष्ठं चक्षुर्निर्निमेषं कवीनाम्।
यो येनार्थी तस्य तत् प्रार्थयन्ती
वाङ्मूर्तिर्मे देवता सन्निधत्ताम्॥ १४॥ (ख)

इदं च सूक्तमुक्तवान् (ङ)।

---

अकटोऽपि [illegible]दृष्टपूर्वेण वचसा सुतरां आनन्दयतीति [illegible]। यथा [illegible] मधुगृष्याकार मधा [illegible] भाव । एवं अपरं [illegible] चपमा. [illegible] न च [illegible] इति [illegible] [illegible] भाग [illegible]। शिखरिणी वृत्तम् ।

(क) [illegible]मुष्यायणस्य [illegible] महाराष्ट्रस्य चूडामणे[illegible] अकालजलदस्य चतुर्थः दौर्दुकिः [illegible] अपत्यं पुमान् शीलवत्या नाम मातुः तनयः उपाध्यायः [illegible] श्रीराजशेखर इति बहुमानेन अपरनाम [illegible]। आत्मश्लाघा [illegible] प्रशंसा ।

(ख) प्रायः इति। वेदविद्या एव लता तासाम् [illegible] प्रथम [illegible] निर्निमेषं निमेषरहितम् [illegible] चक्षुः [illegible] यो जनः येन अर्थी [illegible] तस्य तत् प्रार्थयन्ती। [illegible] वाङ्मूर्तिः [illegible] देवता [illegible] मम सन्निधत्तां सान्निध्यं करोतु। [illegible] [illegible]रिति लक्षणात् ।

(ङ) । सूक्तं शोभनं वचनम् ।

जिह्वे देवि! सरस्वतीं भगवतीमग्रे समग्रां कुरु
त्वां बद्धाञ्जलिराजशेखरकविः सोऽयं स्वयं याचते।
स्तुत्येऽस्मिन्निजवंशमौक्तिकमणौ रामे विरामे द्विषां
कुण्ठा मे प्रतिभेव दैवतवशाद्वाचां प्रवृत्तिर्यदि॥ १५॥ (ख)

पारिपार्श्विकः। ता किं स वण्णीअदि (११)।

सूत्रधारः। ननु वर्णितमेव दैवज्ञेन।

बभूव वल्मीकभवः कविः पुरा
ततः प्रपेदे भुवि भर्तृमेठुताम्।
स्थितः पुनर्यो भवभूतिरेखया
स वर्त्तते सम्प्रति राजशेखरः॥ १६॥ (क)

तत् किं न वर्ण्यते।

ख। जिह्वे इति। हे जिह्वे। रसने देवि। त्वम् अग्रे प्रथमं समग्रां सम्पूर्णां भगवतीं सरस्वतीं कुरु धारय इत्यर्थः। सोऽयं राजशेखरकविः त्वां स्वयं बद्धाञ्जलिः सन् याचते। स्तुत्ये स्तवनीये अस्मिन् निजवंशस्य मौक्तिकमणौ मुक्तारत्नभूते द्विषां शत्रूणां विरामे विच्छेदकारिणि रामे मे मम प्रतिभा कुण्ठेव सङ्कुचिता एव रामेण इत्यर्थं रामचरितं दृष्ट्वैव मन्दा अनमस्य भवति भावः, यदि दैववशात् भाग्यवशात् वाचां प्रवृत्तिः स्फुरणं जिह्वया भवति तदा रामचरितं वक्तुं शक्नुयामिति तात्पर्यार्थः। शार्दूलविक्रीडितं छन्दः।

क। बभूवेति। पुरा पूर्वकाले वल्मीकभवः वल्मीकोत्पन्नः वाल्मीकिर्नाम कविः बभूव। ततः भुवि पृथिव्यां भर्तृमेठुः भर्तृमेठत्वं प्रपेदे प्राप। यः भवभूतिरेखया भवभूतिनाम्ना स्थितः सम्प्रति स राजशेखरः वर्तते। वाल्मीकिः, ततः पुनः भवभूतिः, वाल्मीकिरसौ जन्मान्तरेति तात्पर्यम्।

अपिच। किं न श्रुतं सभ्यस्य शङ्करवर्मणो वर्णनम्।

पातुं श्रोत्ररसायनं रचयितुं वाचः सतां सम्मता
व्युत्पत्तिं परमामवाप्तुमवधिं लब्धुं रससोतसः।
भोक्तुं स्वादु फलं च जीविततरोर्यद्यस्ति ते कौतुकं
तद् भ्रातः शृणु राजशेखरकवेः सूक्तीः सुधास्यन्दिनीः॥१७॥(ख)

अपिच।

आपन्नार्त्तिहरः पराक्रमधनः सौजन्यवारांनिधि-
स्त्यागी सत्यसुधाप्रवाहशशभृत्कान्तः कवीनां गुरुः।
वर्ण्यं वा गुणरत्नरोहणगिरेः किं तस्य साक्षादसौ
देवो यस्य महेन्द्रपालनृपतिः शिष्यो रघुग्रामणीः॥१८॥(ग)

(ख) पातुमिति। हे भ्रातः! श्रोत्राभ्यां रसायनम् अमृतमय-मौषधविशेषं पातुं सतां साधूनां सम्मताः वाचः रचयितुं, परमाम् उत्कृष्टां व्युत्पत्तिम् अवाप्तुं लब्धुं रससोतसः रसप्रवाहस्य अवधिं पारं लब्धुं गन्तुमित्यर्थः तथा जीविततरोः जीवनरूपस्य वृक्षस्य स्वादु फलं भोक्तुं यदि कौतुकम् अस्ति, तत् तदा राजशेखरकवेः सुधास्यन्दिनीः अमृतवर्षिणीः सूक्तीः सुवचनानि शृणु शार्दूलविक्रीडितं वृत्तम्।

(ग) आपन्नार्त्तिहर इति। असौ कवीनां गुरुः राजशेखरः आपन्नानाम् आर्त्तिहरः पीडाप्रशमयिता, पराक्रमधनः शूरः सौजन्यवारांनिधिः साधुतमः त्यागी दानशीलः, सत्यमेव सुधाप्रवाहः तस्य शशभृत् चन्द्रः कान्तः जनरञ्जनश्च। गुणरत्नानां रोहणस्य उत्पत्तेः गिरेः पर्वतस्वरूपस्य अथवा गुणरत्नेषु रोहणगिरेः सर्वोन्नतप्रदेश-रोहणाख्यस्य कस्यचित् पर्वतविशेषस्य तस्य किं वा वर्णं वर्णनीयम्? असौ साक्षात् देवः देवस्वरूपः, रघूणां रघुवंश्यानां

नेपथ्ये गीयते ।

मुक्कहरिणाङ्कमण्डलपासप्पसरो बुधो विबुहवग्गो ।
ओत्थरिअ राहुविहुरं णलिणीणाहं समुल्लिहइ ॥१२॥ ॥१९॥ (घ)

सूत्रधारः । आकर्ण्य कथमुपस्थुतदेवादेशैः (ङ) कुशीलवैरुपक्रान्तमेव यदियं शुनःशेफस्य प्रावेशिकी ध्रुवा । विमृश्य ध्रुवा हि नाम नाट्यस्य प्रथमे प्राणाः । तथाहि ।

प्रथयति पात्रविशेषान् सामाजिकमनांसि रञ्जयति ।
अनुसंदधाति च रसान् नाट्यविधाने ध्रुवा गीतिः ॥२०॥ (च)

---

(१२) मुक्तहरिणाङ्कमण्डलपार्श्वप्रसरो बुधो विबुधवर्गः ।
अवतीर्य राहुविधुरं नलिनीनाथं समुल्लिखति ॥

---

ग्रामणीः धुरन्धरः महेन्द्रपालः नाम नृपतिः यस्य शिष्यः । शार्दूलविक्रीडितं वृत्तम् ।

(घ) मुक्तेति । मुक्तः परित्यक्तः हरिणाङ्कमण्डलस्य चन्द्रस्य पार्श्वप्रसरः पार्श्वावस्थानं येन तादृशः बुधः विज्ञतमः विबुध्यन्त इति विबुधाः देवास्तेषां वर्गः अवतीर्य विमानादिति शेषः राहुणा विधुरं व्याकुलम् आक्रमणादिति भावः नलिनीनाथं चन्द्रं समुल्लिखति ।

(ङ) उपस्थुतदेवादेशैः देवादेशं स्वर्वाङ्गः । उपक्रान्तं प्रारब्धम् । प्रावेशिकी प्रवेशसूचिका ध्रुवा गीतिविशेषः । प्रथमे आद्याः प्राणाः जीवनानि ।

(च) प्रथयतीति । ध्रुवा गीतिः नाट्यविधाने पात्रविशेषान् नटविशेषान् प्रथयति प्रदर्शयति, सामाजिकानां सभ्यानां मनांसि रञ्जयति आनन्दयति, रसान् अनुसन्दधाति च । उपगीतिवृत्तम् ।

तदेह्यावामप्यनन्तरकरणीयाय (छ) सज्जीभवाव इति निष्क्रान्तौ आमुखम् (ज)।

ततः प्रविशति सुनःशेफः ।

सुनःशेफः । प्रातःसवन (झ) एव यजमानं द्रष्टुमिच्छामि । तत्र कश्चित् सन्ध्यां वन्दमानस्य मे कालातिपातः संवृत्तः । ऊर्द्धमवलोक्य कथमद्याप्यपटिष्ठमाञ्जिष्ठं च मञ्जु मार्त्तण्डीयं तेजः । तथाहि ।

उषःप्रवालद्रुमबालपल्लवा-
स्त्रिलोकहर्म्याङ्गणहस्तदीपिकाः ।
दिनद्विपेन्द्रारुणकर्णचामरा
मरीचयोऽर्कस्य लुठन्ति कोमलाः ॥ २१ ॥ (ञ)

(छ) अनन्तरकरणीयाय अतःपरं कर्त्तव्य कार्य्याय ।

(ज) आमुखं ।—नटी विदूषको वापि पारिपार्श्विक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्वते । आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि वेति कथितलक्षणम् ।

(झ) सवने स्नाने । अपटिष्ठमाञ्जिष्ठम् अपटिष्ठा अनुज्ज्वला माञ्जिष्ठा रञ्जनद्रव्यभेदो यस्मात् तादृशं मञ्जिष्ठारागवदुज्ज्वलमित्यर्थः । मञ्जु मनोज्ञम् मार्त्तण्डीयं सौरीयम् ।

(ञ) उष इति । उषः प्रभाते सम्प्रत्यन्तमव्ययम् । प्रवाला विद्रुमा इव द्रुमाणां बालपल्लवाः नवकिसलयाः येभ्यः तादृशाः त्रयाणां लोकानां समाहारः त्रिलोकं तदेव हर्म्याङ्गणम् तस्य हस्तदीपिकाः करधृतदीपश्रेणयः, तथा दिनमेव द्विपेन्द्रः करिराजः तस्य अरुणा रक्ताः कर्णचामराः कोमला अर्कस्य मरीचयः किरणा लुठन्ति समन्तात् पतन्ति । वंशस्थविलं वृत्तम् ।

ध्यात्वा ।

यदेतदग्रे परमम्बरस्थं

ज्योतिः स पूषा पुरुषः पुराणः ।

अथास्य शिष्यः किल याज्ञवल्क्य-

स्तस्यापि राजा जनकः स योगी ॥ ३२ ॥ (ट)

राक्षसरक्षोपघ्नं (ठ) रामभद्रमानेतुं सिद्धाश्रमादयोध्यां गच्छता तातविश्वामित्रेण यज्ञोपनिमन्त्रकस्य परमसुहृदः श्रोत्रियक्षत्रियस्य महाराजसीरध्वजस्य स्वप्रतिनिधिः प्रेषितोऽस्मि । आसन्नसमसमयस्य (ड) चागच्छतोऽध्वरविधिरवभृथावशेषो वर्तत इति मे तर्कः । तदेष राजर्षिः सौत्रातिकोऽपि भवन् न गुरोरपराधभूमिः स्याम् इति परिक्रामति ।

---

(ट) यदिति । यत् एतत् अग्रे परम् [illegible] परिदृश्यमानं अम्बरस्थं गगनतलवर्त्ति ज्योतिः तेजः, स पुराणः पुरुषः पूषा मार्त्तण्डः । अस्य अथ एव अतः [illegible] । शिष्यः याज्ञवल्क्यः किलेति प्रसिद्धौ याज्ञवल्क्यः [illegible] शिष्य इति प्रसिद्धिरित्यर्थः । स च राजा योगी जनकः [illegible] शिष्य इति शेषः । [illegible] ।

(ठ) [illegible] राक्षसेभ्यः [illegible] रक्षोमयविघ्नं [illegible] यज्ञोपनिमन्त्रकस्य [illegible] निमन्त्रणं [illegible] इत्यर्थः । श्रोत्रियश्चासौ [illegible] वेदमतिकः श्रोत्रियशब्दश्च [illegible] क्षत्रियः राजन्यश्चेति तथाभूतस्य महाराजसीरध्वजस्य जनकस्य ।

(ड) आसन्नसमसमयस्य आसन्नः उपस्थितः [illegible]

प्रविश्य तापसच्छद्मना (ढ) राक्षसः । स्वगतम् ।

सम्प्रेषितो माल्यवताहमद्य
ज्ञातुं प्रवृत्तिं कुशिकात्मजस्य ।
पुरं निमीनां मिथिलां च गन्तुं
तां चाप्ययोध्यां रघुराजधानीम् ॥ २३ ॥ (ण)

कुलपुत्रक इति सप्रसादमादिष्टयास्मि (त) । यथा सीता नामायोनिजां जनककन्यां धूर्जटिधनुरारोपणपणपरिक्रेयां देवो दशाननः श्रुतवान् । तस्य मर्त्यमण्डलवाराधिकारनियुक्ता सहोदरी शूर्पणखा नित्यमेवंविधानां राजकार्याणां सम्पादयित्री उचितविधायिनी च मे वत्सा । प्रभुचित्तानुवर्त्तनं हि सेवकजनसिद्धविद्या । सीतार्थी च मिथिलां प्रस्थातुकामो महाराजरावणः । किं बहुना-ऽयमपरो गरुडस्योपरि पिण्डकोद्वेदो यत्किल प्रस्थास्य-

---

यथोक्तस्य । अध्वरविधिः यज्ञानुष्ठानम् आन्त्यावशेषः अवभृथः दीक्षान्तस्नानम् अवशेषो यस्य तादृशः । सर्व एव यज्ञविधिरवशिष्टः केवलम् अवभृथोऽवशिष्यते इत्यर्थः । कौशिकः कुशिकानां ... तथोक्तः स्नातकव्रतात् ... आपराधभूमिः दोष-स्थानम् ... भेद्यम् ।

(ढ) तापसच्छद्मना छद्मवेशेनेत्यर्थः ।

(ण) सम्प्रेषित इति । अहमद्य माल्यवता राक्षसराजस्य मातामहेन कुशिकात्मजस्य विश्वामित्रस्य प्रवृत्तिं वार्त्तां ज्ञातुं तथा निमीनां निमिवंश्यानां पुरं मिथिलां रघुराजधानीं ताम् अयोध्याञ्च गन्तुं सम्प्रेषितः । उपजातिर्वृत्तम् ।

(त) कुलपुत्रकः कुलस्य वंशस्य पुत्रकः वंशधुरन्धर इत्यर्थः सप्रसादं साहकम्पम् । धूर्जटिधनुरारोपणपणपरिक्रेयां धूर्जटेः हरस्य

मानेन निशाचरचक्रवर्तिना तत्रभवतो नीललोहितान्ते-वासिनः पार्वतीधर्मपुत्रकस्य जामदग्न्यस्य सकाशं परशु-मार्गणाय मायामयः प्रहितः । तदिदमसमञ्जसमिव पश्यामि । यतः ।

शमव्यायामाभ्यां प्रतिविहिततन्त्रस्य नृपतेः
परं प्रत्यावापः फलति कृतसेकस्तरुरिव ।
बहुव्याजं राज्यं न सुकरमराज्यप्रणिधिभि-
र्दुराराधा लक्ष्मीरनवहितवित्तं चलयति ॥२४ (ख)

---

धनुरारोपणं ज्यया धनुषः संयोजनम् स एव पणः मूल्यं तेन परिक्रेया विवाह्या ताम् । सर्वनगरसञ्चाराधिकारनियुक्ता सर्वनगरस्थलेषु चार-काः केन प्रकारेण वार्त्तेति गुप्तानुसन्धानार्थं भ्रमणं तस्य अधिकारे व्यापारे नियुक्ता इत्यर्थेनेति शेषः । प्रभुचित्तानुवर्त्तिनी प्रभोः स्वामिनः चित्तस्य मनसः अनुवर्तिन्यम् अनुसरणम् अभिप्रायानुसारेण कार्यसाधनमित्यर्थः । लोकजनजिह्वानिष्पन्दा लोकजनानां जिह्वा निःस्विन्ना निष्पा निष्पन्दम् । पिण्डकोद्भेदः विस्फोटकजननम् । गमिष्यमाणेन गमिष्यता । नीललोहितान्तेवासिनः शङ्करशिष्यस्य । मायामयः तदाख्यः राक्षसः । व्याजजलमिव निःसङ्कुलमिव ।

(ख) शमेति । शमव्यायामाभ्यां शमेन शान्त्या व्यायामेन युद्धप्रकारेण च दण्डनीतिः प्रतिविहितः पर्यालोचितः तन्त्रः राज्यशासनं येन तादृशस्य नृपतेः प्रत्यावापः परराष्ट्रचिन्ताव्यापारः कृतः सेकः जलसेको यस्य तथोक्तः तरुरिव परम् अत्यन्तं फलति । बहुव्याजं छलपूर्णं राज्यं अराज्यप्रणिधिभिः न सन्ति राज्येषु प्रणिधयो येषां तैः तादृशैः भूप-तिभिः न सुकरं सुसाध्यम् । यतः लक्ष्मीः दुराराधा दुःखेन आराधनीया अनवहितं चित्तं यस्य तथाभूतं नृपं चलयति भ्रंशयति । शार्दूलविक्रीडितं वृत्तम् ।

निरूप्य । अहह ! अनमात्यायत्तसिद्धिर्धिक्स्वामित्वम् (द) । कुतः ।

स्वेच्छया कुरुते स्वामी यत्किञ्चन यतस्ततः ।
अतस्तत् प्रतिचिकीर्षन्तो दुःखं जीवन्ति मन्त्रिणः ॥२५॥ (ध)

विचिन्त्य । तद्भवद्भविष्यदनर्थयोर्भवदनर्थं प्रथमं प्रतिकुर्वीतेति नीतिविदः । तदेष सीतावृत्तान्त एव प्रथमं प्रतिविधातव्यः । भद्रमुख ! त्वया मेनकाकामुकस्य त्रिशङ्कुयाजिनः क्षत्रियब्राह्मणस्य तस्य प्रवृत्तिरस्मासु निवेदनीया स च सिद्धाश्रमादुच्चलित इति श्रुतिः । तस्य दशरथः सीरध्वजश्च परं मित्रे । तत्र यदि दशरथं प्रति यायात् तदहमन्यापदेशेन दशकन्धरस्य यात्राभङ्गाय यतिष्ये । स हि नक्तंचराणां निसर्गामित्रो विश्वामित्रः । व्रतचर्यया वीरव्रतचर्यया च समर्थः । दशरथो-

---

(द) अनमात्यायत्तसिद्धेः अमात्येषु आयत्ता निर्भरस्य या न भवतीति अनमात्यायत्तसिद्धिः तस्य ।

(ध) स्वेच्छयेति । स्वामी स्वेच्छया यतस्ततः यत्र तत्र यत् किञ्चन कुरुते । मन्त्रिगणस्तु ततत् स्वामिकार्यं अविविच्यकारितानि अतः प्रतिचिकीर्षन्तः प्रतिकर्त्तुमिच्छन्तः दुःखं यथा तथा जीवन्ति ।

(न) भवद्भविष्यदनर्थयोः वर्त्तमानभाविनोरनर्थयोः मध्ये भवदनर्थं वर्त्तमानमनर्थम् । नीतिविदः नीतिशास्त्रज्ञा इति वदन्तीति शेषः । प्रतिविधातव्यः प्रतिकर्त्तव्यः दूरीकर्त्तव्य इत्यर्थः । मेनकाकामुकस्य मेनका नाम सुरसुन्दरी देवैस्तपोभङ्गाय विश्वामित्राय पुरा प्रेषिता, स तु तस्यामासक्तः कियन्तं कालं विषयसुखं बुभुजे इति पौराणिकी गाथात्रानुसन्धेया । त्रिशङ्कुयाजिनः पुरा त्रिशङ्कुर्नाम

ऽपि तथाविध एव। अनकश्च योगी शान्तो दान्तश्च। अहं तु मिथिलां पुरीं प्रत्युच्चलितस्त्वरितमिमां विचिन्त्य रघुराजधानीं यास्यामि। विमृश्य तादृश एव तादृशा-मामपसर्पः स्यादिति कृततापसवेशोऽपि महर्षिभ्यो बिभ्यत् सञ्चरामि। पुरोऽवलोक्य कथं तापसः?। प्रत्यभिज्ञाय तथापि विश्वामित्रधर्मपुत्रः शुनःशेफः। भवत्वस्मादेव तत्किंवदन्तीलाभः (न)। उपसृत्य भगवन्नभिवादये।

शुनःशेफः। अभिलषितेन युज्यस्व।

इति परिक्रामतः।

राक्षसः। विलोक्य भगवन्! साप्तपदीनं (प) सख्यं मां मुखरयति तत्प्रष्टुकामोऽस्मि।

---

सूर्यवंशीयः कश्चिन्नृपतिः कुलगुरुं वशिष्ठं सशरीरस्वर्गगमनाय यष्टु-कामो अनुरुरोध। वशिष्ठस्तु त्वं नैतादृक् पुण्यशालीति प्रत्याख्यातः विश्वामित्रं वशिष्ठद्वेषिणमाशिश्रियत् स च विश्वामित्रस्तम् अभिमत-यागार्थमङ्गीकृत्य अयाजयदिति पुराणस्तकथात्र अनुसन्धेया। क्षत्रिय-ब्राह्मणस्य आदौ क्षत्रियः पश्चात् ब्राह्मण इति तथोक्तस्य विश्वामित्रस्य इत्यर्थः। उच्चलितः क्वचित् गत इति श्रुतिः जनरव:। अन्यापदेशेन अपरं छलमाश्रित्य इत्यर्थः। व्रतचर्यया तपोनुष्ठानेन वीरव्रतचर्यया शौर्यप्रकटनेन च। विचिन्[illegible]णेभ्य अपसर्पः चरः अपसर्पश्चरः स्पश इत्यमरः। तत् किंवदन्[illegible] तद्वार्तोपालम्भः।

(प) साप्तपदीनं [illegible] : सप्तभिः पदैः [illegible] अवाप्यते [illegible] उपतिष्ठन्ते: साख्यम् अथवा विवाहानन्तरं [illegible] समनेन स्त्रीपुंसयोरलौकिक प्रेम जायते तन्निबन्धनं [illegible] अथावकत्वमिति बोध्यम्। मुखरयति वाचालयति।

शुनःशेफः । ब्रह्मन् ! अभिधीयताम् ।

राक्षसः । विद्यास्नातक (क) इव लक्ष्यसे तत् कथमयं स्वाध्यायप्रत्यूहः ? ।

शुनःशेफः । गुरोरादेशः ।

राक्षसः । कस्ते गुरुः ? ।

शुनःशेफः । भगवान् विश्वामित्रः ।

राक्षसः । स्वगतम् । भवतु कोपयाम्येनम् । सुसमस्त-कुपितानां हि भावज्ञानं द्रष्टव्यम् । प्रकाशम् । अथ कोऽयं विश्वामित्रो नाम ? ।

शुनःशेफः । सकोपम् । अये ! द्वीपान्तरादिवागतोऽसि यद्भगवन्तं विश्वामित्रमपि न जानासि ? ।

न्यस्यान्यान् दक्षिणस्यां दिशि गगनमुनीन् सप्त क्लृप्तकल्पा
नव्यं हव्यं च कृत्वा विदग्धजनहृते सर्वयागाङ्गवर्गे ।
वासिष्ठीं शापमुद्रां सपदि विदलयन् यो महासत्त्वबन्धे
मध्येव्योम त्रिशङ्कोः शतमखविमुखः स्वर्गसर्गञ्चकार ॥२६॥ (ख)

---

(क) विद्यास्नातकः स्नातकः ब्रह्मचारिविशेषः विद्यासु स्नातकः विद्यास्नातकः । स्वाध्यायप्रत्यूहः वेदाध्ययनविघ्नः ।

(ख) न्यस्येति । यः अन्यान् सप्त गगनमुनीन् दक्षिणस्यां दिशि न्यस्य स्थापयित्वा [illegible]: विरचितः कल्पाङ्गानां मखलतानां पक्षः स्थानं येन तथाभूतः सर्वे [illegible] यागाङ्गानां [illegible] नसामग्रीणां वर्गे विदग्धजनैः देवैः हृतेऽपि [illegible] निर्गलितगर्वः स्वकीयानधिकारितया विद्वेष [illegible] दिकं हव्यं यागं कृत्वा च वासिष्ठीं वशिष्ठस्य [illegible] गच्छ प्रति न त्वं कदापि स्वर्गमाप्नुहीत्येवं । [illegible] त्रिशङ्कुया[illegible]यन् भगवान् शतमखविमुखः

अपिच

सन्तानब्रह्ममहानिधिः क्षितिभुजां जेता मुनीनां च यः
बाणौ यस्य परं पवित्रिततलौ चापस्रुचोर्धारणात् ।
विश्वामित्र इति त्रिलोकतिलक त्वं वेत्सि नास्मद्गुरुं
योऽस्मिन्सप्तर्षिखण्डिनां भगवतां धात्रा कृतः सप्तमः ॥२७॥ (अ)

'सम्प्रत्येव राक्षसभयात् सत्रे दीक्षिष्यमाणः स भगवान् रक्षितारं रामभद्रं वरीतुमयोध्यां गतः ।

राक्षसः । सक्रोधम् । भगवन् ! मा कोपीः । बटुस्वभावसुलभं चापलमत्रापराध्यति न पुनरज्ञानम् । कः पुनः स्तम्भितरम्भं (ब) भगवन्तं विश्वामित्रं न जानाति ।

गुरुत्यागात् इन्द्रस्य त्रिशङ्कुविरोधितया तमगणयन्नित्यर्थः महामखं महान् मख एव मखः मखनं अवलम्बनं यस्मिन् तादृशे मध्येव्योम व्योम्नोमध्यं तस्मिन् अव्ययीभावसमासः । त्रिशङ्कोः स्वर्गस्य सर्गं सृष्टिं चकार सम्धराडत्तम् ।

(अ) सन्तेति यः सन्तानां ब्रह्मणां ब्राह्मणानाञ्च महानिधिः महाश्रयः सत ब्रह्मधर्मस्य परमोत्कर्षभूत इत्यर्थः । किञ्चेति चार्थः । क्षितिभुजां राज्ञां मुनीनाञ्च जेता पराभविता । यस्य पाणी चापस्रुचोः चापस्य धनुषः स्रुचः यज्ञाङ्गविशेषस्य च धारणात् परम् अतिशयेन पवित्रितं तलं ययोः तादृशौ । त्वं तथाभूतं त्रिलोकतिलकं त्रिभुवनस्यालङ्कारभूतं विश्वामित्र इति ख्यातं अस्मद्गुरुं न वेत्सि, यः धात्रा ब्रह्मणा अस्मिन् जगति भगवतां सर्वशक्तिमतां चित्रशिखण्डिनां सप्तानां देवर्षीणां तदुक्तम् मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः । वशिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः । इति । सप्तमः सप्तानां पूरणः कृतः सप्तसंख्या पूरणस्य विद्यमानत्वेऽपि तेषां समत्वविवक्षया सप्तमत्वसङ्गमिति बोध्यम् ।

(ब) स्तम्भितरम्भं स्तम्भिता रम्भा येन स पुरा देवैस्तपोभङ्गार्थं

स्वगतम् । कृतं यत् कर्तव्यम् । सम्प्रति चारसञ्चारस्यावसरः (क)।
प्रकाशम् । क्व पुनर्गुर्वादेशो गमयिता ।

शुनःशेफः । मिथिलापुरीम् ।

राक्षस. । किं तत्र ?

शुनःशेफः । गुरुसुहृदो राजर्षेः सीरध्वजस्य यज्ञोपस्थानम् ब्रह्मंस्त्वमपि वैदेशिक (ख) इवासि तत् कुतः पुनरिदमागम्यते ? ।

राक्षसः । स्वगतम् । भवत्वेवं तावत् । प्रकाशम् । (ग) रोहणाचलपरिसरोत्तंसादगस्त्याश्रमतः ।

शुनःशेफः । किञ्चित् सानुशयम् (घ) । कोऽयमगस्त्यो नाम ? ।

राक्षसः । विहस्य । भगवन् ! कृतप्रतिकृतमेतत् (ङ) । निजोदयनिर्विषीकृतभुवनाम्भस्कं कः पुनरगस्त्यं न जानाति ।

---

गमयिता सुरनारी रम्भा विश्वामित्रं दृष्ट्वैव स्तम्भिता बभूवेति पुरावृत्तमनुसन्धेयम् । चारसञ्चारस्य चाराणां प्रणिधीनां सञ्चारस्य करणीयव्यापारस्य । अवसरः समय । गमयिता प्रेरकः ।

(ख) वैदेशिकः विदेशादागतः ।

(ग) रोहणाचलपरिसरोत्तंसात् रोहणो नाम अचलः गिरिः तस्य परिसरस्य आसन्नतरस्थानस्य उत्तंसात् शिरोभूषणभूतात् ।

(घ) सानुशयं सानुतापम् ।

(ङ) कृत प्रतिकृत कृतस्य मत्कृतस्य कर्मणः विश्वामित्रोनामकप्रश्नस्य प्रतिकृतं प्रतीकारः । यथाहं 'कोऽयम् विश्वामित्र' इति पृष्टवान् भवानपि कोऽयमगस्त्योनामेति तथा पृष्टवानिति मत्कृतस्य प्रतिक्रिया जातेति भावः । निजोदय निर्विषीकृत भुवनाम्भस्कं निजेन स्वेन उदयेन निर्विषीकृतानि विषरहितीकृतानि भुवनानां अम्भांसि येन तं अगस्त्योदये जलानि प्रसीदन्तीति प्रसिद्धिः

निषेद्धा विन्ध्यस्य प्रथमचुलुकाचान्तजलधिः
कृतापद्वातापेर्नं स कलसभूः कस्य विदितः ? ।
गुरुर्लोपामुद्राहृदयदयितो यस्त्रिजगतः
स्वयीं माणिक्याद्रेरधिवसति वेत्वानसतपा ॥२८॥ ( ष )

(ष) निषेद्धेति विन्ध्यस्य अद्रेः निषेद्धा सम्भविता पुरा सुमेरु जिगीषुर्विन्ध्याद्रिः सूर्यमात्मप्रदक्षिणीकरणार्थमनुकरोत् । ... विधातृनियममन्यथा कर्तुं शक्नुयामिति तेन प्रत्याख्यातस्तद्गति-रोधाय ऊर्ध्वमाक्रान्तुमारेभे । तद्दृष्ट्वा देवैस्तैर्याचितो मह ... रगस्त्यस्तं पर्वतं शिष्यतया वशंवदमुपेत्य अह दक्षिणस्यां दिशि कार्यार्थं गमिष्यामि यावत् नागमिष्यामि तावत् त्वया नोद्धेनम्रमि ... मित्युक्त्वा विन्ध्यं उन्नमनाद्वारयदिति पुराणकथा ... मन्त्रेया । प्रथमे आद्ये एकेनेत्यर्थः चुलुकेन गण्डूषेण आचान्त-पीतः जलधिर्येन तथोक्तः । तथा वातापेः तन्नाम्नो राक्षसस्य कृता आपद् विध्वंसो येन तथभूतः । पुरा आतापि वातापिश्च नाम द्वौ भ्रातरौ असुरौ मुनिवेशेन विचरन्तौ प्रत्यहं एक मुनिं वा ब्राह्मणं आतिथ्यार्थं निमन्त्रयामासतुः । अथागते अतिथौ वातापि भ्रातरं मातापिं मेषरूपिणं कृत्वा तं विनाश्य तन्मांसेन अतिथिं पर्यचरत् । ततश्चातिथिं कृताहारं निश्चमितुं सुप्तं दृष्ट्वा तस्मिन् वातापौ दुरात्मनि आतापे ! निष्क्रमस्वेति शनैः कथयति स आतापिः कुक्षिस्थः तमतिथिं विदार्य निर्गच्छतिस्म । ततस्तौ सुखेन तन्मांसं भक्षयन्तौ कालं निन्यतुः । एकदा अगस्त्ये अतिथौ तथा आतिथ्यदम्भे विश्राम्यति स ... आतापे ! निष्क्रम-स्वेति भ्रातरमाह्वयतिस्म । अगस्त्यस्तु कृते भ्राता मया भक्षितः कुक्षौ मे परिपाकं गत इति वदन् तं मायाविनं तदा तीं घोररूपिणं भस्मसाच्चकार । तदा प्रभृति आतापिर्वधितो येन वातापिश्च स तथाभूतः समुद्रः शोषितो येन स मेऽगस्त्यः ... इति लोकैरगस्त्यः ...

शुनःशेफः। परस्परं गुर्वधिक्षेपादुभावपि प्रायश्चित्तिनौ वर्त्तावहे (ग)।

राक्षसः। तदनुजानीहि मामघमर्षणाय (ङ)।

शुनःशेफः। (च) निर्वर्त्तितगुर्वाज्ञोऽहमपि प्रायश्चित्तं चरिष्ये। किन्तु किञ्चित्प्रष्टव्यमस्ति।

राक्षसः। नियोजय।

शुनःशेफः। लङ्कोपकण्ठवर्त्तिनि तवाश्रमपदे कश्चिदस्ति दशकण्ठादन्यः (छ)।

राक्षसः। यत् किल (ज) स्थाणवीयधनुरारोपणपणेन रावणः सीता परिणेष्यतीति तत्र कश्चिदेवंविधः।

---

इति पौराणिकी गाथा। कलशभवः कुम्भयोनिः पुरा मित्रावरुण-योरुर्वशीदर्शनसञ्जातविकारयो रेतः कुम्भे पपात तत्रास्य समुत्पत्ति-र्जातेति पुराणम्। स अगस्त्यः कस्य न विदितः? अपितु सर्वस्यैवेति भावः। त्रिजगतो गुरुः लोपामुद्रायाः नाम राजकन्याया हृदयदयितः प्राणेश्वरपतिः। यः अज्ञानतमसा तापसप्रवरः सारणिक्याद्रेः समीपे इति त्रयी त्रिवेदी अधि अधिकृत्य मनाक् ऋक्सामयजूंषि समाश्रयन् ग्रसन्ति शिष्यरिणी हन्मत।

(ग) गुर्वधिक्षेपात् गुरोर्विश्वामित्रस्य अगस्त्यस्य च अधिक्षेपात् तिरस्कारात् तावपि अस्त्वं परिचयप्रकटनेनेति भावः। प्राय-श्चित्तिनौ प्रायश्चित्तार्हौ वर्त्तावहे भवावः।

(ङ) अघमर्षणाय। अघं नि मर्षयति ध्वंसयतीति अघमर्षणो-ऽत्र मन्त्रविशेषः तस्य पाठायेत्यर्थः।

(च) निर्वर्त्तितगुर्वाज्ञः। अनुष्ठितगुरुनिदेशः।

(छ) लङ्कोपकण्ठवर्त्तिनि लङ्कासन्निहिते इत्यर्थः. दशकण्ठादन्यः दशकण्ठस्य रावणस्य इतरः, इतरः।

(ज) स्थाणवीयधनुरारोपणपणेन। स्थाणोर्हरस्य इदं स्थाण-वीयं यत् धनुः तस्य आरोपणमेव पणः शुल्कं तेन।

शुनःशेफः। विहस्य स्वगतम्। अये! (ग) लघुचित्तवृत्ति-निर्भिन्नहृदयार्थो राक्षस इवैष:। युक्तियुक्तं चैतत्।

अगर्भसम्भवां कन्यां दशकण्ठो जगज्जयी।
आरोप्य हरकोदण्डं कथं न परिणेष्यति?॥ २९॥ (घ)

प्रकाशम्। ब्रह्मन्! अनुमन्यस्व मां मिथिलाप्रवेशनाय।

राक्षसः। मामपि कार्य्यवशादितो गत्वा प्रायश्चि-त्ताय। इति निष्क्रान्तौ। शुद्धविष्कम्भकः (ङ)।

ततः प्रविशति पुष्पकेण रावणः प्रहस्तश्च।

रावणः।

यस्यारोपणकर्म्मणापि बहवो वीरव्रतं त्याजिता:
कार्य्यं सज्जितबाणमीश्वरधनुस्तद्दोर्भिरेभिर्म्मया।
स्त्रीरत्नं तदगर्भसम्भवमितो लभ्यं च लीलायिता
तेनैषा मम फुल्लपङ्कजवनी जाता दृशां विंशतिः॥३०॥ (च)

---

(ग) लघुचित्तवृत्तिः लघ्वी चित्तस्य वृत्तिर्यस्य तादृशः क्षुद्रचेताः, निर्भिन्नहृदयार्थः निर्भिन्नः प्रकाशितः हृदयार्थो येन तादृशः।

(घ) अगर्भेति। जगज्जयी त्रिभुवनजेता दशकण्ठः हरकोदण्डं आरोप्य ज्यया सङ्गमय्य अगर्भसम्भवां अयोनिजां कन्यां सीतां कथं न परिणेष्यति अवश्यमेव परिणेष्यतीत्यर्थः।

(ङ) शुद्धविष्कम्भकः वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः। सङ्क्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शित इत्युक्तलक्षणो विष्कम्भकः। शुद्धश्चासौ विष्कम्भकश्चेति तथोक्तः तदुक्तं मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः। शुद्धः स्यात् स तु सङ्कीर्णो नीचमध्यमकल्पित इति।

(च) यस्येति। यस्य धनुषः आरोपण कर्म्मणापि भङ्गो दूरे

प्रहस्तकः । सर्वतोऽवलोक्य कथं दशाननदेवदर्शनाकाङ्क्षि वृन्दारकवृन्दमिदमग्रतः समग्रमपि गगनाभोगं बिभर्त्ति ।

साक्षेपम् । (छ)

वह्ने ! निह्नोतुमर्चिः परिचिनु पुरतः सिञ्चतो वारिवाहान्
हेमन्तस्यान्तिके स्याः प्रथयति दवथुं येन ते ग्रीष्म ! नोष्मा ।
मार्त्तण्डाः ! चण्डतापप्रशमनविषये धत्त नाडीं जलार्द्रां
देवो नान्यप्रतापं त्रिभुवनविजयी मृष्यते श्रीदशास्यः ॥३१॥ (ज)

---

स्ताम् आरोपणेऽप्य सामर्थ्यप्रकटनेन यच्छवो राजान इति शेषः वीरव्रतं त्याजिताः लज्जया वीराभिमानितां त्यक्त्वा गता इत्यर्थः तत् ईश्वरस्य धनुः मया एभिः दोर्भिः भुजैः विंशत्या इति शेषः सज्जितं संयोजितः बाणो यस्मिन् तत् कार्य्यम् । इतः कार्य्यात् तत् जगति अस्माकं वीरत्वं लभ्यम् । तेन हेतुना मम एषा दृशां चक्षुषां नेत्राणां विंशतिः फुल्ला विकासं गता पङ्कजवनी कमल-श्रेणी लीलायिता विलासवती जाता । शार्दूलविक्रीडितं वृत्तम् ।

(छ) वृन्दारकवृन्दं देवसमूहः । बिभर्त्ति आवृणोति । साक्षेपं सतिरस्कारम् ।

(ज) वह्ने इति । हे वह्ने ! अग्ने ! अर्चिः स्वं तेजः निह्नोतुं गोपितुं संवरितुमित्यर्थः परिचिनु अभ्यस्य । हे ग्रीष्म ! सिञ्चतः वर्षतः वारिवाहान् मेघान् परितः बाधस्वोऽत्राध्याहार्य्य । हेमन्तस्य अन्तिके समीपे स्याः भव तिष्ठ इत्यर्थः येन ते तव उष्मा उष्णत्वं दवथुं तापं न प्रथयति आविष्करोति । हे मार्त्तण्डाः ! भास्कराः ! द्वादशात्मकत्वात् बहुवचनम् । चण्डतापस्य उग्रतापस्य प्रशमनविषये शान्त्यर्थं जलार्द्रां नाडीं प्रभां धत्त धारयत । यतः त्रिभुवनविजयी देवः श्रीदशास्यः अन्येषां प्रतापं न मृष्यते सहते । चतुर्थपादवाक्यस्य हेतुत्वेन निर्देशात् काव्यलिङ्गमलङ्कारः तदुक्तं हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते इति । स्रग्धरावृत्तम् ।

रावणः । सौत्सुक्यं हंहो ! (ज) नभस्तरुपुष्प ! पुष्पक ! किञ्चिदुच्यसे ।

सेवागतामरविमानसहस्रसेना-
सीमन्तयन् मम मनोजयिना जवेन ।
तां मैथिलस्य नृपतेर्व्रज राजधानीं
यत्राद्भुतं हरधनुर्धरणीसुता च ॥ ३२ ॥ (झ)

प्रहस्तकः । किमस्याप्युत्कण्ठते देवः । नन्ववतीर्णमनेन (ञ) गगनार्णवपोतपात्रेण विमानराजेन जनकमन्दिरे । तद्भवतु देवागमनं सीरध्वजाय निवेदयामि । [illegible] ।

वामैराकृष्य वेगात् प्रगुणितशिरसः पाणिभिः केशबन्धान्
सव्यैरव्याजशस्त्रप्रणयनपटुभिश्छिन्दतः कण्ठपीठाः ।
मन्धानस्यानुरूपामुपकरणगतिं प्रीतये चन्द्रमौले-
र्यस्यान्तस्तोषपोषं व्यधित दशमुखो विंशतिर्बाहवश्च ॥ ३३ ॥ (ट)

(ज) नभस्तरुपुष्प । नभ एव तरुः तस्य पुष्पं तत् सम्बुद्धौ ।

(झ) सेवेति । हे पुष्पक ! त्वं मम सेवार्थं आगतानि यानि अमरविमानानि देवयानानि तेषां सहस्रसेनाः सीमन्तयन् सीमन्ती-कुर्वन् मनोजयिना मनसोऽपि अधिकेन वेगेन यत्र अद्भुतं हरधनुः धरणीसुता जानकी च विद्यते तां मैथिलस्य नृपतेः राजधानीं व्रज गच्छ । वसन्ततिलकं वृत्तम् प्रोक्तं वसन्ततिलकं तभजाजगौग इति लक्षणात् ।

(ञ) गगनार्णवपोतपात्रेण गगनमेव अर्णवः तस्य पोतपात्रं तरिरूपं यानं तेन ।

(ट) वामैरिति । वामैः पाणिभिः भुजैः वेगात् प्रगुणि-तानि भूषितानि शिरांसि यैः तादृशान् केशबन्धान् आकृष्य

सोऽयं स्वयंग्रहणदुर्ललितो दशास्य-
स्त्वां याचते दुहितरं पणपूर्वमेव ।
सम्बन्धसन्धिममुना च सहानुभूय
वंशो निमेर्जयतु यावदियं धरित्री ॥ २४ ॥ (ठ)

कर्णं दत्त्वाऽऽकाशे किं ब्रूथ ? सोऽयं पुराणब्रह्मवादी याज्ञवल्क्यशिष्यो राजर्षिर्जनक ( ड ) आङ्गिरसेन पुरोधसा सार्धमितोऽभिवर्त्तते। तदिदमास्थानमण्डपोपकण्ठमधिष्ठीयताम् । इत्यन्तरितः ।

ततः प्रविशति जनकः शतानन्दश्च ।

जनकः ।

---

चन्द्रमौलेः हरस्य प्रीतये सन्तोषाय अनुरूपां उपकरणगतिं उपचार-प्रयोगं मन्वानस्य अतएव अव्याजं अकपटं यथा तथा प्रस्फुरणचटने पटुभिः अतिप्रयोगनिपुणैः सर्व्वैः दक्षिणैः पाणिभिः कण्ठपीठात् कण्ठनालीः दशापि शेषः छिन्दन्तः लुनतः यस्य दशानां मुखानां समाहारः दशमुखी शिरोनिर्वाहस्य असन्तोषस्य मनस्तुतेः पोषं वृद्धिं व्यधित, स इति परेणान्वयः कार्य्यः । हरप्रीतये यः दशमुखानि छित्त्वा बलिमदादित्यर्थः । स्रग्धरावृत्तम् ।

(ठ) स इति । सोऽयं दशास्यः रावणः स्वयं ग्रहणे बलाद्-ग्रहणे इत्यर्थः दुर्ललितः कृताभ्यास इत्यर्थः अपरित्याज्याग्रहः । त्वां पणपूर्वमेव पणपूरणं कृत्वैवेत्यर्थः दुहितरं कन्यां जानकीं याचते । अमुना सह सम्बन्धसन्धिं यौनविधिमनुभूय तथा यावत् इयं धरित्री स्थास्यतीति शेषः । तावत् निमिवंशः जयतु सर्वोत्कर्षेण वर्त्तताम् । वसन्ततिलकं वृत्तम् ।

( ड ) आङ्गिरसेन अङ्गिरसो अपत्यं पुमान् आङ्गिरसः,

यन्मीमांसयतः श्रुतीः शतपथाः साक्षात्कृतब्रह्मणो
विश्वामित्रमहामुनेरपि वयं वर्त्तामहे चेतसि ।
अप्युत्पीडकषायपावनधियां सद्यः समाधिस्पृशं
तत्सङ्गीतकमन्तरेण हृदयं हर्षान्नरीनर्ति नः ॥ २५ ॥ (ढ)

शतानन्दः । राजर्षे ! (ण) सूर्य्यप्रशिष्य ! सत्याशिषस्ते गुरवो यद्भगवान् विश्वामित्रोऽपि मैत्रीमनुरुध्यते । सङ्गमः । तदेव (त) पठति ।

---

तेन पुरोधसा पुरोहितेन पुरोधास्तु पुरोहित इत्यमरः । शतानन्देनेत्यर्थः । आस्थानमण्डपोपवेशनं सभाप्रस्थानिकम् ।

(ढ) यदिति । यत् यस्मात् शतं पन्थानो यासां ताः श्रुतीः वेदान् मीमांसयतः विचारयतः, तथा साक्षात् कृतः तपोभिः प्रत्यक्षीकृतः ब्रह्मा येन तथाभूतस्य विश्वामित्रमहामुनेरपि चेतसि वयं वर्त्तामहे विश्वामित्रः यज्ञनिमन्त्रणरक्षार्थं प्रतिनिधिं शुनःशेफं प्रेषयता तेन अनुगृहीतत्वेन अस्माकं स्मरणादिति भावः । तत् तस्मात् उत्पीडकषायपावनधियां उत्पीडः उच्चैरतिशयेन पीड़ः [illegible] कषायः विस्वादरसविशेषो येषां ते उत्पीडकषायाः तपोनिष्ठतया [illegible] मरार्थं शरीरपोषणाय कषायरससमायिनः पावनधियः [illegible] ते तथोक्तानामपि नः अस्माकं हृदयं समा[illegible] [illegible]र्षं सत् सद्यः सङ्गीतं अन्तरेण विनापि हर्षात् त[illegible] [illegible]स्य समादरजनितादिति भावः नरीनर्त्ति पुनः पुनरा[illegible] [illegible] शार्दूलविक्रीड़ितं वृत्तम् ।

(ण) सूर्य्य[illegible] [illegible] याज्ञवल्क्यस्य शिष्य इत्यर्थः शिष्यस्य शिष्यः [illegible] सत्याशिषः सत्या आशिषः शुभाशंसनानि [illegible] [illegible]त्वेन त्वामनुगृह्णातीत्यर्थः ।

(त) त[illegible] [illegible] [illegible]मित्यर्थः ।

जनकः। आकर्ण्य। अये! तपस्विनामपि न (थ) निरत्ययः सुखप्रत्ययः। यत् सीतार्थी दशकण्ठोऽपि स्पृहामुपगच्छति।

शतानन्दः। अहह! आश्चर्यमेकोऽपि गरीयान् दोषः समग्रमपि (द) गुणग्रामं दूषयति। तथाहि।

आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी।
उत्पत्तिर्द्रुहिणान्वये च तदहो! नेदृग्वरो लभ्यते
स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः? ॥२६॥(ध)

---

(थ) निरत्ययः अत्ययरहितः विघ्नरहित इत्यर्थः। सुखप्रत्ययः पात्रे कन्यां दत्त्वा सुखी भविष्यामीति सुखप्रत्याशा इत्यर्थः।

(द) गुणग्रामं गुणराशिम्।

(ध) आज्ञेति आज्ञा रावणस्येति शेषः। शक्रस्य इन्द्रस्य यः शिरोमणिः शिरोरत्नं तस्य प्रणयिनी शक्रेण शिरसा स्पृश्यते इत्यर्थः। शास्त्राणि नवं नूतनं विंशत्यधिकमित्यर्थः चक्षुः रावणस्य सम्यक् शास्त्रदर्शित्वमस्तीति भावः। भूतपतौ पिनाकिनि हरे भक्तिः, लङ्का इति ख्याता दिव्या पुरी पदं वासस्थानं तथा द्रुहिणस्य ब्रह्मणः अन्वये वंशे उत्पत्तिः ब्रह्मसुतस्य पुलस्त्यस्य पौत्रत्वादिति भावः। तस्मात् अहो इति आश्चर्यसूचकमव्ययम्। ईदृक् वरः न लभ्यते केनापीतिशेषः। चेत् यदि एषः रावणः, रावयति क्रन्दयति लोकानिति व्युत्पत्तिदूषितो न स्यात्। क्व कुत्र नु वा नुशब्दो विकल्पे। सर्वत्र सर्वस्मिन् जने सर्वे गुणा वर्त्तन्ते? इति शेषः न कुत्रापीत्यर्थः। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः। तदुक्तं दर्पणकारेण। सामान्यम् वा विशेषेण विशेषस्तेन वा यदि। कार्य्यञ्च कारणेनेदं कार्य्येण च समर्थ्यते। साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः इति। शार्दूलविक्रीड़ितं वृत्तम्।

जनकः। सत्यमिदम्। भगवन्नौतथ्य! (त) तद्दानमपगतीय सीतार्थिने लङ्केश्वराय किमुत्तरम्।

शतानन्दः। राजर्षे! चिरं दत्तमेवोत्तरम्।

जनकः। भगवन्! केन।

शतानन्दः। भगवता (प) शिपिविष्टेन।

जनकः। किमिव।

शतानन्दः। स्वधनुः।

जनकः। किं तस्य।

गिरिशधनुरधिज्यं रावणः कर्त्तुमीष्टे
करतुलितहराद्रेर्दुष्करं किं हि तस्य?।
किमुत न स निमीनां यौनसम्बन्धयोग्यः?
तदिति हि मम चित्तं चिन्तया मूर्च्छतीव ॥३७॥ (फ)

शतानन्दः। राजर्षे! मा विषीदस्व। (ब) पाणिप्रणयिनं

---

(त) औतथ्य! उतथ्यस्य अङ्गिरः पुत्रस्य अपत्यं पुमान् औतथ्यः तत्सम्बुद्धौ। किमुत्तरं देयमिति शेषः।

(प) शिपिविष्टेन हरेण।

(फ) गिरीति। रावणः गिरिशधनुः शैवं कार्मुकं अधिज्यं ज्यायुक्तं कर्त्तुं ईष्टे प्रभवति। हि यतः करेण तुलितः हराद्रिः कैलासः येन तादृशस्य तस्य किं दुष्करं? न किमपीत्यर्थः। स च किमुत कथं वा निमीनां मद्वंश्यानां यौनसम्बन्धयोग्यः न। अपितु योग्य एव उभयोर्वंशयोर्महत्त्वादिति भावः। तदिति तदेवं हेतोः मम चित्तं चिन्तया मूर्च्छतीव इति कर्त्तव्यताम् नावधारयतीवेत्यर्थः। वंशस्थविलं वृत्तम्।

(ब) पाणिप्रणयिन स्वभुजसङ्गिनं कोदण्डदण्डं धनुर्यष्टिम् वियोद्धा परिच्छेत्ता। प्रचण्डदोःखण्डः प्रचण्डबाहुदण्डः। लोकत्रयस्य

कोदण्डदण्डं प्रमादीकुर्वतः पार्वतीपतेर्विवोढा कः सीताया अभिमत इति न जानीमः। इदं तु प्रतिजानीमहे यदुत न प्रचण्डदोःखण्डोऽपि दशकण्ठः श्रीकण्ठमनीषितमपरथा प्रस्थापयिष्यति। तदेहि दुर्नृत्तमपि मुनिपुत्र-मुचितेन सम्भावयाव इत्युत्थाय परिक्रामतः।

जनकः। पुरोऽवलोक्य। दिष्ट्या दृष्ट (भ) पुलस्त्यप्रसवाः प्रमोदामहे। लङ्केश्वर! इत इतो भवानिदमासनमास्यताम्।

सर्वे यथोचितमुपविशन्ति।

शतानन्दः। ऋषिपुत्रको दिव्यश्चासि (म) तत्कृतमा-मातिथेयीं कुर्मः।

महोक्षो वा महाजो वा श्रोत्रियाय विशस्यते।
निवेद्यते तु दिव्याय स्रक्सुगन्धिनिधिर्विधिः॥ ३८॥ (य)

---

विष्णो र्मनीषितं वाञ्छितम् अपरथा अन्येन प्रकारेण प्रस्थापयिष्यति प्रस्थापयितुम् शक्ष्यतीत्यर्थः। मुनिपुत्रं मुनेर्विश्रवसःपुत्रं रावणम्। सम्भावयामः सत्कुर्मः।

(भ) दृष्टपुलस्त्यप्रसवाः दृष्टः पुलस्त्यस्य ब्रह्मसुतस्य प्रसवः तनयः रावण इत्यर्थः यैः तथाभूताः।

(म) आतिथेयीं अतिथिविहितं सत्कारम्।

(य) महोक्ष इति महान् उक्षा वृषः महोक्षः वा महान् अजः छागः महाजः वा श्रोत्रियाय वेदव्रतविप्राय मधुपर्कार्थमिति शेषः विशस्यते बध्यते आतिथ्यार्थेति भावः। दिव्याय अमानवीयाय तु श्रोत्रियाय स्रक्सुगन्धिनिधिः सुगन्धस्रक् वा यथाकुलविशेषेण वह सुगन्धिनिधिः रत्नविशेषरूपो विधिः निवेद्यते दीयते।

रावणः । आर्ये ! इयमस्माकमातिथेयी

यत् पार्वतीहठकुचग्रहणप्रवीणे
पाणौ स्थितं पुरभिदः शरदां सहस्रम् ।
गीर्वाणसारकणनिर्मितगात्रमत्र
तन्मैथिलीक्रयधनं धनुराविरस्तु ॥ ३८ ॥ (र)

प्रहस्तकः । आविरस्तु सममगर्भसम्भवया सीतया । (ल)

रावणः । सप्रत्याशं स्वगतं च ।

निर्माल्यं नयनश्रियः कुवलयं वक्त्रस्य दासः शशी
कान्तिः प्रावरणं तनोर्मधुमुचो यस्याश्च वाचः किल ।
विंशत्या रचिताञ्जलिः करतलैस्त्वां याचते रावण-
स्तां द्रष्टुं जनकात्मजां हृदय ! हे नेत्राणि मित्रीकुरु ॥४०॥ (व)

---

(र) यदिति । यत् पुरभिदः त्रिपुरारेः पार्वत्याः हठेन सहसा यत् कुचग्रहणं तत्र प्रवीणे तत्परे पाणौ शरदां वत्सराणां सहस्रं स्थितम्, अत्र मत्सन्निधौ इत्यर्थः तत् गीर्वाणानां देवानां सारकणेन निर्मितं गात्रं शरीरं यस्य तथोक्तं देवानां शरीरेभ्यः सारानादाय निर्मितमित्यर्थः, मैथिल्याः सीतायाः क्रयस्य धनं धनुः आविरस्तु प्रकटीभवतु ।

(ल) अगर्भसम्भवया अयोनिजया जानक्या समं सह ।

(व) निर्माल्यमिति । कुवलयं नीलोत्पलं यस्याः नयनश्रियः नेत्रकान्त्याः निर्माल्यं निवेदितद्रव्यम् । शशी चन्द्रः वक्त्रस्य यस्याः इति सर्वत्र संबध्यते दासः किङ्करः । कान्तिः लावण्यं तनोः अङ्गस्य प्रावरणम् आच्छादनम् । वाचः मधुमुचः मधुवर्षिण्यः किल निश्चितम् । रावणः विंशत्या करतलैः रचितः अञ्जलिः येन तथोक्तः सन् त्वां जानकीं याचते । हे हृदय ! तां जनकात्मजां द्रष्टुं नेत्राणि विंशतिमिति शेषः मित्रीकुरु सहायान् कुरु ।

शतानन्दः । इदमाविर्भवति दशानन ! माहेश्वरं धनुः ।

रावणः । स्वात्मानं प्रतीदमाविर्भवति माहेश्वरं धनुर्न-पुनरद्यापि मान्मथम् (श) ।

शतानन्दः । सहेलमालोक्य ।

स्फूर्जद्वज्राहतसुरगिरिस्वर्णचूर्णच्छटाभि-
स्तुल्योल्लासैस्त्रिभुवनदृशां दत्तदौस्थित्यमुद्रः ।
आशारन्ध्राण्ययमविरतं रुद्रकोदण्डदण्डः
स्वेच्छाचण्डो रचयति रुचां पञ्जरैः पिञ्जराणि ॥४१॥ (ष)

नेपथ्ये प्रति कः कोऽत्र भोः (स) सौविदल्लेषु ? कन्यान्तः-पुरादागच्छतु जनकराजकन्या । नेपथ्ये इयमियम् । ततः प्रविशति सीता सख्यौ च ।

सीता । ससाध्वसोल्लासम् (ह) । अम्महे ! रक्खसो त्ति सुणिअ सच्चं साज्झसकोदूहल्लाणं अन्तरे वट्टामि ।

---

(१) अहो ! राक्षसः इति श्रुत्वा सत्यं साध्वसकौतूहलयोरन्तरे वर्ते ।

---

(श) मान्मथं मन्मथस्य इदं मदनसम्बन्धीत्यर्थः ।

(ष) स्फूर्जदिति । अयं स्वेच्छया चण्डः भीषणः रुद्रस्य कोदण्ड-दण्डः धनुः स्फूर्जतां स्फुरतां वज्राहतस्य सुरगिरेः सुमेरोः स्वर्ण-चूर्णानां छटाभिः प्रभाभिः तुल्यः उल्लासः प्रकाशः येषां तैः रुचां तेजसां पञ्जरैः समूहैः त्रिभुवनानां भुवनत्रयवासिनां दृशां चक्षुषां दत्ता दौस्थित्येन दुःखेनावस्थानेन मुद्रा सङ्कोचो येन तथोक्तः सन् आशारन्ध्राणि दिगन्तराणि अविरतं पिञ्जराणि पिङ्गलवर्णरञ्जि-तानि रचयति करोति । वृत्तमत्र मन्दाक्रान्ता ।

(स) सौविदल्लेषु कञ्चुकिषु, सौविदल्लाः कञ्चुकिन इत्यमरः ।

(ह) साध्वसकौतूहलयोः साध्वसं भयं कौतूहलम् औत्सुक्यं तयोः । वर्ते तिष्ठामि ।

एका । भट्टिदारिए ! रक्खसोत्ति मा णं परिहव रक्खस-चक्कवट्टी क्खु एसो ( १४ ) ।

सीता । अहिअदरं उव्वेअणिज्जो ( १५ ) ।

द्वितीया । अह किं मन्तेध किं कादुं इध आअदो (१६) ।

प्रथमा । सङ्करसरासणं समारोवइदुं ( १७ ) । (ख)

द्वितीया । णं एव्वं भण भट्टिदारिअं परिणेदुं ( १८ ) ।

प्रथमा । अयि (क) उड्डामरसीले ! कहं पुण असङ्करो अलद्धसङ्करप्पसादो वा इमं चावमारोवइस्सदि ( १९ ) ।

सीता । स्वगतम् । (ख) अम्महे ऊससिदह्मि अणब्भवरिसेणपिअसहीवअणेण ( २० ) ।

---

( १४ ) भर्तृदारिके ! राक्षस इति मैनं परिभव राक्षसचक्रवर्ती खल्वेषः ।

( १५ ) अधिकतरमुद्वेजनीयः ।

( १६ ) अथ किं मन्त्रयथः किं कर्तुमिहागतः ।

( १७ ) शङ्करशरासनं समारोपयितुम् ।

( १८ ) नन्वेवं भण भर्तृदारिकां परिणेतुम् ।

(१९) अयि उड्डामरशीले ! कथं पुनरशङ्करोऽलब्धशङ्करप्रसादो वेमं चापमारोपयिष्यति ।

( २० ) अहो उच्छ्वसितास्मि अनभ्रवर्षेण प्रियसखीवचनेन ।

---

( ख ) समारोपयितुं अध्यया सज्जयितुम् ।

( क ) उड्डामरशीले उत्तरलस्वभावे । अशङ्करः शङ्करादन्यः । अलब्धशङ्करप्रसादः अप्रसादितशङ्कर इत्यर्थः ।

( ख ) उच्छ्वसिता जीविता । अनभ्रवर्षेण विना मेघं जल-वर्षणेन ।

सर्वाः परिक्रामन्ति ।

सीता । पुरो ऽवलोक्य । एक्कासणोववेसिणो कदि उण एदे जणा (२१) ।

सखी । णं एक्को एव्व एसो दसमुहो विंसदिभुअदण्डो अ (२२) ।

सीता । तादसदाणन्दमिस्साणं अन्तरे उववििसस्सम् (२३)

रावणः । सौत्सुक्यमवलोक्य स्वगतम् । अहो ! त्रिभुवनातिशायि मकरध्वजसञ्जीवनं (ग) रामणीयकमस्याः । तथाहि ।

इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणामिव
प्रम्लानारुणिमेव विद्रुमलता श्यामेव हेमद्युतिः ।
पारुष्यं कलया च कोकिलवधूकण्ठेष्विव प्रस्तुतं
सीतायाः पुरतश्च हन्त ! शिखिनां बर्हाः सगर्हा इव ॥४२॥ (घ)

(२१) एकासनोपवेशिनः कति पुनरेते जनाः ।

(२२) नन्वेक एवैष दशमुखो विंशतिभुजदण्डश्च ।

(२३) तातशतानन्दमिश्राणामन्तर उपवेक्ष्यामि ।

---

(ग) मकरध्वजसञ्जीवनं कामोद्दीपनम् ।

(घ) इन्दुरिति । हन्त ! हर्षे सीतायाः पुरतः अग्रतः इन्दुः चन्द्रः अञ्जनेन कज्जलेन लिप्त इव, मुखप्रशस्तिरियं मृगीणां दृष्टिः जडिता सङ्कुचिता इव, नेत्रप्रशस्तिरियम् । विद्रुमलता प्रवालवल्ली प्रम्लानः प्रकर्षेण मालिन्यं गतः अरुणिमा लौहित्यं यस्याः तादृशीव अधरप्रशस्तिरियम् । हेमद्युतिः स्वर्णकान्तिः श्यामेव अङ्गप्रशस्तिरियम् । कोकिलवधूनां कण्ठेषु कलया अंशतः पारुष्यं कार्कश्यं प्रस्तुतमिव वचनप्रशस्तिरियम् । तथा शिखिनां मयूराणां बर्हाः शिखाः सगर्हा इव कुत्सिता इव केशप्रशस्तिरियम् । अत्रोत्-

किंच बहुष्वपि निजेषु कर्मसु विवेक्त्रे (ङ) कर्म किञ्चिदेव रोचते। यतः।

एतां यथा हृदयवर्त्तनमायताक्षीं
संसारसारनिचयेन विधाय वेधाः।
शङ्के दिदेश मदनं परिरक्षितार-
मारात् स मां किरति येन शरैः शिताग्रैः ॥४२॥ (च)

शतानन्दः। पुलस्त्यनन्दन! इदं तद्धनुरियं सा सीता।

रावणः। इदं तद्धनुरयं स रावणः! किं (छ) पुनरसम्भावनागर्भमदृशकण्ठोचितं व्याहरसि। पश्य।

प्रेक्षालङ्कारः तदुक्तं दर्पणे। भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मनेति। शार्दूलविक्रीडितं वृत्तम्।

(ङ) विवेक्त्रे। विवेचकाय।

(च) एतामिति। शङ्के मन्ये वेधाः ब्रह्मा एताम् आयताक्षीं विशालनेत्रां यथा हृदयवर्त्तनं चित्तहारिमनुगुणम् इत्यर्थः संसारसारनिचयेन संसारस्य सृष्टेः सारसङ्घातेन विधाय निर्माय मदनं परिरक्षितारम् एतस्या इति शेषः दिदेश नियुक्तवान्, येन हेतुना स मदनः शिताग्रैः तीक्ष्णमुखैः शरैः आरात् दूरमसामर्थ्यमित्यर्थः। आराद्दूरसमीपयोरित्यमरः। मां किरति अभिवर्षति। अत्र शङ्केपदस्य उत्प्रेक्षावाचकत्वात् उत्प्रेक्षालङ्कारः, तदुक्तं मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः। उत्प्रेक्षावाचका एते इवशब्दोऽपि तादृश इति। वंशस्थविलं वृत्तम्।

(छ) असम्भावनागर्भम् असम्भावनासहितमित्यर्थः। व्याहरसि वदसि व्याहार उक्तिर्लपितमित्यमरः।

साईं हरेण हरवल्लभया च देव्या
हेरम्बषण्मुखवृषप्रमथावकीर्णम् ।
कैलासमुद्धृतवतो दशकन्धरस्य
कैषा जरद्धनुषि दुर्मददोःपरीक्षा ॥ ४४ ॥ (ज)

प्रहस्तः । स्वगतम् । इदं (झ) शिपिविष्टान्यस्माददृष्टगुणारोपणकर्म कार्मुकम् । कथमेतत् । विचिन्त्य पराक्रमपरीक्षायां को वा महादेवोऽपि देवस्य किंच ।

कृतं सुराणां सारेण स्थाणवीयमिदं धनुः ।
किङ्करास्ते च देवस्य सुकरा रोपणक्रिया ॥ ४५ ॥ (ञ)

रावणः । सरोषं धनुरादाय ।

अस्मद्दोर्दण्डचण्डाञ्चननिविडगुणग्रन्थिभुग्नाभग्नास्थिव्यग्रीभावोर्ध्वपृष्ठत (ट) दनणुरणत्कर्मणः कार्मुकस्य ।

---

(ज) साईमिति । हरेण हरवल्लभया पार्वत्या देव्या साईं हेरम्बो गणपतिः, षण्मुखः कार्त्तिकेयः, वृषः हरवाहनं प्रमथाः हरानुचराः तैः अवकीर्णं व्याप्तं कैलासम् उद्धृतवतः उत्तोलितवतः दशकन्धरस्य मम अस्मिन् जरद्धनुषि जीर्णे कोदण्डे का एषा दुर्मदानाम प्रचण्डशीलानां दोष्णां भुजानां परीक्षा ? । वंशस्थविलं वृत्तम् ।

(झ) शिपिविष्टान्यस्मात् शिपिविष्टात् हरात् अन्यस्मात् जनात् अदृष्टं केनापीति भावः गुणारोपणकर्म यस्य तत् ।

(ञ) कृतमिति । सुराणां देवानां सारेण इदं स्थाणवीयं धनुः कृतं निर्मितं ते च देवाः देवस्य महाराजचक्रवर्त्तिनः रावणस्य किङ्कराः दासाः, तस्मात् रोपणक्रिया आरोपणं सुकरा सुसाध्या देवेनेति शेषः ।

(ट) अस्मदिति । अस्माकं दोर्दण्डैः चण्डम् अञ्चनम् आरोपणं यस्य तादृशस्य निविडगुणस्य घनमौर्व्याः यः ग्रन्थिः तेन भुग्नः वक्री-

कल्पान्तोद्भ्रान्तभर्गप्रहतडमरुकोड्डामरध्वानधीर-
ष्टङ्कारस्तारतारस्त्रिदशनिशमितो व्योमरन्ध्रं रुणद्धु ॥४६॥ (ट)

शतानन्दः । अपवार्य (ठ) । अहो ! लङ्कापतेरपूर्वो गर्वगरिमा यन्ममापि शतानन्दस्य न निश्चिनुते चेतः किं भवितेति । दुरारोपमैन्दुशेखरं धनुर्दुर्निवारा रावणभुजदण्डाः ।

जनकः । स्वगतम् । भगवन् ! भर्ग ! (ड) संनिधत्स्व निजे धनुषि यथा जनककुलालङ्करणं भवति मे वत्सा । जितत्रि-जगतापि जामात्रा वयमपत्रपामहे ।

सीता । आत्मगतं सप्रणामम् । अम्ब वसुन्धरे ! पसीद सीदा विसवेदि पढमं मे अन्तरं देहि पच्छा रावणो धनुं आरोविज्जदु ( २४ ) ।

---

(२४) अम्ब वसुन्धरे ! प्रसीद सीता विज्ञापयति प्रथमं मे अन्तरं देहि पश्चाद्रावणो धनुरारोपयतु ।

(ट) यः उभयाग्रिः कोटिद्वयं तस्य व्यग्रभावेन आकर्षणरणात् कोटिद्वयपरस्परयोगेन ऊर्ध्वपृष्ठं स्फुटत् उच्छलत् अनणु अनल्पं रणत्कार-रणरणाध्वनिर्यस्य तथाभूतस्य कार्मुकस्य तारतारः अतिदीर्घः कल्पान्ते प्रलयकाले उद्भ्रान्तः उन्नम्रमना यो भर्गः संहारमूर्त्तिः रुद्रः तेन प्रहतस्य ताडितस्य डमरुकस्य वाद्यभेदस्य उड्डामरः प्रचण्डो यो ध्वानः निस्वनः तद्वत् धीरः गम्भीरः अतएव त्रिदशैः देवैः निशमितः श्रुतः टङ्कारः व्योमरन्ध्रं गगनाभ्यन्तरम् रुणद्धु आवृणोतु ।

(ठ) अपवार्य । परदृष्टस्य अन्यस्य रहस्य कथनमपवारितम् ।

(ड) संनिधत्स्व संनिधेहि सान्निध्यं कुरु इत्यर्थः येन भङ्क्तुं न शक्यते रावणेनेति भावः । अपत्रपामहे अन्येभ्यो लज्जामहे । लज्जा सापत्रपान्यत इत्यमरः ।

सख्यौ । आकाशे भगवं अणङ्ग ! णमो दे मा क्खु रक्खसं उद्दिसिअ सुउमारजणजोग्गं (ढ) पहरणं संधिहिसि (२५) ।

प्रहस्तकः । सर्गर्वम् । हन्त ! न सर्वदा सर्वस्य सदृशो दशापाकः (ण) । यतः ।

वामो बाहुर्मृडान्याः करकलितरणत्कङ्कणालीकरालो
यस्मिन् सव्यश्च शम्भोर्भुजगवलयवान् सख्यमाकर्षेण तत् ।
कैलासोद्धारधीरं दशवदनभुजामण्डलीघन्धबन्ध
रे रे कोदण्डदण्ड ! प्रतिपत तदलं नासि सोढा दृढोऽपि ॥४७॥ (त)

विचिन्त्य । भवतु पातालचरानम्बरचरांश्च सावधानान्विधा-

---

(२५) भगवन्ननङ्ग ! नमस्ते मा खलु राक्षसमुद्दिश्य सुकुमारजन-योग्यं प्रहरणं सन्धास्यसि ।

---

(ढ) प्रहरणं अस्त्रं घोरमस्त्रं सन्धाय रावणं जहीति भावः ।

(ण) दशापाकः अवस्थापरिणामः ।

(त) वाम इति । रे रे कोदण्डदण्ड । यस्मिन् मृडान्याः पार्वत्याः करेण कलिता धृता रणन्ती या कङ्कणाली तया करालः दन्तुरः अलङ्कृत इति यावत् वामो बाहुः, तथा शम्भोः भुजगवलयवान् अहिवलयभूषित इत्यर्थः सव्यः दक्षिणः बाहुरिति शेषः । तेन हरगौरीरूपेणेति भावः । तत् आकर्षणं सख्यं स्थर्येति शेषः । साम्प्रत कैलासस्य कुबेरशैलस्य उद्धारेण उत्तोलनेन धीरं दृढं दशवदनस्य रावणस्य भुजामण्डली भुजसमूह एव बन्धं तदेव बन्धः बन्धनं तत् प्रतिपत प्राप्नुहि, दृढोऽपि अतिकठिनोऽपि त्वं तत् दशमुखभुजबन्धनमित्यर्थः अलं सम्यक् न सोढासि सोढुं शक्ष्यसीत्यर्थः । स्रग्धरावृत्तम् ।

-इये । अधोऽवलोक्य ।

पृथ्वि ! स्थिरा भव भुजङ्गम ! धारयैनां
त्वं कूर्मराज ! तदिदं द्वितयं दधीथाः ।
दिक्कुञ्जराः ! कुरुत तत्त्रितये दिधीर्षां
देवः करोति हरकार्मुकमाततज्यम् ॥ ४८ ॥ ( ध )

ऊर्ध्वमवलोक्य ।

अश्वान् विश्वासयैतान् क्षणमरुण ! कुरु स्वर्गमातङ्गकण्ठं
गाढोरुग्रन्थिमाधोरण ! विबुधगणाः ! कर्णयोर्दत्त हस्तान् !
लङ्केन्द्रोदग्रपाणिप्रणयिभवधनुर्भङ्गजन्मा कठोर-
ष्टङ्कारः स्वर्गरोदःकुहरवलयितस्त्रासकारो न कस्य ? ॥ ४९ ॥ (द)

---

( ध ) पृथ्वीति । देवो दशाननः हरकार्मुकम् आततज्यं करोति ततः, हे पृथ्वि ! स्थिरा भव, मा चञ्चला इति शेषः, भुजङ्गम ! नागराज ! एनां पृथ्वीं धारय, हे कूर्मराज ! त्वं तदिदं द्वितयं, पृथ्वीभुजगयोर्द्वयं दधीथाः धारय, हे दिक्कुञ्जराः ! तत्त्रितये तेषां पृथ्वीभुजङ्गमकूर्माणां त्रये दिधीर्षां धारणेच्छां कुरु। चतुर्थपादवाक्यस्य पादत्रयहेतुत्वेन निर्देशात् काव्यलिङ्गमलङ्कारः । वृत्तमत्र वसन्ततिलकं ज्ञेय वसन्ततिलकं तभजाजगौ ग इति लक्षणात् ।

(द) अश्वानिति । हे अरुण ! सूर्यसारथे ! अश्वान् सौरानिति शेषः । क्षणं विश्वासय, निःशङ्कान् कुरु । आधोरण ! हस्तिपाल ! स्वर्गमातङ्गस्य ऐरावतस्य कण्ठं गाढः उरुः महान् ग्रन्थिर्यस्य तादृशं कुरु । हे विबुधगणाः ! देवाः ! कर्णयोः हस्तान् दत्त । लङ्केन्द्रस्य उदग्रैः पाणिभिः प्रणयि यत् भवधनुः शैवं कार्मुकं तस्य भङ्गेन जन्म यस्य तथाभूतः कठोरः टङ्कारः स्वर्गस्य रोदसः पृथिव्याश्च कुहरे अन्तराले वलयितः मण्डलितः सन् कस्य त्रासकारो भयप्रदो न ? अपि तु सर्वस्यैवेत्यर्थः । अत्र चतुर्थपादवाक्यस्य पादत्रयहेतुत्वेन कीर्त्तनात् काव्यलिङ्गमलङ्कारः । स्रग्धरावृत्तम् ।

रावणः । अहो ! मम दशाननस्याशा यदमीषां स्वावयवानामपि जितगगनचाटुकारः सर्वत्र व्यापारः । तथाहि सम्प्रत्येव तावत् ।

निष्पर्य्यायनिवेशपेशलरसैरन्योन्यनिर्भर्त्सिभि-
र्हस्ताग्रैर्युगपन्निपत्य दशभिर्वामैर्धृतं कार्मुकम् ।
सव्यानां पुनरप्रथीयसि विधावस्मिन् गुणारोपणे
मत्सेवाविदुषामहंप्रथमिका काप्यम्बरे वर्त्तते ॥ ५० ॥ (क)

विचिन्त्य । सजुगुप्सानुतापम् (ख) । अविमृश्यकारिता हि पुंसः परं परिभवस्थानं यत्प्राकृतवदप्राकृतोऽपि रावणः पणेन परिणेतुकामः । तत्सर्वथा किमनेन ।

रुद्राद्रेस्तुलनं स्वकण्ठविपिनच्छेदो हरं वासनं
कारावेश्मनि पुष्पकापहरणं यस्येदृशाः केलयः ।

---

(क) निष्पर्य्यायेति । निष्पर्य्यायः पर्य्यायरहितः यौगपद्यमित्यर्थः, निवेशः आग्रहः, तेन पेशलाः दक्षाः रसाः अनुरागाः येषां तैः अन्योन्यं परस्परं निर्भर्त्सन्तीति निर्भर्त्सयन्तः स्पर्द्धमाना इत्यर्थः, तैः दशभिः वामैः हस्ताग्रैः युगपत् समकालं निपत्य कार्मुकं धृतम् । पुनः सव्यानां दक्षिणानां भुजानाम् अस्मिन् गुणारोपणे विधौ व्यापारे अप्रथीयसि पृथुताम् अगच्छति अपर्याप्ततां गते इति तावत् मत्सेवाविदुषां मम परिचर्य्याभिज्ञानां तेषामिति शेषः अम्बरे आकाशे कापि अनिर्वाच्या अहम्प्रथमिका अहमहमिका अहमग्रे एवं दशाननं सेविष्ये अहमग्रे इत्येवंरूपा इत्यर्थः वर्त्तते ।

(ख) सजुगुप्सानुतापं सावज्ञानुतापमित्यर्थः । अविमृश्यकारिता अविवेकिता परिभवस्थानम् अवमानास्पदम् । प्राकृतवत् नीचवत् ।

(ग) रुद्राद्रेरिति । अस्य मम रुद्राद्रेः कैलासस्य तुलनं

सोऽहं दुर्मदबाहुदण्डसचिवो लङ्केश्वरस्तस्य मे
का श्लाघा घुणजर्जरेण धनुषा कृष्टे न भग्ने न वा ॥ ५१ ॥ (प)

इति सावज्ञं क्षिपति।

सख्यौ। भट्टिदारिए! दिट्ठिआ वड्ढसे सम्मं दे पाणि-
ग्गहणमङ्गलेण मुक्कं रावणेण धणू ( २६ )।

सीता। साश्वासमात्मगतम्। हिअअ! अणुऊलो विअ दे
देवो मम्महो अ ( २७ )।

शतानन्दः। भो लङ्केश्वर! (फ) परममाहेश्वरोऽसि तत्कि-
मिदमसंस्तुतं प्रस्तुतम्।

जनकः। ससंरम्भमुत्थाय ( ब )।

---

( २६ ) भर्तृदारिके! दिष्ट्या वर्धसे सम्यं ते पाणिग्रहणमङ्गलेन मुक्तं रावणेन धनुः।

( २७ ) हृदय! अनुकूल इव ते देवो मन्मथश्च।

---

हस्तैस्त्वरणम्। तस्य कण्ठविपिनस्य कण्ठारण्यस्य छेदः स्वहस्तेन हरप्रीतये कर्त्तनम्। कारावेश्मनि बन्धनशालायां हरेरिन्द्रस्य वासनम् अवस्थापनं तथा पुष्पकस्य देवयानरत्नस्य अपहरणं कुबेरादिति शेषः ईदृशाः एवम्प्रकाराः केलयः क्रीडितानि, मः दुर्मदाः प्रचण्डाः बाहवो दण्डा एव सचिवाः सहाया यस्य तथाभूतः लङ्केश्वर अहम्। तस्य तादृशस्य मे मम घुणैः कीटविशेषैः जर्जरेण अन्तःसारशून्येनेति भावः धनुषा शैवेन कृष्टेन आरोपितज्येन वा भग्नेन किम्?

( फ ) परममाहेश्वरः परमशैवः। असंस्तुतम् अप्रस्तावानुरूप-मित्यर्थः।

( ब ) ससंरम्भं सक्रोधम्।

न ब्रह्मोपनिषन्निषेवणरतिर्मो याज्ञवल्क्यो गुरुः
कोपावेश! न विस्रसा च सहसा शक्नोति रोद्धुं मनः।
दृष्ट्वा शम्भुमहाधनुःपरिभवं पाणिर्जराजर्जर-
स्तेनाभ्युत्सहते ममैष युगपच्चापाय शापाय च ॥५२॥(भ)

(विलोक्य नेपथ्यं प्रति) कः कोऽत्र भोः? । धनुर्धनुः । (प्रविश्य धनुरुपनीय निष्क्रान्तः पुरुषः ।)

जनकः । (म) परिकरं बद्ध्वा टङ्कारयति ।

रावणः । सकोपहासम् ।

हस्तालम्बितमक्षसूत्रवलयं कर्णावतंसीकृतं
स्रस्तं भ्रूयुगमुन्नमय्य रचितं यज्ञोपवीतेन च ।
सन्नद्धा जघने च वल्कलपटी पाणिश्च धत्ते धनु-
र्दृष्टं भो! जनकस्य योगिन इदं दान्तं विरक्तं मनः ॥५३॥(य)

---

(भ) मेति । हे कोपावेश! क्रोधावेग! ब्रह्मणां वेदानाम् उपनिषदां विद्यानां निषेवणरतिः सेवनानुरागः मम: ममेति शेषः रोद्धुं निवारयितुं न, गुरुः याज्ञवल्क्यः न, विस्रसा जरा च न सहसा शक्नोति त्वत्प्रभावमिति शेषः । शम्भोः हरस्य महाधनुषः परिभवं रावणकर्तृकसावज्ञक्षेपणरूपमिति भावः दृष्ट्वा जरया वार्द्धक्येन जर्जरः मम एषः पाणिः तेन क्रोधावेगेन हेतुना युगपत् समकालं चापाय धनुषे, शापाय च धनुर्ग्रहीतुं शापं वा दातुम् अभ्युत्सहते अभिवाञ्छति । शार्दूलविक्रीडितं वृत्तम् ।

(म) परिकरं बद्ध्वा बद्धकटिरित्यर्थः ।

(य) स्रस्तेति । स्रस्तं हस्तात् स्खलितं पश्चात् आलम्बितं धृतम् अक्षसूत्रवलयं जपमालामण्डलं कर्णस्य अवतंसीकृतं भूषणी-कृतं कर्णे मण्डलाकारेण स्थापितं सर्वत्र जनकेनेति सम्बन्धः । स्रस्तं वार्द्धक्यात् अवनतं भ्रूयुगम् उन्नमय्य उत्तोल्य रचितम् । यज्ञोपवीतेन

शतानन्दः । आश्चर्यम् । अहो महाप्रभावो मे याज्यः । अस्य हि ।

वाञ्छानुगौ न जरसा जनकस्य पाणी
सत्यं स एष तपसस्तु परः प्रकर्षः ।
मौर्वी स्वयं यदधिरोहति चापकोटिं
सन्धानकर्मणि शराश्च यदुत्सहन्ते ॥ ५४ ॥ (ल)

सीता । हद्धि ! हद्धि ! तादोवि णाम उवसमेक्कधणो धणुं वावारेदि स एस हुदवहं (व) वरिसिदुकामो मिअङ्कमणी ( २८ ) ।

---

( २८ ) हा धिक् ! हा धिक् ! तातोऽपि नाम उपशमैकधनो धनु र्व्यापारयति स एष हुतवहं वर्षितुकामो मृगाङ्कमणिः ।

---

जघने वल्कलपटी ! वल्कलरूपं वसनं सन्नद्धा बद्धम् । पाणिश्च धनुः धत्ते । भो ! योगिनोऽपि जनकस्य इदं दान्तं मनः विरक्तम् ।

( र ) याज्यः यजमानः ।

( ल ) वाञ्छानुगाविति । जनकस्य पाणी भुजौ जरसा वार्द्धक्येन वाञ्छानुगौ अभिलाषानुरूपकारिणौ न । तथापि मौर्वी चापकोटिं धनुष्कोटिं यत् अधिरोहति, शराश्च सन्धानकर्मणि लक्ष्यनिपातनव्यापारे यत् उत्सहन्ते, स एषः सत्यं निश्चितं तपसः परः परमः प्रकर्षः । वृत्तमत्र वसन्ततिलकम् ।

( व ) तं हुतवहम् अग्निं वर्षितुकामः वर्षणेन निर्वापयितुकामः मृगाङ्कमणिः चन्द्रकान्तमणिः । अत्र चन्द्रकान्तमणेर्हुतवहवर्षणस्य जनकस्य धर्मैकरतेः धनुषा शरपातनमिवेति वाक्ययोः साम्यस्य गम्यमानत्वात् प्रतिवस्तूपमालङ्कारः । तदुक्तं, प्रतिवस्तूपमा सा स्यात्

प्रहस्तकः। आः! क्षत्रियबन्धो! दुराशय! दशाननमुद्दिश्य धनुरारोपयसि नन्वेष ते (ग) पौलस्त्यशस्त्रं चन्द्रहासः शिक्षयिता।

रावणः उच्चैर्विहस्य सोल्लुण्ठम् (घ)।

घुणव्रणमभङ्गुरं पशुपतेः पुराणं धनु-
र्निरीक्ष्य भुजमण्डलीबलमदाद्विकीर्णं मया।
स एष न तितिक्षते समरसीम्नि सीरध्वजः
सखे हसत हे! मुखान्यसममेतदुद्घट्टनम् ॥५५॥ (ङ)

जनकः। पुलस्त्यपुत्र! (च) संवृणु शस्त्रम् एष ते परममाहेश्वरः सीरध्वजो न क्षमते।

---

वाक्ययोर्गम्यसाम्ययोः। एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक् इति।

(ग) पौलस्त्यस्य रावणस्य शस्त्रं चन्द्रहासः असिः।

(घ) सोल्लुण्ठं सपरिहासम्।

(ङ) घुणेति। घुणव्रणं कीटनिष्कुषितमित्यर्थः पशुपतेः पुराणं धनुः अतएव अभङ्गुरं तद्वक्रा भङ्क्तुमनर्हमिति यावत् निरीक्ष्य दृष्ट्वा विविच्य इत्यर्थः भुजमण्डल्याः बलस्य यो मदः दर्पः तस्मात् मया विकीर्णम् अनादरया विक्षिप्तम्। स एष सीरध्वजः जनकः समरसीम्नि संग्रामसीमायां वर्तमानः सन् इति शेषः न तितिक्षते। हे मुखानि! हसतेति शेषः समं हसत, एतेन जनकेन उद्घट्टनं संग्रामावतरणम् असमम् अयोग्यम्। पृथ्वीवृत्तं, जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुरिति लक्षणात्।

(च) संवृणु गृहाण।

रावणः। अहो! सीतापि हा मामार्द्रयति यदहमपि द्व्यङ्गुष्ठ ईदृशानां वचसां सोढा। ससंरम्भम्।

यज्वा जरापरिणतः श्वशुरो भविष्यन्
ब्रह्मैकतानहृदयो गुणवांस्तथेति।
श्रान्तेर्निमित्तमिदमत्र ममैकमेकं
हे पाणयः! किमिति वाञ्छथ चन्द्रहासम् ॥५६॥ (क)

जनकः। रावण! इतो (ख) भव एष प्रहरिष्यसे। नेपथ्ये

जनक! विरम रोषात् त्वं हि संन्यस्तशस्त्रः
कथमयमुपरागस्त्वद्गुरुर्याज्ञवल्क्यः।
परिणतिपरिहीणक्षुद्रराजन्यजन्ये
तदिह शरनिवेशं संवृणु व्रीडिताः स्मः ॥ ५७ ॥ (ग)

(क) यज्वेति। हे पाणयः! भुजाः! यज्वा याज्ञिकः, परिणतः वार्द्धक्यपरीतः, भविष्यन् भावी श्वशुरः, ब्रह्मणि परमात्मनि एकतानम् एकाग्रं हृदयं यस्य तादृशः तथा गुणवान् दाक्षिण्यादिगुणशाली इति एकम् एकं प्रत्येकम् इदं मम श्रान्तेः क्षमायाः निदानं हेतुः। तदत्र किमिति चन्द्रहासम् असिं धर्त्तुमिति शेषः। वाञ्छथ अभिलषथ? वृत्तमत्र वसन्ततिलकम्।

(ख) भव तिष्ठ।

(ग) जनकेति। हे जनक! रोषात् विरम रोषं त्यज इत्यर्थः हि यतः त्वं संन्यस्तानि शस्त्राणि येन तादृशः। कथं किमर्थम् अयं उपरागः? याज्ञवल्क्यः तव गुरुः तच्छिष्यस्य क्रोधोऽनर्थाय इति भावः। परिणतिपरिहीणानाम् अपरिणामदर्शिनामित्यर्थः क्षुद्राणां नीचानां राजन्यानां जन्यं युद्धम्। तस्मात् इह शरनिवेशं शर-निक्षेपाभिनिवेशमित्यर्थः संवृणु संहर त्यज इत्यर्थः। व्रीडिताः लज्जिताः स्मः तव एतादृशं मनःक्षोभं संयमविरहं दृष्ट्वा वयं लज्जामहे

जनकः । बालर्षे शुनःशेफ ! यदात्थ इदमपास्तं शस्त्रम् । तथाकृत्वा ( ग ) तत्रागतानामपराधसत्वायेदं शापोदकमुत्सृजामि इति कमण्डलुमादत्ते ।

शतानन्दः । भगवतो ( घ ) वैकर्त्तनाद् [illegible] निरवधिसीम्नो ब्रह्मतत्त्वोपलम्भस्य तपोराशेः किमयं व्ययः क्रियत इति शापोदकमुपसंहरेति ।

जनकः । भगवन् ! विश्वामित्रधर्मपुत्र ! कुलगुरो ! गौतम !

कृते राक्षसराजेन पिनाकस्य पराभवे ।
जानन्ति युक्तं गुरवो भवद्भिः परवानहम् ॥ ५८ ॥ ( ङ )

रावणः । मिथिलेश्वर ! किमिति ( च ) संरम्भसे । ननु रभसनिर्जितैरावणो रावणः खल्वहम् ।

---

इति भावः । वृत्तमत्र मालिनी न नमयययुतेयं मालिनी भोगि लोकैरिति लक्षणात् ।

( ग ) अपराधसत्वाय राक्षसरहिताय ।

( घ ) वैकर्त्तनात् विकर्त्तनस्य सूर्यस्य अयं वैकर्त्तनः याज्ञवल्क्यः तस्मात् विकर्त्तनार्कमार्त्तण्ड मिहिरारुणपूषण इत्यमरः । निरवधिसीम्नः सीमारहितस्य इत्यर्थः ब्रह्मतत्त्वोपालम्भस्य ब्रह्मणो वेदस्य यत् तत्त्वं तात्पर्यं तस्य उपालम्भः आगमः प्राप्तिरिति यावत् ।

( ङ ) कृते इति । राक्षसराजेन रावणेन पिनाकस्य हरधनुषः पराभवे कृते युक्तं समुचितं यदिति शेषः गुरवो भवन्तः तत् जानन्ति । अहं भवद्भिः परवान् भवतां मते स्थित इति भावः ।

(च) संरम्भसे कुप्यसि । रभसनिर्जितैरावणः रभसेन वेगेन निर्जितः ऐरावणः ऐरावतः येन तथोक्तः ।

अपि कण्ठपरिच्छेदपरितोषितशङ्करे

कुण्ठीभवन्ति सर्वेषामस्त्राणि च तपांसि च ॥५९॥ (छ)

त्वं किल (ज) सब्रह्मश्रेष्ठो ब्रह्मविद्यावरिष्ठ इति च मया श्रूयते।

सखी। अपवार्य हदास! दे वअणं जणअकुलदेवदाओ पडिहणन्तु (२८)।

शतानन्दः। निशाचरचक्रवर्त्तिन्! मा वृथा (झ) विकत्थस्व। चक्रीकृतखण्डपरशुचापदण्डस्य शोभते एष व्याहारो न पुनस्तव।

रावणः। सक्रोधम्। किमिदमाह भवान्। निशाचरचक्रवर्तिन्! मा वृथा विकत्थस्व इत्यादि पूर्वोक्तमनुवदति। विचिन्त्य तत्किमत्र साम्प्रतम्।

परिषदियमृषीणामेष वृद्धो नरेन्द्रः

कथमथ तदमुष्मिन् मैथिलीलालसोऽपि।

निजभुजबलदृप्यद्वीरवीर्ये समाजे

हठहरणविनोदं रावणेन्द्रः करोतु ॥६०॥ (ञ)

---

(२८) हताश: ते वचनं जनककुलदेवता: प्रतिघ्नन्तु।

---

(छ) अपीति। अस्त्राणां परिच्छेदेन खण्डनेन परितोषितः शङ्करो येन तादृशे अपि सर्वेषाम् अस्त्राणि तपांसि च कुण्ठीभवन्ति।

(ज) सब्रह्मश्रेष्ठः ब्राह्मणेन अतिशयगुरुत्वरूपेण श्रेष्ठः मान्यः।

(झ) विकत्थस्व श्लाघस्व। चक्रीकृतखण्डपरशुचापदण्डस्य चक्रीकृतः वक्रीकृतः खण्डपरशोः शिवस्य चापदण्डः धनुर्यष्टिर्येन तादृशस्य जनकस्येति शेषः।

(ञ) परिषदिति। इयम् ऋषीणां परि[illegible] एष वृद्धो नरेन्द्रः

ससंरम्भम्। शृणुत भोः। शृणुत निशाचरपतेः प्रतिज्ञाम्। कुर्वन् मौर्वीनिवेशक्रमनमदटनि स्पष्टटङ्कारशङ्कं शम्भोः कोदण्डदण्डं बधिरितभुवनं भूर्भुवःस्वस्त्रयेऽपि। यस्यामेतां वरीता रसयति तदसृक् चन्द्रहासो ममासिः कण्ठास्थिग्रन्थिशल्कीकरणभवरणत्कारवाचालधारः॥६१॥ (ट)

नेपथ्ये कलकलः।

रावणः। भोः प्रहस्त! (ठ) किमयमकाण्डचण्डो विस्तीर्णजलधरध्वानतानवक्रदेष निर्घोषः।

---

जनकः। अथ भो! अयेति सम्बोधनसूचकमव्ययम्। तत् तस्मात् मैथिलीलालसः जानकीलोलुपः सन् अमुष्मिन् निजभुजबलेन दृप्यत् वीराणां वीर्य्यं दर्शिन् तादृशे समाजेऽपि राक्षसेन्द्रः किं हठहरणविनोदं हठेन बलात् यत् हरणं मैथिल्या इति भावः तेन विनोदं आनन्दम् करोतु। वृत्तमत्र मालिनी।

(ट) कुर्व्वन्निति। भूः पृथ्वी भुवः अन्तरीक्षं स्वः स्वर्गः तेषां त्रयेऽपि त्रिलोक्यामपीत्यर्थः मध्ये यः शम्भोः हरस्य कोदण्डदण्डं धनुर्यष्टिं मौर्व्वीनिवेशस्य ज्यायोजनस्य यः क्रमः तेन नमन्त्यौ अटन्यौ कोटी यस्य तथोक्तं स्पष्टः विशालः टङ्कारशब्दः यस्य तादृशम् अतएव बधिरितभुवनं कुर्व्वन् ताम् एतां मैथिलीं वरीता परिणेष्यति मम चन्द्रहासो नाम असिः कण्ठस्य अस्थ्नां यः ग्रन्थिः तस्य शल्कीकरणात् खण्डनात् भवतीति तथोक्तः यः रणत्कारः रणरणध्वनः तेन वाचाला धारा यस्य तादृशः सन् तस्य असृक् रसयति कार्द्र्वनि। भविष्यत्सामीप्ये लट्।

(ठ) अकाण्डचण्डः अकस्मात् भीषणः। विस्तीर्ण जलधरध्वानतानवक्रदेष विस्तीर्णः विशालः यो जलधरध्वानः मेघगर्जितं तस्य तानवं [illegible] वत् [illegible] प्रोक्तः। [illegible] ति त[illegible]

प्रहस्तकः। देव। (ट) देवमनुपततामस्मद्बलानामेष निर्भरभरितभुवनतलाभोगः कलकलः।

नेपथ्ये वैतालिकः। जय जय त्रिजगत्पते पौलस्त्य! सुखाय (ठ) माध्यन्दिनी सन्ध्या भवतु देवस्य सम्प्रति हि।
शीतं श्रीखण्डकाण्डं निविडयति फणी भोगनालेन लीन-
श्छायाद्रुमस्य मूले रचयति चमरी रम्यरोमन्थलीलाम्।
सेर्ष्यान्तर्मानुषीयं वितरति कमितुर्घर्मितस्याङ्कपालीं
लीलाकस्तूरिकैणी सरति विचयितुं मारणिग्रन्थिपर्णम्॥१७॥ (ण)

---

(ट) अनुपतताम् अनुसरताम्। निर्भरभरितभुवनतलाभोगः निर्भरम् अत्यर्थं भरितः पूरितः भुवनतलस्य आभोगः विस्तारः येन तथाभूतः।

(ठ) माध्यन्दिनी माध्याह्निकी।

(ण) शीतमिति। फणी पन्नगः भोगनालेन भोगः स्वकायः भोगः सुखेऽस्त्र्यादि भृतावहेश्च फणकाययोरित्यमरः। स एव नालं मृणालं तेन लीनः तिरोभूतः सन् शीतं शीतलं श्रीखण्डकाण्डं चन्दनस्कन्धं निविडयति वेष्टयति। चमरी मृगीविशेषः छायाद्रुमस्य छायाप्रधानतरोर्मूले रम्यां रोमन्थलीलाम् उद्गीर्य चर्वणरूपां रचयति आचरति। अन्तः सेर्ष्या कलुषितान्तःकरणा इयं मानुषी खण्डिता नायिका इत्यर्थः ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायितेति आलङ्कारिकाः। घर्मितस्य घीष्मतप्तस्य कमितुः कान्तस्य अङ्कपालीम् उत्सङ्गदेशं वितरति ददाति तादृशी अपि तापशान्तये स्वाङ्के तमङ्कमारोपयतीत्यर्थः। लीलाकस्तूरिका मृगनाभिविलासिनी एणी मृगी मारणेः मरीभेदस्य पन्थिपर्णं [illegible]ात्मकं गन्धद्रव्यभेदं विचयितुं भक्षयितुं सरति गच्छति सर्वत्र माध्यन्दिनतापप्रशमनार्थमिति भावः। स्रग्धरावृत्तम्।

रावणः । तद्वयमपि (त) निसर्गरमणीयेषु मिथिलापुरीपरिसराक्रीडेषु क्रीडाभिर्द्दिवाणि दिनान्यात्मानं विनोदयामस्तदादिश्यन्तां सेनापतयः ।

ताम्बूलीनद्धमुग्धक्रमुकतरुतलप्रस्तरे सानुगाभिः
पायंपायं कलावीकृतकदलदलं नारिकेलीफलाम्भः ।
सेव्यन्तां व्योमयात्राश्रमजलजयिनः सैन्यसीमन्तिनीभि-
र्दात्यूहव्यूहकेलीकलितकुहकुहारावकान्ता वनान्ताः ॥ ६३ ॥ (थ)

इति निष्क्रान्ताः सर्वे ।

प्रतिज्ञापौलस्त्यो नाम प्रथमोऽङ्कः ।

---

(त) निसर्गरमणीयेषु स्वभावरम्येषु मिथिलापुरीपरिसराक्रीडेषु मिथिलापुर्य्याः यः परिसरः आभोगः तस्य आक्रीडेषु उपवनेषु ।

(थ) ताम्बूलीति । सानुगाभिः समहचरीभिः सैन्यसीमन्तिनीभिः सैनिक महिलाभिः ताम्बूलीभिस्ताम्बूललताभिः नद्धः परिवृतः अतएव मुग्धः सुन्दरः । मुग्धः सुन्दरमूढयोरिति कोषः । यः क्रमुकतरूणां गुवाकवृक्षाणां तलप्रस्तरः तलप्रदेशः तस्मिन् कलावीकृतानि पात्रीकृतानि कदलदलानि कदलीपत्राणि यस्य तत् नारिकेलीफलाम्भः नारिकेलोदकं पायं पायं पीत्वा पीत्वा दात्यूहानां कोकिलानां व्यूहः समूहः तस्य केलिकलितः क्रीडोच्चरितः यः कुहकुहारावः कुहकुहुध्वनिरित्यर्थः तेन कान्ता रम्या अतएव व्योमयात्रया अन्तरीक्षगमनेन यत् श्रमजलं घर्मोदकं तज्जयिनः तच्छमयितारः वनान्ता वनभूमयः सेव्यन्ताम् । स्रग्धराछन्दः ।

इति प्रथमोऽङ्कः ।

# अथ द्वितीयोऽङ्कः ।

अतः परं परशुरामराघवीयो भविष्यति ।

ततः प्रविशति भृङ्गिरिटिः ( क ) ।

भृङ्गिरिटिः । सपरिक्रममात्मानं निर्वर्ण्य । अये ! विकृतरूपतापि क्वचिन्महतेऽभ्युदयाय । यतः ।

स्नायुप्रायनिबद्धकीकसतनुं नृत्यन्तमालोक्य मां
चामुण्डाकरतालकुट्टितलयं वृत्ते विवाहोत्सवे ।
ह्रीमुद्रामपनुद्य यद्विहसितं देव्या समं शम्भुना
तेनाद्यापि मयि प्रभुः स जगतामास्ते प्रसादोन्मुखः ॥ १ ॥ (ख)

पुनर्निरूप्य सोपहासम् । अहो ! (ग) त्रिभुवनाधिपतेरनुचरस्य महार्हवेषता ।

---

( क ) भृङ्गिरिटिः शिवानुचरविशेषः । निर्वर्ण्य दृष्ट्वा । विकृतरूपता रूपस्य वैकल्यम् । अभ्युदयाय मङ्गलाय ।

(ख) स्नायुप्रायेति । विवाहोत्सवे पार्वत्या इति शेषः वृत्ते जाते स्नायुप्रायेण प्रायेण स्नायुना शिरया मांसैरल्पादिति भावः निबद्धाः कीकसाः अस्थीनि यस्यास्तादृशी तनुः शरीरं यस्य तथाभूतं प्रायेण अस्थीभूतशरीरमित्यर्थः चामुण्डायाः कालिकायाः करतालेन कुट्टितः कल्पितः लयः नृत्यविरतिर्येन तथाभूतं नृत्यन्तं माम् आलोक्य दृष्ट्वा देव्या पार्वत्या ह्रीमुद्रां लज्जाजनितं सङ्कोचम् अपनुद्य विहाय शम्भुना समं सह यत् विहसितं, तेन अद्यापि स जगतां प्रभुः हरः मयि प्रसादोन्मुखः प्रसन्नः आस्ते वर्त्तते ।

(ग) त्रिभुवनाधिपतेः हरस्य ।

कौपीनमाच्छादनं वल्कमक्षसूत्रं जटासटाः ।
रुद्राक्षास्त्रिपुण्ड्रं च वेषो भृङ्गिरिटेरयम् ॥ २ ॥ (घ)

विचिन्त्य भृङ्गिरिटिस्वामिनो वा कीदृशो वेषविशेषः ।

दिगम्बरो वहति भुजङ्गभूषणं
कपालवान् कलयति दाम कौणपम् ।
वृषप्रियो रचयति भस्मगुण्ठना-
मुमापतेश्चरितमचिन्त्यकारणम् ॥ ३ ॥ (ङ)

(च) यद्वा यस्य लैङ्गोद्भवं भैरवीयं तौम्बुरवमौमापतमार्द्धनारीश्वरमैन्दुशेखरमन्तकान्तकरं कालकूटीयं जम्भारिभुजस्तम्भनं दक्षमखोन्माथि मान्मथं त्रैपुरमन्धकासुरीयमित्यपरमप्यपरिमेयं चित्रं चरित्रजातमाचष्टे । तस्य

---

(घ) कौपीनेति । कौपीनमेव आच्छादनं परिधानम् । वल्कं वल्कलं तरुत्वक् अक्षसूत्रं जपमालिका, जटानां सटा विस्ताराः । रुद्राक्षाः त्रिशूलं त्रिपुण्ड्रं तिलकविशेष अयं भृङ्गिरिटेर्मुनेरिति शेषः वेषः परिच्छदः ।

(ङ) दिगम्बर इति । दिगम्बरः नग्नः सन् भुजङ्गभूषणं वहति । कपालवान् नरशिरोधारी सन् कौणपं शावं दाम मालां कलयति बिभर्त्ति । तथा वृषप्रियः वृषभवाहनः सन् भस्मगुण्ठनां भस्माच्छादनं रचयति । उमापतेः हरस्य चरितम् अचिन्त्यकारणम् अतर्क्यहेतुकं केन हेतुना देवस्य एवंरूपं चरितं न कोऽपि जानातीति भावः । रुचिराष्टत्तं, जभौ जसौ गेति रुचिरा चतुर्ग्रहैरिति लक्षणात् ।

(च) यद्वा अथवा । लैङ्गोद्भवं लिङ्गसम्भूतं भैरवीयं भैरवरूपसम्बन्धि, तौम्बुरवं तुम्बुरुसम्बन्धम् औमापतम् उमापतिनिष्ठम् आर्द्धनारीश्वरं हरगौर्य्यैकरूपाय ऐन्दुशेखरं चन्द्रमौलिकम् अन्तकान्तकरं

भगवतश्चेष्टापरीक्षायां कौ नाम परमेष्ठिवैकुण्ठावपि।
किं पुनर्भृङ्गिरिटिः। तथाहि।

नग्नस्तिष्ठति तं नमन्ति विबुधाः संवीतदिव्यांशुकाः
प्रीतो याति वृषेण वारणगतस्तं वासवः सेवते।
भूषा तस्य नृणां कपालशकलाः स्तोता धनेशः स्वयं
दौर्गत्यस्य परं पदं स भगवान् शम्भुर्विभुत्वस्य च ॥ ४ ॥ (छ)

तत्किमनेन यथादिष्टमनुतिष्ठामि। (परिक्रम्यावलोक्य च।)
अये! नारदः।? (ज) कलहकुतूहली खल्वेष मुनिः यद्वा।

---

गमनदमनं कालकूटीयं हलाहलपानीयं जम्भारिभुजस्तम्भं जम्भो नाम असुरः तस्य अरिरिन्द्रः तस्य भुजस्य वज्रप्रहारार्थमुद्यतस्येति भावः स्तम्भनं निःस्पन्दीकरणं दक्षक्रतोन्माथि दक्षयज्ञविध्वंसनं मान्मथं मदन-भस्मीकरणरूपं त्रैपुरं त्रिपुराणाम् असुरनगरीणां पातनरूपं तथा अन्धकारातीयम् अन्धकासुरवधरूपमित्यर्थः। अपरिमेयम् अपरिच्छेद्यं चरितम् अद्भुतं चरितजातं चरितसमूहम् आचक्षते कीर्त्तयन्ति बुधा इति शेषः चेष्टापरीक्षायां चरित्रविचारे. परमेष्ठिवैकुण्ठौ विरिञ्चिविष्णू अपि कौ नाम. न कौ अपि. न समर्थौ इति भावः।

(छ) नग्न इति। नग्नः दिगम्बरः तिष्ठति असौ प्रभुरिति शेषः। विबुधाः देवास्तु संवीतं परिहितं दिव्यम् अंशुकं वसनं यैः तादृशाः सन्तः तं शम्भुं नमन्ति। प्रीतः सन् वृषेण याति गच्छति, वासवः इन्द्रः वारणगतः ऐरावतस्थः तं सेवते। कपालशकलाः नर-शिरःखण्डाः तस्य भूषणं, स्वयं धनेशः कुबेरः तस्य स्तोता स्तौतीत्यर्थः। तथापि स भगवान् शम्भुः दौर्गत्यस्य दारिद्र्यस्य विभु-त्वस्य वैभवस्य च परं पदम् आस्पदम्। स्वयं दुर्गतः स्थित्वा सेवकान् वैभवशालिनः करोतीति भावः। शार्दूलविक्रीडितं वृत्तम्।

(ज) कलहकुतूहली कलहप्रियः।

लिङ्गोद्भवव्यतिकरे स्वमहत्त्वहेतो-
र्नारायणद्रुहिणयोरुदभूद्विवादः ।
यस्मादयं कलिमुखो मुनिराविरासीत्
तस्मात् कथं नु भवतु प्रियसम्प्रहारः ॥ ५ ॥ (झ)

विचिन्त्य । भवत्वस्मादेव तर्हि (ञ) तयोरुदन्तमुपलप्स्ये इति परिक्रामति । ततः प्रविशति यथा निर्दिष्टो नारदः ।

नारदः । विचिन्त्य सत्यं सत्यमिदं गीयते दुस्त्यजा (ट) प्रकृतिरिति । यतः ।

युयुधे युध्यते को वा योत्स्यते वा मदोद्धतः ।
इति मे व्यग्रमनसः कालोऽभ्येति च याति च ॥६॥ (ठ)

---

(झ) लिङ्गेति । लिङ्गस्य शैवस्य उद्भवव्यतिकरे उदयप्रसङ्गे स्वमहत्त्वहेतोः स्वं स्वं महत्त्वं श्रेष्ठत्वं तस्य हेतोः नारायणद्रुहिणयोः विष्णुब्रह्मणोः विवादः पुरा अहमेव महान् इति नारायणो वदति अहमेव महान् इति ब्रह्मा वदति इत्येवंरूपः उदभूत् । यस्मात् विवादात् अयं कलिः मुखे आरम्भे उद्भवकाले इत्यर्थः अथवा मुखे वदने यस्य स मुनिर्नारदः आविरासीत् अजनि । तत् तस्मात् कलहागमनादित्यर्थः प्रियः सम्प्रहारः विनाशः यस्य अथवा अभिलषित-संग्रामः कथं नु मा भवतु अवश्यमेव भविष्यतीत्यर्थः । वृत्तमत्र वसन्ततिलकम् ।

(ञ) तयोर्जामदग्न्यदशकण्ठयोः । उदन्तं वार्त्ताम् । वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादित्यमरः ।

(ट) प्रकृतिः स्वभावः दुस्त्यजा त्यक्तुमशक्या ।

(ठ) युयुध इति । को जनः मदोद्धतः सन् युयुधे, युध्यते वा योत्स्यते इति इत्थं व्यग्रं मनः यस्य तस्य मम कालः अभ्येति आगच्छति याति गच्छति च ।

अपि च ।

अश्रान्तश्नुतवन्यतन्त्रतुरगाणि क्षपाचरात-
घूर्णत्करीन्द्रमनघपूतनकृत्तानि ।
धावत्कबन्धकटुताण्डवडामराणि
द्रष्टुं रणान्यहरहस्त्रिजगन्नमामि ॥ ७ ॥ (ड)

किञ्च यो यथानुरक्तः स तदन्यतिरस्कारेण तदेव बहु-मन्यते । तथाहि ।

तन्मम ब्रह्म परमं तत्तपः सा क्रतुक्रिया ।
स स्वाध्यायः स च जपो यद्दोर्भ्यां युद्धमुद्धतम् ॥ ८ ॥ (ठ)

येन (ढ) केनचिद्व्यसनिनो जनस्य तदसन्निधाने तत्प्रतिनिधिरपि विनोदाय । तथा चाहम् ।

---

(ड) अश्रान्तेति । अहरहः प्रतिदिनं श्रुतानि च्युतानि वन्यानां तन्त्राणि आन्त्राणि येषां तादृशाः तुरगा अश्वा येषु तानि, क्षपाचराणाम् [illegible] व्रातेन प्रकारेण घूर्णन्तः मोहं गच्छन्तः करिणो हस्तिनो येषु तथोक्तानि, [illegible] पूतनैः पिशाचभेदैः कृत्तानि [illegible] तानि तथा धावताम् इतस्ततः [illegible] कबन्धानाम् अपमूर्धकलेवराणां कटुभिः [illegible] ताण्डवैः नृत्यैः डामराणि भीषणानि रणानि संग्रामान् द्रष्टुं [illegible] जनतां [illegible] त्रिजगत् लोकानि [illegible] सर्वः [illegible] पर्यटामि ।

(ठ) तदिति । यदहम् उद्धतं भीषणं युद्धं प्रीये पश्यामि तत् मम परमं ब्रह्म परमात्मज्ञानं, तत् तपः प्राजापत्याद्यनुष्ठानं सा क्रतोर्यज्ञस्य क्रिया अनुष्ठानं सः स्वाध्यायः वेदाध्ययनं स च जपः मन्त्रोच्चारणव्यापारः ।

(ढ) व्यसनिनः आसक्तस्य तदसन्निधाने तस्य व्यसनस्य असन्निधाने अभावे । विनोदाय सन्तोषाय ।

अलाभे वीरयुद्धस्य नखवादनमस्तु तत् ।
साधत्यककलिं स्त्रीणां पश्यामि च करोमि च ॥९॥ (त)

किञ्च ।

लावकतित्तिरिकुक्कुटमेषैर्महिषैश्च वा रणक्रीडाः ।
दृष्टिपथाच्युतकलिकौतुकाः प्रीत्यै नारदस्य मुनेः ॥१०॥ (थ)

अपि च ।

वीराणां शस्त्रसंस्फोटे करिणां दन्तघट्टने ।
व्याघ्राणां नखनिर्भेदे नारदः परितुष्यति ॥ ११ ॥ ( द )

आत्मानं निर्दिशन् । अपि च ।

यन्नारीतनुरच्युतः स भगवान् कन्दर्पदर्पापहो
यच्चाभूद्गिरिशः पतिश्च मरुतां यत्पीनपुष्पायुधः ।
सौम्यं यच्च विमुच्य रूपमभवच्चण्डी हिमाद्रेः सुता
तत्सर्वं मम नारदस्य ललितं युद्धैककौतूहलैः ॥१२॥ (ध)

---

( त ) अलाभे इति । वीराणां युद्धस्य अलाभे अप्राप्तौ नख-वादनेन नखेन नखस्य ताडनेन इत्यर्थः तत्कृतं स्त्रीणां नारीणां साधत्यककलिं साधत्यकलहं पश्यामि च करोमि च ।

( थ ) लावकेति । लावकाः पक्षिविशेषाः तित्तिरयः पक्षि-भेदाः कुक्कुटाः मेषाश्च प्रसिद्धाः तैः महिषैश्च वा रणक्रीडाः संग्राम-केलिव्यापाराः, ताः दृष्टिपथाच्युतकलिकौतुकैः मम विशुद्धिमाहृतवतः मुनेः नारदस्य प्रीत्यै भवन्तीति शेषः ।

( द ) वीराणामिति । वीराणां योधानां शस्त्रसंस्फोटे शस्त्र-प्रहारे करिणां हस्तिनां दन्तघट्टने दन्ताग्राणां प्रहरणे तथा व्याघ्राणां नखनिर्भेदे नखैर्विदारणे नारदः परितुष्यति ।

( ध ) यदिति । स भगवान् अच्युतः नारायणः यत् नारीतनुः असुराणां मोहनाय स्त्रीरूपधारिणीमूर्त्तिः, गिरिशः हरः यत्

सम्प्रत्येवोपस्थितामिव मनोरथसिद्धिं पश्यामि यदा-वेदितमेतस्य न त्रयीविद्याभिज्ञेन माठरेण यथा याचित-परशुं द्रुतमेवमाधूतधूर्जटिधनुषं चाभियोक्तुं मिथिला-पुरीं प्रस्थितो राम इति । विचिन्त्य । तदहमपि तत्र गत्वा तयोरमर्षवृद्धिविधिना मनोरथानामप्यपथं समरसम्भार-मालोकयामि । इति परिक्रामति ।

भृङ्गिरिटिः । वेगात् कतिचित्पदानि गत्वा । स्वागतं देवर्षेर्ना-रदस्य ।

नारदः । कथं महादेवानुचरो भृङ्गिरिटिः । उपसृत्य स्वस्ति भृङ्गिरिटये । क्व पुनः प्रस्थीयते ? ।

भृङ्गिरिटिः । यत्र वीरवर्गवरिष्ठौ जामदग्न्यदशकण्ठौ ।

---

न्दर्पस्य कामस्य दर्पापहः मनोभवद्वेषादिति भावः, अहनां देवा ग तिच यस्य फेनपुञ्जायुधः वज्रायुधः अभूत् । तथा यस्यै नगे ोक्यं शोभनं रूपं विद्यते यद् हिमाद्रेः सुता पार्वती अभवत्, तत वें युद्धे एका केवला लीलारुचिः लीलया रुचिः अनुरागो यस्य ाङ्गस्य नारदस्य मम चरितं चेष्टितं मम चेष्टयैव तत् सर्वमभवदि-र्थः । शार्दूलविक्रीडितं वृत्तम् ।

( च ) एतस्य जामदग्न्यस्य । त्रयीविद्याभिज्ञेन त्रयीविद्या ऋग्-यजुःसम्बन्धिनी विद्या तत्र भिज्ञः प्राज्ञः तेन माठरेण तदाख्येन चरेण । याचितः परशुः येन तम् परशुरामात् परशुप्रार्थयितार-मर्थः । तथा आधूतं कम्पितं भिन्नं धूर्जटेः धनुः येन तम् । अभियोक्तुम् आक्रमितुम् । तयोर्जामदग्न्यदशग्रीवयोः अमर्षस्य क्रोधस्य वृद्धिविधिना वृद्धिं सम्पादनेन । अपथम् अगोचरं समरसम्भारं ाङ्ग्रामायासम् ।

नारदः । (प) प्रमथप्रथम ! साधु कारितोऽसि तत् कथय कः पुनर्जामदग्न्यदशग्रीवयोर्वीरव्रतचर्य (फ) प्रकृष्यते ।

भृङ्गिरिटिः । देवर्षे ! महदन्तरं (ब) रामरावणयो र्वीरव्रतचर्यां प्रति पश्य ।

त्रिःसप्ताद्यधि बाधिता क्षितिभुजामाजन्मवैश्वानरः
कर्त्ता मातृवधैनसः स सकलस्तुत्यर्थवीथीगुरुः ।
विश्वस्याय भुवः क्रती वितरिता श्यामाकमुष्टिम्पचो
रामः सोमसुदप्रमेयमहिमा कासां गिरां गोचरः ? ॥१३॥

---

(प) प्रमथप्रथम ! प्रमथानां हरानुचराणां प्रथमः श्रे तत्सम्बुद्धौ ।

(फ) प्रकृष्यते प्रकृष्टः गण्यते ।

(ब) रामरावणयोः जामदग्न्यदशग्रीवयोः ।

(भ) त्रिरिति । त्रिःसप्ताद्यधि एकविंशतिवारं क्षितिभुजां र बाधिता निहन्ता अथच आजन्मवैश्वानरः यावज्जीवतापसः मातृव नसः जननीवधजनितस्य पापस्य कर्त्ता कारकः पितुराज्ञया मातृव कारीत्यर्थः तथा च सकलाः समस्ताः स्तुतीनां या अर्थवीथ्यः अर्थाव तासां गुरुः उपदेष्टा, कृती यज्ञे कृतार्त्विज्याः सर्वेभ्यः पृथिव्याश्च वितरिता दाता तत्प्रदायीति भावः । अथच श्यामाक धान्यविशेषस्य मुष्टिं पचतीति तथोक्तः निःस्पृह इति भ सोमसुत् सोमं रसविशेषं सुनोति यज्ञेषु देवप्रीत्यर्थम् आहरती तथोक्तः अतएव अप्रमेयः प्रमातुमशक्यः महिमा यस्य तथाभूतः रा कासां गिरां वाचां गोचरः ? कीदृशैः वाक्यैः कीर्त्यते ? न कैरपीत्यर्थः माहात्म्यमनिर्वचनीयमिति भावः ।

नारदः । चन्द्रशेखरसखे ! न रावणोऽपि वीरव्रतचर्यां प्रति (म) केनाप्यतिसन्धीयते । यतः ।

आसीदस्ति भविष्यति क्वचिदपि त्रैलोक्यमालोक्यतां
यद्येतस्य दशाननस्य सदृशो दिव्या हि यूयं दृशः ।
तुभ्यं कृत्तशिरःस्रुवः कृतनुतेः स्तोकां त्रिलोकीप्रदो
यस्मात् सोऽपि वरप्रदानसमये देवः शिवो लज्जितः॥१४॥ (य)

अङ्गिरिटिः । देवर्षे ! नारद ! (र) यथा समर्थयसे । तथाहि ।

एकः कैलासमद्रिं करगतमकरोच्चिच्छिदे क्रौञ्चमन्यो
लङ्कामेकः कुबेरादहृत दशतये कोङ्कणानामतोऽन्यः ।
एकः शक्रस्य जेता रणमिति भगवतः कार्त्तवीर्यस्य चान्य-
स्तत् कामं कर्मसाम्यात् किमपरमनयोर्मध्यगा वीरलक्ष्मीः ॥१५॥ (ल)

(म) अतिसन्धीयते प्रतार्यते पराजीयते इत्यर्थः ।

(य) आसीदिति । एतस्य दशाननस्य सदृशः पुरुषः कश्चित् अपि आसीत् अस्ति वा भविष्यति त्रीणि भुवनानि त्रैलोक्यं त्रिभुवनम् आलोक्यतां दृश्यतां हि यतः युष्माकं दृशः चक्षूंषि दिव्याः दिव्यचक्षुषा सर्वदर्शिनो यूयमिति भावः । यस्मात् सोऽपि देवः शिवः कृत्तशिरःस्रुवः समस्तशिरश्छेदकर्तिनः कृता नुतिः स्तुतिर्येन तादृशस्य स्तुवतः क्रमेण स्वशिरांसि जुह्वतः अस्य दशाननस्य वरप्रदानसमये स्तोकां क्षुद्रां त्रिलोकीं प्रददातीति तथोक्तः सन् तुल्यं सर्वं यदावश्यकदानात् इत्यर्थः लज्जितः । यदस्मा एतस्य तपोऽनुरूपा त्रिलोकी न तत्-वचनस्य निष्क्रयं करवाणीति मन्यमानो लज्जते इति भावः । इदं च शार्दूलविक्रीडितम् ।

(र) समर्थयसे कथयसि तथा इति शेषः ।

(ल) एक इति । एकः अनयोर्जामदग्न्यदशग्रीवयोरिति शेषः । रावणः कैलासम् अद्रिं पर्वतं करगतं हस्तोद्धृतम् अकरोत् । अपरः

नारदः । सहर्षं हस्तमुद्यम्य ।

चित्रं नेत्ररसायनं त्रिदशतासिद्धेर्महामङ्गलं
मोक्षद्वारमपावृतं मम मनःप्रह्लादनाभेषजम् ।
साकं नाकपुरन्ध्रिभिर्नवपतिप्राप्त्युत्सुकाभिः सुराः !
सर्वे पश्यत रामरावणरणं वक्त्येष वो नारदः ॥१६॥ (ब)

भृङ्गिरिटिः । युद्धकल्पे ! मा निर्भरं (ग) संरभस्व । त्वन्मनोरथपरिपन्थी हि देवादेशः । यदेषोऽस्मि स्वचापतिरस्कारमप्यविगणय्य ऋचीकपुलस्त्यसहितस्तयोरन्योन्यमन्युग्रन्थिश्लथीकरणाय प्रेषितः ।

---

रामः क्रौञ्चं पर्वतं चिच्छिदे बिभेद । एकः रावणः वसतये कुबेरात् लङ्काम् अहृत जहार । अन्यः रामः अर्थितः समुद्रात् कोङ्कणान् देशभेदान् । तदुक्तम् अथाभ्यक्तं समारभ्य कोटिदेशस्य मध्यगे । समुद्रप्रान्तदेशो हि कोङ्कणः परिकीर्त्तित इति । एकः रावणः समिति युद्धे भगवतः शक्रस्य इन्द्रस्य जेता, अन्यः रामः कार्त्तवीर्य्यस्य जेता इति शेषः, तस्मात् कर्मसाम्यात् कार्य्यतौल्यात् अनयोरपरं किं वक्तव्यमिति शेषः । वीरलक्ष्मीस्तु कामं सम्यक् मध्यमा मध्यवर्त्तिनी एकमपि परित्यक्तुं न शक्नोतीति भावः । स्रग्धरावृत्तम् ।

(ब) चित्रमिति । हे सुराः ! सर्वे यूयं नवपतिप्राप्तये उत्सुकाभिः नाकपुरन्ध्रिभिः सुरसुन्दरीभिः साकं चित्रम् अद्भुतं नेत्ररसायनं नयनप्रीतिकरं त्रिदशतायाः देवत्वस्य सिद्धेः महामङ्गलम् अपावृतम् उद्घाटितं मोक्षद्वारं मुक्तिमार्गं मम मनसः प्रह्लादनायाः भेषजं औषधं रामरावणयोः रणं युद्धं पश्यत अवलोकयत, एष नारदः वः युष्मान् वक्ति । शार्दूलविक्रीडितं वृत्तम् ।

(ग) संरभस्व उत्सहस्व । त्वन्मनोरथस्य तवाभिलाषस्य परिपन्थी विरोधी । स्वस्य चापस्य भर्त्तुः तिरस्कारम् अवमाननम्

नारदः। (सविषादस्मितम्)। धिक्कष्टमुत्थितश्च (क) कौतुक-कुसुमाङ्कुरो झटिति त्रुटितश्च तदन्तरितं तावदिदं रामरावणीयं युद्धमनयोर्मा गत्वा परं रामरावणीयं योजयिष्यामि सम्पत्स्येतोभयरामीयं वा। (प्रकाशम्)। भूर्भुवःस्वस्तिलवासिभिरप्यनुल्लङ्घनीयो देवादेशः। तदहं ब्रह्मणः सदनं प्रति तावद्यास्यामि।

भृङ्गिरिटिः। अहमपि प्रस्तुतकार्यसिद्धये। इति निष्क्रान्तौ।

शुद्धविष्कम्भकः।

ततः प्रविशति राघवः प्रतीहारी च।

राघवः। (ख) सीतामनुसन्धाय।

तद्वक्त्रं यदि? मुद्रिता शशिकथा तच्चेत् स्मितं का सुधा?
सा दृष्टिर्यदि? हारितं कुवलयैस्ताश्चेद् गिरो? धिङ्मधु।
सा चेत्कान्तिरतन्त्रमेव कनकं किं वा बहु ब्रूमहे
यत् सत्यं पुनरुक्तवस्तुविरसः सर्गक्रमो वेधसः॥ १७॥ (ग)

---

भृङ्गिरिटेश्च पुनःशब्देन सूचितः तयोः रामरावणयोः अन्योन्यस्य परस्परस्य सम्पृक्तैः क्रोधोद्रेकस्य कथोपकथनाय उपगमनाय।

(क) कौतुकस्य कौतूहलरूपस्य तरोः अङ्कुरः। त्रुटितः भग्नश्च। तदन्तरितं तिरोहितं परम् अपरम् रामरावणीयं परशुरामरावणीयं विरसत्व दाशरथिरावणीयं वा उभयरामीयं जामदग्न्यदाशरथिसम्बन्धि योजयिष्यामि विधास्यामीत्यर्थः। देवादेशः देवस्य इन्द्रस्य आदेशः आज्ञा।

(ख) अनुसन्धाय स्मृत्वा।

(ग) तदिति। यदि तत् वक्त्रं वदनं सीतायाः इति सर्वत्र योज्यम्। वर्त्तते इति शेषः तदा शशिकथा मुद्रिता तिरोहिता। कोऽपि शशिनो नाम न करिष्यतीति भावः। चेत् यदि तत् स्मितं

प्रतीहारी । स्वगतम् । कहं अज्जवि सच्चेअ (ज) चित्तभित्ती तं चेअ चित्तअम्म ता गाढमभिणिविठ्ठो दसाणणे कामो ता मण्णे सदमण्णुपक्खवादो एत्थ वित्थरइ । आकाशे । हंहो विसमबाण ! जुत्तमिदं सरिसमिदं जं दाणिं एदावमेत्ते वि

---

१) कथमद्यापि सैव चित्रभित्तिस्तदेव चित्रकर्म तद्गाढमभिनिविष्टो दशानने कामस्तन्मन्ये शतमन्युपक्षपातोऽत्र विस्तार्यते । हंहो विष मबाण ! युक्तमिदं सदृशमिदं यदिदानीमेतावन्मात्रेऽपि दशाननप्रसादे

---

मन्दहसितं तदा सुधा अमृतं का ? तुच्छेति भावः । यदि सा दृष्टि नयनं तदा कुवलयैः नीलोत्पलैः हारितं पराजितम् । चेत् यदि सा गिरः वचांसि, तदा मधु धिक् । चेत् यदि सा कान्तिः, तदा कनक सुवर्णम् एव अतत्त्वम् अप्रधानं निकृष्टं तुच्छमित्यर्थः । बहु किंवा ब्रूमहे वदामः, वेधसः विधातुः सर्गक्रमः सृष्टिपरिपाटी पुनरुक्तेषु वस्तुषु विमुखः पराङ्मुखः तुल्यं वस्तु विधाता न सृजतीति नियम इति यत् तत् सत्यम् । शार्दूलविक्रीडितं वृत्तम् ।

( ज ) चित्रभित्तिः चित्रस्य आलेख्यस्य भित्तिः कुड्यम् । चित्र-कर्म आलेख्यरचनम् । अयं भावः रावणः सीतां दृष्ट्वा तामेव सततं चिन्तयति । अत्र सीता एव चित्रभित्तिः तद्रूपलावण्यादिचिन्तनं चित्रकर्म इति । शतमन्युपक्षपातः शतं मन्यवो यस्य सः शतमन्युरिन्द्रः तस्मिन् पक्षपातः स्नेहः इन्द्रस्नेहात् कामेन दशाननः इन्द्रशत्रुरेवं व्याकुली क्रियते इति भावः । एतावन्मात्रेऽपि दशाननप्रसादे दशाननकर्तृक प्रति एवं प्रसन्नत्वप्राप्तावित्यर्थः । पुरन्दरे महेन्द्रेऽपि पक्षपातः स्नेहः । इक्ष्वाकुजनानां निन्दनीयेन अनेन कामेन अनुभयवेदनत्वेनापि सीतां परित्यज्य केवलं रावणं प्रति पाक्षपात्येन न लज्जते इति भावः । कार्य्यम् एकमिति शेषः कार्य्यान्तरम् अन्यत् कार्य्यम्

दृष्टाणाणप्पमादे ईदिसो दे पुरन्दरपक्खवादो जेण सअल-जणाणिन्दणिज्जेण दूमिणा अणुभयवेज्जणस्सणेणवि ण लज्जीअदि। भोदु कज्जं कज्जन्तरमन्तरेदि ता एव्वं दाव।

प्रकाशम्। देव! (क) मायामओ दुवारदे से चिट्ठदि (३१)।

रावणः। (आकर्ण्य) भो भो मदन! अति हि नाम (ख) दुर्ललितोऽसि यन्मय्यपि प्रहरसि। यदा।

अपि प्रहर्त्ता मम वल्लभोऽसि
मृगाङ्कबन्धो! निखिलामरेषु।
यैर्व्यापृतस्त्वं मयि रावणेऽपि
तैरेव बाणैर्यदि तां प्रति स्याः॥ १८॥ (ग)

प्रतीहारी। पुनरुक्तमभिधत्ते।

ईदृशस्ते पुरन्दरपक्षपातो येन सकलजननिन्दनीयेनानेन अनुभयवेदनत्वेनापि न लज्जते। भवतु कार्य्य कार्य्यान्तरमन्तरयति तदेव तावत् देव। मायामयो द्वारदेशे तिष्ठति।

---

अन्तरयति तिरोदधाति अन्यकार्य्यचिन्तया सीतागतं देवस्य मनः शिथिलं भवतीति भावः।

(क) मायामयः नटाख्यः कश्चित् रावणानुचरः।

(ख) दुर्ललितः दुर्विनीतः।

(ग) अपीति। हे मृगाङ्कबन्धो! चन्द्रसख! मदन! निखिलामरेषु सर्वेषु अमरेषु मध्ये प्रहर्त्तापि त्वं मम वल्लभः प्रियोऽसि, यैः बाणैः त्वं रावणेऽपि मयि व्यापृतः व्यापारवान् प्रहरणशील इत्यर्थः यदि तैरेव तां जानकीं प्रति स्याः भवेः, जानकीमपि प्रहरेरित्यर्थः। उपजातिवृत्तम्।

रावणः । हन्तहन्त ! नैकप्रकारो मदनव्यापारः । (घ)
अतो मम वैदेहीदर्शनतः प्रभृति ।

व्यञ्चत्कुञ्चितमुन्मुखं हसितवत् साकूतमाकेकरं
व्यावृत्तं प्रसरत्प्रसादि मुकुलं सप्रेम कम्प्रं स्थिरम् ।
उद्भ्रु भ्रान्तमपाङ्गवृत्ति विकचं मज्जत्तरङ्गाकुलं
चक्षुः सास्रु च वर्त्तते रसवशादेकैकमन्यक्रियम् ।१८। (ङ)

प्रतीहारी । स्वगतम् । सव्वधा (च)मन्दोदरीमन्दीकिदसिवि-

---

(२२) सर्व्वथा मन्दोदरीमन्दीकृतकोपवह्नेः सीतामया जल्पा-

---

(घ) नैकप्रकारः बहुविधः ।

(ङ) व्यञ्चदिति । एकैकं चक्षुः विंशतेरिति शेषः । रसवशात् राग-वशात् अन्यक्रियं विभिन्नव्यापारं वर्त्तते तथाहि एकं व्यञ्चत् कुञ्चत् । द्वितीयं कुञ्चितं प्रागेव सङ्कोचमाप्तम् । तृतीयम् उन्मुखं सीतां प्रत्यभिमुखम् । चतुर्थं हसितवत् हास्ययुक्तम् । पञ्चमं साकूतं साभिप्रायम् । षष्ठम् आकेकरम् ईषद्वक्रम् सप्तमं व्यावृत्तं पराङ्मुखम् अष्टमं प्रसरत् विकासं गच्छत् । नवमं प्रसादि प्रसन्नं विमलमित्यर्थः । दशमं मुकुलं मुद्रितम् । एकादशं सप्रेम प्रेमपूर्व्वम् । द्वादशं कम्प्रं कम्पनशीलं चञ्चलमित्यर्थः । त्रयोदशं स्थिरं निश्चलम् । चतुर्दशम् उद्भ्रु ऊर्द्ध्वीकृतभ्रु । पञ्चदशं भ्रान्तं घूर्णत् । षोडशं अपाङ्गवृत्ति कटाक्षितम् । सप्तदशं विकचं विकस्वरम् । अष्टादशं मज्जत् अन्तर्लीनमित्यर्थः । ऊनविंशं तरङ्गाकुलं तरलमित्यर्थः । विंशं सास्रु अश्रुयुतम् । शार्दूलविक्रीडितं वृत्तम् ।

(च) मन्दोदरीमन्दीकृतकोपवह्नेः मन्दोदर्य्या मन्दीकृतः खर्व्वीकृतः कोपवह्निः येन तथोक्तस्य । जल्पाः आलापाः । निसर्गदुःसहेन स्वभावादसह्येन वैरित्वादिति भावः । सीतामयं सीतामयम् । परशुरामपार्श्वप्रतिनिवृत्तः परशुरामात् प्रतिनिवृत्तः ।

उवगच्छिओ मे सीदासमआ उवाओ। (विचिन्त्य)। ता जाव विसमदूसहेण मे परसुरामणामग्गहणेण सिढिलेमि सीदावेसं। (प्रकाशम्)। णं विसज्जेमि परसुरामपासपडिणिउत्तो रक्खसीए (१२)।

रावणः। मायामयस्तावच्छीघ्रं प्रविशतु।

(प्रविश्य मायामयः)। देव ! मायामय इतो दृष्टिदानेनानु-ग्राह्यः।

रावणः। अथ याचितपरशुना परशुरामेण किमभिहितमासीत्।

मायामयः। त्रैलोक्यमाणिक्य ! रामोक्तमाकर्णयतु स्वामी।

पौलस्त्यः प्रणयेन याचत इति श्रुत्वा मनो मोदते
देयो नैष हरप्रसादपरशुस्तेनाधिकं ताम्यति।
तद्वाच्यः स दशाननो मम गिरा दत्ता द्विजेभ्यो मही
तुभ्यं ब्रूहि रसातलत्रिदिवयोर्निर्जित्य किं दीयताम्॥२०॥(क)

---

तद्यावत् निसर्गदुःसहेनास्य परशुरामनामग्रहणेन शिथिलयामि सीतावेशम्। ननु विसर्जयामि परशुरामपार्श्वप्रतिनिवृत्तः।

---

(क) पौलस्त्य इति। पौलस्त्यः रावणः प्रणयेन याचते परशु-मिति शेषः। इति श्रुत्वा मनः ममेति शेषः मोदते हृष्यति रावणस्य महाप्रभविष्णुत्वात् याचनं करोतीति भावः। एषः हरप्रसाद-परशुः शिवानुग्रहलब्धः कुठारः न देयः तेन हेतुना अधिकं ताम्यति क्षुभ्यति। तद् तस्मात् स दशाननः मम गिरा वाचा त्वया वाच्यः कथ्यः। यथा मही द्विजेभ्यः दत्ता, ब्रूहि परं, रसातलत्रिदिवयोः

रावणः । कदा नु खलु परशुरामो रसातलत्रिदिवयोर्जेता दाता च संवृत्तः ? । रावणः पुनः प्रतिपन्थीना । ततस्त्वया किमसौ प्रत्युक्तः ।

मायामयः । नक्तञ्चरचक्रवर्त्तिन् ! इदमिदं निवेद्यते ।

देवो यद्यपि ते गुरुः स भगवान् खण्डेन्दुचूडामणिः
क्षौणीमण्डलमेकविंशतिमिदं वारान् जितं यद्यपि ।
द्रष्टव्योऽयमुमेव भार्गववटो ! कण्ठे कुठारं वहन्
पौलस्त्यस्य पुरस्त्वयापि रचितप्रत्यग्रसेवाञ्जलिः ॥ २१ ॥ (ञ)

रावणः । सक्रोधम् । (झ) कथमीदृशमनीदृशोऽभिदधीत ततस्ततः ? ।

मायामयः । तूष्णीं तिष्ठति ।

रावणः । पराभिहितं हि भाषसे तदभिप्रायं निवेदय ।

मायामयः । देव ! (ञ) प्रकृतिमुखरा हि ब्राह्मणजातिर्देवादेश इति निवेद्यते ।

---

पातालस्वर्गयोर्मध्ये किं निर्जित्य तुभ्यं दीयताम् । यदि पातालं वा स्वर्गं कामयसे, तदा तत् निर्जित्य अहं तुभ्यं दास्यामीति भावः । शार्दूलविक्रीडितं वृत्तम् ।

(ञ) देव इति । हे भार्गववटो ! अमुं पश्य ! यद्यपि स भगवान् देवः खण्डेन्दुचूडामणिः इन्दुशेखरः ते तव गुरुः, यद्यपि च एकविंशतिवारान् इदं क्षौणीमण्डलं भूतलं जितं भवतेति शेषः तथापि अमुमेव कुठारं कण्ठे वहन् पौलस्त्यस्य रावणस्य पुरः त्वया रचितः कृतः प्रत्यग्रः अभिनवः सेवाञ्जलिः सेवार्थं करयोर्योगः येन तथाभूतः द्रष्टव्यः भवेति शेषः । शार्दूलविक्रीडितं वृत्तम् ।

(झ) अनीदृशः अनेवंविधः त्वदन्यः जन इत्यर्थः ।

(ञ) प्रकृतिमुखरा स्वभावचपला ।

परशुमिममदेयं याचते युद्धहेतो-

र्गिरिशधनुरभिज्ञं कर्तुमुत्कण्ठते च।

तदिदमभिदधीथास्त्वं प्रवाचं विप्रावं

तव भुजतरुषण्डं मत्कुठारो न सोढा॥ २२॥ (ट)

रावणः। सक्रोधहासम्। नूनं (ठ) भद्रेण प्रकृतिमुखरा ब्राह्मणजातिरिति तदनुभविष्यति क्षुद्रक्षत्रियविजयदुःशिक्षितो मुनिरवलेपस्य फलम्।

माल्यवान्। (ड) अस्त्रामितान्यविक्रमगतीनि जगन्ति चीण्यपि सम्वांसा नितरां हृष्यति ब्रह्मघोर.।

रावणः। कतरदधिष्ठानमस्यास्ते स तं तपस्वी [illegible]।

माल्यवान्। स्वगतम्। (ढ) सर्कोपपर्यायितवाग्यतूर्णामो भवतु न प्राणनिर्यातिऽप्यनुचितवाच्या भर्यादा स्त्याः।

प्रकाशम्।

(ट) परशुमिति। [illegible] युद्धहेतोः याचते प्रार्थयते गिरिशधनुः [illegible] कर्तुम् उत्कण्ठते च। रावण [illegible] मयाव मत्कुठारं [illegible] रावणम् इदम् अभिदधीथाः वदेः मम कुठारः [illegible] न सोढा न सहिष्यते छेत्स्यतीति भावः। [illegible]

(ठ) [illegible] भद्रेण [illegible] क्षुद्रक्षत्रियविजयदुःशिक्षितः [illegible] हतः। [illegible] मर्त्यलोक [illegible]

(ड) [illegible] गिरोऽभिमता [illegible] विक्रमवन्तः [illegible] तेषु [illegible]।

(ढ) सर्कोपपर्यायितः कोपपर्यायितः क्रोधावेगेन वशीकृतः। प्राण-निर्याणे प्राणात्यये।

निःशेषं काश्यपाय क्रतुविधिगुरवे दक्षिणीकृत्य पृथ्वीं
कालैर्ज्योतिःशिखण्डैर्मधुरिपुशयने व्यस्तवान् वारि येभ्यः ।
ताम्बूलानारिकेलीक्रमुकफलिलताराजरम्भावनान्ता-
नम्भोधेर्गर्भभागानधिवसति मुनिर्भार्गवो भर्गशिष्यः ॥२३॥ (ख)

रावणः। तर्हि मिथिलातः सिंहलानुसारेण लङ्कां (ग) साधयतः सविधीभविता।

मायामयः। देव। प्रकृतिरोषणो रेणुकापुत्रस्समागतस्तु नेपथ्ये।

रावणः। तत्प्रियं प्रियं नः। नेपथ्ये।

स एष भृगुपुङ्गवो गिरिशबालशिष्यो मुनिः
परश्वधशिखाग्रशुष्यद्विहुताखिलक्षत्रियः।
उपैति धृतमत्सरो गुरुशरासनन्यक्कृतः
क नाम दशकन्धरो वहतु चन्द्रहासं करे ॥ २४ ॥ (घ)

(ख) निःशेषमिति। भर्गस्य शिवस्य शिष्यः भार्गवो मुनिः आवहन्नः क्रतुविधेरश्वमेधानुष्ठानस्य गुरवे आचार्याय काश्यपाय निःशेषं यथा तथा पृथ्वीं दक्षिणीकृत्य दक्षिणां दत्त्वा ज्योतिःशिखण्डैः तेजः पूर्णैः काण्डैः शरैः मधुरिपुशयने हरिशयनकाले येभ्यः सकाशात् वारि जलं व्यस्तवान् अपसारितवान् एतेषां नारिकेलीनां क्रमुकाणां गुवाकानां फलिलताना नागवल्लीनां राजरम्भानाञ्च वनैः कम्रान् रम्यान् तान् अपसारिततोयान् इत्यर्थः अम्भोधेः समुद्रस्य गर्भभागान् अभ्यन्तरप्रदेशान् अधिवसति। इदानीं पृथिव्यां वासस्य अनौचित्यात् जलापसारणेन समुद्रगर्भे वसतीति भावः। स्रग्धरा छन्दः।

(ग) साधयतः गच्छतः। सविधीभविता भविष्यतीत्यर्थः।

(घ) प्रकृतिरोषणः स्वभावकोपनः रेणुकापुत्रः रेणुका जमदग्निपत्नी तत्पुत्रः परशुरामः। उत्तमेत्रे सम्भावनायाम्।

(ङ) स इति स एषः भृगूणां भार्गवाणां पुङ्गवः श्रेष्ठः गिरि-

रावणः। (ध) अनाकर्णनमभिनीय। अपि न मर्मगर्भमभिधत्से।

मायामयः। सत्यमेतत्।

रावणः। स विनोदयिता मे (न) कन्दर्पकण्डूलभुजदण्डमण्डलम्। नेपथ्ये पुनरुक्तेव।

मायामयः। ननु प्राप्त एवायमसावितः (प) सममहस्तास्फाल्यमानमार्जनामञ्जुमुरजनिनादनिष्यन्दसुन्दरेण रवेण निवेदितनिजागमनो जामदग्न्यः।

ततः प्रविशति करेण शरमान्दोलयन्भृगुनन्दनो जामदग्न्यो माठरश्च।

माठरः। स्वगतम्।

अयमेव महाभागो भुवनपत्ये यदस्य हि।

यदेव ब्रह्म परमं स एव गिरिशो गुरुः ॥ २५ ॥ (फ)

यस्य बालमित्रः भवान्तेवासी परशुरामस्य कुठारस्य निशातरूपे अंशु- मुखलो अस्मौ कुता आकुञ्चिता अभिनिता भयदा भाविता येन तपोनिः मुनिः परशुरामः गुरोर्हरस्य शरासनं कार्मुकं तस्य भङ्क्तुः अभिक्षेपात् धृतमत्सरः जातक्रोधः सन् उपैति आगच्छति। दत्त- मत्सरः रावणः क नाम ? कुत्र खलु वर्तते इति शेषः, करे चन्द्रहासं तदाख्यम् असिं करोतु गृह्णातु। इत्यतत पृच्छी।

(ध) अनाकर्णनं अश्रवणम्। मर्मगर्भं सपरिहासम्।

(न) कन्दर्पकण्डूलभुजमण्डलं कन्दर्पेण कामेन कण्डूलं कण्डूतियुक्तं बाहुदण्डमण्डलम्।

(प) समहस्तेति समेन हस्तेन आस्फाल्यमानः ताड्यमानः मार्जनया शोधनेन मञ्जुः मनोज्ञः यः मुरजः वाद्यभेदः तस्य निनदः निस्वनः तस्य निष्यन्दसुन्दरेण निर्गमनमनोरमेण।

(फ) अयमिति। अयमेव भगवानेव महाभागः महात्मा, यदु

किञ्च (ब) अनाकलितसत्त्वसारसम्भारभीषणरमणीयाकृतयो हि महात्मानः। तथाहि।

वैखानसो मुनिवृषा प्रवरश्च वीर-
श्चित्रं चरित्रमिदमस्य मुदे भिये च।
क्षीराम्बुधेरिव पयः सभुजङ्गराजं
मार्तण्डरूपमिव घर्मपरिप्लुतं च॥ २६॥ (भ)

विचिन्त्य। भवत्वेवं तावत्। प्रकाशम्। भगवन्! भार्गव! (म) किमिदमपाकृतच्यवनादिवचःशृङ्खलाविसंष्ठुलमपक्रममुपक्रान्तम्।

जामदग्न्यः। सकारणमनाकर्ण्य। अहो! मयि महान् खलु

---

यस्मात् अस्य परमं ब्रह्म यदेव, स गिरिशः शिव एव गुरु आचार्य्यः हिशब्दः पादपूरणार्थः। परमात्मनो हरस्य शिष्यत्वात् महाभागत्वमित्यर्थः।

(ब) अनाकलितेति अनाकलितेन केनाप्यपरिमितेन सत्त्वसारयोः उत्साहबलयोः सम्भारेण आतिशय्येन भीषणा रमणीयाश्च आकृतयः येषां तथाभूताः।

(भ) वैखानस इति। अयं मुनिवृषा तापसप्रवरः वैखानसः यावज्जीवब्रह्मपरायणः प्रवरः वीरश्च। अस्य चित्रम् अद्भुतं इदं चरित्रं क्षीराम्बुधेः सभुजङ्गराज पन्नगराजसहितं पयः सलिलमिव घर्मेण परिप्लुतं युक्तञ्च मार्त्तण्डरूपमिव सौरं रूपमिव मुदे आनन्दाय भिये भीतये च लोकानामिति शेषः। वृत्तमत्र वसन्ततिलकम्।

(म) अपाकृतेति। अपाकृतया अगणितया च्यवनादीनां पूर्वपुरुषाणां वचःशृङ्खलया वचनपरम्परया विसंष्ठुलम् असङ्गतम् अपक्रमं क्रमस्य शिष्टाचाररूपनियमस्य अभावः शिष्टाचारराहित्यमित्यर्थः; तम् उपक्रान्तं प्रारब्धम्। पुरा च्यवनादयः परशुरामपूर्वपुरुषाः रामं पुनः

(य) महेश्वरवल्लभायाः प्रसादः। कुतः।

गोदानमङ्गलविधेरनु रेणुका याम्
केशाननर्धयत तातनिवारिताऽपि।
वेणीकृता मम जटापटलस्य हेतो-
स्ते कुन्तलाः स्वयमपास्य भवं भवान्या॥ २७॥ (र)

माठरः। भगवन्! भार्गव! इत्यादि तदेवाभिमतं।

जामदग्न्यः। महाब्राह्मण! किमुच्यते यदनभिज्ञोऽसि (ल) वीरव्रतचर्याक्रमस्य न च विन्दानस्य योगमार्गमनुप्रीतिपदः परब्रह्मानन्दः। पश्यतु भवान्।

---

पुनः जगत् संहर्तुं प्रवृत्त उपलभ्य तस्मात् पापात् निवारयामासुरिति पौराणिकी वार्त्ता।

(य) महेश्वरवल्लभायाः पार्वत्याः।

(र) गोदानेति। गोदानं गावः केशाः दीयन्ते खण्ड्यन्ते यस्मिन् इति दो च छेदे इत्यस्मात् अनट्प्रत्ययः। उपनयनानन्तरं विवाहात् प्राक् क्रियमाणकेशच्छेदनगर्भः संस्कारविशेषः। तदेव मङ्गलं माङ्गलिकं कर्म, तस्य विधेः अनुष्ठानात् अनु परं रेणुका मम माता तातेन पित्रा निवारितापि याम् केशान् अवर्द्धयत वर्द्धयामास, भवान्या पार्वत्या भवं हरम् अपास्य पतिसेवामपि त्यक्त्वा इति भावः। मम जटापटलस्य जटासमूहस्य हेतोः स्वयं ते कुन्तलाः केशाः वेणीकृताः॥ वृत्तमत्र वसन्ततिलकम्।

(ल) वीरव्रतचर्याक्रमस्य वीरव्रतस्य वीराचारस्य या चर्या अनुष्ठानं तस्य क्रमः तस्य कर्मणि षष्ठी अनभिज्ञः अज्ञः। विन्दानस्य जानतः योगमार्गं मुक्तिमार्गविशेषं न च वीरव्रतस्येति शेषः। अनुप्रीतिपदः प्राप्तप्रीतिदायी। वीरव्रतचर्यायां ब्रह्मानन्दसुखमस्तीति भावः।

सैर्ष्यं पश्यति षण्मुखे भगवती कोदण्डशिक्षाश्रमं
धम्मिल्लं विरचय्य चुम्बितवती यं वत्सला मूर्द्धनि ।
सोढा सोऽपि हि भार्गवो गुरुधनुर्निर्भर्त्सनं रावणा-
दित्याकर्ण्य गणैर्वृतः स्मितमुखैरीशोऽपि लज्जिष्यति ॥२८॥ (व)

माठरः । शिष्यस्नेह एव मां मुखरयति । तदाचार्याः प्रमाणम् ।

जामदग्न्यः । स एष भृगुपुङ्गव इत्यादि पठति ।

रावणः । साधु भोः ! साधु सत्यमिन्दुशेखरशिष्योऽसि ।

वीरप्रसूर्जगति भार्गव ! रेणुकैव
या त्वां त्रिलोकतिलकं सुतमभ्यसूत ।
शक्रेभकुम्भतटखण्डनचण्डधारो
येनैष मे न गणितो युधि चन्द्रहासः ॥ २९ ॥ (श)

---

(व) सैर्ष्यमिति । षण्मुखे षडानने स्कन्दे सैर्ष्यं पश्यति अवलोकयति मां प्रतीति शेषः । वत्सला स्नेहवती भगवती पार्वती कोदण्डशिक्षया धनुर्विद्यापर्यालोचनेन श्रमं शिथिलं धम्मिल्लं केशं विरचय्य यं मां मूर्द्धनि चुम्बितवती सोऽपि भार्गवः रावणात् गुरोर्धनुषो निर्भर्त्सनं सोढा इति आकर्ण्य स्मितमुखैः हसद्भिः गणैः प्रमथैः वृतः ईशोऽपि लज्जिष्यते लज्जां प्राप्स्यति ।

(श) वीरप्रसूरिति । हे भार्गव ! जगति रेणुका भवन्माता एव वीरप्रसूः वीरप्रसविनी, या त्रिलोकीतिलकं त्वाम् अभ्यसूत प्रसूतवती । येन युधि शक्रस्य य इभः हस्ती ऐरावत इत्यर्थः तस्य कुम्भावेव तटौ तयोः खण्डने विदारणेन चण्डा तीक्ष्णा धारा यस्य तादृशः मे मम चन्द्रहासः असिः न गणितः तृणीकृत इति भावः । वृत्तम् वसन्ततिलकम् ।

जामदग्न्यः । पुलस्त्यापत्य ! (प) अयमस्माकमाकस्मिकवीरव्रतदायी विफलीकृतकृतान्तक्रोधहासः स ते चन्द्रहासः । येन त्रिपिविष्टपरितुष्टये स्वकण्ठकाण्डमण्डलीं द्विधा कृतवानसि ।

रावणः । आं जामदग्न्य ! स एवैष (स) निसर्गकरालः करवालः येन सा मम भूर्भुवःस्वस्त्रयी पादपीठे लोठिता ।

जामदग्न्यः । लङ्केश्वर ! ईदृश एवायं चन्द्रहासः ।

दृष्टे मुखानामेतस्मिन् कण्ठखण्डनशङ्कया ।
स्वेषां च न परेषां च जायन्ते कम्पसम्पदः ॥ ३० ॥ (ह)

रावणः । भार्गव ! भार्गव ! मामेवं किं कथयसि (च) यदतिक्रान्ते वस्तुनि साक्षिप्रत्ययपरतन्त्रा व्यवहाराः । ततश्च ।

---

(प) आकस्मिकवीरव्रतदायी आकस्मिकम् अतर्कितं वीरव्रतं ददातीति तथोक्तः । विफलीकृतकृतान्तक्रोधहासः विफलीकृतौ कृतान्तस्य यमस्य क्रोधहासौ येन तथोक्तः तन्निर्जयादिति भावः । येन चन्द्रहासेन त्रिपिविष्टस्य हरस्य परितुष्टये । स्वस्य कण्ठा एव काण्डाः दण्डास्तेषां मण्डलीम् ।

(स) निसर्गकरालः स्वभावभीषणः । करवालः असिः ।

(ह) दृष्टे इति । एतस्मिन् करवाले दृष्टे कण्ठखण्डनशङ्कया शिरश्छेदनभयेन स्वेषां मुखानामिव न परेषाञ्च अन्येषां शत्रूणां मुखानां कम्पसम्पदः कम्पोदयाः जायन्ते । स्वकीयान्यपि एव कम्पन्ते, न परेषाम् कम्पन्ते एव इत्यर्थः ।

(च) अतिक्रान्ते गते वस्तुनि विषये साक्षिप्रत्ययस्य परतन्त्राः पराधीनाः व्यवहाराः आचाराः अतीतं यत् साक्षिभिः प्रकाश्यते इति भावः ।

आस्कन्धावधि कण्ठकाण्डविपिने द्राक् चन्द्रहासासिना
छेत्तुं प्रक्रमिते मयैव टमिति त्रुट्यच्छिरःसन्ततौ ।
अस्मेरं गलिताश्रु गद्गदपदं भुग्नभ्रु वा यद्भू-
दस्मिन्नेकमपि स्वयं स भगवांस्तस्मै प्रमाणं शिवः ॥३१॥ (क)

जामदग्न्यः । आत्मवधः खलु प्रथमः पातकेषु । अनेनापि विकत्थसे इत्यहो ! ते श्रुतिषु वैचक्षण्यं यदित्थमध्यगीष्महि । (ख)

असूर्य्या इति ते लोका अन्धेन तमसा वृताः ।
तांस्ते मृत्वाभिगच्छन्ति ये के चात्महनो जनाः ॥३२॥ (ग)

---

(क) आस्कन्धेति । मया एव स्वयमित्यर्थः द्राक् झटिति आस्कन्धावधि स्कन्धात् अवधेः सीम्न आ इति आस्कन्धावधि स्कन्धपर्य्यन्तमित्यर्थः टम् इति त्रुट्यन्ती शिरःसन्ततिः शिरःसमूहो यस्य तथाभूते कण्ठकाण्डविपिने कण्ठरूपस्तम्भकाण्डवने छेत्तुं प्रक्रमिते प्रारब्धे सति तस्मिन् छिद्यमानेषु मध्ये एकमपि शिर इति शेषः यदि अस्मेरं हास्यविमुखं गलिताश्रु अश्रुपूर्णं गद्गदपदं कातर्य्यात् अस्पष्टाक्षरोच्चारितमुपनिहतं वा भग्ना भ्रूर्यस्य तादृशम् अभूत्, तत् तदा तस्मै सः भगवान् शिवः स्वयं प्रमाणं साक्षीत्यर्थः । उत्साहातिशयात् न कस्यापि शिरसः व्याकुलताभाव इति भावः । शार्दूलविक्रीडितं वृत्तम् ।

(ख) पातकेषु पतन्ति एभ्यः पातकानि पापानि तेषु मध्ये प्रथमः श्रेष्ठः । विकत्थसे श्लाघसे । श्रुतिषु वेदेषु शास्त्रेषु वा वैचक्षण्यं पाण्डित्यम् अध्यगीष्महि अधीतवन्तः वयमिति शेषः ।

(ग) असूर्य्या इति । ये के च जनाः आत्महनः आत्मघातिनः ते मृत्वा तान् लोकान् अभिगच्छन्ति प्राप्नुवन्ति । कानित्याह—असूर्य्या इति सूर्य्यादिरहितान् इत्यादिरिति भावः अतएव अन्धेन निबिडेन तमसा अन्धकारेण वृताः आच्छन्नाः, ते प्रसिद्धाः ।

रावणः । आः (च) क्षत्रियापुत्र ! ब्राह्मण इव मीमांसमानस्त्रिवेदीं विप्लावयसि । तदेष ते राजा रावणो दण्डधरः ।

जामदग्न्यः । (विहस्य) अहो (छ) वर्णाश्रमेषु वैशारद्यं राज्ञः । तदिदमध्याप्यसे ।

सकलस्यास्य लोकस्य जातिर्भवति मातृतः ।
ऋषीणां तु श्रुतिदृशां पितृतो धर्मनिर्णयः ॥ २२ ॥ (ज)

रावणः । यदात्थ एवमपि भवतु ।

जामदग्न्यः । किं (झ) पुनरैरम्मदे महसि न दारवीय

(च) क्षत्रियापुत्र ! रेणुकायाः गाधिराजपुत्रीत्वादिति भावः । पुरा गाधिर्नाम कुशिकात्मजः स्वदुहितरं पुत्रीं रेणुकां जमदग्नये भार्गवाय ददौ । स तु ऋषिः स्वस्य श्वशुरस्य च पुत्रार्थं यज्ञमकरोत् । तत्र पायसद्वयम् अभिमन्त्रितम् एकं ब्रह्मतेजोऽन्वितम् अपरं क्षात्रतेजसा सम्भृतम् । ब्रह्मतेजोऽन्वितं रेणुकायाः भक्षणार्थं प्रस्तुतं भ्रान्त्या तन्माता बुभुजे, क्षात्रन्तु रेणुका । ततस्तयोरेका ब्रह्मर्षिं विश्वामित्रमसूत । अपरा क्षात्रतेजःसम्भृतं परशुराममिति पौराणी कथात्रानुसन्धेया । मीमांसमानः तत्त्वं विचारयन् । विप्लावयसि विप्लुतां विध्वस्तामिति यावत् करोषि ।

(छ) वर्णाश्रमेषु वर्णेषु ब्राह्मणादिषु आश्रमेषु ब्रह्मचर्यादिषु च वैशारद्यम् आधिपत्यं वा वैचक्षण्यम् । अध्याप्यसे पाठ्यसे शिक्ष्यसे इत्यर्थः ।

(ज) सकलस्येति । अस्य सकलस्य लोकस्य जातिः मातृतः मातृकुलानुसारेण इत्यर्थः भवति बीजाद् योनिर्गरीयसीति वचनात् । श्रुतिदृशां वेददर्शिनाम् ऋषीणान्तु पितृतः पितृकुलानुसारेण धर्मनिर्णयः धर्मस्य जात्यादि विहितस्य निर्णयः निरूपणम् । यदि चाहं क्षत्रियापुत्रः तथापि पितुर्ब्राह्मणत्वात् ब्राह्मणएवेति भावः ।

(झ) ऐरम्मदे इरया जलेन माद्यति वर्द्धते इति इरम्मदो वैद्युताग्निः

ज्योतिरस्तमयते ? । यतश्च ।

यः पाणिप्रणयात्पवित्रिततनुर्देवेन खट्वाङ्गिना
यः शस्त्रैकगुरुर्गजासुरवधूवैधव्यमुद्राप्रदः ।
तस्मिन् परशौ शितायहुतभुग्ज्वालाच्छटाडामरे
क्षिप्यन्तः सहसा व्रजन्ति विलयं ते चन्द्रहासादयः ॥ २४ ॥ (ज)

रावणः । विहस्य । अयमसौ चन्द्रहासस्य (झ) विलापयिता कुठारो यः खण्डैकभाग इत्यमाङ्गलिकत्वाद्भगवता भर्गेण भवते दत्तः । तत्तपस्यतस्ते महदुपकरणमासीत्त्रिमित्काण्डखण्डनाय ।

वाडवानलो वा । तस्य इदं ऐरम्मदं तस्मिन् मकसि तेजसि दाशरीयं दाहसम्बन्धि ज्योतिः काष्ठानलः इत्यर्थः अस्तमयते अस्तं नाशं अयते गच्छति तिरोहितं भवतीत्यर्थः ।

(ज) य इति । यः देवेन खट्वाङ्गिना हरेण पाणिप्रणयात् पाणिना करेण प्रणयः स्पर्शः तस्मात् पवित्रिता पावीता तनुः शरीरं यस्य तथाक्तः, शस्त्रैकगुरुः शस्त्राणाम् एकः मुख्यः गुरुः महान्, तथा गजासुरस्य वधूना यत् वैधव्यं पतिराहित्यं तदेव मुद्रा लक्षणं तां प्रददातीति तथाभूतः । पुरा देवदेवः शम्भुरनेन कुठारेण गजासुरं निहतवानिति प्रसिद्धिः । तत्र शिताया तीक्ष्णधारा एव हुतभुग्ज्वाला वह्निशिखा तस्याः छटाभिः स्फुरणैः डामरे भीषणे तस्मिन् परशौ कुठारे क्षिप्यन्तः मज्जन्तः ते चन्द्रहासादयः सहसा विलयं व्रजन्ति खण्डिता भवन्तीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ।

(झ) विलापयिता विध्वंसयिता । खण्डैकभागः खण्डः कुठिता सुरशिरश्छेदनेनेति भावः एकभागो यस्य तादृशः अतएव खण्डपरशुरिति शिवपर्य्यायः । अमाङ्गलिकत्वात् अशुभजनकत्वात् खण्डितानां वस्तूनाम् अमङ्गलजनकत्वस्य शास्त्रसिद्धत्वादिति भावः । तपः-

जामदग्न्यः । आं रावण ! स एवायं भगवतो भवानीवल्लभस्य (ञ) प्रसादचिन्तकः परशुर्मदुपकरणं च मे तपस्यतः समित्काष्ठखण्डनाय क्रुध्यतस्तु प्रचण्डदुर्वृत्तदण्डनाय ।

रावणः । जामदग्न्य ! ईदृश एवायं (ट) खण्डपरशुपाणौ परशुरासीत् । आधारनिबन्धनो यदाधेयस्य गुणाध्यारोपः । मुक्ताशुक्तिसम्पुटपीतं हि पश्य पयो ग्रन्थीभवति ।

जामदग्न्यः । निशाचरचक्रवर्त्तिन् ! न (ठ) सार्वत्रिकमिदं सलिलगर्भगतोऽपि गभस्तिमाली दुरालोक एव जामदग्न्यपाणिप्रणयवानपि हरपरशुर्वा दुर्निषेध एव ।

---

करणम् उपक्रियते अनेनेति उपात् कृधातोः करणे अनट् प्रत्ययः । उपकारसाधनमित्यर्थः । समित्काष्ठखण्डनाय, यज्ञकाष्ठखण्डनाय ।

( ञ ) प्रसादचिन्तकः अनुग्रहकारकः । प्रचण्डानां भीषणानां दुर्वृत्तानां दुराचाराणां दण्डनाय ध्वंसनाय ।

( ट ) खण्डपरशुपाणौ खण्डपरशुः शिवः तस्य पाणौ । ईदृशः प्रचण्डदुर्वृत्तदण्डन इत्यर्थः । आधेयस्य आश्रितस्य गुणाध्यारोपः गुणसम्बन्धाध्यासः आधारनिबन्धनः आश्रयहेतुकः आश्रयगुणेनैव आश्रितस्य गुणसम्बन्धं न तु स्वत इति भावः । मुक्ताशुक्तिसम्पुटपीतं मुक्तायाः या शुक्तिः जलजजीवविशेषः तस्याः सम्पुटेन उभयपार्श्वेन पीतं पयः सलिलं ग्रन्थीभवति मुक्तावयवत्वेन परिणमतीति भावः ।

( ठ ) इदम् आधेयस्य आधारनिबन्धनं गुणसम्बन्धमित्यर्थः । गभस्तिमाली रश्मिमाली सूर्य्य इत्यर्थः दुरालोकः दुर्दर्शः । यदि आधारस्यैव प्राबल्यं तदा कथम् आधारे सलिले पतितस्य सूर्य्यस्य आधारगुणः सुखालोकत्वं स्यादिति भावः । दुर्निषेधः दुर्वारः ।

रावणः। ओमिति ब्रूमः। यदि न दुर्निवेधः कथमिव (ड) रेणुकाशिरश्छेदेऽपि स्वच्छन्दः। अपि च रे ब्रह्मबन्धो!।

देवीविलासमुकुरः परशुर्य आसीत्
स्वर्वैरमासुरशिरोमणिशातधारः।
तं रेणुकारुधिरपङ्ककृताङ्कमेनं
दृष्ट्वा न कस्य हृदयं करुणा रुणद्धि॥ १५॥ (ढ)

विचिन्त्य। हंहो नीललोहितशिष्य! नूतनः खल्वेष क्षत्रियधर्मो यत् जननीजनेऽपि (ण) शौर्यपर्यवसायः। तथाप्याद्रियसे। अहो! स्वतन्त्रा लोकयात्रा। यद्वा महता-मपि महापुरुषशुश्रूषा किमपि कामदुघा। यतः।

त्वं जामदग्न्य! जननीवधपातकेन (त)
न ब्रह्मवर्चसवतां सविधेऽभविष्यः।

(ड) रेणुकाशिरश्छेद इति सोत्प्रासोक्तिः। ब्रह्मबन्धो! ब्राह्मणापसद! इत्यर्थः।

(ढ) देवीति। देव्याः पार्वत्याः विलासमुकुरः क्रीडादर्पणं यः परशुः स्वर्वैरमासुरस्य गजासुरस्य शिरोमणौ शाता निशिता धारा यस्य तथोक्तः आसीत्, रेणुकायाः रुधिरपङ्केन कृतः अङ्कः चिह्नं कलङ्को वा यस्य तादृशं तम् एनं परशुं दृष्ट्वा कस्य जनस्य हृदयं करुणा दया न रुणद्धि व्याप्नोति? अपितु सर्वस्यैवेति भावः। वृत्तमत्र वसन्ततिलकम्।

(ण) शौर्यपर्यवसायः वीरत्वप्रकाशः। लोकयात्रा लोकस्थितिः स्वतन्त्रा स्वाधीना, यो यथा इच्छति स तथैव करोतीति स्वेच्छाचारित्वमिति भावः। कामदुघा अभिलषितदोहिनी। महापुरुषसेविनो दुर्जना अपि अभीष्टं साधयन्तीति भावः।

(त) त्वमिति। हे जामदग्न्य! त्वं जननीवधपातकेन ब्रह्मवर्चसवतां

गीर्वाणवन्द्यचरणस्तव चन्द्रमौलि-
राचार्यकं स भगवान् यदि नाकरिष्यत् ॥ २६ ॥

तथाप्येतदभिधीयते।

चापाचार्यस्त्रिपुरविजयी कार्त्तिकेयो विजेयः
शस्त्रव्यस्तः सदनमुदधिर्भूरियं हन्तकारः।
सत्येवैतत् किमु कृतवता रेणुकाकण्ठबाधां
बद्धस्पर्द्धस्तव परशुना लज्जते चन्द्रहासः॥ ३० ॥ (घ)

जामदग्न्यः। कष्टं नाम न लज्जते यतो (ङ) निसर्ग-
निरवग्रहं न जानाति जामदग्न्यम्।

रेवाभोगभ्रमज्जद्विविधवरवधूहस्तयन्त्राश्रिताभिः
क्रीड़न् वारां शताभिः स्वरसि यदकरोदर्जुनः कार्त्तवीर्यः।

---

प्रतिक्षणानां क्षत्रिये संहारे न सम्भविष्यः स्थितिं न अनपायया। यदि गीर्वाणैः देवैः वन्द्यौ चरणौ यस्य तथाभूतः स भगवान् चन्द्रमौलिः तव आचार्यकं गुरुकर्म न अकरिष्यत्। दुर्गतिप्रापत्वेनैव भवान् क्षत्रियजनकण्ठे गच्छ इति भावः। छन्दोऽत्र वसन्ततिलकम्।

(घ) चापाचार्य इति। त्रिपुरविजयी शङ्करः चापाचार्यः धनुर्वेदविद्यायिता कार्त्तिकेयः विजेयः पराजयभाजनं, पुराकिल भगवतो देवाद् धूर्जटेः धनुरुपनिषदम् अधीयानेन भगुनन्दनेन स्कन्दस्य सर्वथा क्रौञ्च गिरिरयम् अतिनिशितविशिखसमूहेन हेलया वप्रपिण्डवत् बिभेद। इति पौराणिकी कथा। शस्त्रव्यस्तः शस्त्रेण व्यस्तः अपसारितः उदधिः समुद्रः सदनं वासभूमिः, इयं भूः पृथ्वी ब्राह्मणाय दत्तेति येन हन्तकारः दर्पनिदानम्। सर्वञ्च तवेति सम्बध्यते। एतदेव सत्यं शुभम्। एतद्गुणायतत्वे न लज्जेति भावः। किमु किन्तु रेणुकायाः कण्ठबाधां कण्ठच्छेदं कृतवता तव परशुना कुठारेण बद्धस्पर्द्धः कृतस्पर्द्धः चन्द्रहासः लज्जते। छन्दोऽत्र मन्दाक्रान्ता।

(ङ) निसर्गनिरवग्रहं निसर्गेण स्वभावेन निरवग्रहम् अप्रति-हतम्।

तद्दोष्णां यत्तु रामो रणभुवि विदधे वेगवल्गत्कुठारः
प्रायः पौलस्त्य ! सा ते श्रवणपरिणतिं नो गता किंवदन्ती॥ ८(ध)

प्रतीहारी। स्वगतम्। एदं तं रक्खसाणं पि रक्खसो अत्थित्ति (३२)।

रावणः। विहस्य। मानुषेण रावणपराजय इत्यहो सुभाषितम्। तं प्रति मार्त्तण्डकिरणत्वं ग्रहुरिति योधनीयो भवति न पुनर्मृषावादादोषेर्योजनीयः। विभाव्य। यद्वा आयुधनिषेध्या रिपवो न सामसाध्याः। कृतानुतापम्। भार्गव ! भार्गव ! मा निरर्गलं पगल्भस्व। न निरस्त्रेषु निशाचरपतिः प्रहरति यदि ते निर्विघ्नो वीरव्रतचरितोत्कर्षः। अतश्च।

(३२) एतत्तत् राक्षसानामपि राक्षसो ऽस्तीति।

(ध) रेवेति। कार्त्तवीर्य्यः कृतवीर्य्यतनयः अर्जुनः रेवायाः नर्मदायाः अम्भसां गर्भे मध्ये मज्जन्तीनाम् अवगाहमानानां विविधानां विचित्राणां वरवधूनां वराङ्गनानां कृतयत्नैः यत्नेकृतः उज्झितामिः मुक्ताभिः वारां जलानां ततामिः लताकारैः विप्रजलैरिति भावः क्रीडन् सन् यत् अकरोत् तदेति शेषः, करोति शेषः। पुरा दिग्विजयी दशग्रीवः कार्त्तवीर्य्यं जेतुं तन्निकटमगात्। तदानीं जलक्रीडास्थितेन तेन दशाननो निर्जित्य कारागारे स्थापित इति पुरावार्त्ता। रामः परशुरामः रणभुवि संग्रामाङ्गने वेगेन वल्गन् चलन् कुठारो यस्य तथाभूतः सन् तस्य कार्त्तवीर्य्यस्य दोष्णां सहस्रभुजानां यत् तु खलु विदधे कृतवान् कुठारेण सहस्रं भुजान् चिच्छेद इति यावत्, हे पौलस्त्य ! पुलस्त्यवंश ! रावण ! सा किंवदन्ती जनश्रुतिः ते तव श्रवणपरिणतिं श्रोत्रपथं

त्रैयम्बकः परशुरेष निसर्गचण्डः
सौपर्णकेतनमिदं धनुरुन्नतं च ।
अस्मिन् द्वये विमृश हि भार्गव ! हेतिमेकां
येनायमृच्छति करं मम चन्द्रहासः ॥ ३८ ॥ ( प )

जामदग्न्यः । किं नाम रामोऽप्येवमुच्यते । वाडवीयमपि ( फ ) ज्योतिरर्णवार्णःपानार्थमभ्यर्थ्यते । किञ्च ।

कैलासाद्रिविटङ्कतः सह सुरैर्दृष्टुं प्रवृत्ते हरौ
मध्यस्थे शशिशेखरे रणविधौ सूनाश्च शिष्यस्य च ।
सार्द्धं येन विनिर्जितो गणचमूचक्रेण हेरम्बिणा
स्कन्दोऽसौ दशकण्ठ ! कुण्ठरभसास्तस्मिन् मयि त्वादृशाः । ( ब )

नो गता प्राय मन्ये प्राय इति अव्यय मन्ये इति क्रियापदं बोध्यम् ।
शार्दूलविक्रीड़ितं वृत्तम् ।

( न ) तं प्रतिहारिणम् । आर्चीके ऋचीकनन्दनस्य जमदग्नेः अपत्यं परशुरामः वृथा निरर्थकैः । आयुधनिरपेक्षा अन्द्रनिवार्य्या । साम्ना मन्त्रिणा न साध्याः न निवार्य्या । निरर्गलं निर्बाधं प्रगल्भस्व स्पर्द्धस्व ।

( प ) त्रैयम्बक इति । हे भार्गव ! एष निसर्गचण्डः स्वभावभीषणः त्रैयम्बकः शैवः परशुः, इदं सौपर्णकेतनं गरुड़ध्वजम् उन्नतञ्च धनुः, अस्मिन् द्वये एतयोः द्वयोर्मध्ये इत्यर्थः एकहेतिम् अस्त्रं विमृश्य गृहाण, येन अयं चन्द्रहासः मम करम् ऋच्छति आश्रयति त्वया अस्त्रे धृते अहम् अस्त्रं ग्रहीष्यामीति भावः । वृत्तमत्र वसन्ततिलकम् ।

( फ ) वाड़वीयं वाड़वानलसम्बन्धि । अर्णवार्णसां सागराम्बुनां पानार्थम् अभ्यर्थ्यते प्रार्थ्यते वाड़वानलः सागरसलिलं पिबत्येव का तत्राभ्यर्थना ? इति भावः ।

( ब ) कैलासेति । कैलासाद्रेः विटङ्कतः उपरिप्रदेशात् हरौ

रावणः । विहस्य । (भ) सैषा गुरुप्रदेशा गुरुपुत्रे दक्षिणा तदिदमनुष्ठितं गुरुवद्गुरुपुत्रे वर्त्तितव्यमिव ।

जामदग्न्यः । भवानिव न सर्वः (म) श्रुत्यर्थवीथीविदग्धः । यतस्तवैव गुरुवद्गुरुपुत्रे प्रवृत्तिः ।

वयं पुनरशास्त्रचक्षुषस्तदिदं ब्रूमहे । यथा ।

वन्द्यः पितेव स भवान् नलकूवरस्य
रम्भा स्नुषा धनपतेरिव सा तवापि ।
यत्त्वन्यदत्र हृदयात् न तदेति कण्ठं
दोषस्तथापि यदि तत् स्मृत एष रुद्रः ॥४१॥ (य)

इन्द्रे सुरैः देवैः सह इषु प्रवृत्ते, शशिशेखरे हरे स्वनोः पुत्रस्य स्कन्दस्य शिष्यस्य मम च रणशिरसि मध्यस्थे माध्यस्थ्यमाश्रयति सति येन मया गणचमूचक्रेण प्रमथसैन्यव्यूहेन हेरम्बेण गजाननेन च सार्द्धम् असौ स्कन्दः कार्त्तिकेयः विनिर्जितः जितः, हे दशकण्ठ ! तस्मिन् मयि त्वादृशाः त्वद्विधाः वीराः कुण्ठरभसाः सङ्कुचितवेगाः । स्रग्धरावृत्तं, म्रभ्नैर्यानां त्रयेण त्रिमुनि यतियुता स्रग्धरा कीर्त्तितेयमिति लक्षणात् ।

(भ) सैषेति सोल्लुण्ठनोक्तिः ।

(म) श्रुत्यर्थवीथीविदग्धः श्रुतेः अर्थवीथीषु अर्थावलीषु विदग्धः विचक्षणः । अशास्त्रचक्षुषः शास्त्रचक्षुर्हीनाः शास्त्रज्ञानरहिता इत्यर्थः ।

(य) वन्द्य इति । स शास्त्रज्ञो भवान् नलकूवरस्य कुवेरपुत्रस्य पितेव वन्द्यः पितृव्यत्वादिति भावः । सा रम्भा नलकूवरपत्नी धनपतेः कुवेरस्य इव तवापि स्नुषा पुत्रवधूः भ्रातृपुत्रस्य पुत्रत्वाभिधानादिति भावः । सर्वेषामेकजातानामेकश्चेत् पुत्रवान् भवेत् । सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीदिति भ्रातृपुत्रस्य पुत्रत्वातिदेशात् । यत्तु यत

रावणः । (र) आधेयविक्रमकर्माणो येन केनचिदपवदन्ते । किञ्च ।

हेरम्बडम्बरिणि नन्दिनिनन्दिहेता-
वुद्दामचन्द्रमसि संयति षण्मुखेन ।
मुक्तोऽसि यत् पशुपतिप्रणयानुरोधात्
तेन त्वमेव विजयी विजितः कुमारः ॥ ४२ ॥ (ल)

जामदग्न्यः । (व) किमभेद्यमभ्रसां किमदूष्यं दुर्जनवचसां यतो जामदग्न्यवचांस्यपि विचार्य्यन्ते । पश्य पश्य ।

---

अन्यत् आचरणमिति शेषः तत् हृदयात् कण्ठं न एति अवक्तव्यत्वादिति भावः । तथापि एवमसम्यक् कीर्त्तितेऽपि यदि दोषः स्यादिति शेषः तत् तदा एषः रुद्रः शङ्करः स्मृतः । रुद्रस्मरणस्य पापध्वंसकत्वादिति भावः । वृत्तमत्र वसन्ततिलकम् ।

(र) आधेय विक्रमकर्माणः आधेये आधिजनके मनोव्यथाकरे इत्यर्थः विक्रमकर्मणी येषां ते येषां विक्रमं कर्म च श्रुत्वा लोकाः मानसीं पीड़ामनुभवन्ति इत्यर्थः तादृशाः अपवदन्ते मृषा दोषैः अभिक्षिपन्ति ।

(ल) हेरम्बेति । हेरम्बडम्बरिणि गणेशसन्नाहशालिनि नन्दिनो-नन्दीश्वरस्य निनन्दिः आनन्दातिशयः तस्य हेतौ तथा उद्दामचन्द्रमसि प्रकटयशसि संयति संग्रामे पशुपतिप्रणयानुरोधात् हरस्नेहवशात् षण्मुखेन स्कन्देन यत् मुक्तोऽसि परित्यक्तोऽसि तेन हेतुना त्वमेव विजयी जेता, कुमारः कार्त्तिकेयः विजितः पराजितः । कुमारः स्वयं पराभवं स्वीकुर्वन् पितुरनुरोधात् त्वां रणशिरसि न हतवानिति भावः । वृत्तमत्र वसन्ततिलकम् ।

(व) अभेद्यम् अपाश्यम् । अदूष्यं निर्दोषम् ।

ईशो गुरुर्गिरिसुता जननी किमाभ्या-
मस्तु स एव समरेषु पराङ्मुखस्य।
अद्यापि काण्डचयखण्डितचन्द्रकायः
साक्षी शिखण्डनिवहो गुहवाहनस्य ॥ ४३ ॥ (अ)

रावणः। कस्य पुनः (ब) प्रत्यक्षपराङ्मुखस्य मतिमतः मतोऽनुमाने बहुमानः। ततश्च तदेवाभिधीयसे त्रैयम्बकः परशुः इत्यादि पुनः पठति।

जामदग्न्यः। निशाचरचक्रवर्त्तिन्! अपकुर्वतापि भवता परमुपकृत यदेष स्मारितोऽस्मि। ततश्च।

येन न्यक्कृतमिन्दुशेखरधनुर्दर्पादनादृत्य मां
खर्वेन्दोभिरसूयितः स बलवान् पौलस्त्य! कस्ते करः।
द्राक् छित्त्वा मणिबन्धनाद्वलयिनं रामः कुठारेण तं
देव्याः कोपविभिन्नसास्वशशिनि स्वं धाम सन्धास्यति ॥४४॥ (स)

---

(अ) ईश इति। ईशः शङ्करः गुरुः पिता, गिरिसुता पार्वती जननी माता, आभ्यां मातापितृभ्यां किम्? न किमपि प्रयोजनमित्यर्थः। समरेषु पराङ्मुखस्य गुहवाहनस्य मयूरस्य काण्डचयेन शरसङ्घातेन खण्डितः चन्द्रकायः मेचकप्रान्तभागः यस्य तथोक्तः स एव शिखण्डनिवहः पुच्छसङ्घः एव अद्यापि सम्यक् निरन्तरं साक्षी।

(ब) प्रत्यक्षपराङ्मुखस्य प्रत्यक्षे विषये पराङ्मुखः विमुखः तस्य प्रत्यक्षमगच्छत इति भावः।

(स) येनेति। हे पौलस्त्य! येन करेण दर्पात् माम् अनादृत्य अगणयित्वा इन्दुशेखरस्य धनुः न्यक्कृतम् अवज्ञातं खर्वेन्दोभिः सुरनारीभिः असूयितः असूयां गमितः ईर्ष्यया निरीक्षित इत्यर्थः बलवान् ते तव सः करः कः? रामः तं वलयिनं कटकभूषितं करं

अथवा एकस्मिन्नपराधिनि सर्वेऽपि सहधर्मचारिणो- (क) ऽपराद्धारः । ततश्च ।

ये हेलोद्धृतचन्द्रचूड़गिरयो ये चन्द्रहासार्थिनः
संग्रामे युगपद्भवन्ति सभयं श्लिष्टाश्च ये रम्भया ।
दोर्दण्डास्त इमे क्षुरप्रपतनच्छिन्नोच्चलत्पाणयो
मत्कोपाद्दिवि नालशेषकमलामासूत्रयन्त्वब्जिनीम् ॥४५॥ (ख)

रावणः । अथ सनाथः प्रमथनाथो भवता (ग) परिग्रा-हकेण । अथ भगवती भवानी च विमाननानतं शिरः समुन्नेष्यति । विचिन्त्य ।

---

कुठारेण मणिबन्धनात् द्राक् झटिति छित्त्वा देव्याः पार्वत्याः व्यास्यशशिनि सुखचन्द्रे कोपयिभिन्नं क्रोधविकृतं धनुःत्वमाननादिति भाव । स्वं निजं स्वाभाविकमित्यर्थः धाम तेजः कान्तिमित्यर्थः सन्धास्यति सङ्गमयिष्यतीत्यर्थः ।

(क) अपराद्धारः अपराधिनः. संसर्गजा दोषगुणा भवन्तीति भावः ।

(ख) ये इति । ये कराः हेलया उद्धृतः चन्द्रचूडगिरिः कैलासो यैः तथोक्ताः ये संग्रामे युगपत् चन्द्रहासार्थिनः चन्द्रहास-खड्गाभिलाषिणः भवन्ति, तथा ये रम्भया नलकुवरभार्यया सभयम् अनालिङ्गने मृत्युर्मे भवेदिति भयेनेत्यर्थः श्लिष्टाः आलिङ्गिताश्च. ते इमे दोर्दण्डाः बाहुयष्टयः मत्कोपात् मम क्रोधेन क्षुरस्य कुठारस्य यत् पतनं पातः तेन छिन्नाः अतएव उच्चलन्तः पाणयः येभ्यः तथाभूताः सन्तः दिवि अन्तरीक्षे नालानि मृणालानि शेषाः येषां तादृशानि कमलानि यस्याः तादृशीम् अब्जिनीं कमलिनीम् आक-लयन्तु स्वसमुक्तं कुर्वन्तु स्वच्छरीरमिति शेषः । शार्दूलविक्रीड़ितं छन्दः ।

(ग) परिग्राहकेण आश्रयेण ।

बन्दीकृतामरपतेर्जितपुष्पकस्य
तस्याट्टहाससमुखराणि मुखानि मेऽद्य ।
तूणीधनुःपरशुवल्कजटाक्षसूत्री
वैश्वानरो भृगुबटुर्यदयं विपक्षः ॥ ४६ ॥ (ख)

जामदग्न्यः । (ग) विरोचनस्नुषाजनपरीक्षितविक्रमस्य क्षोभित एव मादृशेषु (घ) बटुर्नित्यधिक्षेपः । सजुगुप्सम् ।

अपि दशमुख ! कच्चिद्दत्तपातालयात्रः
स्मरसि लयविचित्रं वल्कवाद्यं विधाय ।
यदसि बलिवधूभिः स्मेरनेत्रोत्पलाभि-
र्निजकरतलरङ्गे नर्तितः कौतुकेन ॥ ४७ ॥ (ङ)

(ख) बन्दीकृतेति । बन्दीकृतः कारानिक्षिप्तः अमरपतिः इन्द्रो येन तस्य तथा जितं पुष्पकं कौवेरविमानं येन तथाभूतस्य तस्य मे मम अद्य मुखानि अट्टहाससमुखराणि अट्टहासैः ... मुखराणि वाचालानि जातान्येव मुखेषु नाधिकं ... अद्य यस्मात् अयं तूणी धनुः परशुः वल्कं जटा अक्षसूत्रं कृताक्षमालाः च अस्त्यस्य इति तादृशः वैश्वानरः तापसः भृगुबटुः भार्गवः द्विजाधमः विपक्षः शत्रुः । वसन्ततिलकं वृत्तम् ।

(ग) विरोचनस्नुषाजनपरीक्षितविक्रमस्य विरोचनस्य प्रह्लादसुतस्य बलिपितुः स्नुषाजनैः पुत्रवधूभिः बलिभार्याभिरित्यर्थः परीक्षितः विक्रमो यस्य तथाभूतस्य । पुरा बलिं जिगीषुर्दशाननः पातालमगच्छत् । तत्र तेन निर्जितः कारायां निक्षिप्तः तद्भार्याभिः सकरुणाभिः चेटीकृत्य प्रेषितम् अयं मुक्तः प्रायाणतस्तीर्थादिति पुराण-कथाऽत्रानुसन्धेयम् ।

(घ) अधिक्षेपः तिरस्कारः । सजुगुप्सं सावज्ञम् ।

(ङ) अपीति । हे दशमुख ! त्वं दत्ता पातालयात्रा येन सः

रावणः। सर्वमस्ति यतो न भार्गव इव रावणः करुणात्मनि (च) परित्रातव्ये स्त्रीजनेऽपुरुषः।

जामदग्न्यः। भार्गवो न रावण इव (क) पशावप्यपुरुषः। अपिच किञ्चित् पृच्छामि।

त्वां सङ्क्रन्दननन्दनः किल कपिः कक्षागुहागह्वरे
कृत्वा प्रत्युदधि व्यधत्त स यदा सन्ध्यासमाधिव्रतम्।
शङ्के रावण! बाहुयन्त्रघटनासंरोधमन्दीकृत-
श्वासश्रेणिविसंष्ठुलाननवनो दुःखं तदासीः स्थितः॥४८॥ (ज)

रावणः। सक्रोधहासम्। मुग्धबुद्धयो हि यथाश्रुतस्य ग्रहीतारो न पुनर्विवेक्तारः। अतश्च पश्य पश्य।

पातालजयार्थं तत्र प्रविष्ट इत्यर्थः लयविचित्रं लयेन विच्छित्त्या मनोहरं वक्त्रवाद्यं मुखवाद्यं विधाय कृत्वा स्मेराणि नेत्राम्बुजानि यासां ताभिः बलिवधूभिः कौतुकेन निजकरनगरे यत् नर्त्तितोऽसि तदपि कच्चित् स्मरसि? वृत्तमत्र मालिनी।

(च) परित्रातव्ये परित्राणार्हे। मातृवधादियं मोक्षुरुठनोक्तिरिति बोध्यम्।

(क) पशौ अपि वानरेऽपि वालिनि इति भावः अपुरुषः पुरुषकारवर्जितः।

(ज) त्वामिति। हे रावण! यदा किलेति प्रसिद्धौ संक्रन्दनस्य इन्द्रस्य। संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहन इत्यमरः। नन्दनः तनयः कपिः वाली त्वां कक्षागुहागह्वरे कक्षारूपे गुहामध्ये कृत्वा संस्थाप्य प्रत्युदधि प्रतिसमुद्रं सन्ध्यासमाधिव्रतं सन्ध्यावन्दनाविधिं व्यधत्त कृतवान्, शङ्के मन्ये, तदा तस्मिन् काले त्वं बाहुयन्त्रस्य घटनासंरोधेन चालनाप्रतिरोधेन मन्दीकृताः याः श्वासश्रेणयः निश्वासावल्यः ताभिः विसंष्ठुलं विशेषेण व्याकुलम् आननवनं मुखवन-

अर्द्धं नारी पुमानर्द्धमिति सञ्चिन्त्य चेतसा ।
चण्डीशस्यापि कोदण्डे यस्यावज्ञा न संहृता ॥ ४९ ॥ (झ)
भूर्भुवःस्वस्त्रयीवीरः स एष दशकन्धरः ।
का नाम राम ! तस्यास्था बटौ वा मर्कटेऽपि वा ॥५०॥ (ञ)

जामदग्न्यः । पुलस्त्यापत्य ! यद्वा तद्वा भवतु भार्गवस्तादृशानि तु वीररत्नानि न (ट) जात्या जुगुप्सते । पश्य ।

लोकोत्तरं चरितमर्पयति प्रतिष्ठां
पुंसां कुलं न हि निमित्तमुदात्ततायाः ।
वातापितापनमुनेः कलशात् प्रसूति-
र्लीलायितं पुनरमुद्रसमुद्रपानम् ॥ ५१ ॥ ( ठ )

---

यस्य तथाभूतः सन् दुःखं स्थितः आसीः, दुःखेन स्थितवानित्यर्थः । शार्दूलविक्रीडितं वृत्तम् ।

(झ) अर्द्धमिति । अर्द्धं शरीरार्द्धं नारी, अर्द्धं द्वितीयमिति शेषः पुमान् इति चेतसा संचिन्त्य, यः सम्यक् नारी न, वा पुरुषो न, स निष्पौरुष एव इति विविच्येति भावः चण्डीशस्यापि कोदण्डे कार्मुके यस्य मम अवज्ञा न संहृता न संहृता । यस्येति कर्त्तरि षष्ठी ।

(ञ) भूर्भुवःस्वस्त्रयीवीरः त्रिलोकवीरः एषः दशकन्धरः सः । तस्य मम वटौ ब्राह्मणाधमे वा मर्कटे वानरे वापि का नाम आस्था आदरः, न कापीत्यर्थः त्रिभुवनवीरस्य मम वटुर्वा कपिर्वा किं करिष्यतीति भावः ।

( ट ) जात्या राजस्या इति भावः । जुगुप्सते अवजानाति ।

( ठ ) लोकोत्तरमिति । लोकोत्तरम् अलौकिकं चरितं प्रतिष्ठाम् अर्पयति गमयति पुरुषमिति शेषः कुलम् अन्वयः पुंसां उदात्ततायाः उच्चततायाः न हि निमित्तं कारणम् । वातापेरसुरस्य तापनः शमनः मुनिः अगस्त्यः तस्य कलशात् प्रसूतिः उद्भवः, पुनः किन्तु अमुद्रः सीमावर्जितः यः समुद्रः तस्य पानं लीलायितं विलास-

रावण। अरे दुर्मुखवटो! ड) वैखानसखेट! विडम्बित-त्र्यम्बकाचार्य! स्वहेतिधारातिथीकृतरेणुकामूर्द्धन्! मूर्धाभिषिक्तरुधिरजलनिवापाञ्जलितर्पितपितृक! क्षत्रिया-गर्भपातनमहापातकिन्! एष प्रदर्श्यते दशाननदोर्दण्डमण्डलीसामर्थ्यसारः। ततश्च।

लूत्वा बिसलतालावं कण्ठं ते रेणुकारिपोः।
स एष चन्द्रहासासिः प्रायश्चित्तं चरिष्यति॥ ५२॥ ढ)

यद्वा।

क्वायं मे चन्द्रहासः प्रहृतिशतलिपिन्यस्तजैत्रप्रशस्तिः
स्वर्मातङ्गस्य कुम्भे क्व च कुहक! भवान् ब्राह्मणः शस्त्रवाही

---

चेष्टितम्। विशेषेण सामान्यसमर्थनरूपोऽयमर्थान्तरन्यासः। वृत्तमत्र वसन्ततिलकम्।

(ड) वैखानसखेट! वैखानसेषु तापसेषु खेट अधमः तत्सम्बुद्धौ। विडम्बितत्र्यम्बकाचार्य! विडम्बितः प्रतारितः त्र्यम्बक एव आचार्यो गुरुः येन तथोक्तः तत्सम्बुद्धौ। स्वहेतीति स्वस्य हेतिधारायाः अस्त्र-धारायाः अतिथीकृतः रेणुकायाः स्वजनन्याः मूर्द्धा येन तथाभूतः तत्सम्बुद्धौ। मूर्द्धेति मूर्द्धाभिषिक्तानां राज्ञां रुधिरजलान्येव निवापा-ञ्जलयः पितृदेयाञ्जलिपूर्णद्रव्याणि तैः तर्पिताः तृप्तिं गमिताः पितरो येन तादृशः तत्सम्बुद्धौ। क्षत्रियेति क्षत्रियाणां गर्भपातनेन गर्भस्थ-शिशुहननेन महापातकिन्! महापापपूर्ण!।

(ढ) लूत्वेति। स एषः चन्द्रहासासिः रेणुकायाः रिपोः शत्रुः ते तव कण्ठं बिसलतालावं मृणालदण्डमिवेत्यर्थः लूत्वा छित्त्वा प्रायश्चित्तं मातृवध ज..तस्य पापस्य शुद्धिं करिष्यति।

(ण) क्वायमिति। हे कुहक! प्रतारणशील! स्वर्मातङ्गस्य ऐरावतस्य कुम्भे प्रहृतिशते प्रहारशतेन लिपिन्यस्ता वर्णविन्यस्ता जैत्री जय-

शातेभ्योऽस्मत्करेभ्यो बहिरयमिह यस्त्वत्कनिष्ठाङ्गुलीभूः
प्रारब्धब्रह्मघोषं हरतु न सुभगिका त्वच्छिरः कन्धरातः ॥५१॥(थ)

जामदग्न्यः । अरे रे (त) पुनरुक्ताकार ! दुराचार ! निशाचरचरम ! विरिञ्चिकुलकलङ्क ! लङ्कोपपते ! पातकैकरसिक ! कुबेरवैरिन् ! अभिलषितरम्भापरीरम्भ ! दाशायणीप्रणामपरिहारिन् ! नन्वेष ते हसति दोर्दण्डमण्डली-सामर्थ्यसारः ।

रावणः । विहस्य । स्वसारानुसारेण भार्गवो (थ) दशकण्ठमप्याकलयति । नेपथ्यं प्रति । पुष्पक ! इतइतः ।

प्रविश्य पुष्पकः । अयमहम् ।

रावणः । एष समारुह्यते । रत्नारोहणावरोहणनाटितकाभ्याम् । अहह ! (द) मनाक्किल वीरव्रतसमयमुद्रामतिक्रान्तोऽस्मि ।

सूचिका प्रशस्तिः प्रशंसा यस्य तथाविधः अयमरावान् इत्यर्थः अयं चन्द्रहासः क्व, शस्त्रग्राही ब्राह्मणो भवांश्च क्व । इह शातेभ्यः अस्मत्करेभ्यः बहिः या इयं तत् कनिष्ठाङ्गुलीभूः तेषां शातकराणां मध्ये या कनिष्ठा अङ्गुली तस्यां भवतीति तथोक्ता सुभगिका कन्धरातः ग्रीवाप्रदेशात् प्रारब्धः उच्चारितः ब्रह्मघोषः वेदध्वनिर्येन तादृशं त्वच्छिरः तव मस्तकं हरतु । शार्दूलविक्रीडितं वृत्तम् ।

(त) पुनरुक्ताकार । पुनरुक्तः पुनः पुनः कथितः आकारः स्वरूपं यस्य तथोक्तः तत्सम्बुद्धौ । निशाचरचरम । राक्षसाधम । लङ्कोपपते ! कुबेरस्वामिकत्वात् लङ्काया इति भावः । अभिलषितरम्भापरीरम्भ ! अभिलषितः वाञ्छितः रम्भायाः अप्सरसः परिरम्भः आलिङ्गनं येन तथोक्तः तत्सम्बुद्धौ ।

(थ) आकलयति अधिक्षिपति इत्यर्थः ।

(द) मनाक् ईषत् । वीरव्रतस्य वीराचारस्य यः समयः नियमः

जामदग्न्यः।

वीरव्रतात् जहिहि रावण ! चन्द्रशाला
मा पुष्पकस्य मयि पादचरेऽपि रामे।
पश्यन्त्विमाः समरमप्सरसोऽद्य तावत्
न्यक्पातिभिर्विहितमूर्ध्वचरैश्च बाणैः॥ ५४॥ (ध)

रावणः। (न) अनभ्यस्तचरस्तवैष समरारम्भ इति ममानुकम्पा।

जामदग्न्यः। (प) सोल्लुण्ठम्। पशुपतिनाप्यननुकम्प्यमानमनुकम्पस इत्यहो सकरुणा ते धिषणा। किं पुनरिदमुच्यते।

यथाभ्यासं प्रवर्तन्ते त्वादृशामत्र पत्रिणः।
इहान्तेवासिनस्त्वेते सर्वतोदिक्कविक्रमाः॥ ५५॥ (फ)

---

स एव क्षुद्रः सङ्कोचः मर्य्यादा इति यावत् ताम्। रथी रथिनमायोधयति तत् कथं पादचारिणमिमं योद्धुं पुष्पकमारोहामीति भावः।

(ध) वीरव्रतादिति। हे रावण ! मयि रामे पादचरेऽपि त्वं पुष्पकस्य चन्द्रशालाम् उपरिस्थगृहम् चन्द्रशाला शिरोगृहमित्यमरः। वीरव्रतात् वीरोचितशिष्टाचारादित्यर्थः मा जहिहि न परित्यज। अद्य तावत् इमाः अप्सरसः न्यक्पातिभिः निम्नगामिभिः ऊर्ध्वचरैश्च बाणैः विहितं समरं पश्यन्तु।

(न) अनभ्यस्तचरः अचिरिचितपूर्व इत्यर्थः चरट् भूतपूर्वे इति चरट् प्रत्ययः।

(प) सोल्लुण्ठं सपरिहासम्। धिषणा प्रज्ञा।

(फ) यथाभ्यासमिति। त्वादृशां त्वत्सदृशानां वीराणामिति

रावणः । तद्यदि तवाधुना भगवांस्त्रिनेत्रस्त्राता इत्युभावपि चापारोपणं नाटयतः ।

ततः प्रविशतः सशिष्यावृषीकपुलस्त्यौ भृङ्गिरिटिश्च ।

शिष्यः पुरो निर्दिशन् । साश्चर्यम् । किं उण इदो एदाओ अ अखण्डपिण्डिअसिहासहचण्डीकिअचित्तभाणुणो तक्खणावणद्दहुत्तरणतारतरजच्चकंचणमअकेउदण्डमण्डलीओ अमन्दसच्छन्दसंपडिअजडिलजालालिपक्खालणामविसेससमुज्जलन्तअग्गिरासिअअसंठिअधअपडाडम्बरिल्लीओ णिविडुग्गाप-

---

(२) किं पुनरित एताः अखण्डपिण्डितशिखासहचण्डीकृतचित्रभानवस्तत्क्षणोपनतदहनोत्तरणतारतरजात्यकाञ्चनमयकेतुदण्डमण्डल्यो-ऽमन्दस्वच्छन्दसम्पतितजटिलज्वालालिप्रक्षालनामविशेषसमुज्ज्वलदग्निराशिवदसंस्थितध्वजपटाडम्बरिण्यो निबिडोग्रप्राग्भारपरिगमेघच्छायमानाः मरकतमणिविच्छिन्नकनककोकनदपरिकरेण च विराजमाना विमानपङ्क्तयो गगनप्रान्तेभ्यो झटित्युपसरन्ति ।

---

शेषः । प्रतिपद गत्वा यथाभ्यासं अभ्यासमनतिक्रम्य अभ्यासानुसारेणैव इत्यर्थः प्रवर्तन्ते यादृगस्ते अभ्यासः तादृगेव आचरितुं शक्नोषि न तु अन्यदित्यभिप्रेति भावः । अरण्य अलं वाचिक शिष्यस्य तु सम्मत्यर्थं एते प्रविष्टाः सर्वतो दिशि सर्वस्यां दिशि विक्रम्य प्रसरो येषां तथाविधाः ।

(२) अखण्डितेन अखण्डेन सम्पूर्णेन पिण्डितेन घनीभूतेन शिखामण्डलेन अग्निरायामानामिति भावः चण्डीकृताः तीक्ष्णीकृताः चित्रभानवः किरणाः भानुः अतामरोचिः ध्मायमानाः । यासां ताः तत् तथोक्ताः । तत्क्षणोपनतात् तत्काल उपस्थितात् दाहात् दहनात् उत्तरणं उद्धारः मालिन्यशून्यः । तेन तारतरा उज्ज्वलतराः जाति येषां तद्वशाः

भारपरिगमेवि अमुंजायमाणसरसुप्पलाविच्छिस्सकणअको-
अणअपरिअरेण अ विराअमाणाओ विमाणपन्तीओ गअ-
णपेरन्ताहिं झत्ति ओसरन्ति ( २४ ) ।

सुचीकः । वत्स ! दाण्डायन !

नश्यन्नानाविमानाङ्गणमणिवलभीरत्नवातायनेभ्यो
वक्त्रैराकण्ठदघ्नैर्यदमरललना लोलमालोकयन्ति ।
यच्चेदं व्योम विद्युत्खचितमिव पुरस्तेन मन्ये किमन्य-
द्धस्ताभ्यामाद्रियन्ते शिखिनिचयमुचो देवताः शस्त्रमय्यः ५६ (भ)

---

काञ्चनमयकेतुदण्डानां मण्डल्यः यासां तथोक्ताः । अमन्देति अमन्दं तथा स्वच्छन्दं यथा तथा सम्पतितानां जटिलानां सङ्कुलानां ज्वालालीनां शिखावलीनां प्रज्वालनया स्पर्शेन सविशेषं समुज्ज्वलता यः अग्निराशीनां चयः तेन संस्थितः विनष्टः यः ध्वजपटाडम्बरः पताकाविस्तारः तद्वत्यः । निबिडोष्मणां घनसन्तापानां प्राग्भारस्य वेगस्य परिगमेऽपि उपस्थितावपि अम्लायमानानां अम्लानानां सरसोत्पलानाम् आर्द्रकमलानाम् अविच्छिन्नानाम् अत्रुटानां कनककोकनदानां काञ्चनरक्तोत्पलानां परिकरेण समूहेन विराजमानाः शोभमानाः विमानपङ्क्तयः देवयानश्रेण्यः गगनप्रान्तेभ्यः अन्तरीक्षदेशेभ्यः झटिति द्रुतम् अपसरन्ति पलायन्ते ।

( भ ) नश्यन्नानेति । अमरललनाः सुरसुन्दर्यः नश्यतां पलायमानानां नानाविमानानां विविधदेवयानानाम् अङ्गणेषु विचरणस्थानेषु याः मणिवलभ्यः रत्नवातायनानि च तेभ्य आकण्ठदघ्नैः वक्त्रैः मुखैः यत् लोलं सतृष्णं लोलश्चलसतृष्णयोरिति कोषः । आलोकयन्ति पश्यन्ति । यच्च पुरः अग्रतः इदं व्योम अन्तरीक्षं विद्युद्भिः खचितमिव व्याप्तमिव तेन मन्ये सम्भावयामि अन्यत् किं न किमपीत्यर्थः, हस्ताभ्यां रामरावणाभ्यामित्यर्थः शिखिनाम् अग्नीनां निचयः राशिः तं मुञ्चन्ति इति

पुरुषः । सविशेषमालोक्य सखे ! (स) तस्यानुगतस्ते तर्कः ।

एकत्रैकतमोऽपरत्र दशधा कीर्णो यदाकर्ण्यते
टङ्कारस्तिरयन् जगन्ति धनुषामेकादशानामयम् ॥
रामोऽसौ स च रावणो रणधुरां धर्तुं समभ्युद्यता-
वीषद्बालकुशाङ्कुरामरवधूकेशप्रियैः पार्थिभिः ॥ ५७ ॥ (य)

शिष्य । एकतोऽवलोक्य । सचमत्कारम् । पेक्खह पेक्खह इदो एदाओ (र अमन्दसिन्दूरसुन्दरिअकुम्भपब्भारभासु-राओ पअण्डमुण्डमण्डलोनण्डिअसुण्डादण्डब्भरड्डामराओ पअट्टमअधारार्धोरणीणीरन्धणिरुद्धरेणुरमणिअसरणीओ ग-

(२५) पेक्खध्वं पेक्खध्वम् । इत एता अमन्दसिन्दूरसुन्दरितकुम्भ-प्रागभारभासुराः प्रचण्डमुण्डमण्डलोमण्डितशुण्डादण्डडम्बरोड्डामराः प्रवृत्तमदधाराधोरणीनीरन्ध्र रुद्ध रेणुरमणीयसरण्यो गलगुञ्जानिकु-ञ्जपुञ्जितनिर्जितजलदजालस्तनितविस्तारा दोर्घट्टघटा अवतरन्ति ।

तथाविधा यज्ञमय्य देवता अन्यायाकान्तीति भावः आदियन्ते सेव्यन्ते । रामरावणाभ्याम् आग्नेयास्त्राणि मुक्तानीति भावः ।

(स) तस्यानुगतः तत्त्वं व यार्थ्यम् अनुगतः अनुसृतः ।

(य) एकत्रेति । यत् यस्मात् एकत्र एकतम एक एव, परत्र अन्यत्र दशधा कीर्णः विभक्तः जगन्ति तिरयन् आच्छादयन् एकादशानां राम-दशाननस्य एकस्य दशाननस्यैतानां दशानामित्यर्थः धनुषाम् अयं टङ्कार भैरवस्वनः आकर्ण्यते श्रूयते तस्मात् असौ रामः स च रावणः बालकुशाङ्कुराणां अभिनवदर्भाङ्कुराणाम् अमरवधूकेशानाञ्च प्रियैः यज्ञोपनेनेति भावः पार्थिभिः ईषत् अर्द्धा रणधुरां संग्रामस्य भारं धर्तुम् आचरितं समभ्युद्यतौ उद्युक्तवन्तौ ।

(र) अमन्देति । अमन्देन बहुलेन सिन्दूरेण सुन्दरिताः

लगुहाणिउञ्जपुञ्जिअगज्जिअणिज्जिदजलदजालत्थइदवि
त्थराओ दीग्घघट्टघटाओ सोहन्ति ( ३५ )

भृङ्गिरिटिः । भद्र ! दाशायण ! साधु दृष्टं (ल) वारणास्त्रमिदमामन्त्रितं रावणेन । यतः ।

उत्सर्पद्दर्पहेलागुलुगुलितगला डिण्डिमोड्डामरिण्यः
सन्नाहन्यासकर्मक्रमरुचिररुचः सादिभिः शोभमानाः ।
एतास्तीव्राङ्कुशाग्रप्रगुणितशिरसः श्रेणयो वारणानां
प्रेङ्खद्भिः शीकराम्भस्स्तवकितककुभः केतुभिः सम्पतन्ति ५८ (व

---

सौन्दर्यशालिनः ये कुम्भप्राग्भाराः कुम्भपूर्वभागाः तैः भासुराः विराजमानाः । प्रचण्डेति प्रचण्डाभिः उग्राभिः गुण्डमण्डलीभिः मण्डलितानाम् अलङ्कृतानां शुण्डादण्डानां डम्बरेण विस्तारेण उड्डामराः भीषणाः । प्रवृत्तेति प्रवृत्तानां प्रसृतानां मदधाराणां घोरणीभिः परम्पराभिः निरभ्रं निरन्तरं निरुद्धैः रेणुभिः रमणीया सरणिः पन्थाः यासां तथोक्ताः । गलेति गलगुहानिकुञ्जेषु कण्ठाभ्यन्तरप्रदेशेषु पुञ्जिताः सञ्चिताः निर्जितो जलदो मेघो यैः तथाभूताः स्तनितविस्ताराः बृंहितशब्दाः यासां तथाविधाः । दीर्घघट्टघटा गजसङ्घाः ।

( ल ) वारणास्त्रं गजास्त्रम् । आमन्त्रितं प्रयुक्तम् ।

( व ) उत्सर्पदिति । उत्सर्पन्तः उद्गच्छन्तः दर्पहेलाभ्याम् अहङ्कारावज्ञाभ्यां गुलुगुलिताः स्फुरन्तः गलाः कण्ठाः यासां तथोक्ताः, डिण्डिमेन वाद्यविशेषेण उड्डामरिण्यः उद्दीप्यमानाः । सन्नाहः संग्रामसज्जा तस्य न्यासः विन्यासः एव कर्म तस्य क्रमेण रुचिराः रुचः दीप्तयः यासां तथाविधाः, सादिभिः हस्तिपकैः तीव्राङ्कुशाग्रेण तीक्ष्णाङ्कुशप्रहारेण प्रगुणितानि शिरांसि यासां एताः अतएव शोभमानाः विराजमानाः वारणानां गजानां श्रेणयः शीकराम्भोभिः

शिष्यः । इदोवि एदे (अ) उत्तुङ्गलाङ्गूलमालिङ्गिअगअणङ्गणुच्छङ्गा घणघोणघुरघुराघोसघग्घरिज्जन्तगलगुहाकुहरप्फारफुल्लगल्लविदुरिला विज्जुप्पुञ्जपिञ्जरिददिट्ठिच्छडाकडक्खदुप्पेच्छा सहसत्ति सीहसंघा ओदरन्ति (२६) ।

पुलस्त्यः । इदमपि (ब) द्विरदास्त्रप्रतिद्वंद्वि पञ्चाननास्त्रमामन्त्रितं जामदग्न्येन । यतः ।

गुञ्जापुञ्जारुणाभैर्धुतविकटसटासङ्कटस्कन्धबन्धैर्विभ्राङ्गिर्विभु गात्रं खरनखरशिखाग्रे विनिर्यान्तरौद्रैः ।

---

(२६) इतोऽप्येते उत्तुङ्गलाङ्गूलमालिङ्गितगगनाङ्गनोत्सङ्गा घनघोणघुरघुराघोषघर्घरद्गलगुहाकुहरस्फारफुल्लगल्लव्यतिकरा विद्युत्पुञ्जपिञ्जरितदृष्टिच्छटाकटाक्षदुष्प्रेक्ष्या सहसैव सिंहसङ्घा अवतरन्ति ।

---

गुञ्जाजलबिन्दुभिः स्तबकिताः आच्छादिताः ककुभः दिशः याभिः तादृशाः सन्तः प्रेङ्खद्भिः चलद्भिः केतुभिः ध्वजैः सह अभ्यतन्ति । स्रग्धरावृत्तम् ।

(अ) उत्तुङ्गेति । उत्तुङ्गैः समुन्नतैः लाङ्गूलाग्रैः आलिङ्गितः आक्रान्तः गगनाङ्गनमेव उत्सङ्गो यैः तथोक्ताः । घनेति घनानां घोणानां नासिकानां घुरघुराघोषेण घुरघुराकारशब्देन घर्घरत् घर्घरशब्दं कुर्वत् यत् गलगुहाकुहरं कण्ठाभ्यन्तरं तस्य स्फारेण स्फीततया फुल्लाः शोभिताः गल्लव्यतिकराः गल्लदेशसमूहा येषां तथाविधाः । विद्युदिति विद्युतां पुञ्जा इव राशय इव पिञ्जरिताः पिङ्गलीकृता या दृष्टिच्छटाः तासां कटाक्षेण प्रान्तदर्शनेन दुष्प्रेक्ष्येणेति भावः दुष्प्रेक्ष्या दुर्दर्श्याः द्रष्टुमशक्या इत्यर्थः ।

(ब) द्विरदास्त्रस्य वारणास्त्रस्य प्रतिद्वन्द्वि प्रतिकूलं पञ्चाननास्त्रं सिंहास्त्रं, सिंहो मृगेन्द्रः पञ्चास्य इत्यमरः ।

(स) गुञ्जेति । गुञ्जानां पुञ्जानीव अरुणानि आभानि येषां

एतैः कण्ठप्रणालीप्रणयिघुरघुराघोरनिर्घोषनिघ्नै-
र्निर्विघ्नं सिंहसङ्घैरिदमतिरभसात्क्रान्तमेवान्तरिक्षम् ॥५८॥ (ग)

सर्वे। साकूतम्। (ङ) एत एत एतयोरन्तरे भवामः।

शिष्यवर्जमितरे हस्तमुद्यम्य।

विरम भार्गव! संहर सङ्गरं
त्यज धनूंषि दशापि दशानन!।
विषहते न परस्परवैशसं
स भवतोर्भगवान् वृषभध्वजः ॥ ६० ॥ (च)

रावणः। सविषादम्। सोऽयं (क) द्विषज्जोर्दावपावकस्य
गरिमसारः सीकरासारः। विमृश्य।

---

तैः रक्तनेत्रैरित्यर्थः। धुताभिः कम्पिताभिः विकटाभिः तीव्राभिः सटाभिः जटाभिः सङ्कटाः व्याप्ताः स्कन्धबन्धाः स्कन्धदेशाः येषां तैः। बभ्रु पिङ्गलं गात्रं बिभ्रद्भिः। खराणां तीव्राणां नखराणां याः शिखाश्रेणयः तासां निर्याणेन निर्गमनेन रौद्रैः भीषणैः। कण्ठप्रणालीनां कण्ठरूपनलानां प्रणयी यः घुरघुरारूपः घोरघोषः तीक्ष्णरवः तत्र निघ्नैः आसक्तैः एतैः सिंहसङ्घैः अतिरभसात् अतिवेगात् निर्विघ्नं निर्बाधं यथा तथा इदम् अन्तरीक्षं क्रान्तम् आक्रान्तम्। स्रग्धरावृत्तम्।

(ङ) एत एत आगच्छत आगच्छत।

(च) विरमेति। हे भार्गव! विरम क्षमस्व, सङ्गरं युद्धं संहर। हे दशानन! दशापि धनूंषि त्यज। स भगवान् वृषभध्वजः भवतोः युवयोः परस्परवैशसं अन्योन्यविध्वंसं न विषहते नेच्छतीत्यर्थः। वृत्तमत्र द्रुतविलम्बितम्, द्रुतविलम्बितमाह नभौ भराविति लक्षणात्।

(क) द्विषज्जोः दग्धुमिच्छोः दावपावकस्य दावानलस्य गरिम-

वीरः स भार्गवमुनिः स च राघवेन्द्रो
योऽयं द्विधा प्रविततो यशसां प्ररोहः।
कस्मान्न वाञ्छति मया स तमष्टमूर्त्ति-
रेकायनं त्रिजगति क्रियमाणमीशः॥ ६१॥ (ख)

जामदग्न्यः। सावज्ञम्।

न्यक्कारो गुरुकार्मुकस्य कुरुते मां वीरवर्गे पुनः
साक्षाद्भृङ्गिरिटिर्गिरा पशुपतेराज्ञापयत्येष च।
हा! तत् किं करवै किमन्यदथवा याचे महीमन्तरं
येन स्यां सशरासनः सपरशुः कालाग्निरुद्रातिथिः॥६२॥ ग।

सारः गौरवशाली अनतिक्रमणीय इति भावः सीकरासारः धारा-सम्पातः।

(ख) वीर इति। स भार्गवमुनिः जामदग्न्यः स च राघ-वेन्द्रः वीरः योऽयं यशसां प्ररोहः देवस्येति भावः द्विधा प्रवि-ततः प्रकर्षेण विस्तारं गतः एकस्य शिष्यत्वात् अपरस्य भक्तत्वादिति भावः। सः अष्टमूर्त्तिः देवः त्रिजगति मया क्रियमाणं तम् एका-यनम् एकनिष्ठं यशसां प्ररोहं कस्मात् न इच्छति। तस्य यशः-प्ररोहः द्वयोराश्रयोः तिष्ठति, मया तु तस्य एकाश्रयत्वं कर्त्तुमिष्टं देवः कथं न सहते इति तात्पर्य्यार्थः।

(ग) न्यक्कार इति। गुरोः आचार्य्यस्य यत् कार्मुकं तस्य न्यक्कारः नाधिक्षेपः अवमाननमित्यर्थः मां कुरुते प्रेरयति वैरसाधना-येति भावः। एषः भृङ्गिरिटिः पुनः पशुपतेः गिरा वचसा साक्षात् स्वयं वीरवर्गे वीराचारत्यागे आज्ञापयति च। हा इति शोक-सूचकमव्ययं तत् तस्मात् किम् अन्यत् किं कार्य्यं करवै? अथवा महीं पृथ्वीम् अन्तरम् अवकाशं याचे भूगर्भं प्रवेष्टुमिच्छामीत्यर्थः। येन सशरासनः सधनुः सपरशुः परशुसहितः कालः एव अग्निः स

इतरे। तदेव पठन्ति। रावणः। भार्गव भार्गव! देवादेशान्मित्रमसि तदिदमापृच्छामहे गमनाय।

जामदग्न्यः। यथात्थ मित्रमसि तदेव प्रेष्यसे।

इतरे। प्रियं नः प्रियं नः।

नेपथ्ये। भगवन्! भार्गव! तत्रभवत्या परमे ब्रह्मणि वर्त्तमानया मैत्रेय्या (घ) लोकयात्रापरतन्त्रया च कात्यायन्या समं समुपरतकल्को याज्ञवल्क्यस्त्वामाह।

अतिथिरसि किमन्यद्देवदेवो गुरुस्ते
वयमपि च सदाराः साग्नयोऽस्मिन् वसामः।
तदुपसर गृहान्नस्त्वं भृगोः पुत्रभाण्ड
बटुपरिषदभीष्टाः सन्त्वनध्यायचेष्टाः॥ ६२॥ (ङ)

जामदग्न्यः। यथाह सूर्यशिष्यः।

इति निष्क्रान्ताः सर्वे।

परशुरामरावणीयो नाम द्वितीयोऽङ्कः।

---

एव रुद्रः संहारकत्वादिति भावः तस्य अतिथिः स्यां भवेयं देहं त्यक्ष्यामीति भावः। शार्दूलविक्रीडितं वृत्तम्।

(घ) लोकयात्रापरतन्त्रया लोकस्थितेरायत्तया लोकस्थित्यनुसारिण्या इत्यर्थः समुपरतं कल्कं पापं यस्य तथोक्तः निष्पाप इत्यर्थः।

(ङ) अतिथिरिति। अतिथिरसि, अन्यत् किं वक्तव्यमिति शेषः, देवदेवः शिवः ते तव गुरुः आचार्य्यः। वयमपि सदाराः सस्त्रीकाः साग्नयः अपि होमिनः अस्मिन् प्रदेशे वसामः। तत् तस्मात् नः अस्माकं गृहान् उपसर आगच्छ त्वं भृगोः पुत्रभाण्ड पुत्ररत्न कुलधुरन्धर इत्यर्थः। बटुपरिषद्भिः ब्राह्मणसमाजैः शिष्य-

# अथ तृतीयोऽङ्कः।

अतः परं (क) विष्कलङ्केश्वरी भविष्यति।

ततः प्रविशति खगमिथुनम्॥

पक्षी। प्रिये। सुवेगे। भगवतो लक्ष्मीपतिलाञ्छनस्य निसर्गनागशत्रोरमृताहरणविश्रुतविक्रमस्य शकुन्तचक्रवर्त्तिनो वैनतेयस्यास्मत्कुलप्रथमपुंसः सकलगोत्रधुरन्धरेण भविष्यतापत्येन नूनमन्तर्वत्न्यसि यत् ते निशाचरमांसास्वादनेन तत्कीलालकवलेन च दोहदविधेरयमुपस्थितः समयः।

भूर्यैरिति शेषः अभीष्टा, वाञ्छिता, अनध्यायवष्टा, अनध्यायेन या वेष्टा स्वच्छन्दविहारा इत्यर्थः सन्तु महापुरुषे अतिथावागते शिष्टानध्यायस्य शास्त्रीयत्वादिति भावः।

---

## अथ तृतीयाङ्कव्याख्या।

(क) विष्कलङ्केश्वरः विगतः कल्मषः कलङ्केश्वरो यस्मिन् तथाविधः। लक्ष्मीपतिलाञ्छनस्य लक्ष्मीपतेः नारायणस्य लाञ्छनं चिह्नं ध्वजस्थत्वादिति भावः निसर्गेण प्रकृत्या नागानां पन्नगानां शत्रोः, अमृताहरणेन विश्रुतः विख्यातः विक्रमो यस्य तादृशस्य शकुन्तानां चक्रवर्त्तिनः सम्राजः। सकलगोत्राणां कुलपर्वतानां धुरन्धरेण अग्रगण्या भविष्यता भाविना अपत्येन अन्तर्वत्नी गर्भवती,

सुवेगा। अयि (ख) चित्तसिहण्ड ! तेल्लोक्केक्कमल्ले रक्खसरक्खाकरे पुलत्थकुमारे णन्दमाणे दुल्लहं दोहलअमिमं मसे (२७)।

चित्रशिखण्डः। भवति! यथात्थ किमुच्यते रावणः खल्वसौ। पश्य।

साक्षाद्यत्प्रपितामहः कमलभूर्मानः स कोऽप्युन्नतो
न स्तौति प्रणनाम यश्च वरदां देवीं भवानीमपि।
यच्छौर्योदयसाक्षिणी च सकला सा भूर्भुवःस्वस्त्रयी
तं व्यावर्ण्य दशास्यमन्यचरितस्तोत्रेण लज्जामहे ॥१॥ (ग)

किन्तु।

---

(२७) अये चित्रशिखण्ड! त्रैलोक्यैकमल्ले राक्षसरक्षाकरे पुलस्त्यकुमारे नन्दमाने दुर्लभं दोहदकमिमं मन्ये।

---

भावः। तत् कीलालकवलेन तेषां निशाचराणां कीलालकवलेन रुधिरपानेन दोहदविधेः दोहदः गर्भिणीमनोरथः तस्य विधेः मनोरथानुरूपमाचरणमित्यर्थः।

(ख) चित्रं शिखण्डं यस्य इति व्यस्तसम्बोधनपदम्। त्रैलोक्येषु एकः अद्वितीयः मल्लः वीरः तस्मिन् पुलस्त्यकुमारे रावणे नन्दमाने राजति दोहदकम् अभिलाषपूरणम्।

(ग) साक्षादिति। यस्य प्रपितामहः पितामहपिता साक्षात् स्वयं कमलभूः ब्रह्मा। स कोऽपि अनिर्वचनीयः उन्नतो महान् मानः गर्वः मूर्त्तिमानहङ्कार इत्यर्थः यश्च वरदाम् अभीष्टप्रदां देवीं भवानीं पार्वतीमपि स्तौति नारीति बुद्ध्या इत्यर्थः न प्रणनाम। सा सकला समग्रा भूर्भुवः स्वस्त्रयी त्रिजगती यस्य शौर्योदयस्य वीर्यप्रकाशस्य

गतः स कालो यत्रासीत् मुक्तानां जन्म वल्लिषु ।
वर्त्तन्ते साम्प्रतं तासां हेतवः शुक्तिसम्पुटाः ॥ २ ॥ (घ)

यतः (ङ) श्रुतताड़काताड़नोऽपि न निशाचरपतिरद्यापि निजदोर्दण्डचण्डिमोचितमाचरति ।

सुवेगा । हंहो (च) गरुत्मद्गोलाङ्गूलशरण ! कधेसु कीदिसी उण सुन्दसुन्दरीए वहविड़म्बणा संवुत्ता (३८) ।

चित्रशिखण्डः । प्रिये ! श्रूयताम् । एकदा स भगवान्

---

३८ । गरुत्मद्गोलाङ्गूलशरण ! कथय कीदृशी पुनः सुन्दसुन्दर्य्या वधविड़म्बना संवृत्ता ।

---

सान्निध्यौ साक्षात् दृष्टौ, तं दशाननं व्यावर्त्त्य विज्ञाय अन्येषां चरितस्य स्तोत्रेण प्रसक्त्या लज्जामहे वयं प्रायशः । शार्दूलविक्रीड़ितं वृत्तम् ।

(घ) गत इति । यत्र यस्मिन् काले वल्लिषु लतासु मुक्तानां जन्म आसीत् सः कालः गतः व्यतिक्रान्तः, साम्प्रतं शुक्तिसम्पुटाः तासां मुक्तानां हेतवः जन्मस्थानानि वर्त्तन्ते पूर्वं लतासु मुक्तोत्पत्तिरतीव प्रथिताऽऽसीत् अधुना तु शुक्तेरेव न हि कस्यापि प्राधान्यं सार्वकालिकमिति भावः ।

(ङ) श्रुतं ताड़कायाः राक्षस्याः ताड़नं निधनं येन सः ताड़कावधमाकर्ण्यापीत्यर्थः निशाचरपतिः दशग्रीवः निजानां दोर्दण्डानां भुजयष्टीनां यच्चण्डिम्ना चण्डत्वं तदुचितं व्यापारं युद्धमित्यर्थः ।

(च) गरुत्मद्गोलाङ्गूलशरण ! नरकुम्भभूषण ! सुन्दसुन्दर्य्याः सुन्दो नाम कश्चित् असुर आसीत् तस्य सुन्दरी भार्य्या ताड़का तस्याः वधविड़म्बना वधव्यापारः ।

विश्वस्य मित्रं विश्वामित्रः (क) सप्ततन्तुत्राणाय दाशरथिमयोध्यातः सिद्धाश्रमं सलक्ष्मणं राममानिनाय । वैतानिकं च वितताम । तत्र यथोचितसामोद्गारिण्युद्गातरि समन्त्रसंस्कृताहुतौ होतरि प्रचरणकर्मधुर्य्येऽध्वर्य्यौ दिव्यां गिरमनुवर्त्तमाने यजमाने सम्यगवेक्षिताखिलकर्मणि ब्रह्मणि सरभसमनैरम्मदमदाम्भोलमनैन्द्रवममार्त्तण्डीयमवैत्रभानवं च ज्योतिरुदजृम्भत ।

सुवंगा । अश्चरिअमच्चरिअम् । तदो तदो ? (३८) ।

चित्रमित्रब्रह्मः । ततश्च सपुत्रदारेषु दिगन्तरादागतेषु

---

३८ । आश्चर्यमाश्चर्यम् । ततस्ततः ? ।

---

(क) सप्ततन्तुत्राणाय यज्ञरक्षार्थं सप्ततन्तुर्मखः क्रतुरित्यमरः । वैतानिकं यज्ञीयं यथोचितं यथाविधि सामोद्गारिणि सामवेदसुधागायिनि उद्गातरि सामवेदिनि ऋत्विजि इत्यर्थः, समन्त्रेण मन्त्रेण संस्कृताः आहुतयः येन तथोक्ते होतरि होमं कुर्वति ऋत्विजि, प्रचरणं विधिदर्शनमेव कर्म तस्मिन् धुर्य्ये धुरन्धरे विचक्षणे इत्यर्थः अध्वर्य्यौ ऋत्विजि इत्यर्थः अध्वर्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमादित्यमरः । दिव्यां संस्कारपूतां गिरं वाचम् अनुवर्त्तमाने अनुसरति यजमाने यष्टरि सम्यक् अवेक्षितम् अखिलं समग्रं कर्म्म येन तादृशे ब्रह्मणि ऋत्विग्विशेषे सति सरभसं सवेगम् अनैरम्मदम् अवाडवम् अदाम्भोलं दम्भोलिर्वज्रं तदीयं न भवतीति अदाम्भोलम् अवैद्युतमित्यर्थः अनैन्द्रवम् अचान्द्रम् अमार्त्तण्डीयम् असूर्य्यम् अवैत्रभानवम् अनाग्नेयं ज्योतिः तेजः अलौकिकमिति भावः उदजृम्भत उत्तस्थौ ।

किमिदमिति (ञ) कान्दिशीकेषु मुनिषु तयोद्घोषि जनैः ।

रक्ताभ्यक्तोष्ठकण्ठा गुरुकवलवलज्जाङ्गलव्यस्ततालुः
फेत्कारैः फुल्लगल्लैर्ज्वलितकरगुरुभिः कम्पयन्ती जगन्ति ।
अन्योन्येनाग्रपाणिप्रणयि शवयुगं ताड़का ताड़यन्ती
सेयं द्राग्दृष्टदंष्ट्राङ्कुरकषणरणत्कारभीमाऽभ्युपैति ॥३॥ (भ)

सुवेगा । अहह ! भीषणाणं वि भीसणा इदासा । तदो तदो ? (४०) ।

चित्रशिखण्डः । अथ स भगवान् कुशिकनन्दनस्तत्प्रमथनार्थं राममेव नियुयुजे ।

सुवेगा । दुक्करमुवक्कन्तं भअवदा कोसिएण । तदो तदो ? ( ४१ ) ।

४० । अहह ! भीषणानामपि भीषणा हताशा । ततस्ततः ।
४१ । दुष्करमुपक्रान्तं भगवता कौशिकेन । ततस्ततः ? ।

---

( ञ ) कान्दिशीकेषु भयद्रुतेषु कान्दिशीको भयद्रुत इत्यमरः । उद्घोषि उद्घोषितम् ।

(भ) रक्तैः रुधिरैः अभ्यक्ते लिप्ते ओष्ठौ कण्ठश्च यस्याः सा तथोक्ता गुरवे कवलाय ग्रासाय वलद्भिः चलद्भिः उदरं गच्छद्भिरित्यर्थः जाङ्गलैः मांसैः व्यस्तः विक्षिप्तः तालु यस्याः तथोक्ता मांसभक्षणतत्परा इति भावः फुल्लौ स्फीतौ गल्लौ कपोलदेशौ व्यतिकरेण सङ्गेन गुरुभिः महद्भिः गभीरैरित्यर्थः फेत्कारैः फेत्कारविशेषैः जगन्ति कम्पयन्ती अग्रपाणि प्रणयि भुजालग्नं शवयुगलं मृतकलेवरयुगलम् अन्योन्येन परस्परं च ताड़यन्ती इदानीं

विश्वामित्रः । ततः (ञ) सञ्जातस्त्रीवधविचिकित्सामुद्रो रामभद्रः सविनयमिदमाह ।

स्त्रीराक्षसी कथमिवात्र पतन्तु बाणाः
प्रेष्यस्य ते कुशिकनन्दन ! तत्प्रसीद ।
आदिश्यतामिह हि कोऽपि तपस्वितन्त्रे
मन्त्राक्षरैः कतिपयैर्य इमामपास्येत् ॥ ४ ॥ (ट)

सुवेगा । अहो ! उचिदकारित्तणं राहवस्स ! तदो तदो(४२) ? ।

विश्वामित्रः । (ठ) अथैकजन्मानुभूतब्रह्मभावः स भगवांस्त्रिपताकेन पाणिना चिबुके राममुन्नमय्य निजगाद ।

(४२) अहो उचितकारित्वं राघवस्य । ततस्ततः ? ।

दंष्ट्राङ्कुराणां कषणेन परस्परसंघर्षेण यः रणत्कारः रणरणशब्दः ो । भीमा भीषणा सा इयं ताड़का द्राक् झटिति अभ्युपैति आग-च्छति । स्रग्धरावृत्तम् ।

(झ) तत् प्रमथनार्थं तस्याः ताड़कायाः खण्डनार्थम् ।

(ञ) सञ्जातेति सञ्जाता उत्पन्ना स्त्रीवधे स्त्रीहत्यायां या विचिकित्सा संशयः विचिकित्सा तु संशय इत्यमरः । स्त्रीहत्याया अकर्त्तव्यत्वादिति भावः । तया हेतुना मुद्रा सङ्कोचः यस्य तथाभूतः ।

(ट) स्त्रीति । हे कुशिकनन्दन ! राक्षसी इयं स्त्री अत स्त्रियां बाणाः ममेति शेषः कथं पतन्तु कथं स्त्रीहत्यां करोमीति भावः । तत् तस्मात् ते तव प्रेष्यस्य दासस्य मम प्रसीद प्रसन्नो भव मा क्रुध्य इति भावः । इह तपस्विनां तन्त्रे समाजे तपस्विमध्ये इत्यर्थः कोऽपि तपस्वी आदिश्यताम् आज्ञाप्यताम् यः कतिपयैः मन्त्राक्षरैः इमां राक्षसीम् अपास्येत् निराकुर्यात् । वृत्तमत्र वसन्ततिलकम् ।

(ठ) एकेति । एकस्मिन् जन्मनि अनुभूतः ब्रह्मणः भावः

कालरात्रिकरालेयं स्त्रीति किं विचिकित्ससे ।
तज्जगत्त्रितयं त्रातुं तात ! ताड़य ताड़काम् ॥ ५ ॥ (ड)

सुवेगा । साकूतम् । तदो तदो ? (४२) ।

चित्रशिखण्डः । ततः सहैव मुनिगिरां विरामेण रामकार्मुकतो (ढ) भुजङ्गभोगभीषणा बाणपद्धतिराविरासीत् । उक्तं च लक्ष्मणेन ।

विध्वस्तहस्तयुगलं ललितान्त्रतन्त्र-
मुन्मुक्तरक्ततति खण्डितकालखण्डम् ।
उत्कृत्तकृत्ति रचितं च शरैः शरीर-
मार्य्याखिलाङ्गपरिताड़िनि ताड़कायाः ॥ ६ ॥ (ण)

(४२) ततस्ततः ? ।

धनुः येन तथाभूतः क्वाटौ क्षत्रियोऽपि तपसा ब्रह्मत्वं प्राप्त इत्यर्थः । त्रिपताकेन त्रिपताका ध्वजपटाकारा उत्थिता अङ्गुलयः यस्य तादृशेन पाणिना भुजेन ।

(ड) कालरात्रीति । कालरात्रिः संहाररात्रिः सा इव करालां भीषणा कालरात्रिर्यथा जगत्संहारिणी तथा इयं राक्षसीत्यर्थः तनस्त्री इति स्त्रीबुद्ध्या किं कथं विचिकित्ससि संशेषे ? हे तात ! वत्स ! तत् तस्मात् जगतां त्रितयं त्रातुं ताड़कां ताड़य जहि ।

(ढ) भुजङ्गभोगभीषणा आशीविषकायवत् भीषणा तीक्ष्णा बाणानां शराणां पद्धतिः परम्परा ।

(ण) विध्वस्तेति । आर्य्य राम अखिलानां सर्वेषाम् अङ्गानां परिताड़ीनि प्रहारकारीणि प्रहारार्हाणीति भावः । शरैः ताड़कायाः शरीरं विध्वस्तं छिन्नं हस्तयुगलं यस्मात् तादृशं, ललिताः लम्बिताः अन्त्रतन्त्र्यः अन्त्रराजयः यस्मात् तथोक्तम्, उन्मुक्ताः निर्ग-

सुवेगा। (त) डिम्भत्तणेवि तरुणराहवोचिदं चरिदं रामभद्दस्स। तदो तदो? (४४)।

चित्रशिखण्डः। (थ) ततस्तैगङ्गवस्य शोकशङ्कोः शम-यिता सुन्दासुरबधूबधचरित्रेण विनीयमाणः।

साकं लेभे जृम्भकास्त्रैः समस्तै-
र्विश्वामित्रस्तुष्यतो यं कृशाश्वात्।
रामायासौ तं धनुर्वेदमाद्यं
प्रीतः प्रादात् तत्र सौमित्रये च ॥ ७ ॥ (द)

---

(४४) डिम्भत्वेऽपि तरुणराघवोचितं चरितं रामभद्रस्य।

---

लिताः रक्तानां ततिः धारा यस्मात् तथाभूतं, खण्डितं कृत्तं काल-खण्डं यकृत् यस्य तथाविधं, तथा उत्कृत्ताभ्छिन्नाः कृत्तयः चर्माणि यस्य तथाभूतञ्च रचितं कृतम्। वृत्तमत्र वसन्ततिलकम्।

(त) डिम्भत्वेऽपि शिशुत्वेऽपि तरुणस्य यूनः राघवस्य रघुवंशी-यस्य उचितं सदृशम्।

(थ) तैगङ्गवस्य त्रिशङ्कुसम्बन्धिनः शोकशङ्कोः शोककृपस्य शल्यस्य शमयिता उद्धर्ता विश्वामित्र इत्यर्थः। विनीयमानः चमत्-कृतः।

(द) साकमिति। विश्वामित्रः तुष्यतः कृशाश्वात् मुनेः सका-शात् समस्तैः जृम्भकैः अस्त्रविशेषैः साकं सह यम् आद्यं धनुर्वेदं लेभे, असौ विश्वामित्रः प्रीतः प्रसन्नः सन् ताडकावधेनेतिभावः। तं धनुर्वेदं तत्र सिद्धाश्रमे रामाय सौमित्रये लक्ष्मणाय च प्रादात्। वृत्तमत्र शालिनी, मात्तौ गौ चेच्छालिनी वेदलोकैरिति लक्षणात्।

सुवेगा । अहो ! से ( ध ) भरदमादामहस्स मुणिणो (न) सुसरिससंजोअगब्भाचरिअविब्भमा । किंच तदो कोसिएण पडिवस्सं ( ४५ ) ।

चित्रशिखण्डः । ततश्च शकुन्तलायाः पिता (प) सुकेतुसुतोन्मथनपरीक्षितविक्रमं संक्रान्तकार्मुकोपनिषदं सलक्ष्मणं राममादाय शङ्करशरासनारोपणप्रवर्त्तितसीतास्वयंवरयात्रां मिथिलां पुरीं प्रत्युच्चचाल ।

सुवेगा । तदो तदो ? ( ४६ ) ।

चित्रशिखण्डः । ततस्तेषां (फ) ताडकेयौ निजतेजस्तिर-

( ४५ ) अहो ! अस्य भरतमातामहस्य मुनेः सुसदृशसंयोगगर्भाश्चरितविभ्रमाः । किंच ततः कौशिकेन प्रतिपन्नम् ।

( ४६ ) ततस्ततः ? ।

---

( ध ) भरतमातामहस्य भरतः शाकुन्तलेयः तस्य माता शकुन्तला तस्य पितुः कौशिकस्य इत्यर्थः । पुरा विश्वामित्रः तपोभीतैर्देवैः तपोविघ्नार्थं प्रेषिता मेनका कियन्ति दिनानि सम्भुज्य तस्यां शकुन्तलां जनयामासेति पुराणम् ।

( न ) सुसदृशसंयोगगर्भाः सुसदृशः अनुरूपः संयोगः गर्भे अन्तर्येषां ते, चरितानां विभ्रमाः विलासाः । प्रतिपन्नं ज्ञातम् ।

(प) सुकेतुसुतोन्मथनपरीक्षितविक्रमं सुकेतोः कस्यचित् गन्धर्वस्य सुतायाः ताडकायाः उन्मथनेन दमनेन परीक्षितः विक्रमो यस्य तम् । संक्रान्ता आश्रिता कार्मुकोपनिषद् धनुर्विद्या यं तादृशम् । शङ्करस्य यत् शरासनं धनुः तस्य आरोपणेन प्रवर्त्तिता प्रारब्धा सीतास्वयंवरयात्रा जानकीपरिणयोत्सवो यस्यां ताम् ।

( फ ) ताडकेयौ ताडकाया अपत्ये पुमांसौ ताडकेयौ ताडकासुतौ । निजेन [illegible]

स्नातमार्तण्डमरीचिर्मारीचः सततोद्यतबाहुः सुबाहुश्च जननीवधविरुद्धौ मध्वानमनुरुन्धाताम्।

सुवेगा। ठाणेक्खु (ब) अहिणिविट्ठा दुट्ठा दुट्ठरक्खसीसुदा तदो किं संवुत्तं ताणं (४७)?।

चित्रशिखण्डः। यत्तयोर्मातुः। तथाहि।

कोदण्डात्तरलमुदञ्चतः शरस्य
द्राग्द्वेधा व्यधित सुधारया सुबाहुम्।
मारीचं सपदि च पुङ्खपत्रवाते-
रम्भोधेः पुलिनचरं चकार रामः॥ ८॥ (भ)

सुवेगा। सपरितोषम्। रक्खसकुलक्खअकारिक्खु रामअन्दचरिदम् (४८)।

---

(४७) स्थाने खल्वभिनिविष्टौ दुष्टौ दुष्टराक्षसीसुतौ। ततः किं संवृत्तं तयोः?।

(४८) राक्षसकुलक्षयकारि खलु रामचन्द्रचरितम्।

---

येन तथोक्तः सौरतेजःपरिभावीत्यर्थः। जननीवधेन जनन्याः मातुस्ताड़काया वधेन हेतुना विरुद्धौ विरोधकारिणौ जातक्रोधौ इत्यर्थः, अनुरुन्धाताम् अवरुरुधतुः।

(ब) अभिनिविष्टौ वैरसाधनार्थमुद्यतौ।

(भ) कोदण्डेति। रामः कोदण्डात् धनुषः तरलं द्रुतम् उदञ्चतः उत्क्षिप्तः शरस्य सुधारया तीक्ष्णधारया द्राक् झटिति सुबाहुं द्वेधा द्विखण्डं व्यधित कृतवान्। पुङ्खपत्रवातैः वायव्यास्त्रैरित्यर्थः सपदि शीघ्रं मारीचम् अम्भोधेः सागरस्य पुलिनचरं सैकतस्थं चकार च। एतसमत प्रहर्षिणी, त्र्याशाभिर्मनजरगाः प्रहर्षिणीयमिति लक्षणात्।

चित्रशिखण्डः । तस्मात्त्व समरतः (म) सुचिरसञ्चितेन निशाचराणामसृजा मांसेन च सम्पादय दोहदम् ।

सुंगा । णाह । एव्वं तुए उवअरन्तेण (र) णिज्जिदसअल-सउन्तसीमन्तिणीसोहग्गा सुवेगा कआ । किं पुण किंपि पुच्छीअदि ? (४८) ।

चित्रशिखण्डः । प्रिये ! समादिश्यताम् ।

सुंगा । कीस दआणणोवि (ल) अवमाणणासहण-सहावो वट्टदि (५०) ।

चित्रशिखण्डः । अयि (व) सुपर्विणि ! सर्वावमानी दशा ननः कथमवमाननां सहते । किंतु सीताविरहवैधुर्यम-नापराध्यति । न विना हिमानीमचण्डो मातङ्गः ।

(४९) नाथ ! एवं त्वयोपकुर्वता निर्जितसकलशकुन्तसीमन्तिनी-सौभाग्या सुवेगा कृता । किं पुनः किमपि पृच्छ्यते ? ।

(५०) कथं दशाननोऽप्यवमाननासहनस्वभावो वर्तते ।

(म) सुचिरसञ्चितैः सुचिरं सञ्चितं संरक्षितं तेन । असृजा शोणितेन ।

(र) निर्जितेति निर्जितं सकलानां शकुन्तसीमन्तिनीनां पक्षिणीनां सौभाग्यं यया तादृशी अतिसौभाग्यवतीति भावः ।

(ल) अवमाननाया असहनः स्वभावो यस्य तादृशः पराव-माननासहिष्णुरित्यर्थः ।

(व) सुपर्विणि । पक्षिसुन्दरि ! सीताविरह वैधुर्यंसीताया विरहेण अप्राप्त्या यत् वैधुर्यं विक्लवता तत् अत्र विषये अपराध्यति अपराधं करोति सीताविरहदुःखेन व्याकुलीभूतत्वात् अनवधानता एवात्र हेतुरिति भावः । हिमानीं हिमसंहतिं हिमानी हिमसंहति

सुवेगा। कीदिसा उण सीदाविरहवेदणाविणोदा दसाणणस्स (५१)।

चित्रशिखण्डः। लङ्काप्रचारिणा (श) त्रिकूटाचलपक्षिराजेन रत्नशिखण्डेन भवद्देव्या निवेदिता एव।

सुवेगा। के उण टे? (५२)।

चित्रशिखण्डः। नन्वेते कथ्यन्ते।

इन्दुः सीतावदनसदृशो जानकीनेत्रहृद्यं
नीलाम्भोजं बिसकिसलया मैथिलीहासभासः।
सख्यक्साम्यादिति च बहवस्तस्य जाता जगत्यां
लङ्काभर्त्तुर्जनकतनयाविप्रलम्भे विनोदाः ॥ ८ ॥ (प)

(५१) कीदृशाः पुन सीताविरहवेदनाविनोदा दशाननस्य।
(५२) के पुनस्ते?

रित्यमरः। तां विना मार्त्तण्डः र[illegible] न प्रचरति अ[illegible] [illegible]-प्रभावात् स्वर्णादिरसि यथा।

(श) त्रिकूटाचलस्य त्रिकूटगिरेः लङ्कानगर्याधारस्य यः पक्षिराजः तेन रत्नवत् शिखण्डः यस्य [illegible] भवत्या तव देव्यैव मम वार्त्तेति यावत्।

(प) इन्दुरिति। जनकतनयायाः जानक्याः विप्रलम्भे विरहे तस्य लङ्काभर्त्तुः दशाननस्य जगत्यां सम्यक् साम्यात् सादृश्यात् इति इत्थं बहवो विनोदाश्चित्तविनोदोपकरणाः जाताः, तथाहि इन्दुः सीतायाः वदनस्य सदृशः, नीलाम्भोजं नीलोत्पलं जानक्याः नेत्रवत् हृद्यं मनोहरं बिसकिसलयाः मृणालपल्लवाः मैथिल्याः हासस्येव भासो येषां तथोक्ताः।

विनोदान्तरं पुनरिदमद्य। यत्किल भगवतः पुरन्दरस्यादेशात्तत्रभवता भरताचार्येण सीतास्वयंवरचरितसंबद्धं नूतनं (स) नाटकमुपनिबद्धं सुरसदसि प्रयुक्तं च। तद्दर्शनाय दशाननेन द्रौहिणिर्भणितः। तेन चाप्सरोभिः सह पुत्रशतमपि लङ्कां पुरीं प्रति प्रहितमिति।

सुभेगा। ता एहि अह्मे वि णिअरज्जाहिट्ठाणं विंझगिरिं गदुअ णिविट्टणीडणिवासिणो दोहलयं संपादेह्म (५३) इति परिक्रम्य निष्क्रान्तौ।

(ह) मिश्रविष्कम्भकः।

ततः प्रविशति रावणः प्रहस्तश्च।

रावणः। सहर्षमभिनीय। हृदय! दिष्ट्या वर्द्धसे सीताप्रतिकृतिदर्शनेन। नेपथ्ये। जय जय त्रिजगत्पते! पौलस्त्य! सुखाय सायन्तनी सन्ध्या भवतु देवस्य। सम्प्रति हि।

माञ्जिष्ठीकृतपट्टवस्त्रसदृशः पादानयं पुञ्जयन्
यात्यस्ताचलचुम्बिनीं परिणतिं क्वैव द्युग्रामणीः।

(५३) तत एहि आवामपि निजराज्याधिष्ठानं विन्ध्यगिरिं गत्वा निविष्टनीडनिवासिनो दोहदं सम्पादयाव।

(स) उपनिबद्धं रचितं सुर-सदसि देवसभायां प्रयुक्तम् अभिनीतम्। द्रौहिणिः द्रुहिणस्य ब्रह्मणः पुत्रः, भगवान् नाट्याचार्यः भरत इत्यर्थः। तैः। भरताचार्येण च।

(ह) मिश्रविष्कम्भकः सङ्कीर्णविष्कम्भकः। अत्र उभयोर्नीचजातित्वात् नीचकल्पितत्वेन सङ्कीर्णत्वं तदुक्तं प्रागेव।

वात्यावेगविवर्त्तिताम्बुजरजश्छायमानः स्वयं
ज्योतिर्ज्यातिरितोऽप्ययं स भगवानर्णोनिधौ मज्जति॥१०॥ (च)

रावणः । दिष्ट्या गतं दिवसेन । भो भो प्रहस्त !
तदुच्यन्तां (क) वैरिञ्चा मुनयः प्रस्तूयतामिति ।

प्रहस्तः । नेपथ्याभिमुखमवलोक्य । भो भो भरतपुत्राः !
(ख) प्रेक्षणककृते कृतक्षणः दशग्रीवचक्रवर्त्ती तत्प्रस्तूयताम् ।

प्रविश्य कोहलः ।

कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने ।
नमः शृङ्गारबीजाय तस्मै कुसुमधन्वने ॥ ११ ॥ (ग)

रावणः । (घ) द्वादशपदेयं प्रवर्तिता नान्दी तत्प्रस्ताव-
यिष्यति ।

---

(च) माञ्जिष्ठैरिति । अयं स भगवान् महतां ज्योतिषां धाम्नः अधिपतिः रविः माञ्जिष्ठीकृतैः मञ्जिष्ठारागेण रञ्जितैः पतङ्गस्य सूर्यस्य तुल्यान् पादान् किरणान् पुञ्जयन् सङ्कोचयन् स्वैरं मन्दं मन्दम् अस्ताचलचुम्बिनीं परिणतिं याति गच्छति । इतोऽपि अयं क्षीण-ज्योतिः सन् स्वयं वात्यावेगेन विवर्त्तितैः चालितैः अम्बुजानां रजोभिः परागैः छायमानः अर्णोनिधौ जलनिधौ मज्जति । शार्दूलविक्रीडितं वृत्तम् ।

(क) वैरिञ्चाः ब्रह्मसुताः ।

(ख) प्रेक्षणककृते दर्शनार्थम् । कृतक्षणः कृतोत्सवः कृतोद्योग इत्यर्थः ।

(ग) कर्पूर इति । यः दग्धोऽपि भस्मीकृतोऽपि कर्पूर इव जने जने प्रतिपुरुषं शक्तिमान् तस्मै शृङ्गारबीजाय शृङ्गाररसनिदा-नाय कुसुमधन्वने कामाय नमः ।

(घ) द्वादशपदेति द्वादश पदानि सुबन्तादीनि यस्यां सा । प्रवर्त्तिता प्रयुक्ता ।

कोहलः । तत्रभवतः परमेष्ठिनो (ङ) मानसभुवः प्रथमपुत्रस्य नाट्यवेदनिर्भरताचार्यस्य कृतिरभिनवं सीतास्वयंवर इति नाटकं प्रयोक्तव्यम् । अतः कमलसम्भवोपदिष्टनाट्यवेदेन स्वपौरुषपरितोषितखण्डपरशुदर्शितलास्यताण्डवप्रपञ्चचतुरेण भवता दीयमानमवधानमभ्यर्थये ।

व्रतः ।

श्रवणैः पेयमनेकैर्दृश्यं दीर्घैश्च लोचनैर्बहुभिः ।
भवदर्थमिव निबद्धं नाट्यं सीतास्वयंवरणम् ॥ १२ ॥ (च)

रावणः । किं (छ) पुनरिदमसंस्तुतं प्रस्तूयते । कः पुनरसौ योऽयमत्र मयि रावणेऽपि सति सीतां स्वयं वृणुते ।

विहस्य । भवतु निरङ्कुशाः कविवाचः ।

कोहलः । समन्तादवलोक्य अहो राक्षसराजस्य त्रिभुवनशिरःशिखरायमाणा प्रभुशक्तिः । तथाहि ।

---

(ङ) मानसभुवः मानसजातस्य । प्रयोक्तव्यम् अभिनेतव्यम् । कमलसम्भवेन ब्रह्मणा उपदिष्टः शिक्षितः नाट्यवेदः नाट्यशास्त्रं यस्मै तेन । तथा स्वपौरुषेण परितोषितः यः खण्डपरशुः हरः तेन दर्शितेन शिक्षितेनेत्यर्थः लास्यताण्डवप्रपञ्चेन नाट्योत्सवविस्तारेण चतुरः तेन ।

(च) श्रवणैरिति । सीता स्वयंवरणं नाट्यम् अनेकैः श्रवणैः कर्णैः पेयं श्राव्यमित्यर्थः तथा बहुभिः दीर्घैः लोचनैः नेत्रैः दृश्यञ्च तस्मात् भवदर्थमिव त्वदर्थमिव निबद्धं रचितं तव बहुश्रोत्रलोचनत्वादिति भावः । आर्य्यावृत्तं, यस्याः प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि अष्टादश द्वितीये पञ्चदश चतुर्थके सार्य्या इति लक्षणात् ।

(छ) असंस्तुतं अप्रस्तुतम् । निरङ्कुशाः निर्बाधाः ।

ज्योतींषि प्रस्तुवन्ति प्रतिफलनवशान् मौक्तिकन्यासलक्ष्मी-
मिन्दोर्ज्योत्स्ना वितानीभवति भगवतां दर्पणत्वं रवीणाम् ।
सन्ध्यारागश्च रङ्गे रचयति सहसा सान्द्रसिन्दूररेखां
स्वेदच्छेदाय चैते दिशि दिशि मरुतस्तालवृन्तीभवन्ति ॥ १३ ॥ ज

भोभो लङ्केश्वरसभासद ! स तत्रभवान् द्रौहिणि-
रेवमाह ।

वाग्वैदर्भी मधुरिमगुणं स्यन्दते श्रोत्रलेह्यं
वस्तुन्यासो हरति हृदयं सूक्तिमुद्रानिवेद्यः ।
सद्यः सूते रसमनुपमप्रौढिजन्मा प्रसादः
संदर्भोऽयोरिति कृतधियां धाम गीर्देवतायाः । १४ ॥ झ

(ज) ज्योतींषीति । ज्योतींषि नक्षत्राणि प्रतिफलनवशात् प्रति-बिम्बनात् मौक्तिकानां न्यासस्य लक्ष्मीं श्रियं प्रस्तुवन्ति वितन्वन्ति । इन्दोः चन्द्रस्य ज्योत्स्ना वितानीभवति चन्द्रातप इव भवतीत्यर्थः । भगवतां रवीणां द्वादशात्मकत्वात् बहुवचनम् । दर्पणत्वं मुकुरकार्य-कारित्वम् । सन्ध्यारागश्च रङ्गे नाट्यशालायां सहसा सान्द्रस्य घनस्य सिन्दूरस्य रेखां रचयति । एते च मरुतः समीरणाः स्वेदच्छेदाय घर्मनिवारणाय दिशि दिशि तालवृन्तीभवन्ति तालवृन्तकार्यं साधयन्तीत्यर्थः ; सर्वत्र तव सन्तोषार्थमिति योज्यम् ।

(झ) वागिति । वैदर्भी विदर्भदेशीया वाक् रचनाविशेषः असमस्तिरल्प-समस्तिर्वा मधुरा रचना तथा । वैदर्भीति लक्षणात् श्रोत्राभ्यां कर्णाभ्यां लेह्यं पेयं मधुरिमगुणं माधुर्यरसं स्यन्दते वर्षति । सूक्तिः शोभना उक्तिरेव मुद्रा प्रत्ययसाधनं चिह्नविशेषः तेन निवेद्यः साध्यः सूचित इत्यर्थः वस्तुन इतिवृत्तस्य न्यासः कथनमिति यावत् हृदयं हरति आकर्षति । अनुपमया प्रौढ्या वैचित्र्येण जन्म यस्य तथोक्तः प्रसादः गुणविशेषः । तदुक्तं दर्पणे, चित्तं व्याप्नोति यः क्षिप्रं शुष्के-

ततश्च ।

सुवर्णबन्धविद्योति कुरुत श्रवणाश्रयम् ।
सच्छायमुल्लसद्वृत्तं काव्यं मुक्तामयं बुधाः ॥ १५ ॥ (ञ)

नेपथ्ये गीयते ।

प्रकटितरामाम्भोजः कौशिकवान् सपदि लक्ष्मणानन्दो ।
सुरचापदमनहेतोरयमवतीर्णः शरत्समयः ॥ १६ ॥ (ट)

कोहलः । कथमुपक्रान्तं (ठ) भरतपुत्रैः । यदियं राम-

स्वनमिवाऽलः । सः प्रसादः समस्तेषु रसेषु रचनासु चेति । सद्यः झटिति रसम् आस्वादं सूते जनयति इति इत्थं कृतधियां मार्जितमतीनां कवीनामित्यर्थः सन्दर्भस्य ग्रन्थस्य श्रीः गीर्देवतायाः वाग्देव्याः धाम आश्रयः । वृत्तमत्र मन्दाक्रान्ता ।

(ञ) सुवर्णेति । हे बुधाः ! सुवर्णानां शोभनानां वर्णानां बन्धेन विन्यासेन विद्योतन इति विद्योति शोभमानं सती छाया कान्तिरौज्ज्वल्यं यस्य तादृशम् उल्लसन्ति विराजमानानि सुव्यक्तानीति भावः वृत्तानि छन्दांसि यस्य तथाविधम् अतएव मुक्तामयं मुक्ताहारवत् मनोहरं काव्यं श्रवणाश्रयं कुरुत शृणुत इत्यर्थः ।

(ट) प्रकटितेति । प्रकटितं प्रकाशितं राम एव अम्भोजं कमलं यत्र तथोक्तः कौशिकवान् स विश्वामित्रः पेचकाकुलश्च वर्षासु तेषां गिरिगह्वरादिषु अवस्थितानां साम्प्रतं बहिर्गमनादिति भावः । लक्ष्मणम् आनन्दयतीति तथोक्तः । लक्ष्मणेन शुभचिह्नेन चन्द्रपद्मादिविकासरूपेण लोकानन्दजनकश्च । सुरचापस्य देवधनुषः हरकार्मुकस्येत्यर्थः इन्द्रधनुषश्च तस्य वार्षिकत्वादिति भावः । दमनहेतोः भङ्गार्थम् अनुदयार्थञ्च शरत्समयः अवतीर्णः उपस्थितः । आर्य्यावृत्तम् ।

(ठ) भरतपुत्रैः नटैः । प्रावेशिकी प्रवेशसूचिका ध्रुवा गीतिविशेषः ।

लक्ष्मणानुगतस्य भगवतो विश्वामित्रस्य प्रायोगिको भूत्वा। तदहमप्यनन्तरकरणीयाय सज्जो भवामि। इति निष्क्रान्तः।

प्रस्तावना।

ततः प्रविशति विश्वामित्रो रामलक्ष्मणौ च।

विश्वामित्रः। अहो (ड) तत्त्वाभिनिविष्टं मनो जनकस्य। यदा याज्ञवल्क्याद्यजुर्विज्ञानविभवः खल्वसौ। स हि चन्द्रमसोऽनुभावो यदस्य ग्रावाणोऽपि निस्यन्दन्ते।

रामलक्ष्मणौ। भगवन्नुपाध्याय। किमसौ वैदेहः (ढ) शुक्लान्यपि यजूंषि विज्ञाय याज्ञवल्क्यात् न वनाय प्रतितिष्ठते।

---

(ड) तत्त्वं परमात्मनि वेदे च। वेदस्तत्त्वं तपो ब्रह्म इत्यमरः। यजुरिति यजुषां विज्ञानस्य विभवः सामर्थ्यम्। अनुभावः प्रभावः। ग्रावाणः प्रस्तराः चन्द्रकान्तमणय इत्यर्थः।

(ढ) शुक्लानि श्वेतवर्णानि। यजूंषि द्विविधानि शुक्लानि कृष्णानि च। पुरा वैशम्पायनो मुनिः स्वशिष्यं याज्ञवल्क्यं प्रति चुक्रोध। ततः क्रुद्धेन गुरुणा मत्तोऽधीतानि देहीत्यभिहितः याज्ञवल्क्यः सर्वाणि अधीतानि यजूंषि उज्जगार। तेन तानि कृष्णवर्णानि अभवन्। भक्षयामासुश्च तानि तदानीमेव तित्तिरिपक्षिभिः। ततश्च तैत्तिरीयाणि तानि लोके विख्यातानि। यानि च ततः सूर्यमाराध्य तस्य सिद्धानि तानि शुक्लानि। तेन च मुनिना वैदेहाय तानि दत्तानीति गाथाख्यानमनुसन्धेयम्। वनाय प्रतितिष्ठते—अयं भावः शुक्लयजुषां ब्रह्मज्ञानप्रदत्वेन गृहाश्रमस्य निवर्त्तकत्वादिति।

विश्वामित्रः। वत्स दाशरथे राम! वत्स लक्ष्मण! स खलु राज्याश्रममहामुनिरित्थं (ण) समर्थयते।

स्थितिः पुण्येऽरण्ये सह परिचयो हन्त हरिणैः
फलैर्मेध्या वृत्तिः प्रतिनदि च तल्पानि दृषदः।
इतीयं सामग्री फलति हि विरक्त्यै स्पृहयतां (त)
वनं वा गेहं वा सदृशमुपशान्तस्य मनसः॥ १७॥

रामः। सत्यमिदं गोष्ठी। (थ) अनथाविधो न तथाविधरहस्यवेदी।

रावणः। (साक्षेपम्) अये! अयमसौ रामो दाशरथिर्यस्ताडकारिस्ताडकेयारिश्च? (मुनिमुद्दिश्य) अहो! (द) क्षत्रियब्राह्मणस्याभिचारे चातुर्यं यदस्मत्परिजनेऽपि जनितवानयमपि क्षत्रियडिम्भाडम्बरम्।

(ण) समर्थयते विचारयति।

(त) स्थितिरिति। पुण्ये पवित्रे अरण्ये स्थितिः वासः, हन्त इति हर्षसूचकमव्ययं हरिणैः सह परिचयः सङ्गः, फलैः वन्यैः प्रतिनदि च नदीभिश्च मेध्या पवित्रा वृत्तिः जीविका, दृषदः प्रस्तराः तल्पानि शय्याः, इति एवं रूपा इयं सामग्री उपकरणं स्पृहयतां वासनावतां विरक्त्यै विरागाय फलति प्रभवति हि, [illegible]-वत्वे उपशान्तस्य निस्पृहस्य मनसः वनं वा गेहं वा सदृशं तुल्यम्। छन्दोऽत्र शिखरिणी।

(थ) अनथाविधः अतद्रूपः अतज्ज्ञ इत्यर्थः। तथाविधं रहस्यं मर्म वेत्तीति तथोक्तः।

(द) अभिचारे मारणादिके आथर्वणिके कर्मणि इत्यर्थः। क्षत्रियब्राह्मणस्य आदौ क्षत्रियः पश्चात् ब्राह्मणः तस्य विश्वामित्रस्य इत्यर्थः। क्षत्रियडिम्भः क्षत्रियशिशुः। डिम्भस्य शिशोः डम्बरं चापल्यम्। अस्य मुनेरभिचारप्रभाव एव, न तु बालकस्येति भावः।

लक्ष्मणः। पुरोऽवलोक्य। अये (ध) सविधीकृतधनुषि स्वयंवरयात्राभुवि वर्त्तामहे। यतः।

क्वणत्कनककिङ्किणीमुखरतोरणैर्गोपुरै-
र्विचित्रमणिदीधितिस्फुरणसूचितेन्द्रायुधैः।
चकास्त्ययमवाङ्मुखीकृतनभश्चरोलोचनः
स्थितोन्नतनरेश्वरः किमपि मञ्चहर्म्योच्चयः॥ १८॥ (न)

विश्वामित्रः। समन्तादवलोक्य।

पुरविजयि तदेतत् कार्मुकं चन्द्रमौले-
रयमिह जनकानामग्रणीर्योगिनां च।
अयमपि च निमीनां धर्मबन्धुः पुरोधाः
सुरयजनसमुत्था मैथिली चेयमत्र॥ १९॥ (प)

(ध) सविधीकृतधनुषि सविधीकृतं सन्निधापितं धनुः यस्यां तथोक्तायां स्वयंवरयात्राभुवि स्वयंवरोत्सवक्षेत्रे।

(न) क्वणदिति। अवाङ्मुखीकृतानि दिदृक्षया न्यक्प्रसारितानि नभश्चरीणां खेचरीणां लोचनानि येन तथोक्तः, तथा स्थितः उन्नतः महान् नरेश्वरः नरपतिः यत्र तथाभूतः अयं मञ्चहर्म्योच्चयः पर्यङ्कशोभिताट्टालिचयः क्वणन्तीभिः कनककिङ्किणीभिः स्वर्णनिर्मितक्षुद्रघण्टिकाभिः मुखराः तोरणाः द्वारोपरिस्थितधनुराकाराः अवयवविशेषाः येषां तैः तथा विचित्राणां मणीनां दीधितिस्फुरणेन रश्मिविकासेन सूचितम् इन्द्रायुधं शक्रधनुः यैः तादृशैः गोपुरैः पुरद्वारैः पुरद्वारन्तु गोपुरमित्यमरः। चकास्ति राजते। पृथ्वी वृत्तमत्र।

(प) पुरेति। तदेतत् परिदृश्यमानमिति भावः चन्द्रमौलेः हरस्य पुरविजयि त्रिपुरध्वंसि कार्मुकं धनुः। इह अस्मिन् प्रदेशे जनकानां निमिकुलानां योगिनाञ्च अग्रणीः प्रवरः अयं विदेहराजः। अपिच अयं निमीनां धर्मबन्धुः धर्मकार्यसहायः पुरोधाः पुरोहितः शतानन्द

ततः प्रविशन्त्युपविष्टा यथानिर्दिष्टा जनकशतानन्दसीताः प्रतीहारी धात्रेयिका च ।

शतानन्दः । भोः सीरध्वज ! अद्य खलु ताडिततातका-कुटुम्बस्य रामभद्रस्य दर्शनेन (फ) दशरथशैशवमनुस्मारितोऽस्मि यत्तेनापि ।

अदृष्टशत्रुभेदेन गतेन सखिमित्रताम् ।
वज्रपाणेः कृतं राज्यमदैत्यमपदानवम् ॥ २० ॥ (ब)

जनकः । एवमेवैतत् । न (भ) खल्विक्ष्वाकूणामपेक्षित-वयःप्रक्रमो विक्रमः ।

शतानन्दः । (म) हेमप्रभे ! शम्भुधनुःसमीपवर्त्तिनीं कुरु राजपुत्रीं प्रवृत्ता स्वयंवरयात्रा ।

सीता धात्रेयिका तथा कुरुतः ।

विश्वामित्रः । वत्स ! लक्ष्मण ! यथानिर्दिष्टं जनका-

---

इत्यर्थः । अत्र च इयं सुरयज्ञसमुत्था यज्ञवेदिभवा मैथिली सीता च वर्त्तते इति सर्वत्र योज्यम् । वृत्तमत्र मालिनी ।

(फ) दशरथशैशवं दशरथस्य शैशवं बाल्यावस्थाम् ।

(ब) अदृष्टेति । अदृष्टः शत्रूणां भेदः विकाशः यस्य तादृशेन बालेनेत्यर्थः वज्रपाणेः इन्द्रस्य सखिमित्रतां तत्कामसख्यं गतेन प्राप्तेन सता राज्यं त्रैलोक्यरूपमिन्द्रराज्यम् अदैत्यम् अपदानवं दैत्यदानवशून्यमित्यर्थः । कृतम् ।

(भ) अपेक्षितेति अपेक्षितः वयसः क्रमः यस्मिन् तथोक्तः वयो नापेक्षते इति भावः ।

(म) हेमप्रभे ! धात्रेयिकासम्बोधनमिदम् । स्वयंवरयात्रा स्वयम्वरोत्सवः ।

समासन्नवर्त्तिनं (य) मञ्चकैकदेशमारोहय रामभद्रम्।
आरोह च स्वयं येन सीरध्वजोऽनुसन्धत्ते। (र)

रामलक्ष्मणौ तथा कुरुतः।

रामः। स्वगतम्। अये इयमसौ सीता यस्याः स्वयं भगवती वसुमती माता यागभूमिर्जन्ममन्दिरम् इन्दुशेखर-कार्मुकारोपणं च जामातृगुणः। सस्पृहं निर्वर्ण्य।

समन्तात् साभोगं न च कुचविभागाञ्चितमुरो
नितम्बः स्वां लक्ष्मीमभिलषति नाद्यापि लभते।
दृशो लीलामुद्रा स्फुरति च न चातिस्थितिमती
तदस्यास्तारुण्यं प्रथममवतीर्णं विजयते ॥ २१ ॥ (र)

विचिन्त्य। हंहो हृदय। इतः प्रभृति (ल) नूनमस्खलित-शासनः कुसुमायुधो भविता। पश्य।

(य) मञ्चकैकदेशं धनुषः सन्निधौ परिस्थितार्दिति भावः; अनुसन्धत्ते अनुनिरीक्षते इत्यर्थः।

(र) समन्तादिति। उरः वक्षः समन्तात् चतुर्दिक्षु साभोगम् आभोगः परिपूर्णता तेन सहितम्। आभोगः परिपूर्णतेत्यमरः। कुचयोर्विभागेन विरचनया न च अञ्चितं पूजितं न शोभितमित्यर्थः। नितम्बः स्वां निजां लक्ष्मीं शोभाम् अभिलषति वाञ्छति, अद्यापि न च लभते न प्राप्नोति। दृशोर्नेत्रयोः लीलामुद्रा विलासचिह्नं स्फुरति विकाशते, न च सा अतिस्थितिमती न बहुक्षणं तिष्ठतीत्यर्थः; सर्वत्र सीताया इति योज्यम्। तत् तस्मात् अस्याः सीतायाः प्रथम-मवतीर्णं तारुण्यं विजयते। वृत्तमत्र शिखरिणी।

(ल) अस्खलितशासनः अव्याहताज्ञः।

वहतु धनुरसङ्गादैशवं वैष्णवं वा
प्रहरतु च पृषत्कैः कौसुमैरायसैर्वा ।
तदपि मकरकेतुर्मूर्ध्नि धन्वीश्वराणा-
मियमिह युवभावं यावदङ्गीकरोति ॥ २२ ॥ (ख)

सम्यग्विभाव्य । तामिव वयोवस्थामलङ्करोति (ग) यस्या-मभिनवाकल्पविकल्पविभ्रमभङ्गिव्यग्रमानसा मन्ये दिवा-निशं तिष्ठतीति । यतः ।

उत्तालालकभञ्जनानि कबरीपाशेषु शिक्षारसो
दन्तानां परिकर्म नाविनहनं भ्रूलास्ययोग्याग्रहः ।
तिर्यग्लोचनवर्त्तितानि वचसां छेकोक्तिसंक्रान्तयः
स्त्रीणां श्लाघयति शैशवे प्रतिपदं कोऽप्येष केलिक्रमः २३ (घ)

---

(ख) वहतु इति । मकरकेतुः अनङ्गात् आसक्तरहितः धनुर्विद्या-भ्यासेन इत्यर्थः ऐशम् ईशसम्बन्धिनं वा वैष्णवं विष्णुसम्बन्धिनं धनुः वहतु, कौसुमैः कुसुममयैः आयसैः लौहमयैः वा पृषत्कैः शरैः प्रहरतु च, तदपि तथापि धन्वीश्वराणां धनुर्धराग्रणीनां मूर्ध्नि स्थितम् भविष्यतीति शेषः यावत् इदं मैथिली इह युवभावं तारुण्यम् अङ्गीकरोति । तावत् कामस्य न धनुर्धराग्रणीत्वं सिध्यति, सीतायास्तारुण्ये सत्येवेति भावः । वृत्तमत्र मालिनी ।

(ग) यस्यां वयोऽवस्थायाम् अभिनवानां नूतनानाम् आकल्पानाम् अलङ्काराणां विकल्पस्य रचनायाः यो विभ्रमः विलासः तस्य भङ्गी चातुर्ये व्यग्रम् आसक्तं मानसं यस्याः तादृशी । मन्ये तर्कयामि ।

(घ) उत्तालेति । उत्तालानाम् उन्नतानाम् अलकानाम् चूर्णकुन्तला-नाम् । अलकाश्चूर्णकुन्तलाः इत्यमरः । भञ्जनानि कौटिल्यानि रचनानि इत्यर्थः, कबरीपाशेषु केशबन्धनेषु शिक्षारसः शिक्षायाम् अनु-रागः । दन्तानां परिकर्म प्रसाधनं नीव्याः वस्त्रग्रन्थेः नहनं बन्धनं

रावणः । इयमसौ (स) हृदयविशल्यकरणौषधिर्मैथिली ; तदखिलनेत्रसम्पातनेन पश्याम्येनाम् । सुचिरं विभाव्य ।

धम्मिल्लो ललितः स्मितं शुचि दृशौ दीर्घे भ्रुवौ भङ्गुरे

पाशाभे श्रवसी विशालमलिकं माञ्जिष्ठपृष्ठोऽधरः ।

कण्ठो रुक्मरुचिः समुन्नतमुरः काम्यं च काञ्चीपदं

दृग्वृन्दानि ! चिरं विभज्य दशधा तन्मैथिलीं पश्यत २४ (छ)

आकाशे । (च) सीतामनुसन्धाय सोन्मादमिव ।

भ्रुवोर्लास्य नर्त्तनं भङ्गीविशेषः तस्य योग्यः अभ्यासः तस्मिन् यत्नः यत्नः आदर इति यावत् लोचनयोः नेत्रयोः तिर्य्यक् वर्त्तितानि कौटिल्येन चालितानि तथा वचसां वाक्यानां छेकोक्तिषु विदग्धवाक्येषु सङ्क्रान्तयः सङ्क्रमणानि छेको विदग्ध इति दर्पणकारः । एष एव-प्रायः कोऽपि अनिर्वाच्यः केलिक्रमः विलासक्रमः शोभा शैशवे बाल्ये गते इति शेषः प्रतिपलं प्रतिक्षणं आयाति आगच्छति । शार्दूलविक्रीडितं वृत्तम् ।

(ख) हृदयेति हृदयस्य विशल्यकरणं शल्योद्धरणं तस्य औषधि ।

(छ) धम्मिल्ल इति हे दृग्वृन्दानि नेत्रसमूहाः ललितः सुन्दरः ललितं त्रिषु सुन्दरमिति कोषः धम्मिल्लः बद्धकेशः शुचि विशुद्धं स्मितं दीर्घे विशाले दृशौ नेत्रे भङ्गुरे कुटिले भ्रुवौ, पाशाभे बन्धन-रज्जुसदृशे श्रवसी कर्णौ विशालम् अलिकं ललाटं मञ्जिष्ठया रञ्जितं माञ्जिष्ठं पृष्ठम् उपरिभागो यस्य स एवं अधरः । कण्ठः रुक्मरुचिः सुवर्णकान्तिः, समुन्नतं कुचयोः प्राग्भागादिति भावः उरः, काम्यं कमनीयं काञ्चीपदं रशनास्पदं नितम्ब इत्यर्थः मैथिल्या इति सर्वत्रा-न्वेति । चिरं दशधा उक्तप्रकारेण दशविधेन विभज्य विभागं कृत्वा तां मैथिलीं पश्यत अवलोकयत ।

(च) अनुसन्धाय निर्णय्य मनसा ध्यात्वा वा ।

तरङ्गय दृशोऽङ्गने ! पततु चित्रमिन्दीवरं
स्फुटीकुरु रदच्छदं व्रजतु विद्रुमः श्वेतताम् ।
क्षणं वपुरपावृणु स्पृशतु काञ्चनं कालिका-
मुदञ्चय मनाङ्मुखं भवतु च द्विचन्द्रं नभः ॥ २५ ॥ (क)

प्रतीहारी । समन्तादवलोक्य भूमिभागान् । यत् सत्यं (ख) निरुपमरूपसम्पदा जनस्य साहायकेन स भगवान् कुसुमायुधः किमपि कामिजनं विडम्बयति । यतः ।

एतेनाश्चैर्विहसितममी काकलीगर्भकण्ठो
लुभ्यच्चक्षुः प्रहितममुना साङ्गभङ्गः स्थितोऽयम् ।
हारस्याग्रं कलयति करेणैष हर्षाच्च किञ्चित्
स्त्रैणः पुंसां नवपरिगमः काममुन्मादहेतुः ॥ २६ ॥ (ग)

---

(क) तरङ्गयेति । हे अङ्गने सुन्दरि ! दृशः तरङ्गय, चपलय चित्रं मनोरमम् इन्दीवरं पततु सौभाग्यात् भ्रश्यतु । रदच्छदं अधरं स्फुटीकुरु प्रकटय, विद्रुमः प्रवालमणिः श्वेततां धावल्यं व्रजतु गच्छतु । क्षणं वपुः शरीरम् अपावृणु निरावरणं कुरु, काञ्चनं कालिकां मालिन्यं स्पृशतु । मनाक् ईषत् मुखम् उदञ्चय उन्नमय, नभः अन्तरीक्षं द्विचन्द्रं भवतु च । पृथ्वी वृत्तम् ।

(ख) निरुपमेति निरुपमा अतुल्या रूपसम्पद् यस्य तादृशस्य साहायकेन साहाय्येन । विडम्बयति प्रतारयति जयति वा ।

(ग) एतेनेति । एतेन कामिजनेन उच्चैर्विहसितम् । असौ कामिजनः काकलीगर्भकण्ठः मधुरस्वरकण्ठः भवतीति शेषः । अमुना कामिजनेन लुभ्यत् लालसं चक्षुः प्रहितम् । अयं कामिजनः साङ्गभङ्गः अङ्गभङ्गेन सह स्थितः तिष्ठतीत्यर्थः । एषः करेण हारस्य अग्रं हर्षात् उल्लासात् अव्यक्तं किञ्च किमपि कलयति स्पृशति । अतः पुंसां स्त्रैणः स्त्रीसम्बन्धी नवपरिगमः अभिनव-

किञ्चिदुच्चैः ।

शृणुत जनकशुल्कं क्षत्रियाः ! सर्व एते
दशवदनभुजानां कुण्ठिता यत्र शक्तिः ।
न मयति धनुरैशं यस्तदारोपणेन
त्रिभुवनजयलक्ष्मीर्मैथिली तस्य दाराः ॥ २१ ॥ (घ)

रावणः । सक्रोधहासम् । (ङ) अप्यलीककवे ! मूढ ! कथमिव करतललुलितकैलासशैलोस्रयाः कामं कलतारोपणेऽपि दशकण्ठबाहवः कुण्ठाः । किन्तु रे विचक्षणम्मन्य ! रुद्राद्रेस्तुलनम् इत्यादि पठति ।

हेमप्रभा । सहि ! जाणइ ! उवक्कन्ता (च) धणुज्जता ता सफलपरिस्समं होदु संपत्रं पञ्चावरिणो पिञ्चसहीए

( ५४ ) सखि । जानकि । उपक्रान्ता धनुर्यात्रा तत् सफलपरिश्रमं भवतु साम्प्रतं प्रजापतेः प्रियसख्या रूपनिर्माणनिपुणत्वम् । अस्तु च कृतार्थः कुसुमकोदण्डस्य कोदण्डयोग्यः परिश्रमः ।

---

समागमः कामं यथा तथा उन्मादहेतुः उन्मत्ततानिदानम् । वृत्तमत्र मन्दाक्रान्ता ।

(घ) शृणुतेति । हे सर्वे एते क्षत्रियाः ! यूयं जनकस्य मैथिलस्य शुल्कं पणं शृणुत । यत्र धनुषि दशवदनभुजानां शक्तिः कुण्ठिताः तत् ऐशं धनुः, यः आरोपणेन ज्यया सन्नमनेन नमयति, त्रिभुवनानां जयलक्ष्मीः विजयश्रीः मैथिली तस्य दाराः पत्नी भवितेति शेषः । वृत्तमत्र मालिनी ।

( ङ ) अलीककवे ! वृथाकवित्वक् !

( च ) धनुर्यात्रा कार्मुकमहोत्सवः । कुसुमकोदण्डस्य पुष्पधन्वनः कोदण्डयोग्यः कोदण्डस्य धनुषः योग्य अभ्यासः यत्र तादृशः ।

रूढगिम्भाणणिडवत्तणं अत्थ अ कदल्यां कुसुमकोषखण्डस्स कोषखण्डजोग्गो परिस्समो ( ५४ )।

प्रतीहारी । पुरोऽवलोक्य स्वगतम् । अये नरक ! एष प्रथममुपस्थितः । प्रकाशम् ।

कृष्णागुरुद्रुमतलेषु मृगाङ्गनाभि-
रामोदिगन्धमृगबन्धुषु गीतकीर्त्तिः ।
शौरेर्वराहवपुषो जगतीकलत्रे
प्राग्ज्योतिषाधिपतिरेष सुतः किलाभूत् । २८ ॥ (ज)

किञ्च ।

अस्योद्योगे प्रसर्पत्पटुपटहरवोद्रिक्तदानद्रवाणां
सन्नाहन्यासदर्पद्विगुणिततरसां वारणानां भरेण ।
निःशेषन्यञ्चदुर्वीवलयपरिणतिस्रस्तसन्नाहबन्धः
पृष्ठाष्ठील विलोलं कलयति कलया जर्जरं कूर्मराजः २९ (झ)

---

(क) नरकः नरकनामा असुरविशेषः ।

(ज) कृष्णेति । आमोदिनः सौरभवन्तः ये गन्धमृगाः कस्तूरीमृगाः तेषां बन्धुषु आश्रयेषु कृष्णागुरूणां द्रुमाणां तलेषु मृगाङ्गनाभिः गीताः कीर्त्तयो यस्य तथोक्तः एष प्राग्ज्योतिषाधिपतिः नरकः वराहवपुषः वराहमूर्त्तिधरस्य शौरेः नारायणस्य जगतीकलत्रे पृथिवीरूपायां भार्य्यायां सुतः अभूत् । वृत्तमत्र वसन्ततिलकम् ।

(झ) अस्येति । कूर्मराजः अस्य नरकस्य उद्योगे यात्रायां प्रसर्पन्तः मसृद्गच्छन्तः पटवः प्रकटाः ये पटहानां वाद्यभेदानां रवाः तैः उद्रिक्तः उत्तेजितः दानद्रवः मदजलस्रावः येषां तादृशानां सन्नाहस्य परिच्छदस्य न्यासेन विन्यासेन रचनया हर्षः यो दर्पः तेन द्विगुणिततरसां द्विगुणबलानां वारणानां हस्तिनां भरेण निःशेषं यथातथा न्यञ्चत् अवनमत् यत् उर्वीवलयं पृथ्वीमण्डलं तस्य

क्षेमप्रभा । (अ) दंसणमेत्तमहणिज्जकामरूवो कामरूवे-
सरो एसो ता इमस्सिं तरुणतापिच्छकन्तिसरिच्छच्छाआ
णिवडन्तु णिविडकडक्खविक्खेवा (५५) ।

सीता । जो सुरपडिपक्खो असुरो (५६) ।

क्षेमप्रभा । सहि ! मा उत्तम्म ण असुरजणमाणोवणिज्जं
सङ्करसरासणम् (५७) ।

प्रतीहारी । अहो प्रभावो भवानीवल्लभस्य यदमुनतो-
ऽमूनपि ।

दोर्दण्डचरितोद्दण्डो हरचिन्ताचमत्कृतः ।
कार्मुकारोपणायेव समुत्थाय पुनः स्थितः ॥ ३० ॥ (ट)

(५५) दर्शनमात्रमहणीयकामरूपः कामरूपेश्वर एषः । तदस्मिंस्तरुणतापिच्छकान्तिसदृशच्छाया निपतन्तु निबिडकटाक्षनिक्षेपाः ।

(५६) यः सुरप्रतिपक्षोऽसुरः ।

(५७) सखि ! मा उत्ताम्य नासुरजनारोपणीयं शङ्करशरासनम् ।

परिणत्या परिणामेन स्रस्तः शिथिलितः सन्नाहस्य परिकरस्य बन्धः रचना यस्य तथोक्तः सन् कलया अंशतः विलोलं चञ्चलं पृष्ठालोकं पृष्ठरूपम् अश्लीलं मांसोपचितरूपं रागविशेषं जर्जरं यथा तथा कलयति धत्ते । स्रग्धरावृत्तम् ।

(अ) दर्शनेति । दर्शनमात्रेण अवलोकनमात्रेणैव महनीयं स्पृहणीयं कामरूपं कमनीयं रूपं यस्य तादृशः । कामरूपेश्वरः प्राग्ज्योतिषाधिपतिः । तरुणस्य अभिनवस्य तापिञ्छस्य तमालस्य या कान्तिः, तत्सदृशी छाया कान्तिर्येषां तादृशाः निबिडा घनाः कटाक्षाणां निक्षेपाः ।

(ट) दोर्दण्डेति । दोर्दण्डयोः बाहुदण्डयोः चरितेन उद्दण्डः समुद्यतः अपि हरस्य चिन्तया शैवं धनुरिदम् इति चिन्तया चमत्कृतः

रावणः । धिग्भवन्तं (ठ) वासुन्धरेय ! धिक् । यदभिमानिनामारम्भस्यानिर्वहणममन्दो दुर्यशःकन्दः ।

प्रहस्त । देव ! न (ड) सर्वो दशाननः ।

प्रतीहारी । अन्यतोऽवलोक्य स्वगतम् । अये कथममौ (ढ) पाण्ड्यः । प्रकाशम् ।

यत्कीर्तिं मलयाद्रिचन्दनलताकुञ्जे भुजङ्गाङ्गनाः
श्रुत्वा तच्छबरीजनात् फणिपतेर्गायन्ति सङ्गीतिषु ।
पाण्ड्यः सोऽयमुदन्वदन्वयधुरा किञ्चान्यदस्य स्वयं
दातुर्मौक्तिककामधेनुरसमा सा ताम्रपर्णी सरित् ॥३१॥ (ण)

अपि च ।

र्थिकः नतु कार्मुकस्य धनुषः आरोपणाय समुत्थाय यत्र पुनः स्थितः ।

(ठ) वासुन्धरेय ! वसुन्धरानन्दन ! अभिमानिनां मानवतां वीराणाम् आरम्भस्य उद्योगस्य यत् अनिर्वहणम् अपरिसमाप्तिः सः अमन्दः महान् दुर्यशःकन्दः मूलम् ।

(ड) सर्वः सर्वः जनः इत्यर्थः ।

(ढ) पाण्ड्यः तदाख्यदेशनृपतिः ।

(ण) यत्कीर्त्तिमिति भुजङ्गानां नागानां अङ्गनाः भुजङ्गस्त्रियः मलयाद्रेः चन्दनलतानां कुञ्जे तच्छबरीजनात् तत्रत्यात् शबरीजनात् यस्य कीर्त्तिं श्रुत्वा फणिपतेः नागराजस्य वासुकेः सङ्गीतिषु गायन्ति सः अयं उदन्वदन्वयस्य सागरकुलस्य धुरा स्कन्धः पाण्ड्यः किञ्च अस्य अन्यत् अपरं वक्तव्यमिति शेषः सा प्रसिद्धा असमा अतुल्या ताम्रपर्णी सरित् स्वयं अस्य पाण्ड्यस्य दातुः दीनार्थं मौक्तिकानां कामधेनुः अभवदिति शेषः । शार्दूलविक्रीडितम् ।

वाचः सञ्जननं सतां रणविधिः कॢप्तामरीवल्लभो
नेत्रोत्सादकरं वपुर्मृगदृशां हस्तावचेयं यशः ।
इत्येतस्य निसर्गसुन्दरगुणस्यैतत्परं लाञ्छनं
पात्रापात्रविवेचनं न यदभूत् सर्वस्वदानेष्वपि ॥ १२ ॥ (त)

हेमप्रभा । (थ) कपोलकन्तिणिब्भच्छिअमहुअकुसुम-पण्डिमे ! पण्डुमेइणीणाहो एसो ता इमस्स वअणसअवत्ते णिवेसेसु संचरन्तछप्पअरिञ्छोलीसच्छाअं दिट्ठिं (५८) ।

---

(५८) कपोलकान्तिनिर्भर्त्सितमधूककुसुमपाण्डिमे ! पाण्डु-मेदिनीनाथ एष तदस्य वदनशतपत्रे निवेशय संचरत् षट्चरणकान्ति-सच्छायां दृष्टिम् ।

---

(त) वाच इति । वाचः वचनानि सतां सज्जनानां रञ्जनं रञ्जनसाधनमित्यर्थः रणविधिः संग्रामव्यापारः कॢप्ता विहिता अमरीणां देवाङ्गनानां वल्लभा येन तादृशः संग्रामहतानां स्वर्गगतत्वेन सुराङ्गनालाभादिति भावः । वपुः शरीरं मृगदृशां नारीणां नेत्रोत्सादकरं नयनरञ्जनम् । यशः हस्ताभ्याम् अवचेयम् उपार्जनीयं यशःसाध्यानां कर्मणां हस्तसाध्यत्वादिति भावः । इतीत्थं निसर्गेण प्रकृत्या सुन्दराः जनरञ्जनाः गुणाः यस्य तादृशस्य एतस्य पाण्ड्यस्य परं केवलम् एतत् लाञ्छनं कलङ्कः । कलङ्काङ्कौ लाञ्छनञ्च चिह्नमित्यमरः । यत् सर्वस्वदानेषु अपि पात्रापात्रविवेचनं न अभूत् अयं पात्रम् अयम् अपात्रमित्यविविच्यैव अनेन सर्वस्वं दीयते इति भावः । शार्दूलविक्रीडितं वृत्तम् ।

(थ) कपोलेति कपोलयोः कान्त्या निर्भर्त्सितः तिरस्कृतः मधुः सुन्दरः मधूककुसुमस्य पाण्डिमा धावल्यं यया तादृशि मैथिलि ! वदनमेव शतपत्रं पद्मं तस्मिन् सञ्चरतां षट्चरणानां भ्रमराणां या कान्तिः तस्याः सच्छायां सदृशीम् ।

सीता। जो (द) दविदचूडामणी (५९)।

प्रतीहारी। साकारसंवरणं विहस्य।

रभसादयमादाय कोदण्डं मदनद्विषः।

व्रीडाविनमितग्रीवो वल्गित्वा पुनरुज्झति॥ ३३॥ (ध)

रावणः। विहस्य। अहो द्रविडपतेः (न) सुसूचितस्त्यागकारणपरिग्रहः।

प्रतीहारी। अन्यतोऽवलोक्य स्वगतम्। अये अयं माहिष्मतीपतिः। प्रकाशम्।

अत्रेर्लोचनशुक्तिमौक्तिकमणेर्देवात्सुधादीधिते-
र्गोत्रे हैहयभूभुजां यदुकुलात्तस्मिन्नभूदर्जुनः।
दोःसीमन्तितनर्मदेन वपुषा पौलस्त्यदर्पद्रुहः
सूनुर्वाञ्छितमेव नादविजयस्तस्यैव यतुस्तपः॥ ३४॥ (प)

---

(५९) जो दविडचूडामणि.।

---

(द) द्रविडचूडामणिः द्रविडानां तद्देशीयानां चूडामणिः शिरोरत्नभूतः।

(ध) रभसादिति। अयं पाण्ड्यः रभसात् वेगात् हर्षाद्वा। रभसो वेगहर्षयोरिति कोषः। मदनद्विषः शम्भोः कोदण्डं कार्मुकम् आदाय गृहीत्वा व्रीडया लज्जया विनमिता ग्रीवा येन तथोक्तः सन् असामर्थ्यादिति भावः वल्गित्वा शैवं धनुरिति शेषः पुनः उज्झति त्यजति।

(न) सुसूचितः सूचितः। त्यागस्य धनुष इति शेषः यत् कारणं शैवधनुषो वन्द्यत्वरूपं तस्य परिग्रहः ग्रहणम्।

(प) अत्रेरिति। अत्रेः मुनेः लोचनमेव शुक्तिः तस्य मौक्तिकमणेः मुक्तारत्नभूतादित्यर्थः देवात् सुधादीधितेः चन्द्रात् हैहयभूभुजां

रावणः । भाः अरत्नत्रियप्रतीहार । (फ) दुरभिधायिनमेनं त्वां मृष्यतां नाम दशास्यः । वत्समेघनादनिन्दापदं पुनरयं न क्षमते चन्द्रहासः । इति खड्गमादित्सते ।

प्रहस्तः । देव ! मुनिजनप्रयोज्यं (ब) प्रेक्षणकमेतत् तदलमकाण्डसंरम्भेण ।

प्रतीहारी ।

यन्मेखला भवति मेकलशैलकन्या
वीतेन्धनो वसति यत्र च चित्रभानुः ।
तामेष पाति कृतवीर्ययशोवतंसां
माहिष्मतीं कलचुरेः कुलराजधानीम् ॥ ३५ ॥ (भ)

अपि च ।

---

हैहयाख्यक्षत्रियाणां यत् गोत्रं कुलम् उदगात् उदपादि, तस्मिन् अर्जुनः कार्त्तवीर्यः अभूत् । दोर्भ्यां बाहुभ्यां सीमन्तिता नर्मदा येन तादृशेन नर्मदायां जलकेलिं कुर्वता इत्यर्थः वपुषा शरीरेण पौलस्त्यस्य रावणस्य दर्पं द्रुह्यतीति तथाभूतस्य तस्य अर्जुनस्य सूनुः तनयः वार्त्तिको मेघनादस्य इन्द्रजितो विजयो येन तथाभूतः एष माहिष्मतीपतिः शलूनपः शलून् नपतीति तथोक्तः तन्नाम्ना ख्यात इत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ।

(फ) दुरभिधायिनं दुर्व्याहारिणम् । मृष्यतां सहताम् । वत्सस्य मेघनादस्य निन्दापदं कुत्साकारणम् ।

(ब) प्रेक्षणकं दृश्यं काव्यम् । अकाण्डे अनवसरे संरम्भः कोपः तेन ।

(भ) यन्मेखलेति । यस्याः मेखला काञ्ची मेकलस्य शैलस्य कन्या नर्मदा इत्यर्थः नर्मदायाः मेकलशैलादुत्पत्तेरिति भावः या नर्मदया परिखारूपेण वेष्टिता इति भावः । यत्र च चित्रभानुः वह्निः

अस्याहवे हरिचमूखुरखण्डितोर्वी-
पांसुप्रसारपरिपूर्तिभिया वहन्ति।
नेत्राणि नित्यविकचानि मरुत्तकण्यो
नीरन्ध्रपाणिपुटकुड्मपिधानवन्ति॥ ३६॥ (म)

हेमप्रभा। (य) गुरुअणदंसिअविणअणम्मदे! णम्मदेक्का-
लङ्करणमाहिस्सईणअरणरिन्दो एसो ता इमस्सिं तरल-
पह्मलधवलविसाला लाअसुरत्तणीला दिट्ठक्कु सअमेति
मत्तपेरन्ता (६०)।

(६०) गुरुजनदर्शितविनयनर्मदे! नर्मदैकालङ्करणमाहिष्मतीनगर-
नरेन्द्र एष तदस्मिंस्तरलपक्ष्मलधवलविशाला लावण्यरक्तनीला दृष्टयः
नह्येव नेत्रपर्यन्ताः।

नीतिज्ञः दक्षतरक्षितोऽपि वर्षति कार्तवीर्यमप्यनुहन्या रनिता
बहुत्वादिति भावः एष सत्कुलपः तत्तवीर्यस्य अर्जुनस्य यद्धः यथोक्तंमा
कीर्तिमालिनीं कलचुरे तदास्य राज्ञः कुलराजधानीं माहिष्मतीं
पाति रक्षति। इत्यमल वसन्ततिलकम्।

(म) अस्येति। अस्य सत्कुलपस्य आहवे युद्धे मरुतां देवाना
तरुणयः दुवत्यः स्त्रियः हस्त्यः हरिचमूनाम् अश्वसैनिकानां खुरैः
खण्डितायाः उर्व्याः पृथिव्याः पांसुना रजसा यः प्रसारः विस्तारः
तेन परिपूर्तिः परणात् या भीः भयं तया हेतुना नित्यविकचानि
सततोत्फुल्लानि नेत्राणि नीरन्ध्रयोः पाणिपुटयोः कुड्मलैव पिधा-
नम् आच्छादनं तद्वन्ति तदाच्छादितानीत्यर्थः वहन्ति धारयन्ति।
इत्यमल वसन्ततिलकम्।

(य) गुरुजनेति गुरुजनेषु दर्शितः विनयः यया सा गुरु
जनदर्शितविनया तथा नर्म केलिं ददाति इति नर्मदा सा सदायिनी-
त्यर्थः ततश्च गुरुजनदर्शितविनया च नर्मदा चेति विशेषणसमासे

सीता। जो खत्तिअकुलकुमारोवि भविअ अवमस्सिअपरसुरामपरक्कमो (६१)।

प्रतीहारी। स्वगतम्। अहो गर्वगरिमा हैहयकुलकुमारस्य। प्रकाशम्।

त्रैयम्बकेऽपि कोदण्डे दोर्दण्डमदडामरः।
अयमाद्रियते वीरो नारोपणपणक्रियाम् ॥ ३७ ॥ (र)

प्रहस्त। मूढ़! दशकण्ठायसे किन्तु न वन्दीकृतमहेन्द्रोऽसि।

प्रतीहारी। अन्यतोऽवलोक्य स्वगतम्। अये प्रयमितखेदिपतिः। प्रकाशम्।

सीतास्वयंवरनिदानधनुर्धरेण
दग्धात् पुरत्रितयतो विभुना भवेन।
खण्डं निपत्य भुवि या नगरी बभूव
तामेष चेद्यतिलकस्त्रिपुरीं प्रशास्ति ॥ ३८ ॥ (ल)

---

(६१) यः क्षत्रियकुलकुमारोऽपि भूत्वाऽवमानितपरशुरामपराक्रमः।

---

गुरुजनदर्शितविनयनर्मदा तत्सम्बुद्धौ। नेलपर्यन्ताः अपाकृष्टमानि इत्यर्थः।

(र) त्रैयम्बकेऽपीति। दोर्दण्डमदडामरः बाहुबलमदोद्धतः अयं वीरः त्रैयम्बकेऽपि कोदण्डे धनुषि आरोपकर्मैव पणः तस्य क्रियाम् अनुष्ठानं न आद्रियते।

(ल) सीतेति। सीतायाः स्वयंवरस्य निदानं यत् धनुः तस्य धरतीति धरः तेन विभुना भवेन महेशेन दग्धात् पुरत्रितयतः

किञ्च।

पाणिप्रस्थैर्वकुलसुमन:सौरभं यो मिमीते
दम्पत्यार्य: सुरतचरिते सौख्यसंख्यां करोति।
यश्च ज्योत्स्ना चुलुकपुटकै: काममाचामतीन्दो:
शक्त: स्तोतुं स खलु निखिलान्यस्य कीर्त्त्यद्भुतानि ॥३८॥ व)

हेमप्रभा। (आ अमन्दमअणमअदाणापअडहाले। हहा लसरी एसा ता इमं पेक्खु तिरिच्छदंसणलीलाणिमीलिअकालिमेण कालअसासिहण्डपंडिमेण दिट्ठिच्छडाकडक्खेण। ६२

६२ अमन्दमदनमददानपटभाले। ह्यार्येश्वर एष तदिमं प्रेक्षस्व तिर्यग्दर्शनलीलानिमीलितकालिम्ना कलितगणिखण्डपाण्डिम्ना दृष्टिच्छटाकटाक्षेण।

पताका तदात् कार्यं क्रियदिति शेष: निपत्य भुवि या नगरी बभञ्ज, एष चैद्यतिलक चेदिपति: तां त्रिपुरीं नाम नगरीं प्रशास्ति परिपालयति। छन्दस्तु वसन्ततिलकम्।

(२) पाणीति। य: पाणिप्रस्थै: पाणिरूपै: परिमाणविशेषै: वकुलसुमनसां वकुलपुष्पाणां सौरभं मिमीते आप्नोति, य: दम्पत्यो: स्त्रीपुंसयो: सुरतचरिते निधुवनलीलाया सौख्यसंख्यां सुखगणनां करोति, यश्च चुलुकपुटकै: गण्डूषपुटै: इन्दो: चन्द्रस्य ज्योत्स्ना कामं सम्यक् आचामति पिबति, स खलु एष अस्य चैद्यस्य निखिलानि कीर्त्त्यद्भुतानि अद्भुतकीर्त्तिरित्यर्थ: स्तोतुम् कीर्त्तयितुं शक्त: समर्थ:। पाणिभ्यां वकुलसौरभावधारणमिव, दम्पत्यो: सुरतसुखगणनमिव तथा गण्डूषेण समग्रचन्द्रकिरणपानमिव अस्य अद्भुतकीर्त्तिकथनं दुष्करमिति तात्पर्य्यार्थ:। छन्दस्तु मन्दाक्रान्ता।

(आ) अमन्देति अमन्देन घनेन मदनेन कामेन यो मद: विलास:

सीता । जो सो णम्मदालङ्किदमण्डलाहिवई (६३) ।

प्रतीहारी ।

मानी गिरिशकोदण्डमयमाकलयन् दृशा ।
सद्यो निभृतमुन्मार्ष्टि निजदोर्दण्डमण्डलम् ॥ ४० ॥ (च)

राघवः । अहो मेकलपतेः (स्वपरिच्छेदवैदग्धी ।

प्रतीहारी । अन्यतोऽवलोक्य स्वगतम् । अयमितः सिंहलेश्वरः । प्रकाशम् ।

यस्याम्बुधिः स भगवान् स च रोहणाद्रिः
कोशाविमौ मदनमन्त्रपदैर्वचोभिः ।
सोऽयं प्रियो यदि हसन् मृदु सिंहलेन्द्रः
क्रीडानिधानमनुराधपुरं धिनोति ॥ ४१ ॥ (ज)

किञ्च ।

(६३) य. स नर्मदालङ्कृतमण्डलाधिपति ।

तस्य दाने प्रकटं भालं ललाटं यस्यास्तत् सम्बुद्धौ । तिर्यग्दर्शनस्य अपाङ्गदर्शनस्य लीलया निर्मीलित कालिमा यस्य तादृशेन कलितः स्नातः शशिखण्डस्य कर्पूरचूर्णस्य पाण्डिमा धावल्यं यस्य तादृशेन ।

(च) मानीति । अयं मानी दृशा चक्षुषा गिरिशस्य हरस्य कोदण्डं कार्मुकम् आकलयन् पश्यन् सद्यः निभृतं निःशब्दं यथा तथा निजदोर्दण्डमण्डलं स्वं भुजदण्डमण्डलम् उन्मार्ष्टि भृशं मर्दति विविनक्ति ।

(छ) स्वस्य परिच्छेदः परिज्ञानं तस्य वैदग्धी चातुर्यम् ।

(ज) यस्येति । स भगवान् अम्बुधिः स च रोहणो नाम अद्रिः पर्वतः इमौ यस्य कोशौ धनागारे, समुद्रपर्वतरत्नानामयमधिकारीति भावः । सोऽयं सिंहलेन्द्रः मदनमन्त्रपदैः मदनस्य कामस्य मन्त्रपदैः

यस्योच्चण्डासिदण्डप्रहतिविदलितैर्वैरिवर्गैरलक्ष्य-
भ्रिमाल्लोद्भ्रान्तवीरप्रतिबलकलनाशून्यसंग्राममार्गे।
जीवत्संस्कारशक्त्या भुवि चरति चिरात् क्लृप्तबन्धं कबन्धे
दत्तो देवीभवद्भिः सह सुरकुसुमैरात्मनः साधुवादः॥४२॥ (ख)

हेमप्रभा। (क) असमन्तजोव्वणारोहणारम्भे! रोहणमा-
णिक्कगिरिणो परमेसरो एसो ता इमं णिज्झाअन्ती कुण
खणविसट्टकन्दोट्टणिउरम्बकरम्बिअ अम्बरद्धन्तं (६४)।

---

(६४) असमस्तयौवनारोहणारम्भे! रोहणमाणिक्यगिरेः परमेश्वर एष तदिमं निध्यायन्ती कुरु क्षणविशदकमलनिकुरम्बकरम्बित, मम्बरान्तम्।

---

कामस्य अनङ्गरूपैः वचनै' प्रिय' तथा मृदु मन्दं उक्त्वा क्रीडाभिधानं विलासागारम् अनुरोधपुरं तदाख्यनगरं धिनोति प्रीणाति रञ्जयतीत्यर्थः। वसन्ततिलकं वृत्तम्॥

(ख) यस्येति। यस्य उच्चण्डैः तीक्ष्णैः असिभिः दण्डैः तलवारैः या प्रहतिः प्रहारः तया विदलितैः छिन्नैः अतएव देवीभवद्भिः देवत्व प्राप्तैः वैरिवर्गैः शत्रुसङ्घैः भुवि रणाङ्गने छिन्नैः अतएव उद्भ्रान्तानां वीराणां प्रतिबलानां प्रतिभटानां कलनया आगमनेन शून्यः संग्राममार्गः रणपद्धतिः येन तादृशे स्वबन्धे अर्थात् कलेवरे चिरात् क्लृप्तः छिन्नः बन्धः बाधा यस्मिन् तथाभूतम् निर्बाधमित्यर्थः यथा तथा चरति सति जीवत् संस्कारशक्त्या जीवितस्य रागेण सुरकुसुमैः सह आत्मनः साधुवादः आत्मनः कबन्धात् युधि विचरतो दृष्ट्वा वैरिणः पुष्पवर्षं स्तुवन्तिस्म इति भावः। स्रग्धरा वृत्तम्।

(क) असमस्तेति असमस्तः असम्पूर्णः यौवनारोहणस्य तारुण्याविर्भावस्य आरम्भः यस्याः तत्सम्बुद्धौ। निध्यायन्ती पश्यन्ती क्षणं विशदानां विकचानां कमलानां निकराणां मालाभिः करम्बितम् अम्बरस्य अन्तरीक्षस्य अन्तं तम् ऊर्द्ध्वभागमात्रम्।

गीत । ओ (ख) कोत्थुहसगोत्तरअणरइदसेहरालङ्किद-सिरुद्देसो (६५)।

प्रतीहारी। स्वगतम्। (ग) अनिश्चिन्वता चित्तेन मन्दोद्यम इवायम्। प्रकाशम्।

अस्य चण्डीशकोदण्डे स्वदोर्दण्डे च भूपतेः।
गतागतशतं सख्यं विदधाते विलोचने॥ ४३॥ (घ)

रावणः। सिंहलपते! किमिदं मंदिष्यते न च सन्देह-देहो * वीरव्रतनिर्वाहः।

प्रतीहारी। अन्यतोऽवलोक्य स्वगतम्। कथं मथुरानाथः। प्रकाशम्।

हन्तुं रिपूनवतरिष्यति शार्ङ्गपाणिः
कंसप्रलम्बवृषकेशिमुखानिहेति।

---

(६५) यः कौस्तुभसगोत्ररत्नरचितशेखरालङ्कृतशिरउद्देशः।

---

(ख) कौस्तुभस्य नारायणोरःस्थितस्य रत्नस्य सगोत्राणि सदृशानि यानि रत्नानि तैः रचितेन गुम्फितेन शेखरेण शिरोदाम्ना अलङ्कृतः शोभितः शिरसः उद्देशः भागः यस्य तादृशः।

(ग) अनिश्चिन्वता यत्नः स्यात् न वेति सन्दिहता इत्यर्थः चित्तेन मनसा मन्दः शिथिलः उद्यमो यस्य तथाभूत इव।

(घ) अस्येति। अस्य भूपतेः विलोचने नेत्रे चण्डीशस्य हरस्य कोदण्डे धनुषि स्वस्य दोर्दण्डे बाहुदण्डे च गतागतशते यातायातशते सख्यं मित्रत्वं विदधाते कुर्वाते क्षणं शैवं धनुः प्रति क्षणं स्वभुजबलं प्रति मनो यातीति भावः।

* सन्देहदेहः सन्देहे संशये देहो यस्य तादृशः, वीरा न सन्दिहन्तीति भावः।

(ङ) हन्तुमिति। यस्यां शार्ङ्गपाणिः कृष्णः कंसप्रलम्बवृषकेशिमुखान् रिपून् हन्तुम् अवतरिष्यति इति पुराणकवेः व्यासस्य वचांसि भविष्यद्-

यस्यामशुश्रुम पुराणकवेर्वचांसि
तामेष पार्थिवपतिर्मथुरां प्रशास्ति ॥ ४४ ॥ (ङ)

किञ्च ।

दृष्ट्वा व्योमनि बालमभ्रशकलं लेह्यं जगच्चक्षुषां
नीपानां कुसुमावतंसजननं नृत्यप्रदं बर्हिणाम् ।
यात्रावेशहरं जिगीषुमनसामस्य स्फुटत्कञ्चुकः
कान्ताभिः सुहृदां द्विषां च युगपत् प्राप्तः प्रमोदोत्सवः ॥ ४५ ॥ (च)

हेमप्रभा । णिसग्गसव्वङ्गमहुरे ! महुरेक्कालङ्करणं एसो ता इमस्सिं णिवेसम्र दिट्ठिं जइ तुमं (छ) णिरुवमरूवरेहादंसणुक्कण्ठाविसंठुलमाणसासि (६६) ।

---

(६६) निसर्गसर्वाङ्गमधुरे मधुरैकालङ्करणमेष । तदस्मिन्निवेशय दृष्टिं यदि त्वं निरुपमरेखादर्शनोत्कण्ठाविसंष्ठुलमानसाऽसि ।

---

पुराणवाक्यानि इत्यर्थः इह जगति अशुश्रुम श्रुतवन्तः वयमिति शेषः एष पार्थिवपतिः तां मथुरां प्रशास्ति । वसन्ततिलकं वृत्तमत्र

(च) दृष्ट्वेति । व्योमनि आकाशे जगच्चक्षुषां लेह्यं पेयं नीपानां कदम्बानां कुसुमावतंसजननं पुष्पशोभावहं बर्हिणां शिखिनां नृत्यप्रदं अतएव यात्रायाः युद्धोद्यमस्य वेशहरं परिच्छदापनायकम् उद्दीपकत्वादिति भावः । बालं नवं अभ्रशकलं मेघखण्डं दृष्ट्वा अस्य जिगीषुमनसां जयार्थिनामित्यर्थः सुहृदाम् द्विषाञ्च शत्रूणां कान्ताभिः कामिनीभिः युगपत् समकालं स्फुटन् कञ्चुको एकत्र वारवाणः अन्यत्र स्तनावरणं यस्मिन् तादृशः प्रमोदोत्सवः आनन्दोत्सवः प्राप्तः उपस्थितः । अत्र वर्षास्वेव युद्धनिवृत्तिरिति भावः । शार्दूलविक्रीडितं वृत्तम् ।

(छ) निरुपमेति निरुपमस्य अतुल्यस्य रूपस्य रेखायाः रचनायाः दर्शनेन या उत्कण्ठा तया विसंष्ठुलम् मानसं यस्याः तादृशी ।

सीता । जो विन्दावणविहारदुल्ललिओ (६७) ।

प्रतीहारी । स्वगतम् । (ज) कथमधिगतकोदण्डपाण्डित्यो-ऽप्ययमुदास्ते । प्रकाशम् ।

आरोपयतु वा मा वा राजैष हरकार्मुकम् ।
सूच्यतेऽस्य धनुर्ज्याया प्रकोष्ठकिणमालया ॥ ४६ ॥ (झ)

रावणः । सोपहासम् । कथं मधुराधिपतिर्महाधन्वी न सुरचापारोपणकर्मणि परमप्रवीणः ।

प्रतीहारी । अन्यतोऽवलोक्य स्वगतम् । अयमितोऽवन्ति-पतिः । प्रकाशम् ।

निर्वाणैकरुचिर्भवस्य भगवांस्त्रैलोक्यलीलागुरु-
र्देवोऽसौ मकरध्वजस्य वसता विश्रान्तवैरव्रतम् ।
यस्यामाश्रमतृष्णयैव नगरीमेकामनीं तामसीं
शिप्राम्भःपरिखावतीं नरपतिः सत्यव्रतो रक्षति ॥४७ (ञ)

(६७) यो वृन्दावनविहारदुर्ललितः ।

---

(ज) अधिगतेति अधिगतं कोदण्डेषु धनुःषु पाण्डित्यं येन तादृ-शोऽपि धनुर्विद्याविशारदोऽपीत्यर्थः उदास्ते उदासीनस्तिष्ठतीत्यर्थः ।

(झ) आरोपयत्विति । एष राजा हरकार्मुकम् आरोपयतु वा मा न आरोपयतु वा इत्यर्थः, अस्य तु प्रकोष्ठस्य मणिबन्धोपरिभागस्य किणमालया कलङ्कश्रेण्या धनुर्ज्याया धनुर्ज्यालनाभ्यासः सूच्यते ज्ञायते ।

(ञ) निर्वाणेति । यस्यां नगर्याम् आश्रमतृष्णया वासलोभेन निर्वाणे अपवर्गे एका केवला रुचिर्यस्य तादृशो भगवान् भवः शम्भुः त्रैलोक्यस्य लीलासु गुरुः शिक्षाचार्यः असौ देवः मकरध्वजः स्य विश्रान्तं वैरव्रतं शत्रुभावो यस्मिन् तत् यथा तथा वसतः, या

किञ्च।

वीरश्रीवेणिबन्धो भुजभुजगफणा भ्रूलता भ्रूपताका
देवस्य प्रेतभर्त्तुः पृथुतरपृतनादीर्घिनीवीचिलेखा।
क्रोधाग्नेर्धूमवर्त्तिः सुरयुवतिदृशां शृङ्खलादाम दीर्घं
लक्ष्मीलीलाकटाक्षः प्रतिसमरमभूदस्य जैत्रः कृपाणः ४८(ट)

हेमप्रभा। (ठ) रहवरणचलनिअम्बद्दे सविसाले।
विसालेक्कमाभिलासा एसा वा कोरउ इमस्सिं कुवलअ-
मण्डलतण्डवपण्डिअपत्तलबभूलदालङ्किदा दिट्ठी (६८)।

---

(६८) रथवरणनितम्बोद्देशविशाले! विशालैकमाभिलाष एष तत् कीर्यतामस्मिन् कुवलयमण्डलताण्डवपण्डितपत्रलभ्रूलताल-ङ्कृता दृष्टिः।

---

अपवर्गविलासयोरेकायतनमिति भावः अथ सत्यव्रतोनाम नरपतिः शिप्राया अम्भ एव परिखा तद्वतीं तद्वेष्टिताम् एकासनीम् एकम् अद्वि-तीयम् आसनं सिंहासनं यस्यां तादृशीम् एकाधिपतिकामिति भावः ता नगरीं रक्षति पालयति। शार्दूलविक्रीडितं वृत्तम्।

(ट)। वीरेति अस्य जैत्रः जयसाधनं कृपाणः असिः प्रतिसमरं वीरस्य या श्रीः लक्ष्मीः तस्याः वेणिबन्धः केशपाशः भुज, एव भुजगः पन्नगः तस्य फणा, भ्रूलता भ्रूपताका भ्रूकौटिल्यरूपा पताका, देवस्य प्रेतभर्त्तुः यमस्य पृथुतरा अतिमहती या पृतना सा एव दीर्घिनी नदी तस्याः वीचिलेखा तरङ्गमाला, क्रोधाग्नेः धूमवर्त्तिः धूमाकारा दशा, सुरयुवतिदृशां दीर्घं शृङ्खलादाम तथा लक्ष्म्याः लीलाकटाक्षः विभ्रमापाङ्गदर्शनम् अभूत्। स्रग्धरावृत्तम्

(ठ) रथेति। रथवरणवत् चक्रवत् विशालः नितम्बोद्देशः यस्याः तत्सम्बुद्धौ।

सीता। जो (ढ) तिउरदहणट्ठाणट्ठिअमहाकालणामन्तरिअखण्डपरसुणामपवित्तिअणिहालवट्टो (६८)।

प्रतीहारी। स्वगतम्। कथं धनुरारोपणपराङ्मुखोऽयम्।

प्रकाशम्।

नेत्रत्रिभागमात्रेण निरीक्ष्य हरकार्मुकम्।
एष स्थितो वलत्कण्ठः सुहृदालापतत्परः॥ ४८॥ (ण)

रावणः। चण्डी कुशस्थलीनाथ! (त) कोऽयमनाकलितकालपरिणामजर्जरेऽपि धनुष्यनव्यवसायस्तव।

प्रतीहारी। अन्यतोऽवलोक्य। स्वगतम्। कथमयं क्रथकैशिकाधिपतिः। प्रकाशम्।

---

(६८) यस्त्रिपुरदहनस्थानस्थितमहाकालनामान्तरितखण्डपरशुनामपवित्रितनिभालपट्टः।

---

विशाल एकः अद्वितीयः साभिलाषः सतृष्णः। कीदृशं तं विज्ञिप्यनाम्। तथा मण्डलताण्डवेन मण्डालाकारेण यत् ताण्डवं नर्त्तनं तस्मिन् यत् पाण्डित्यं चातुर्य्यं तत्र पल्लवा पल्लवती पल्लविनी सविस्तारा इत्यर्थः या भ्रूलता तया अलङ्कृता शोभिता।

(ढ) त्रिपुरेति त्रिपुराणां दहनस्य यत् स्थानं यस्मिन् स्थित त्रिपुरं ददाहेति भावः, तत्र स्थितः महाकालनाम्ना अन्तरितः यः खण्डपरशुः हरः महाकालाख्यो हर इत्यर्थः तस्य नाम्ना पवित्रितः निभालपट्टः भालदेशः यस्य तथोक्तः शिवनामाङ्कित ललाट इत्यर्थः।

(ण) नेत्रेति। एषः नृपतिः नेत्रत्रिभागमात्रेण हरकार्मुकं निरीक्ष्य वलन्ती प्रचला कण्ठा उत्कण्ठा यस्य तथोक्तः तथा सुहृद्भिः सह आलापे तत्परः सन् स्थितः।

(त) अनेति। अनाकलितः अविवेचितः अनिश्चित इत्यर्थः

वाग्देवता वसति यत्र रसप्रसूति
लीलास्पदं भगवतो मदनस्य यच्च ।
प्रेङ्खद्विदग्धवनिताञ्चितराजमार्गं
तत्कुण्डिनं नगरमेष विभुर्बिभर्त्ति ॥ ५० ॥ (थ)

किञ्च ।

रूपाधारैकवेधाः कुलगृहमुचितं चातुरीचेष्टितानां
कन्दर्पाह्वानविद्या हृदयहृतिकरो रागिणां मुक्तिहेतुः ।
श्रुत्वैतन्नाम नष्टेष्वरिषु रणभुवो दिव्यभावाश्रमेषु
व्यर्थः स्वःसुन्दरीणां वरवरणविधौ वेषलाभो बभूव ॥५१॥ (द)

---

कालस्य परिणामो यस्य तादृशे आपणे जर्जरे अतिजीर्णेऽपि । अन-ध्यवसायः अनुद्योगः ।

(थ) वाग्देवतेति । यत्र रसस्य प्रसूतिः उत्पत्तिस्थानं वाग्-देवता सरसा सरस्वती वसति । यच्च स्थानं भगवतो मदनस्य लीला-स्पदं विलासभवनम् । एष विभुः नृपः प्रेङ्खन्तीभिः सङ्केतं गच्छ-न्तीभिः विदग्धवनिताभिः अञ्चितः पूजितः अलङ्कृतः इत्यर्थः राजमार्गो यस्य तादृशं तं कुण्डिनं देशं बिभर्त्ति पालयति । वृत्तमत्र वसन्ततिलकम् ।

(द) रूपेति । अयं नृपतिः रूपस्य आधारः आश्रयः एकः केवलः वेधा ब्रह्मा यस्य तादृशः, चातुरीचेष्टितानां विलासव्यापाराणाम् उचितं कुलगृहं आवासस्थानम् । कन्दर्पस्य आह्वाने विद्याः, हृदय-हृतिकरः मनोहरः तथा रागिणां वासनावतां मुक्तिहेतुः, अपवर्गोप-देशकः शोभापवर्गयोरेकाधारोऽयमिति भावः एतस्य नाम श्रुत्वा रणभुवः संग्रामक्षेत्रात् अरिषु शत्रुषु दिव्यभावाश्रमेषु देवत्वं प्राप्नु-मगच्छत्सु अतएव नष्टेषु पलायितेषु सत्सु स्वःसुन्दरीणां सुर-नारीणां वरवरणविधौ वेषलाभः सज्जा इत्यर्थः व्यर्थः विफलो बभूव । स्रग्धरावृत्तम् ।

हेमप्रभा। सिणिद्धसामलघणकुडिलकुन्दले! कुन्दलेस्सरो एसो ता इमस्स दंसणेण सहलीकुरु (ध) पसइसमप्पमाणं णअणणिम्माणम् (७०)।

सीता। जो मरहट्ठवरिट्ठो (७१)।

प्रतीहारी। स्वगतम्। अये (न) प्रकृतिपराधीनं चरितमेतस्य प्रकाशम्।

हरचापसमारोपे प्रेरितोऽप्यनुजीविभिः।
स्वरूपं वर्णयत्येव कुलविद्याविशारदम् ॥ ५२ ॥ (प)

राघवः। अति हि नाम शैशवाचितमाचरितमनेन।

प्रतीहारी। अन्यतोऽवलोक्य। स्वगतम्। कथमयं काञ्चीपुरपरमेश्वरः। प्रकाशम्।

देवस्य मन्मथजितो नयनानलोत्थे
जातः कुले कुलवतां प्रवरः कुमारः।

---

(७०) स्निग्धश्यामलघनकुटिलकुन्तले! कुन्तलेश्वर एष तदस्य दर्शनेन सफलीकुरु प्रसृतिसमप्रमाणं नयननिर्माणम्।

(७१) यो महाराष्ट्रवरिष्ठः।

---

(ध) प्रसृतिसमप्रमाणं प्रसृतेः वितस्तिकायाः समं प्रमाणं परिमाणं यस्य तादृशम् अतिविशालमित्यर्थः।

(न) प्रकृतिपराधीनं प्रकृत्या स्वभावेन पराधीनम्।

(प) हरेति। एष हरस्य चापसमारोपे अनुजीविभिः प्रेरितोऽपि कुलविद्यासु अस्त्रविशेषशिक्षासु विशारदं स्वरूपं आत्मानं वर्णयति न तु कार्य्यतः प्रकटयतीति भावः।

(फ) देवस्येति। मन्मथजितो मदनारेः देवस्य हरस्य नयनानलोत्थे कुले वंशे जातः कुलवतां कुलीनानां प्रवरः काञ्च्याः पुरः अयं

कृतत्त्वत्रिलोकभवनाभरणैर्यशोभिः
काञ्च्याः पुरः पतिरयं पुरतश्चकास्ति ॥ ५३ ॥ (क)

किञ्च ।

वीराश्चण्डासिदण्डप्रहरणसुहृदः सम्मुखं सम्पतन्तो
ये जाताः पात्रमाजिष्वनिमिषसुमनोदामदानोत्सवस्य ।
अस्य प्रेङ्खत्क्षुरप्रप्रहृतिभिरमरीभूय तैरेव भूयः
शेषाणां मूर्ध्नि मुक्ताः सुरकुसुमहावृष्टयः पुष्टभृङ्गाः ५४ (ब)

हेमप्रभा । (भ) णवकञ्चनकाञ्चिदामालङ्किदकाञ्चिदेसे !
काञ्चिदेसेस्सरो एसो ता इमस्स वअणहरिणङ्के विसम्मउ
दस्सिअमअणबाणसिट्ठो दिट्टी । (७२ ) ।

---

(७२) नवकाञ्चनकाञ्चिदामालङ्कृतकाञ्चिदेशे ! काञ्चिदेशेश्वर एष
तदस्य वदनहरिणाङ्के विश्राम्यतु दर्शित मदनबाणसृष्टिर्दृष्टिः ।

---

कुमारः पतिः पुरतः अग्रतः कृत्स्नस्य त्रिलोकभवनस्य आभरणैः
अलङ्कारभूतैः यशोभिः चकास्ति शोभते । छन्दस्तत्र वसन्ततिलकम् ।

(ब) वीरेति । ये वीराः चण्डाः तीक्ष्णा असिदण्डाएव प्रहरण-
सुहृदः प्रहारमित्राणि येषां तथोक्ताः असिसहाया इत्यर्थः आजिषु
संग्रामेषु सम्मुखं पतन्तः सन्तः अनिमिषाणां देवानां यत् सुमनोदाम
पुष्पमाल्यं तस्य दानोत्सवस्य पात्रं जाताः तैरेव अस्य काञ्चीपतेः
प्रेङ्खद्भिः क्षुरप्रैः याः प्रहृतयः प्रहाराः ताभिः अमरीभूय देवत्वं
प्राप्य भूयः शेषाणां निहतावशिष्टानां वीराणां मूर्ध्नि पुष्टा भृङ्गा
यासु ताः सभृङ्गाः सुरकुसुममहावृष्टयः मुक्ताः विक्षिप्ताः । स्रग्धरावृत्तम्

(भ) नवेति । नवैः काञ्चनैः निर्मितं यत् काञ्चिदाम रशना तेन
अलङ्कृतः काञ्चिदेशः नितम्बदेशः यस्यास्तत्सम्बुद्धौ । वदनहरिणाङ्के
वदनचन्द्रे ।

सीता । जो (म) चन्दसेहरप्पसादीकिदकुलक्कमागदवु-सहलञ्छणो ( ७२ ) ।

प्रतीहारी । स्वगतम् । (य) कथमप्रमाणीकृतेन्द्राणीशाप इवायम् । प्रकाशम् ।

चापारोपमपास्यैव स्थितः सीतास्वयंवरे
दृश्यते भूभुजां नेत्रै रेष रोषकषायितैः ॥ ५५ ॥ (र)

रावणः । सक्रोधम् । रेरे (ल) निर्मर्याद । स्वयंवरसमयं विभिन्दन्नेष न भवसि । विभाव्य सलज्जम् । नन्वेष भवसि ।

प्रहस्तः । विहस्य ।

अस्य स्वयंवरविभेदसमुत्सुकस्य
दृष्ट्वा स्फुरत्पुलकपक्ष्मलमङ्गमङ्गम् ।

---

( ७२ ) यश्चन्द्रशेखरप्रसादीकृतकुलक्रमागतवृषभलाञ्छनः ।

---

(म) चन्द्रेति । चन्द्रशेखरेण हरेण प्रसादीकृतः कुलक्रमागतः वृषभ एव लाञ्छनं चिह्नं यस्य तादृशः । यश्चन्द्रशेखरप्रसादलब्धम् प्रभाववन्तम् वृषभमेकं रक्षतीति भावः ।

(य) अप्रमाणीकृतेति । अप्रमाणीकृतः अगणितः इन्द्राण्याः शच्याः शापो येन तथाभूतः स्वयंवरक्षोभकारिणः शच्या विनाश्यन्ते इति श्रुतिमगणयन्निवेति भावः ।

(र) चापेति । एष नृपतिः सीतास्वयंवरे चापारोपं कार्मुकारोपणं अपास्यैव विहायैव भूभुजां राज्ञां रोषकषायितैः क्रोधकलुषितैः स्वयंवरविघ्नकरणक्षोद्योगादिति भावः नेत्रैः दृश्यते सर्वेषां क्रोधभाजनमेष इति भावः ।

(ल) निर्मर्याद ! स्थित्यनभिज्ञ ! स्वयंवरस्य समयं नियमं भनक्षि लोपयसि ।

(व) अस्येति । स्वयंवरस्य विभेदे भङ्गे समुत्सुकस्य अस्य राज्ञः

प्रत्युल्लसन्ति च रुषो विलयं च यान्ति
प्रेक्षाप्रपञ्चमनुसृत्य दशाननस्य ॥ ५६ ॥ (व)

प्रतीहारी । अन्यतोऽवलोक्य स्वगतम् । कथमयं (श) वीर-शृङ्गारललितलम्पटो लाटेश्वरः । प्रकाशम् ।

दैवात् कुशेशयभुवा भुवनैकबन्धोः
संध्याविधौ कलयतश्चुलुकं जलस्य ।
यो जातवान् प्रतिमया स मुनिश्चुलुक्य-
स्तस्यान्वयैकतिलको नृप एष लाटः ॥ ५७ ॥ (ष)

किञ्च ।

हेलावल्गितकण्ठनालविलसन्मुक्तालताऽलङ्कृतां
मालां संदधतीभिरेकविजयी सोऽयं द्विषां धामसु ।
शृङ्गारग्रहकृष्टकेतकदलस्पर्धावतीनां दृशां
वारस्त्रीभिरदभ्रविभ्रमवशाद्दास्येऽपि पात्रीकृतः ॥ ५८ ॥ (स)

स्फुरद्भिः पुलकैः लोमाञ्चैः पक्ष्मलं व्याप्तं अङ्गं अङ्गं प्रत्यङ्गं दृष्ट्वा दशाननस्य रावणस्य रुषः क्रोधाः प्रत्युल्लसन्ति आविर्भवन्ति, प्रेक्षाप्रपञ्चम् दृश्यकाव्याभिनयं अनुसृत्य विविच्य विलयं विनाशं यान्ति गच्छन्ति च ।

(श) वीरेति । वीरशृङ्गारयोः रसयो ललितः सुन्दरः लम्पटः रसिकः उभयथा पटुरित्यर्थः ।

(ष) दैवादिति । कुशेशयभुवः पद्मजन्मनः भुवनैकबन्धोः दैवात् ब्रह्मण इत्यर्थः सन्ध्याविधौ सन्ध्यावन्दनव्यापारे जलस्य चुलुकं गण्डूषं कलयतः पिबतः आचमत इत्यर्थः, प्रतिमया प्रतिबिम्बेन यः चुलुक्यः चुलुकभवत्वात् तदाख्यः मुनिः जातवान् एष लाटो नृपः तस्य चुलुक्यस्य अन्वयैकतिलकः कुलैकभूषणम् । वृत्तमत्र वसन्ततिलकम् ।

(स) हेलेति । सोऽयं एकविजयी लाटो नृपतिः द्विषां शत्रूणां विजितानामिति भावः धामसु गृहेषु हेलया विलासेन वल्गित-

हेमप्रभा। अट्ठमीचन्दसुन्दरललाडे ! लाडेस्सरो एसो ता इमस्सिं सामलधवलपवालसच्छसुरचापरिंछोलिच्छाअं विच्छाअन्ता दिज्जन्तु सुन्दलकडक्खविक्खेवा (७४)।

सीता। जो(ङ) पइदिणमण्डणमेत्तवावारे सत्तचित्तो(७५)

प्रतीहारी। स्वगतम्। स्वभावेन (च) मायावानयम्। प्रकाशम्।

मार्जनाव्याजलग्नेन करेणोत्सरता पुनः।
न गृहीतं न च त्यक्तमनेन इक्षुकार्मुकम्॥ ५८॥ (क)

---

(७४) अष्टमीचन्द्रसुन्दरललाटे ! लाटेश्वर एष तदस्मिन् श्यामलधवलप्रवालस्वच्छसुरचापकान्तिच्छायामपि छादयन्तो दीयन्तां सुन्दरकटाक्षविक्षेपाः।

(७५) यः प्रतिदिनमण्डनमात्रव्यापारे सक्तचित्तः।

---

चलिता कण्ठनाले विलसन्ती या मुक्तालता मौक्तिकावलिः तया अलङ्कृतां माला ऋदयनीभिः वारस्त्रीभि· वाराङ्गनाभिः यश्श्च: निरतिशयः यः विभ्रम· अदभ्र· बहुलं बहु दृत्यमरः। तद्वशात् भङ्गानां भ्रमराणाम् अग्रग्रहेण अग्रभागग्रहणेन कृष्टानां श्रोतकदलानां या स्पर्द्धा तद्वतीनां दृशां नेत्राणाम् आदृष्टि आपरितोषं पात्रीकृतः। बहुसुखं मनुनिलयेषु अवस्थानात् वाराङ्गना एनं सपरितोषमद्राक्षुरिति सन्दर्भार्थः। वृत्तमत्र शार्दूलविक्रीडितम्।

(ङ) प्रतिदिनेति। प्रतिदिनं मण्डनमात्रे स्वालङ्करणमात्रे व्यापारे सक्तं रतं चित्तं यस्य तादृशः।

(च) मायावान् चातुरीपरायणः।

(क मार्जनेति। अनेन लाटेन मार्जना अङ्गमार्जनं सैव व्याजः छद्म तत्र लग्नेन तत्परेण अ।एव उत्सरता अङ्गमार्जनमेव कुर्वता

रावणः। सत्यं शृङ्गारलीलालम्पट एवायं लाठराजः।
किमत्र (ख) वीरव्यपदेशेन।

प्रतीहारी। अन्यतोऽवलोक्य।

स्वगतम्। कथमयं कुशस्थलीनाथः। प्रकाशम्।
विश्वामित्रमहामुनेर्यदजनि ब्राह्मण्यलाभात्पुरा
क्षात्रं गोत्रमयं तदादिनृपतिर्दिग्विश्रुतः सुश्रुतः।
प्रोक्तं येन नृणां महाकरुणया चित्रं चिकित्सामृतं
कीर्त्तिस्तम्भविभूषणाश्च ककुभो यद्वाहिनीशैः कृताः ६०(ग)

किञ्च।

वासो जाम्बवपल्लवानि जघने गुञ्जास्रजो भूषणं
हस्ते स्वस्तिकदानमञ्जलिनिधिर्धातुद्रवो मण्डनम्।
उत्तंसः शितिकण्ठपिच्छलतिका वेषोऽयमल्पैर्दिनै
र्यस्यारातिवधूजनेन शवरीसंवासतः शिक्षितः॥ ६१ ॥ (घ)

---

इत्यर्थः करेण पुनः किन्तु हरकार्मुकं न गृहीतं न च त्यक्तं गृह णाभिलाषो न च त्यक्त इति भावः।

(ख) वीरव्यपदेशेन वीरोऽयमिति कीर्त्तनेन।

(ग) विश्वामित्रेति। ब्राह्मण्यलाभात् पुरा पूर्वं विश्वामित्रमहामुनेः यत् क्षात्रं गोत्रं कुलम् अजनि, अयं दिक्षु विश्रुतः सुश्रुतो नाम तस्य आदिनृपतिः प्रथमो नृपः, येन महाकरुणया अतिदयया नृणां चित्रं विचित्रं चिकित्सामृतं प्रोक्तं कथितम्। यस्य वाहिनीशैः सेनापतिभिः कीर्त्तिस्तम्भविभूषणाः कीर्त्तिस्तम्भशालिन्यः ककुभः दिशश्च कृताः। शार्दूलविक्रीड़ितं वृत्तम्।

(घ) वास इति। यस्य सुश्रुतस्य अरातिवधूजनेन शवरीणां संवासतः वतचारित्वेन संसर्गादित्यर्थः अल्पैर्दिनैः जाम्बवानां जम्बूनां

हेमप्रभा । (ङ) करअलगेज्झमज्झदेसे ! मज्झदेसणरिन्दो ता इमं कोदूहलफुल्लाविअणअणभरिज्जमाणवअणमण्डला विलोएसु (७६) ।

सीता । जो मन्दरान्दोलिददुद्धसिन्धुसमुप्पणधन्नन्तरि चरमावदारस्स दिवोदासस्स पढमसिस्सो (७७) ।

प्रतीहारो ।

वामहस्तधृतेशानधनुरन्येन पाणिना ।
एष ज्यामटनीं नेतुं न शक्नोति न मुञ्चति ॥ ६२ ॥ (च)

---

(७६) करतलग्राह्यमध्यदेशे ! मध्यदेशनरेन्द्र एष तदिमं कौतूहल-फुल्लितनयनभरितवदनमण्डला विलोकय ।

(७७) यो मन्दरान्दोलितदुग्धसिन्धुसमुत्पन्नधन्वन्तरिचरमावतारस्य दिवोदासस्य प्रथमशिष्यः ।

---

पल्लवानि वासः, जघने भूषणं मुञ्जास्रजः, हस्तेः स्वस्तिकस्य सिताबर-शाकस्य दानम् । अञ्चलनिधिः, अञ्चलस्य वसनप्रान्तस्य निधिः शोभनं धातूनां गैरिकादीनां द्रवः मण्डनं भूषणं, तथा शितिकण्ठानां मयूराणां पिच्छलतिका बर्हावल्यः उत्तंसः कर्णभूषणम्, अयम् इत्थं वेषः परिच्छदः शिक्षितः । अनेन निर्जिताः शत्रवः वनमधिवसन्तीति भावः । शार्दूलविक्रीड़ितं वृत्तम् ।

(ङ) करेति । करतलाभ्यां ग्राह्यः मध्यदेशः यस्या तत्सम्बुद्धौ क्षीणमध्ये इत्यर्थः । कौतूहलेन औत्सुक्येन दिदृक्षयेति भावः फुल्लिताभ्यां विकसिताभ्यां नयनाभ्यां भरितं पूरितं वदनमण्डलं यस्यां-स्तादृशी ।

(च) वामेति । एषः सुश्रुतः वामहस्तेन धृतं ईशानधनुर्येन तथोक्तःअपि रक्ताध्याहार्यः । अन्येन दक्षिणेन पाणिना ज्यां मौर्वीम् अटनीं कोटिं नेतुं प्रापयितुं न शक्नोति न च मुञ्चति त्यजति ।

रावणः । विहस्य । हंहो (छ) धनुर्वेदविद्याकुश्रुत ! सुश्रुत ! विविधेषु व्याधिषु भिषज्यतु भवान् न पुनः खाण्डपरशवे धनुषि ।

प्रतीहारी । सम तादृशमालोक्य स्वगतम् । कथमथैते राजानः (ज) सर्वेऽप्यहंपूर्विकया पार्वतीपतेर्भगवतो धनुरारोपयितुमुपस्थिताः । प्रकाशम् ।

औण्ड्रश्चण्डासिरश्मिर्मगधविभुरसावेष काम्बोजराजः
सौराष्ट्रोऽयं नरेन्द्रः शकनृपतिरितोऽप्यत्र नेपालपालः ।
अन्ध्राणामीश्वरोऽग्रे सदसि समुदिताः क्ष्माभृतः सर्व एते
सीतायामिन्दुमौलेर्धनुषि च सरसाः प्रेमकौतूहलाभ्याम् ६२(झ)

हेमप्रभा । पेरन्तर्घोलन्तहारलदालङ्किदथणत्थणि । थण-त्थणिदपअण्डगम्भीरभीमणि सअलमहीमण्डलमण्डणेकपर-

---

( ७८ ) प्रान्तघूर्णद्धारलतालङ्कृतघनस्तनि ! घनस्तनितप्रचण्ड-

---

( छ ) धनुरिति । धनुर्वेदविद्यासु कुश्रुत अविख्यात इत्यर्थः । भिषज्यतु भिषगिवाचरतु, खाण्डपरशवे शैवे ।

( ज ) अहं पूर्विकया अहमहमिकया ।

( झ ) औण्ड्र इति । चण्डाः प्रचण्डा असीनां रश्मयः यस्य तादृशः सर्वेषां विशेषणतयान्वेति । औण्ड्रः औण्ड्रदेशाधिपतिः अयमिति हस्तेन निर्देशः । असौ मगधविभुः, एषः काम्बोजराजः, अयं सौराष्ट्रः सुराष्ट्रदेशीयः नरेन्द्रः, इतोऽपि शकनरपतिः, अत्र नेपालराजः । अयञ्च अन्ध्राणामीश्वरः नृपतिः सर्व एव एते क्ष्माभृतः राजानः सीतायाम् इन्दुमौलेः हरस्य धनुषि च प्रेमकौतूहलाभ्यां सरसाः साभिलाषाः सन्तः अग्रे सदसि सभायां समुदिताः समुपस्थिताः । स्रग्धरावृत्तम् ।

कमे महामहीवइणो (ञ) मस्सरणवस्सुरचश्चरीश्रवश्चुसंपुडट्ठि
असिहासंचिअचावलपुण्डरीअगब्भदलदोणीणं सरिच्छेण
तिरिच्छेण अ सवणावदंसत्तणं दंसअन्तेण अच्छिविच्छो-
हेण जहिच्छं पेच्छ ( ७८ ) ।

सीता । कीस उण एदे णरिन्दा (ट) सअलखत्तिअमाण-
खण्डणखण्डपरसुचावारोवणमुहाडम्बरेण विडम्बअन्ति
अत्ताणम् ( ७९ ) ।

प्रतीहारी । (ठ) एकतरे पृथिवीपालाः ।

---

गम्भीरभीषणान् सकलमहीमण्डलमण्डनैकपराक्रमान् महामहीपतीन्
मस्सरणचश्चुरचश्चरीकचञ्चुसम्पुटस्थितशिखासञ्चितचापलपुण्डरीकगर्भदल-
द्रोणीनां सदृशेण तिरश्चा च श्रवणावतंसत्वं दर्शयताऽक्षिविक्षोभेण
यथेच्छं प्रेक्षस्व ।

( ७९ ) कथं पुनरेते नरेन्द्राः सकलक्षत्रियमानखण्डनखण्डपर-
शुचापारोपण मुखाडम्बरेण विडम्बयन्त्यात्मानम् ।

---

( ञ ) मस्सरणेति । मस्सरणचश्चुराणां मस्सरणशीलानां चश्चरी-
काणां भ्रमराणां चञ्चुसम्पुटेषु स्थिताः याः शिखाः तद्वत् सञ्चितं
चापलं याभिः तादृश्यः याः पुण्डरीकाणां गर्भदलद्रोण्यः अभ्य-
न्तरपत्राकाराः द्रोण्यः तासां सदृशेण सदृशेन तिरश्चा कुटिलेन
श्रवणावतंसत्वं कर्णभूषणतां दर्शयता कर्णभूषणायमानेनेत्यर्थः अक्षि-
विक्षोभेण नेत्रचापलेन अपाङ्गप्रेक्षणेनेत्यर्थः ।

( ट ) सकलेति । सकलानां क्षत्रियाणां मानखण्डनं सम्मान-
भङ्गकरं यत् खण्डपरशोर्हरस्य चापं धनुः तस्य आरोपणं मुखे प्रारम्भे
यस्य तस्य आडम्बरेण भङ्गोद्योगेन विडम्बयन्ति विफली कुर्वन्ति ।

( ठ ) एकतरे कतिपयाः ।

एकाग्रया धिया ध्येयं न करस्पर्शमर्हति।
इति भक्त्या नमन्त्येते केवलं हरकार्मुकम्॥ ६४॥ (ड)

अन्यतरे तु राजानः।

आरोपणाय कलया कार्मुके कलितेऽप्यमी।
तद्भारभुग्नसर्वाङ्गा जानुभिर्जगतीं गताः॥ ६५॥ (ढ)

रावणः। विहस्य। परं नामीभिरारोपितमोमापतं धनुरात्मापि नारोपितः प्रवीरजनसंख्यासु।

प्रतीहारी। स्वगतम्। कथमेते निखिलक्षत्रियाः क्षत्रियजनोचितेऽपि चापारोपणकर्मणि वितथसामर्थ्या वर्त्तन्ते। तदेतेषु (ण) परमनाकलितसत्त्वसारो विकर्त्तनकुलकुमार आस्ते। यद्वा किमनेनापि।

यस्य वज्रमणेर्भेदे भिद्यन्ते लोहसूचयः।
करोतु तत्र किं नाम नारीनखविलेखनम्॥ ६६॥ (त)

---

(ड) एकेति। एते पृथिवीपालाः एकाग्रया धिया ध्येयं चिन्तनीयं हरकार्मुकं करस्पर्शं न अर्हति प्राप्नोति करस्पर्शयोग्यं न भवति दैवत्वादिति भावः इति हेतोः भक्त्या केवलं नमन्ति।

(ढ) आरोपणायेति। अमी राजानः आरोपणाय ज्यासङ्गमनाय कार्मुके कलया अंशतः कलितेऽपि तोलितेऽपि तस्य भारेण भुग्नानि सर्वाणि अङ्गानि येषां तथोक्ताः सन्तः जानुभिः जगतीं गताः।

(ण) परं केवलम् अनाकलितः अप्रकटितः सत्त्वस्य सारः यस्य तथाभूतः विकर्त्तनस्य सूर्य्यस्य कुलकुमारः रामः।

(त) यस्येति। यस्य वज्रमणेः हीरकस्य भेदे विदारणे लोहसूचयः लौहशलाका भिद्यन्ते, तत्र नार्य्या नखविलेखनं किं

विचिन्त्य। भवतु तथापि संकीर्त्तयाम्येनम्। (थ) अनाकलितसारा हि वीरप्रकाण्डप्रसूतिः।

रावणः। (द) अनारोपितमसम्भावनया लङ्केश्वरेण, क्षत्रियैरप्यसामर्थ्येन मन्ये वृषध्वजायुधं दृप्यति। धनुरुद्दिश्य रेरे पुराणवेणुदलद्रोणीनिर्माण!

मुक्तं मयाऽसि हरकार्मुक! यत्तदानीं
मा तेन भूद् द्रढिमदर्पपरिग्रहस्ते।
त्वद्भङ्गमार्गपटुभिः स पुनः प्रकोष्ठै-
र्नन्वेष तिष्ठति हठेकरुचिर्दशास्यः॥ ६७॥ (ध)

---

नाम करोतु एते महावीरा राजानः यत्र विफलप्रयत्ना अभूवन् तत्रायं बालकः किं करिष्यतीति भावः। नार्य्या इति अधिकमार्दवद्योतनार्थम्।

(थ) हि यतः अनाकलितः अप्रकटितः सारो यस्याः तादृशी, वीरप्रकाण्डस्य दशरथस्य प्रसूतिः सन्तानः। दाशरथेः सारस्य अनाकलितत्वात् अयं वर्णनीय इति भावः।

(द) अनारोपित मिति। लङ्केश्वरेण रावणेन असम्भावनया हरावमानेन हरावमानत्वं माभूदिति बुद्ध्या इत्यर्थः अथवा असम्भवबुद्ध्या। मन्ये तर्कयामि वृषध्वजस्य आयुधं धनुः दृप्यति सर्द्धते न कोऽपि मत्तोलनक्षम इति अहङ्कारेण माद्यतीति भावः। पुराणस्य वेणोः वंशस्य दलन्त्या द्रोण्या निर्माणं यस्य तादृशः तत्सम्बुद्धौ।

(ध) मुक्तमिति। हे हरकार्मुक! तदानीं यत् मया मुक्तं परित्यक्तम् असि, तेन मन्मोचनेन ते तव द्रढिम्ना दृढत्वेन यः दर्पः अहङ्कारः तस्य परिग्रहः ग्रहणं माभूत् मा दृप्य इत्यर्थः। स एष दशास्यः रावणः तव भङ्गे यः मार्गः उपायः तत्र पटुभिः समर्थैः, प्रकोष्ठैः उपलक्षितोऽपीति शेषः। हठे एका रुचिः यस्य, तादृशः

इत्युत्थातुमिच्छति।

प्रहस्तः। देव! नेयं जानकी नचेदमैन्दुशेखरं धनुः।

रावणः। तत्किमिदम्।

प्रहस्तः। (न) प्रेक्षणकमिदम्।

प्रतीहारी।

यद्बिम्बमम्बरमणिर्यदपां प्रसूति-
र्नक्तं निषिञ्चति यदग्निशिखासु भासः।
ज्योत्स्ना निशासु हिमधाम्नि च यन्मयूखाः
पूषा पुराणपुरुषः स नमोऽस्तु तस्मै ॥ ६८ ॥ (प)

तस्मादजायत मनुर्नरराजबीजं
यस्यान्वये स सगरः स भगीरथश्च।
एकेन येन जलधिः परिखानितोऽय-
मन्येन सिद्धसरिता परिपूरितश्च ॥ ६९ ॥ (फ)

---

यथेच्छचारी सन् पुनः तिष्ठति ननु तिष्ठत्येव, यदि मम भङ्गे इच्छा अभविष्यत् तदा अवश्यमेव त्वां भग्नमकरिष्यं मम तु तदानीम् इच्छाविरहात् त्वं शुक्त इति भावः। वृत्तमत्र वसन्ततिलकम्।

(न) प्रेक्षणकं दृश्यकाव्यं नाटकमिदमित्यर्थः।

(प) यदिति। यस्य विम्बं मण्डलम् अम्बरस्य आकाशस्य मणिः रत्नं यत् विम्बम् अपां जलानां प्रसूतिः उत्पत्तिस्थानम् आदित्या-ज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति वचनात्। यत् विम्बं नक्तं रात्रौ अग्निशिखासु भासः प्रभाः निषिञ्चति अर्पयति। यस्य मयूखाः निशासु हिमधाम्नि शीतरश्मौ चन्द्रमसि इत्यर्थः ज्योत्स्नाः चन्द्रिकाः। स पुराणपुरुषः पूषा सूर्यः तस्मै नमोऽस्तु। वृत्तमत्र वसन्ततिलकम्।

(फ) तस्मादिति। तस्मात् सूर्यात् नरराजानां नृपतीनां बीजं

सावित्रात् मनुतो महीयसि कुले ये जज्ञिरे क्षत्रिया-
स्तेषामेष महारथो दशरथः क्ष्माचक्रमाक्रामति ।
पीनांसः पृथुलोचनः प्रमदयन् क्रतस्नामयोध्यां गुणै-
र्विश्वामित्रवितीर्णचापनिगमस्तस्यैष रामः सुतः ॥ ७० ॥ (ब)

रामः । वत्स ! लक्ष्मण ! कथमेष मां निर्दिशति । तदुत्थीयते ।

लक्ष्मणः । एतदुत्थीयते । (भ) मञ्चावरोहणनाटितकेन परिक्रामतः ।

प्रतीहारी । साधु रामभद्र ! साधु सत्यं मार्त्तण्ड-कुलैकमण्डनमसि ।

रावणः । साधु रे क्षत्रियडिम्भ ! साधु तवैव परम-

---

निदानं मनुः अजायत । यस्य मनोः अन्वये वंशे सः सगरः स च भगीरथश्च उदपादीति शेषः । येन एकेन सगरेण अयं जलधिः परिखानितः अतएवास्य सागर इति संज्ञेति भावः । अन्येन येन भगीरथेन अयं जलधिः सिद्धसरिता देवनद्या गङ्गया परिपूरितश्च । वृत्तमत्र वसन्ततिलकम् ।

(ब) सावित्रादिति । सावित्रात् सूर्य्यसुतात् मनुतः महीयसि अतिमहति कुले ये क्षत्रियाः जज्ञिरे जाताः तेषां मध्ये एष महारथो दशरथः क्ष्माचक्रं भूमण्डलम् आक्रामति शास्ति । पीनांसः स्थूलस्कन्धः पृथुलोचनः विशालनेत्रः गुणैः शौर्य्यदाक्षिण्यादिभिः क्रतस्नां समग्राम् अयोध्यां प्रमदयन् रञ्जयन् तथा विश्वामित्रेण वितीर्णः दत्तः चापनिगमः धनुर्वेदः यस्मै तथोक्तः एष रामः तस्य दशरथस्य सुतः तनयः । शार्दूलविक्रीडितं वृत्तम् ।

(भ) मञ्चावरोहणनाटितकेन मञ्चात् स्वाध्युषितात् पल्यङ्कात् यत् अवरोहणं तस्य नाटितकेन अभिनयेन ।

खण्डितोऽभिमानग्रन्थिरनवधिरध्यवसायश्च। तत्रानुषोषु भवन्माता पुत्रवती।

विश्वामित्रजनकौ। अतिदिलीपमतिदशरथमङ्गीकृतं कर्म रामभद्रेण।

हेमप्रभा। कालेण बालत्तणं रामचन्दस्स चरित्तेण उण सअलणरेन्दमण्डलीजेट्ठो (८०)।

शतानन्दः। (म) सूर्य्यशिष्यान्तेवासिन्! अतिसाहसिको रामभद्रः।

यतः।

कोदण्डमीशकरपीडनदृष्टसार-
मारब्धनिर्वहणनिर्वृतपूर्वपुंसि।
आरोपणाय परिसर्पति रामभद्रे
गोत्रं तुलां समधिरूढमहस्करस्य॥ ७१॥ (य)

---

(८०) कालेन बालत्वं रामचन्द्रस्य चरित्रेण पुनः सकलनरेन्द्रमण्डलीज्येष्ठः।

---

(म) सूर्य्यशिष्यस्य याज्ञवल्क्यस्य अन्तेवासी शिष्यः जनकः तत्सम्बुद्धौ।

(य) कोदण्डेति। आरब्धस्य कर्मणः निर्वहणेन परिसमाप्त्या निर्वृताः सन्तुष्टाः पूर्वे पुमांसो यस्य तस्मिन् आरब्धकर्मपरिसमाप्त्या निर्वृतसर्वपूर्वपुरुषे इत्यर्थः। सूर्य्यवंश्यः कोऽपि पुरुषः प्रारब्धमसमाप्य नातिष्ठदिति भावः। रामभद्रे ईशस्य शम्भोः करेण यत् पीड़नं तेन दृष्टः सारो यस्य तादृशं कोदण्डं कार्मुकम् आरोपणाय परिसर्पति सर्पं गच्छति सति अहस्करस्य सूर्य्यस्य गोत्रं कुलं तुलाम् परीक्षा विषये च दृढ़पतां संशयकोटित्वं वा समधिरूढं गतम्। इत्यत्र वसन्ततिलकम्।

प्रतीहारी।

प्रणिपत्य कुमारोऽयं मृड़ान्यै च मृड़ाय च।
उद्युक्तो धनुरादातुं न विघ्नः किं करिष्यति ॥ ॥ ७२ ॥ (र)

हेमप्रभा। जं किदं भअवदा दक्खाअणीवल्लहेण। किंच (ल) केसरिकिसोरसद्दिसपओट्ठाणं पुरिसाणं भुअदण्ड-मण्डणिज्जे कज्जे किं विअ दुक्करं णाम (८१)।

रामः। प्रदक्षिणयन् स्वगतम्।

वैदेहीवरबीजाय सुरसारमयाय च।
तुभ्यं चण्डीशचापाय त्रिपुरप्लोषिणे नमः॥ ७३ ॥ (व)

सरभसमादाय प्रकाशम्।

मद्दोर्दण्डद्वयाक्रान्त्या वत्स लक्ष्मण। लक्षय।
स्फुटिष्यति तु कोदण्डं त्रुटिष्यति न वा गुणः ॥७४॥ (श)

---

(८१) यत् कृतं भगवता दाक्षायणीवल्लभेन। किञ्च केसरि-किशोरसदृशप्रकोष्ठानां पुरुषाणां भुजदण्डमण्डनीये कार्ये किमिव दुष्करं नाम।

---

(र) प्रणिपत्येति। अयं कुमारो रामः मृड़ान्यै पार्वत्यै मृड़ाय हराय च प्रणिपत्य धनुः कार्मुकम् आदातुम् उद्युक्तः न विघ्नः न आतीमः किं करिष्यति।

(ल) केशरीति केशरी सिंहः तस्य किशोरः शावकः तत्-सदृशप्रकोष्ठानाम्।

(व) वैदेहीति। वैदेह्या वरस्य बीजं निदानं तस्मै सुरसार-मयाय देवसारस्वरूपाय त्रिपुरप्लोषिणे पुरत्रयदाहिने चण्डीशस्य चापाय तुभ्यं नमः।

(श) मद्दोर्दण्डेति। हे वत्स लक्ष्मण! मम दोर्दण्डद्वयस्य

रावणः । विहस्य । इदं (प) तन्नटगर्जितं नाम ।

लक्ष्मणः । (स) सोढशङ्करकराकर्षणकर्मणि कार्मुके कीयमसम्भावना आर्य्यस्य ।

रामः । तर्हीदमारोप्यते ।

रावणः । इयमपि सा नटबिभीषिका ।

प्रतीहारी । समन्तादवलोक्य ।

यथा यथा धूर्जटिचापकोटिं
रामानुबन्धादधिरोहति ज्या ।
तथातथा सर्वनरेश्वराणां
मुखानि मूलात् मलिनीभवन्ति ॥ ७५ ॥ (ह)

लक्ष्मणः । न केवलं (च) वैलक्ष्यवतां महीपालानामेकेन वदनमालिन्येन सम्पन्नम् । अपितु ।

---

करयुगलस्य आक्रान्त्या आक्रमणेन कोदण्डं कार्मुकं तु किन्तु स्फुटिष्यति भङ्क्ष्यति । न वा गुणः मौर्वी त्रुटिष्यति छिन्नय पश्य । मौर्वीत्रोटनं विना धनुर्भङ्गो भविष्यतीति अवलोकयेति तात्पर्य्यम् ।

(प) नटस्य गर्जितं गर्जनम् असारमास्फालनध्वनिः ।

(स) सोढेति सोढं शङ्करस्य करेण आकर्षणकर्म्म येन तादृशे ।

(ह) यथेति । रामस्य अनुबन्धात् आरोपणात् ज्या मौर्वी यथायथा धूर्जटेः चापस्य धनुषः कोटिम् अटनिम् अधिरोहति तथा तथा सर्वेषां नरेश्वराणां मुखानि मूलात् मूलमारभ्य मलिनीभवन्ति । उपजातिवृत्तम् ।

(च) वैलक्ष्यवतां लज्जितानाम् । सम्पन्नं पूरितम् ।

आर्य्ये रुद्रशरासनं तुलयति स्मित्वा स्थितं पार्थिवैः
शिञ्जासज्जनतत्परे विहसितं दत्त्वा मिथस्तालिकाः
आरोप्य प्रचलाङ्गुलीकिसलये म्लानं गुणास्फालन-
स्फाराकर्षणरुग्णपर्वणि पुनः सिंहासने मूर्च्छितम् ७६ (क)

प्रतीहारी सहर्षाऽवलोक्य। न केवलमाकृष्टं भग्नं च किञ्चिदुच्चैः।

संसर्गादपि मन्थरस्य मरुतः शिञ्जानशिञ्जालतं
सार्द्धं क्षत्रवधव्रतैकगुरुणा क्रौञ्चाचलद्वेषिणा।
दोर्दण्डाञ्चलमण्डलीकृतमिदं रामेण राज्ञां पुरः
प्रागप्राप्तपराभवं भवधनुष्टङ्कारवत् त्रुट्यति ॥ ७७ ॥ (ख)

---

(क) आर्य्ये इति। आर्य्ये रामे रुद्रस्य शरासनं धनुः तुलयति धरति सति पार्थिवैः राजभिः स्मित्वा स्थितम् ईषत् हसितमित्यर्थः। ततः शिञ्जायाः ज्यायाः सज्जने अवरोपणे तत्परे सति मिथः तालिकाः दत्त्वा विहसितम् उच्चैः हासः कृत इत्यर्थः। ततः आरोप्य ज्यया सङ्गमय्य प्रचलानि अङ्गुलि-किसलयानि यस्य तादृशे आर्य्ये स्थिते सति [illegible] म्लानं मालिन्यं गतम्। ततः गुणस्य शिञ्जिन्या आस्फालनेन आरोपणेन स्फारम् उत्कटं यत् आकर्षणं तेन रुग्णानि भग्नानि पर्वाणि धनुर्ग्रन्थयः येन तादृशे सति सिंहासने स्वे स्वे मञ्चे मूर्च्छितम्। शार्दूलविक्रीडितं वृत्तम्।

(ख) संसर्गादिति। मन्थरस्य मन्दस्य मरुतः वायोः संसर्गादपि शिञ्जाना स्वनन्ती शिञ्जा मौर्वी एव लता यस्य तादृशं प्राक् पूर्वं कदाचिदपीत्यर्थः अप्राप्तः अलब्धः पराभवो येन तथाभूतम् इदं भवधनुः हरकार्मुकं रामेण क्षत्रवधव्रतैक गुरुणा क्षत्रियवधप्रतिज्ञा-प्रचण्डेन क्रौञ्चाचलद्वेषिणा क्रौञ्चपर्वतविदारकेण परशुरामेण सार्द्धं

राघवः। सेयं कवीनां (ग) वचनकामधेनुः। यदसद्भूतमपि सूते।

विश्वामित्रः। सखे! जनक! फलितमस्मदनुर्वेदविद्यास्तेवासितया रामभद्रस्य। तथाहि।

गुर्वीं मौर्वीं विधुन्वन् विदधदतिभियः सप्तपातालपालान्
वृन्दैर्वृन्दारकाणां प्रसरति परितस्तूर्णमाकर्ण्यमानः।
टङ्कारः खण्डिताशाकरिकरटतटीदानदुर्वर्ण एष
त्रुत्यत्पर्वोऽनुसन्धेर्वृषधरधनुषो रामदोर्यन्त्रितस्य ॥ ७८ ॥(घ)

शतानन्दः। आश्चर्यमाश्चर्यम्। अतिभवानीवल्लभं रामभद्रचरितम्। तथाहि।

---

राज्ञां पार्थिवानां पुरः परशुरामस्य भार्गवस्य अग्रतः इत्यर्थः। दोर्दण्डाञ्चलेन शाङ्करखण्डाकर्षणेन मण्डलीकृत वक्रीकृत सत् टङ्कारवत् सटङ्कारं यथा तथा त्रुयति भङ्गं प्राप्नोति। शार्दूलविक्रीड़ितं वृत्तम्।

(ग) वचनकामधेनुः वचनमेव वाणी एव कामधेनुः यथेच्छवादित्वादिति भावः। यत् यस्मात् असद्भूतमपि मिथ्यास्वरूपमपि सूते सत्यवत् वर्णयतीति भावः।

(घ) गुर्वीमिति। रामस्य दोर्भ्यां यन्त्रितस्य आकृष्टस्य वृषधरधनुषः हरकार्मुकस्य अनुसन्धेः प्रतिसन्धि त्रुत्यत्पर्वः भग्नग्रन्थिः एषः टाङ्कारः टङ्कारस्वनः स्वार्थे ष्णप्रत्ययः। गुर्वीं महतीं मौर्वीं ज्यां विभिन्दन् छिन्दन् सप्तपातालपालान् सप्तपातालरक्षकान् अतिभियः भयार्त्तान् विदधत् कुर्वन्, वृन्दारकाणां देवानां वृन्दैः समूहैः परितः समन्तात् तूर्णं सहसा आकर्ण्यमानः श्रूयमाणः तथा खण्डितानां भयेन त्रुटितानाम् आशाकरिणां दिग्गजानां करटतटीदानेन गजगण्डतटमदजलक्षरणेन

ओङ्कारो विश्वरक्षाक्रमनिगमविधेरन्तकस्याट्टहासः
संहर्त्ता शात्रवाणां पटुपटहरवः कीर्त्तिनिर्वासनस्य ।
दोर्यन्त्रासङ्गिशिञ्जानमदटनिरटत्सर्वपर्वप्रसूत-
ष्टीत्कारः शम्भुचापे जयति विजयिनो राघवस्यादिबन्दी ७९ (ङ)

जनकः । नमो भगवते नीललोहिताय ।

विश्वक्षमातलनरेश्वरदुष्करेऽस्मिन्
सद्यः कृते गुरुणि कर्मणि राघवेण ।
चण्डीशचापमथनाद् व्यथते च चित्तं
जामातृलाभरभसान्मम मोदते च ॥ ८० ॥ (च)

---

दुर्वर्णः वर्णयितुमशक्य इत्यर्थः सन् प्रसरति समन्तात् व्याप्नोति । स्रग्धरावृत्तम् ।

(ङ) ओङ्कार इति । विश्वस्य जगतः रक्षायाः क्रमः नियम एव निगमविधिः वेदविधिः तस्य ओङ्कारः प्रणवः, ब्राह्मणः प्रणवं कुर्यादादावन्ते च सर्वत इति स्मरणात् । वेदविधेरोङ्कार इव रामस्य जगतीरक्षायाः प्रथमोद्यमस्वरूप इत्यर्थः अन्तकस्य यमस्य, अट्टहासः उच्चहास्यरव इव भासमान इत्यर्थः शात्रवाणां संहर्त्ता तथा कीर्त्तिनिर्वासनस्य यशोदूरीकरणस्य पटुर्भेद्यान् पटहरवः वाद्यविशेषध्वनिः विजयिनो राघवस्य रामस्य दोर्यन्त्रे आसङ्गिनी या शिञ्जा मौर्वी तया नमन्ती या अटनी कोटिः तस्याः रटन् निर्गच्छन् सर्वेभ्यः पर्वभ्यः ग्रन्थिभ्यः प्रसूतः उद्भूतः शम्भुचापे हरधनुषि आदौ वन्दते इति तथोक्तः टीत्कारः शब्दविशेषः जयति । स्रग्धरावृत्तम् ।

(च) विश्वेति । विश्वैः सर्वैः क्षमातलनरेश्वरैः भूपालैः दुष्करे कर्त्तुमशक्ये अस्मिन् धनुर्भङ्गरूपे गुरुणि अतिमहति कर्मणि राघवेण रामेण सद्यः झटिति कृते सति मम चित्तं चण्डीशस्य चापमथनात् धनुर्भङ्गात् व्यथते च, जामातृलाभेन यो रभसः हर्षः तस्मात् मोदते हृष्यति च । वृत्तमत्र वसन्ततिलकम् ।

सीता । सहि ! हेमप्पहे ! भग्गं भग्गस्स भअवदो चावं (८२) ।

हेमप्रभा । संपत्तं च पिअसहीए पाणिग्गहणं (८३) ।

रावणः । उच्चैर्विहस्य । प्रज्ञावतां हि चक्षुरक्षुद्रमतिविषयासु (छ) धिषणासु प्रतिवसति । यतः ।

रामेण मुग्धमनसा वृषलाञ्छनस्य
यज्जर्जरं धनुरभाजि मृणालभञ्जम् ।
तेनामुना त्रिजगदर्पितकीर्त्तिभारो
रक्षःपतिर्ननु मनाङ् न विडम्बितोऽभूत् ॥ ८१ ॥ (ज)

रामः । सकण्ठरोधम् ।

वाचा कार्मुकमस्य कौशिकपतेरारोपणायार्पितं
महोद्दण्डहठाच्चनेन तदिदं भग्नं कृतन्यक्कृति ।

---

(८३) सम्प्राप्तं च प्रियसख्याः पाणिग्रहणम् ।

(८२) सखि हेमप्रभे ! भग्नं भर्गस्य भगवतश्चापम् ।

---

(छ) धिषणासु बुद्धिषु । बुद्धिर्मनीषा धिषणा इत्यमरः ।

(ज) रामेणेति । मुग्धमनसा मूढमतिना रामेण वृषलाञ्छनस्य हरस्य जर्जरम् अतिजीर्णं धनुः मृणालभञ्जं मृणालमिवेत्यर्थः. अनायासेनेति भावः यत् अभाजि, तेन अमुना रामकर्त्तृकधनुर्भङ्गेनेति भावः । त्रिजगता अर्पितः दत्तः कीर्त्तिभारः यस्मै तादृशः रक्षसां पतिः रावणः मनाक् अल्पमपि न ननु नैव विडम्बितः तिरस्कृतः अभूत् । अनायाससाध्यत्वादस्य कर्मणः येन केनापि कर्त्तुं शक्यत्वादिति भावः । वृत्तमत्र वसन्ततिलकम् ।

(झ) वाचेति । अस्य कौशिकपतेः विश्वामित्रस्य वाचा तदिदं

नो जाने जनकस्तदत्रभगवान् व्रीड़ावशादुत्तरं
त्रिनेत्रे नतकन्धरो भगवते रुद्राय किं दास्यति ? ॥८२॥(ञ)

लक्ष्मणः। अहो (ञ) महदन्तरं पुरुषकाराणाम्।

भग्नं निरीक्ष्य हरकार्मुकमित्यथैते
रोमाञ्चकञ्चुकमिदं वपुरुद्वहामः।
आर्य्यस्तु कण्ठधृतवाणि विलक्षभावा-
स्वासानिषण्णनयनं वदनं बिभर्त्ति ॥ ८३ ॥ (ट)

विश्वामित्रः। किमुच्यते दिलीपकुलालङ्करणं दशरथोऽस्य (ठ) जनयिता।

शतानन्दः। महाराज! सीरध्वज! यथोचितमत्र प्रस्तूयतां समर्प्यतां वैदेही रामभद्राय।

---

कार्मुकम् आरोपणाय अर्पितं धृतं, मम दोर्दण्डाभ्याम् हठाग्रनेन सहसाकर्षणेन कृता न्यक्कृतिः अभिक्षेपो यस्मिन् तत् यथा तथा भग्नम्। तत् तस्मात् अत्रभगवान् जनकः व्रीड़ावशात् लज्जया त्रिनेत्रे त्रिपुरहन्ते भगवते रुद्राय नतकन्धरः विनतग्रीवः सन् किम् उत्तरं दास्यति। शार्दूलविक्रीड़ितं वृत्तम्।

(ञ) महत् अन्तरं प्रभेदः।

(ट) भग्नमिति। इति इत्थं हरकार्मुकं भग्नं निरीक्ष्य दृष्ट्वा अथ अनन्तरं एते वयं रोमाञ्चकञ्चुकं लोमाञ्चितं इदं वपुः शरीरम् उद्वहामः। आर्य्यस्तु विलक्षभावात् लज्जावशात् कण्ठे धृता स्खलिता वाणी वाक् यस्मिन् तत् यथा तथा आशासु दिक्षु निषण्णे नयने यस्य तादृशं वदनं बिभर्त्ति धारयति। महति कार्य्ये साधिते महतां लज्जातिरेको भवति क्षुद्राणान्तु महदाक्षालनमिति भावः।

(ठ) जनयिता पिता।

(ड) भग्नेति। भग्नं एवञ्चीयस्य कोदण्डः येन तथोक्तः

जनकः। मञ्चावरोहणमाटितकेन परिक्रम्य।

भग्नचण्डीशकोदण्ड! निजदोर्दण्डनिर्जिताम्।
गृहाण पाणौ वैदेहीं पद्मा पद्मे निषीदतु ॥ ८४ ॥ (ड)

इति पाणौ पाणिमर्पयति।

रावणः। सक्रोधम्। आः (ढ) कथमयमलीकदुर्विदग्धः क्षत्रियवटुकीटो ममापि लङ्केश्वरस्य पुरतः सीतायाः पाणिं पाणिना पीडयति। तदेष न भवति। इति संरभते।

प्रहस्तः। विहस्य स्वगतम्।

दृष्ट्वेतां रभसादलीकजनकप्रत्तां मृषा मैथिलीं
हस्ताग्रे नटराघवेण विधृतां रागेण रङ्गाङ्गणे।
उत्ताम्यन्ति रुषा कषायितदृशो देवस्य लङ्कापते-
र्दोर्दण्डा विधृतायुधाश्च वदनान्याकृष्टदंष्ट्राणि च ॥ ८५ ॥ (ण

---

तत्सम्बुद्धौ। निजेन दोर्दण्डेन निर्जितां वैदेहीं पाणौ गृहाण, पद्मा लक्ष्मीः पद्मे कमले निषीदतु निपन्ना भवतु।

(ढ) अलीकदुर्विदग्धः वृथाचतुरः। क्षत्रियवटुषु बालकुमारेषु कीटः। संरभते क्रुध्यति।

(ण) दृष्ट्वेति। रभसात् हर्षात् अलीकजनकेन नटरूपेण मिथ्याजनकेन प्रत्तां प्रदत्ताम् एतां मृषा मैथिलीं नटीरूपां नटराघवेण रामनेपथ्यभृता नटेन रङ्गाङ्गणे रङ्गभूमौ रागेण अनुरागेण हस्ताग्रे विधृतां दृष्ट्वा रुषा कषायिताः कलुषिताः दृशो यस्य तादृशस्य देवस्य महाराजस्य लङ्कापतेः रावणस्य दोर्दण्डाः भुजदण्डाः विधृतानि आयुधानि यैः तथोक्ताः तथा वदनानि आकृष्टा अधरदंशाय प्रेरिता दंष्ट्रा यैः तादृशानि सन्ति उत्ताम्यन्ति विस्फुरन्ति। शार्दूलविक्रीडितम् वृत्तम्।

प्रकाशम्। राक्षसपते! (त)पर्य्यवसितप्रायः प्रेक्षाविधिः। तद्भावयतु चतुराभिनयां वृत्तिं रसवृद्धिं च नर्त्तकानां देवः।

रावणः। सस्मरणलज्जम्। आत्मगतम्। कथं प्रेक्षणकमेतत्। (थ) मुधा संरब्धमस्माभिः। प्रकाशम्। सखे! प्रहस्त! अपि स्मरसि दशकन्धरस्य प्रतिज्ञाम्।

प्रहस्तः। देव! स्मरामि कुर्वन् मौर्वीत्यादि पठति।

रावणः। तदिदमनुष्ठास्यते।

द्वितीयनेपथ्ये। वैतालिकः। जय जय महाराज! सीरध्वज! सुखाय सायन्तनी सन्ध्या तत्रभवतो भवतु देवस्य जामात्रा रामभद्रेण सह। सम्प्रति हि।

सङ्कोचव्रतमादिशन् जलरुहां देवस्त्रिवेदीतनुः
सोऽयं विद्रुमकन्दसुन्दरवपुर्यात्यस्तमस्तातपः।
माञ्जिष्ठत्रसरेणुछटैकसुहृदां यद्दीधितीनां पुरः
प्रेङ्खत्याति सनालनीलनलिनप्रस्ताररम्यं तमः॥ ८६॥ (द)

---

( त ) पर्य्यवसितप्रायः प्रायेण परिसमाप्तिं गतः। प्रेक्षाविधिः नाट्यदर्शनव्यापारः।

( थ ) मुधा निरर्थकं संरब्धं कुपितम्।

( द ) सङ्कोचेति। त्रिवेदीतनुः वेदत्रयमूर्त्तिः सोऽयं देवः सविता जलरुहां पद्मानां सङ्कोचव्रतमादिशन् विद्रुमकन्दवत् प्रवालमूलमिव सुन्दरं वपुः यस्य तथोक्तः तथा अस्तः क्षीणः आतपो यस्य तथाभूतः सन् अयम् अस्तं याति गच्छति। तमः तिमिरं माञ्जिष्ठानां मञ्जिष्ठारागेण रञ्जितानां त्रसरेणूनां पिङ्गलानां याः छटाः समूहः ता एव एके सुहृदो येषां तादृशानां यस्य दीधितीनां रश्मीनां

अपि च ।

दिनसन्ध्यावरवध्वोर्वहति विवाहाग्निविभ्रमं भानुः ।
लाजायते च साक्षादुत्तरलस्तारकानिकरः ॥ ८७ ॥ (घ)

पुनर्नेपथ्ये । देव ! देव्यो विज्ञापयन्ति ।

जनक ! कुलवधूनामेष सज्जः समाजो
विवहनविधिबन्धुर्वर्त्तते चाप्यनेहा ।
अनुभवितुमुदारां कौतुकागारदीक्षां
तदिह सह दुहित्रा प्रेष्यतां रामभद्रः ॥ ८८ ॥ (न)

जनकः । एष प्रेष्यते स्वयं च प्रस्थीयते । प्रतीहारस्य कर्णे एवमेवम् ।

प्रतीहारी । किञ्चिदुच्चैः ।

इह सुजनसमाजे सङ्गता ये नरेन्द्राः
स्फुटमुकुलितपाणिः प्राह सीरध्वजस्तान् ।

---

पुरः अग्रतः सनालानि मृणालसहितानि यानि नीलनलिनानि नीलकमलानि तेषां प्रस्तारः विस्तारः तद्वत् रम्यं रमणीयं यथा तथा प्रेङ्खत् प्रसरत् सत् भाति राजते । शार्दूलविक्रीडितं वृत्तम् ।

(घ) दिनेति । भानुः सूर्य्यः दिनसन्ध्ययोर्वरवध्वोः विवाहस्य यः अग्निः साक्षित्वेन स्थापित इति भावः तस्य विभ्रमं विलासं वहति । उत्तरलः उज्ज्वलः तारकाणां नक्षत्राणां निकरः निवहस्तु साक्षात् लाजायते लाजवत् आचरति च । आर्य्या वृत्तम् ।

(न) जनकेति । हे जनक ! कुलवधूनाम् एषः समाजः समूहः सज्जः सुसज्जितः । विवहनस्य उद्वाहस्य विधेः बन्धुः अनुकूल इत्यर्थः अनेहा समयश्च वर्त्तते । तत् तस्मात् उदारां महतीं कौतुकागारदीक्षां वासगृहसंस्कारमनुभवितुम् इह दुहित्रा मैथिल्या सह रामभद्रः प्रेष्यताम् । मालिनीवृत्तम् ।

[illegible] इहेति । एष [illegible] समाजे सङ्गता ये नरेन्द्राः राजानः

सविधमधिवसन्तो मत्पुरीगोपुराणां
परिचिनुत सपर्य्यां सोत्सवो यावदस्मि ॥ ८९ ॥ (प)

इति निष्क्रान्ताः सर्वे। सीतास्वयंवरो नाम गर्भाङ्कः।

रावणः। विचिन्त्य।

राज्ञां वृथा सदसि रामयशः प्रकीर्णं
तूर्णं मुधा मुकुलिता च पिनाककीर्त्तिः।
दीर्णेन जीर्णधनुषा गिरिशोज्झितेन
यातः पदं मम रुषां च मृषैव रामः ॥ ९० ॥ (फ)

(ब) सीतामनुसन्धाय। तद्भ्रुमित्यादि पठति।

प्रहस्तः। देव! समाप्तमेव देवप्रेक्षणकम्। तत् प्रेक्षन्तां वैरिञ्चा मुनयः (भ) परमेश्वरोऽपि प्रविशत्वभ्यन्तरम्। इति परिक्रम्य निष्क्रान्तौ।

विलक्षलङ्केश्वरो नाम तृतीयोऽङ्कः।

---

सङ्गता: सीरध्वजः स्फुटमुकुलितः पाणियेंन तथोक्तः कृताञ्जलिरित्यर्थः सन् तान् राज्ञः प्राह ब्रवीति, यावदहं सोत्सवः विवाहव्यापृतः अस्मि, तावत् यूयं मम पुर्य्याः गोपुराणां द्वाराणां सविधं सन्निधिमधिवसन्तः सन्तः सपर्य्यां मत्कृतामिति शेषः परिचिनुत स्वीकुरुत। वृत्तमत्र मालिनी।

(फ) राज्ञामिति। राज्ञां सदसि वृथा निरर्थकं रामस्य यशः प्रकीर्णं विक्षिप्तं पिनाकस्य हरधनुषः कीर्त्तिः तूर्णं सहसा मुधा निरर्थकं मुकुलिता विनष्टा च। गिरिशोज्झितेन हरत्यक्तेन जीर्णेन धनुषा दीर्णेन भग्नेन रामः मृषैव निरर्थकमेव मम रुषां क्रोधानां पदं यातस्य। वृत्तमत्र वसन्ततिलकम्।

(ब) अनुसन्धाय स्मृत्वा।

(भ) परमेश्वरः महाराजः।

इति तृतीयोऽङ्कः।

# अथ चतुर्थोऽङ्कः ।

अतः परं भार्गवभङ्गो भविष्यति ।

ततः प्रविशत्युपाध्यायो वटुश्च ।

वटुः । भो भो उवज्झाअ ! (क) अब्भुवगदसिस्सभावो अहमेस भवभूदी सपादोपग्गहमभिवादेमि (१) ।

उपाध्यायः । विद्यावान् भूयाः । शिरसि स्पृशन् । वत्स ! भवभूते ! कुतः पुनरुपनयनादिकाः संस्काराः (ख) कुतश्च मामुपाध्यायीकर्त्तुमागतोऽसि ।

वटुः । भअवदो भग्गवादो (२) ।

उपाध्यायः । भगवान् भार्गवो भगवतो भवानीवल्लभात् (ग) प्रतिपन्नकार्मुकोपनिषत् संविदितचतुर्दशविद्यास्थान-

(१) भो भो उपाध्याय ! अभ्युपगतशिष्यभावोऽहमेष भवभूतिः सपादोपग्रहमभिवादये ।

(२) भगवतो भार्गवात् ।

---

(क) अभ्युपगतेति । अभ्युपगतः अङ्गीकृतः शिष्यभावो येन सः । पादोपग्रहः पादग्रहणं तेन सहितं सपादोपग्रहं पादावुपस्पृश्येत्यर्थः ।

(ख) संस्काराः शरीरशुद्धानुकूलविषयः ।

(ग) प्रतिपन्नेति प्रतिपन्ना प्राप्ता कार्मुकोपनिषद् धनुर्विद्या येन तादृशः । संविदितं सम्यक् ज्ञातं चतुर्दशानां विद्यानां स्थानं स्थितिः रहस्यं तत्त्वञ्च येन तथाभूतः । उक्तञ्च विद्याचतुर्दशत्वं यथा

इह त्वेव तदनुपपन्नमिवेदं पश्यामि यदुताध्ययननिमित्त-माचार्यान्तरसमाश्रयणम् ।

बटुः । भो उवज्झाअ ! ण क्खु दिट्ठे अणुववण्णं णाम (३) ।

उपाध्यायः । कथम् ।

बटुः । सो क्खु महेसी भविअ (घ) समरसमारम्भमहग्ग-हग्गहिदो (४) ।

उपाध्यायः । तस्य खल्वियं (ङ) मात्रंशक्षत्रभावसुलभा यावज्जीवमायुधपिशाची न हृदयादपक्रामति ।

बटुः । तेण क्खु अहं एदे (च) विणिहदपडिवक्खगज-घटाकडपासवासत्तसल्ला भल्ला विद्दाविअमहारहरिउ-

---

(३) भो उपाध्याय ! न खलु दृष्टेऽनुपपन्नं नाम ।

(४) स खलु महर्षिर्भूत्वा समरसमारम्भमहाग्रहगृहीतः

(५) तेन खलु अहं एते विनिहतप्रतिपक्षगजघटापार्श्वव्यासक्तशल्या भल्लाः विद्राविमहारथरिपुदर्पाः क्षुरप्राः असमसमरारम्भप्रवर्त्तित-

---

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दशेति । अनुपपन्नम् अयुक्तम् असम्भवमित्यर्थः ।

(घ) समरेति समरस्य संग्रामस्य समारम्भः समुद्योगः तत्र यो महान् ग्रहः आग्रहः अत्यासक्तिरित्यर्थः तेन गृहीतः आक्रान्तः । सर्वं व्यापारमुत्सृज्य संग्रामार्थमेव सततमुद्युङ्क्ते इति भावः ।

(ङ) मात्रंशेति । मातुरंशो यः क्षत्रभावः क्षत्रियत्वं मातुः क्षत्रियात्वादिति भावः तेन सुलभा सहजा । आयुधपिशाची अस्त्र-जिघृक्षारूपा पिशाची देवयोनिविशेषः निकृष्टप्रवृत्तिरिति भावः ।

(च) विनिहतानां प्रतिपक्षगजघटानां यत् गजनिवहानां कटेषु गण्डेषु पार्श्वेषु च व्यासक्तानि लग्नानि शल्यानि अग्राणि येषां

दप्पा खुरप्पा असमसमरारम्भपवट्टिदवेरिवीररुहिरराआ णाराआ खण्डिअविपक्खधाणुक्कबाणासणदण्डा कण्डा सुट्ठु मुच्छिअचतुरङ्गबलसेण्णसहअरिसहस्सदंसणसव्वंगुक्कीरिदाओ भेरिआओ सअलखत्तिअगोत्तणिद्दलणदुल्ललिदा बाणावलित्ति पभुदकण्डसंभारं वहन्तेण कुदो दाव विज्जाहिगमो णिअसरीरदोवि परिब्भंसिदोह्मि। जदो गआणणगरुअङ्गभारोवि भविअ भिङ्गिरिटिपडिरूवो वट्टामि। सस्मरणम्। अदिक्कन्तदिअसप्पओसे उण णिद्दलिदणीलकण्ठसरासणं दासरहिराममभिजुञ्जिदुं णिच्छिदमणेण सअं चिन्तिअ बहवो बहुप्पआरफलसारा कण्डकरण्डआ संजमिदा। जाणं दुव्वहत्तणं अणुसंधिअ अद्धरत्तसमए णिहुदपदसंचारमवक्कमिअ उवज्झाअत्तणेण भअवन्तमब्भुववण्णोह्मि (५)।

---

वैरिवीररुधिररागा नाराचाः खण्डितविपक्षधानुष्कबाणासनदण्डाः काण्डाः सुष्ठुमूर्च्छितचतुरङ्गबलसैन्यसहचरसहस्रदंशनसर्वाङ्गोत्कीरिता भेरिकाः सकलक्षत्रियगोत्रनिर्दलनदुर्ललिता बाणावलिरिति प्रभूत काण्डसम्भारं वहता कुतस्तावत् विद्याधिगमो निजशरीरादपि परिभ्रंशितोऽस्मि। यतो गजाननगुर्वङ्गभारोऽपि भूत्वा भृङ्गिरिटिप्रतिरूपो वर्त्ते। व्यतिक्रान्तदिवसप्रदोषे पुनर्निर्दलितनीलकण्ठशरासनं दाशरथिराममभियोक्तुं निश्चितमनसा स्वयं चिन्तयित्वा बहवो बहुप्रकारफलसाराः काण्डकरण्डकाः संयमिताः येषां दुर्वहत्वमनुसन्धायार्द्धरात्रसमये निभृतपदसञ्चारमपक्रम्योपाध्यायत्वेन भगवन्तमभ्युपपन्नोऽस्मि।

---

तादृशाः भल्लाः अस्त्रविशेषाः। विद्राविताः निराकृताः महारथानां रिपूणां दर्पाः यैः तादृशाः। महारथलक्षणमुक्तं यथा, एको दशसह-

उपाध्यायः। एतदेव (छ) स्वर्गगमनप्रभावभाजां मुन्यतिथीनां मुखेभ्यः श्रुतमस्माभिः। यदुत श्रुतभार्गवसमरसंरम्भेण पुरन्दरेणापि दशरथः सत्कृत्य प्रहित इति। विचिन्त्य।

---

स्थाने योधयेद् यस्तु धन्विनाम्। शस्त्रशास्त्रप्रवीणश्च स महारथ उच्यते इति, आत्मानं सारथिञ्चाश्वान् रक्षन् युध्येत यो नरः। स महारथ इत्युक्तो धनुर्वेदविशारदैरिति च। क्षुरप्राः अस्त्रविशेषाः। असमेति असमेन निरुपमेन समरारम्भेण युद्धव्यापारेण प्रवर्त्तितः उत्पादितः नैरिवीराणां रुधिरैः रागः लौहित्यं येषु तादृशाः नाराचाः अस्त्रभेदाः। खण्डितेति खण्डिताः छिन्नाः धानुष्काणां धन्विनां बाणासनदण्डाः धनुर्यष्टयः यैः तादृशाः काण्डाः शराः। सुष्ठ्विति सुष्ठु सम्यक् मूर्च्छितानां चतुरङ्गबलानां हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयमित्यमरः। सैन्यानां सहचरिसहस्रस्य समभिव्याहारिगणस्य दंशनेन सर्वेषु अङ्गेषु अवयवेषु उत्कीरिताः चिह्निताः भेरिकाः अस्त्रभेदाः। सकलेति सकलानां क्षत्रियगोत्राणां राजकुलानां निर्द्दलनेन निपीडनेन दुर्ललिताः दुर्विनीताः दर्पिता इत्यर्थः। प्रभूतानां बहूनां काण्डानां शराणां सम्भारः समूहः तम्। परिभ्रंशितः च्यावितः। गजेति गजाननः गणपतिः तस्येव गुरुः स्थूलः अङ्गभारो यस्य तादृशः। भृङ्गीति भृङ्गिरिटेः शिवानुचरभेदस्य अतिकृशितमूर्त्तेरिति भावः प्रतिरूपः सदृशः। अतिक्रान्तेति अतिक्रान्तस्य गतस्य दिवसस्य प्रदोषे रजन्याम्। निर्द्दलितेति निर्द्दलितं भग्नं नीलकण्ठस्य हरस्य शरासनं येन तथाभूतम्। अभियोक्तुम् आक्रमितुम्। प्रकाराः बहुविधाः फलानां साराः येषां तादृशाः काण्डानां शराणां करण्डकाः भाजनानि तूणीराणि संयमिताः संगृहीताः। अनुसन्धाय विविच्य निभृतः निःशब्दः पदयोः सञ्चारो यस्मिन् तद् यथा तथा। अभ्युपपन्नः प्राप्तः।

(छ) स्वर्गेति स्वर्गगमने यः प्रभावः तं भजन्ते इति तथोक्तानां मुन्यतिथीनाम् अतिथीभूतमुनीनाम्। श्रुतेति श्रुतः भार्गवस्य समर-

अहो! महदन्तरमन्योन्यं रामयोः। यत् परिणतवयाः अगस्त्यविक्रमो वैखानससूनुर्यत् कौमारकमुग्धमधुराननो राजन्यपोतः। विमृश्य। अहह! सकृद्दृष्टमपि नयनावलम्बिनमिव तमहमिमं पुरतः पश्यामि। अहो! नु खलु भोः।

ज्यायान् धन्वी नवधृतधनुस्ताम्रहस्तोदरेण
क्षात्रक्षोदव्यतिकरपटुस्ताडकाताडकेन।
कर्णाभ्यर्णस्फुटितपलितः क्षीरकण्ठेन सार्द्धं
योद्धुं वाञ्छन् कथममुना लज्जते जामदग्न्यः॥ १ ॥ (ज)

वटुः। भो उअज्झाअ! जदि क्खु एवंविधपरक्कमो

---

(६) भो उपाध्याय! यदि खल्वेवंविधपराक्रमः परशुरामस्तत् किं पुनर्न तत्र धनुर्बाणासने प्रवृत्त आसीत्।

---

संरम्भः युद्धोद्योगः येन तथोक्तेन। रामयोः दाशरथजामदग्न्ययोः। वैखानससूनुः तापसपुत्रः भार्गव इति भावः। कौमारकेण कुमारावस्थया मुग्धं सुन्दरं मधुरं मनोहरम् आननं यस्य तथाभूतः राजन्यपोतः क्षत्रियशिशुः राम इति भावः। नयनावलम्बिनमिव नेत्रपथे वर्त्तमानमिव।

(ज) ज्यायानिति। ज्यायान् प्रवयाः धन्वी धनुर्धरः, क्षात्रायां क्षत्रियायां क्षोदव्यतिकरे चूर्णनव्यापारे पटुः समर्थः, तथा कर्णयोः अभ्यर्णेषु समीपेषु स्फुटितं विकसितं पलितं जराजनितधावल्यं यस्य तथोक्तः। पलितं जरसा शौक्ल्यं केशादावित्यमरः। जामदग्न्यः भार्गवः नवधृतेन सद्योऽभिगृहीतेन धनुषा ताम्रं रक्तं हस्तोदरं कराभ्यन्तरं यस्य तेन क्षीरकण्ठेन दुग्धपायिना ताडकाताडकेन ताडकान्तकेन बालकेन रामेण दाशरथेन योद्धुं वाञ्छन् कथं न लज्जते? मन्दाक्रान्तावृत्तम्।

परसुरामो ता की उण  स ( झ ) तिणअणबाणासणे पअट्टो आसि ( ६ ) ।

उपाध्यायः । स खलु शरासनशिक्षाविचक्षणः ( ञ ) सब्रह्मचारिभिरनुयुक्तोऽपि पुनःपुनरित्थमभिधाय स्थितः ।

आचार्य्यो मे स खलु भगवानस्मदग्राह्यनामा
तस्मादेषा धनुरुपनिषत् तत्प्रसादात् क्षमोऽपि ।
अध्यासीनः कथमहमहो ! वर्त्म वैखानसानां
सीतापाणिग्रहणपणितं चापमारोपयामि ॥ २ ॥ ( ट )

बटुः । कीरिसं ( ठ ) मन्तेध भग्गवराहवाणं समरसंरम्भे कस्सिं जअवडाआ पडिवत्तिस्सदि ( ७ ) ।

---

७ ) कीदृशं मन्त्रयथ भार्गवराघवयोः समरसंरम्भे कस्मिन् जयपताका प्रतिवर्त्तिष्यते ।

---

( झ ) त्रिनयनेति । त्रिनयनस्य हरस्य बाणासने धनुषि ।

( ञ ) सब्रह्मचारिभिः सतीर्थैः अनुयुक्तः पृष्टः ।

( ट ) आचार्य्य इति । अहो बालकाः अस्माभिरग्राह्यम् अवाच्यं नाम । यस्य तादृशः शिष्यैर्गुरूणां नाम न ग्रहीतव्यमिति शास्त्रादिति भावः । स भगवान् हरः मे आचार्य्यः उपाध्यायः खलु । एषा धनुरुपनिषद् धनुर्वेदः तस्मात् आचार्य्यात् मयाधिगतेति शेषः । तत्प्रसादात् तस्य आचार्य्यस्य प्रसादात् अनुकम्पया क्षमोऽपि शक्तोऽपि अहं वैखानसानां तापसानां वर्त्म पन्थानं व्रतमित्यर्थः अध्यासीनः आश्रितः सन् सीतायाः पाणिग्रहणमेव पणः सोऽस्य जात इति तथाभूतम् अस्य जाते इत इति इतप्रत्ययः । चापं शैवं कार्मुकं कथम् आरोपयामि ज्यया सज्जयामि । मन्दाक्रान्तावृत्तम् ।

( ठ ) मन्त्रयथ मन्त्रध्वे ।

उपाध्यायः । भद्र भवभूते ! किं कथयामि यद्भुभग्न-पराक्रमावलोकि सन्देहदोलाधिरूढ़मिव चेतः । पश्य ।

एकः सङ्गेऽभिमुखमजयत् सूनुमर्द्धेन्दुमौले-
स्तस्यैवान्यो धनुरनुपमं पुष्पमाथं ममाथ ।
द्वावप्येतावति हि बलिनौ किन्तु तद्वा जयश्री-
र्यस्य प्रीतः स खलु भगवान् पार्वतीप्राणनाथः ॥ ३ ॥ (ड)

नेपथ्ये ।

अत्रे ! पुलस्त्य ! पुलह ! प्रतिथे ! सुगीथ !
शाण्डिल्य ! कुण्डिन ! विभाण्डक ! याज्ञवल्क्य ! ।
काण्वे ! वसिष्ठ ! यम ! दत्त पदं रणाय
शापेन निर्दहति नारद एष नो चेत् ॥ ४ ॥ ( ढ )

---

(ड) एक इति । एकः भार्गवः सङ्गे संग्रामे अभिमुखम् अर्द्धेन्दु-मौलेः चन्द्रशेखरस्य सूनुं कार्त्तिकेयम् अजयत् । अन्यः दाशरथः तस्यैव चन्द्रचूड़स्य अनुपमम् अतुल्यं धनुः पुष्पमाथं पुष्पमिव ममाथ बभञ्जेत्यर्थः । एतावति व्यापारे द्वावपि भार्गवदाशरथौ बलिनौ शक्तौ हि, हिशब्दोऽवधारणे । किन्तु स भगवान् पार्वत्याः प्राणनाथः शङ्करः यस्य प्रीतः खलु सम्प्रति प्रसन्नो भवेदित्यर्थः जयश्रीः विजयलक्ष्मीः तद्भूमा तद्गामिनी तमाश्रयिष्यतीत्यर्थः । मन्दाक्रान्तावृत्तम् ।

(ढ) अत्रे इत्यादि । नारदवचनमेतत् । अत्रे इत्यादि यम इत्यन्तं सम्बोधनपदम् । हे अत्रादयः ! चेत् यदि रणाय रामभार्गवयोः संग्राम-सन्दर्शनाय पदं नो दत्त, नागच्छत इत्यर्थः तदा एष नारदः शापेन निर्दहति युष्मानिति शेषः । नाकनायक इत्यादि रुद्र इत्यन्तं सम्बोधनपदम् । हे नाकनायक ! देवराज ! विनायक ! गणेश ! चित्रभानो ! अग्ने ! हे भानो ! सूर्य ! हे पिनाक ! हे यक्ष ! हे हे क्षपाधेश ! चन्द्र ! हे दम्भ ! देवविशेष ! कीनाश ! यम ! किन्नर-

भो नाकनायक ! विनायक ! चित्रभानो !
भानो ! विशाख ! वरुण ! गणदेश ! दम्भ ! ।
कीनाश ! किन्नरपते ! पवमान ! रुद्र !
द्राक्सङ्गरं भजत भार्गवराघवीयम् ॥ ५ ॥
रत्नप्रभे ! रजनि ! चित्रलते ! लवङ्गि !
सौदामिनि ! भ्रमरि ! सुन्दरि ! देवसेने ! ।
रम्भे ! घृताचि ! कलकण्ठि ! सुकण्ठि ! सर्वाः !
स्वर्योषितो ! व्रजत पश्यत रामभद्रम् ॥ ६ ॥
मायावने ! विहगवेग ! कृपाणकेतो !
जीमूतवाहन ! कपिञ्जल ! हसनाद ! ।
विद्यावतंस ! तिलकोत्तर ! केलिसार !
विद्याधरास्त्वरितमेत रणाय यामः ॥ ७ ॥
हे हेमवर्ण ! मणिशेखर ! चित्रबाहो !
वीणाविनोद ! मदवल्लभ ! रक्तकण्ठ ! ।

---

मते ! पवमान ! वायो ! हे रुद्र ! द्राक् द्रुत भार्गवराघवीयं संङ्गरं संग्रामं भजत पश्यत । रत्नप्रभे इत्यादि सुकण्ठि इत्यन्तं सम्बोधनपदम् । हे रत्नप्रभादयः ! सर्वाः स्वर्योषितः सुरसुन्दर्य्यः ! यूयं व्रजत गच्छत, रामचन्द्रं पश्यत अवलोकयत । मायावने इत्यादि केलिसार इत्यन्तं सम्बोधनपदम् । हे मायावनिप्रभृतयः विद्याधराः ! यूयं त्वरितं शीघ्रम् एत आगच्छत, रणाय भार्गवराघवयोः रणं द्रष्टुमित्यर्थः यामः गच्छामः वयमिति शेषः । हेमवर्ण इत्यादि रक्तकण्ठ इत्यन्तं सम्बोधनपदम् । हे हेमवर्णादयः चारणाः द्विजाः ! चेत् यदि द्विदृक्षा द्रष्टुमिच्छा युष्माकमिति शेषः तदा यूयं युद्धं मां ... अनुगच्छत । वसन्ततिलकं वृत्तं सर्वेषु ।

क्रौञ्चकुमार! कनकाङ्गद! रुद्रहास!

द्राक् सारणाः! सरत मां युधि वेदितुं चेत् ॥ ८ ॥ (ढ)

उपाध्यायः। वत्स भवभूते! कलहकुतूहली नारदमुनिर्महर्षीन् देवानप्सरसो विद्याधरान् सिद्धांश्च (थ) हठप्रसादाभ्यामभिधत्ते तदेह्यावामपि तत्समरोपस्थानेन कमलसम्भवसम्भवं मुनिमनुवर्त्तामहे।

इति निष्क्रान्तौ। मिश्रविष्कम्भकः।

ततः प्रविशति मातलिसारथिना रथेन चामरधारिण्या वीज्यमानो दशरथः। समन्तादवलोक्य। (त) कथमुन्निद्रपारिभद्रद्रुमस्तबकरमणीयारुणसन्ध्यानुबन्धिनि गगनाङ्गनपृष्ठे प्रतिष्ठामहे। विचिन्त्य। अहो! काऽपि वैचित्री वर्त्तते अन्तरीक्षकुक्षौ प्रभातसमयस्य। तथाहि।

व्योमोत्सङ्गविभूषणस्य सवितुर्द्यावापृथिव्योः समं
ध्वान्तध्वस्तिकृदङ्मुखैश्च किरणैः प्रारम्भि चावाङ्मुखैः।
प्रत्यासन्नविरोधितस्य गगने मन्दाकिनीसद्मनां
पद्मानां प्रकरः प्रगेऽपि विकसत्याहत्तकीर्णच्छदः ॥ ९ ॥ (द)

---

(थ) हठप्रसादाभ्यां हठेन व्यक्ततया प्रसादेन प्रसन्नतयेत्यर्थः।

(त) उन्निद्रेति। उन्निद्रः विकासं गतः यः पारिभद्रद्रुमस्य स्तबकः तद्वत् रमणीया अरुणा या सन्ध्या प्रातःसन्ध्या तामनुबध्नाति सङ्गच्छते इति तथोक्ते गगनाङ्गनपृष्ठे आम्बरतले। अन्तरीक्षकुक्षौ गगनान्तरे।

(द) व्योमेति। व्योमोत्सङ्गस्य गगनक्रोडस्य विभूषणम् अलङ्कारः तस्य तथा प्रत्यासन्नविरोधितस्य निराकृततमसोः सवितुः सूर्यस्य

अपि च।

निर्याति प्रथमप्रचारसमये स्फारध्वनड्डिण्डिम-
स्वस्ताधोरणदूरनामितगजेनाऽयं नभोवर्त्मना।
अभ्रं वा जघनान्तदोलितकरः स्वर्वाहिनीं गाहितुं
रोधस्ताडनकेलिरुग्णदशनग्रावाग्निरैरावणः॥ १०॥ (द)

स्मरणमभिनीय। आर्य मातले! (ध) सकलसुरसुन्दरी-
करतलान्दोलितचामरचिकुरचुम्ब्यमानमांसलांसस्थलोत्सृष्टा-
नितसन्तानकुसुममालाप्रालम्बेन समददानवद्विरदनिकु-
रम्बडम्बरडामरैकहारिणा हरिणा समादिष्टोऽस्मि यथा

---

उदङ्मुखैः ऊर्द्ध्वमुखैः अवाङ्मुखैः अधोमुखैश्च किरणैः समं युगपद् द्यावापृथिव्योः ध्वान्तध्वस्तिः अन्धकारविध्वंसनं प्रारब्धि च। गगने प्रगेऽपि प्रातरेव अपि रत्नावधारणार्थः मन्दाकिनीरत्नानां स्वर्गङ्गारुहां पद्मानां प्रकरः समूहः आवृत्ताः पुनरुद्भूताः कीर्णाः विस्तारं गताः छदाः पत्राणि यस्य तथाभूतः सन् विकसति। शार्दूलविक्रीड़ितं वृत्तम्।

(द) निर्य्यातीति। रोधसः तटस्य ताड़ने यः केलिः क्रीड़ा। वप्रक्रीडेति यावत्। तेन रुग्णाः त्रुटिताः दशनरूपाणां ग्राव्णां प्रस्तराणाम् अग्नयः कोणाः यस्य तथाभूतः ऐरावणः अयं सुरगजः प्रथमप्रचारसमये आद्यगमनकाले स्फारेण महता ध्वनता डिण्डिमेन त्रस्तेन आधोरणेन हस्तिपालेन दूरं नामिताः गजाः यस्मिन् तथोक्तेन नभोवर्त्मना अन्तरिक्षमार्गेण अभ्रं मेघं वा स्वर्वाहिनीं मन्दाकिनीं गाहितुं अघनान्ते दोलितः करः शुण्डादण्डः येन तथाभूतः सन् निर्य्याति निर्गच्छति स्वावासादिति शेषः। शार्दूलविक्रीड़ितं वृत्तम्।

(ध) सकलेति। सकलानां सुरसुन्दरीणां करतलैः आन्दोलितेन चालितेन चामरचिकुरेण चामरलोम्ना चुम्ब्यमानायां स्पृश्यमानायां मांसलायां

सखे। दशरथ! गच्छ त्वं मिथिलां पुरीं यदावेदितं मे मर्त्यमण्डलचाराधिकारचतुरेण चारणचक्रेण यदुत शङ्कर-शरासनसमारोपणपणप्रवर्त्तितसीतास्वयंवरयात्रापरत-न्त्रायां मिथिलायां शिथिलाभिमानग्रन्थिमन्थरस्थितिषु सकलपृथ्वीपालेषु।

गात्रं गोत्राचलेन्द्रस्त्रिनयनवलयं यस्य सिञ्जा भुजङ्गो विष्णुर्बाणः पुराणां त्रयमभयमभूद् दुःखलभ्यं शरव्यम्।
धन्वी येनेन्दुमौलिः स च भुवनगुरुस्तदनुधाम धाम्नां क्रूरङ्कारसारात् स्वभुजवलयितं रामभद्रेण भग्नम् ॥११॥ न

---

स्थूलायाम् अंसस्थल्यां स्कन्धदेशे मन्दानिलः निबद्धः सन्तानकुसुममालानां देवतरुविशेषपुष्पप्रकराणां प्रालम्बः स्रक् यस्य तादृशेन। समदेति समदस्य मत्तस्य अतएव दानवतः मदजलवर्षिणः त्रिदशसिन्धुरस्य गजराजस्य ऐरावतस्य इत्यर्थः यः डम्बरः गतिविशेषः तस्य डामरेण वैचित्र्येण एकहारिणा अतिमनोहरेण हरिणा इन्द्रेण। मर्त्येति मर्त्यमण्डले मनुष्यलोके यश्चारः विचरणं लोकचरित्रदर्शनमिति यावत्। स एवाधिकारः व्यापारः तत्र चतुरेण पटुना। चारणचक्रेण कीर्त्तिप्रचारिवर्गेण। शङ्करेति शङ्करस्य हरस्य यत् शरासनं धनुः तस्य समारोपणमेव पणः तस्मिन् प्रवर्त्तिता। या सीतायाः स्वयंवर-यात्रा तस्यां परतन्त्रायां आसक्तायां व्याप्टतायामित्यर्थः। शिथिलेन खर्वीभूतेन असामर्थ्यादिति भावः अभिमानग्रन्थिना मन्थरा जड़ा। सङ्कुचिता इति यावत् स्थितिर्येषां तादृशेषु।

(न) गात्रमिति। यस्य धनुषः गात्रं शरीरं गोत्राचलेन्द्रः कुल-पर्वतराजः सिञ्जा मौर्वी त्रिनयनस्य हरस्य वलयं हस्तालङ्कारभूतं भुजङ्गः वासुकिरिति यावत्। बाणः शरः विष्णुः, शरव्यं वेध्यं तु अलभ्यं दुष्प्रापम् अभयम् अकुतोभयमित्यर्थः पुराणां त्रयम् आसुरी

(प) गुरुधनुर्ध्वंसजनितामर्षविषमेण वीतत्रासरेणुना रैणुकेयेन सह रामभद्रस्य समरसंरम्भो भवितेति तत्र च तत्प्रतिकृत्य अभ्रवरमयोध्यामध्यारोप्य सुरकार्य्यशेषसम्पत्तये प्रसरनाल्लतेनोपस्थातव्यमिति । तन्नमुचिसूदनसारथे ! कथय स भगवान् पौलोमीवल्लभो भृगुपतिचरितानि बहु मन्यते न वा ।

मातलिः । किं नाम बहु मन्यते न वेति शृणु श्रावयामि ।

आस्थानसद्मनि विलासगृहे विमाने
चैत्रे रथे च सततं सुरचक्रवर्त्ती ।
रामस्य चित्रलिखितानि कुतूहलेन
वीरो विलोकयति पूर्वविचेष्टितानि ॥ १२ ॥ (फ)

---

त्रिपुरीत्यर्थः अभूत् । स च भुवनगुरुः ईश्वरः इन्दुमौलिः येन धनुषा धन्वी धनुर्धरः कीर्त्त्यते इति शेषः । धाम्नां तेजसां धाम निकेतनं तत् धनुः क्रूरः कठिनः कर्कश इत्यर्थः ओङ्कारः क्वणनं यस्मिन् तद् यथा तथा रामभद्रेण स्वभुजाभ्यां वलयितं मण्डलितं सत् भग्नम् । स्रग्धरावृत्तम् ।

(प) गुर्व्विति । गुरोः पार्व्वतीशस्य धनुर्ध्वंसेन कार्मुकभङ्गेन जनितः उत्पादितः यः अमर्षः विद्वेषः तेन विषमेण दारुणेन । वीतः विशेषेण गतः त्रासस्य भयस्य रेणुः धूलिः यस्य तथोक्तेन निर्भयेण इत्यर्थः रैणुकेयेन रेणुका जमदग्निभार्य्या तदपत्येन परशुरामेण । समरस्य संग्रामस्य संरम्भः सम्भ्रमः समावेश इत्यर्थः । प्रतिकृत्य प्रति-विधाय सुरकार्य्याणां सम्पत्तये सम्पादनाय । नमुचिसूदनसारथे । नमुचेः असुरस्य सूदनः संहर्त्ता इन्द्रः तस्य सारथिः मातलिः तत्सम्बुद्धौ ।

(फ) आस्थानेति । वीरः सुराणां चक्रवर्त्ती पुरन्दरः आस्थानसद्मनि

यदस्यैव पुरन्दरस्यन्दनस्य चतुर्दिशं (न) मत्तवारणीयफलकेषु रामचित्रं लिखितम् । अङ्गुल्या निर्दिशन् । तत्तावदितो दीयतां दृष्टिः । इयं च प्ररोचना भृगुपतिपराक्रममहानाटकस्य यदुत भगवतस्त्र्यम्बकात् कार्मुकोपनिषल्लाभः ।

दशरथः । कथमयं (भ) विशालशिलः शिलोच्चयः । तत्रापि हिमालय इति प्रालेयपाण्डुराभिः शिखरश्रेणीभिर्लक्ष्यते । मातलिः ।

शैलेन्द्रो हिमवानयं गुरुगुहागर्भस्थविद्याधरी-
गीतत्वच्चरितः कृताश्रमपदो रुद्रेण पत्न्या सह ।
एतस्मिंश्चिरजीविभिः परिगतं दिव्यौषधीसेवनात्
कन्दर्पस्य वपुष्मतश्च चरितं राजन्ननङ्गस्य च ॥ १३ ॥ (म)

---

सभाग्टहे विलासग्टहे क्रीड़ावेश्मनि, विमाने व्योमयाने जैत्रे जयसाधने रथे च चित्रलिखितानि आलेख्यसमर्पितानि रामस्य पूर्वविचेष्टितानि प्राक्तनकार्य्याणि कुतूहलेन सततं विलोकयति । वसन्ततिलकं वृत्तम् ।

(न) मत्तवारणीयफलकेषु मत्तवारणः प्रासादस्य वरण्डदेशः बारागडा इति ख्यातः तत्रत्येषु फलकेषु काष्ठादिखण्डेषु । प्ररोचना दर्शनम् । भृगुपतेः परशुरामस्य यः पराक्रमः स एव महानाटकं महान् अभिनेयव्यापारः । कार्मुकोपनिषल्लाभः धनुर्विद्याधिगमः ।

(भ) विशालशिलः विशालाः महत्यः शिलाः यस्मिन् तथाभूतः । शिलोच्चयः पर्वतः । प्रालेयैः हिमैः पाण्डुराभिः धवलाभिः ।

(म) शैलेन्द्र इति । हे राजन् ! गुरूणां गुहानां मध्यस्थाभिः विद्याधरीभिः गीतं तव चरितं यस्य तादृशः एतद्गुहासु विद्याधर्य्यः तव चरितं गायन्तीति भावः । तथा रुद्रेण हरेण पत्न्या पार्वत्या

अस्मतो दर्शयन्। इह धनुर्वेदविद्योपदेशः।

देवस्त्र्यम्बक एष वन्द्यचरणो वृन्दैः सुधाभोजिना-
मत्रास्ते स शरासनोपनिषदं दातुं वृताचार्य्यकः।
दूरावर्जितमौलयः सरभसाः सद्यः प्रतीच्छन्त्यमी
हेरम्बेण च षण्मुखेन च समं रामादयः सुव्रताः ॥१४॥ (य)

दशरथः। अहो! मनुष्यमुनिमहाभागधेयो भगवान्
भार्गवो यस्य स्वयमर्द्धेन्दुमौलिर्धनुर्वेदविद्याचार्यः।

(र) सौदामिनी। कथं (ल) अधिगदोवदेसरहस्सा कुर-

---

(८) कथमधिगतोपदेशरहस्याः कुरलेखेलिन इव एते वर्त्तन्ते।

---

सह कृतम् आश्रमपदं यस्मिन् तथाविधः अयं हिमवान् शैलेन्द्रः पर्वतराजः। एतस्मिन् दिव्यानाम् औषधीनां सेवनात् चिरजीविभिः अमरभावं प्राप्तैरित्यर्थः जनैः वपुष्मतः शरीरिणः अनङ्गस्य अशरीरस्य च कन्दर्पस्य चरितं पादचारणम् परिगतं ज्ञातम्। चिरजीवित्वात् कन्दर्पस्य आगतिः एभिर्दृष्टेतिभावः शार्दूलविक्रीड़ितं वृत्तम्।

(य) देव इति। सुधाभोजिनाम् अमृतपायिनां देवानां वृन्दैः वन्द्यौ चरणौ यस्य तथोक्तः देवः त्र्यम्बकः अत्र पर्व्वते शरासनोपनिषदं धनुर्वेदं दातुं वृतं गृहीतम् आचार्य्यकं आचार्य्यकर्म येन तादृशः सन् आस्ते अधितिष्ठति। अमी च सुव्रताः शुभव्रतधारिणः रामादयः भार्गवप्रभृतयः हेरम्बेण गणपतिना षण्मुखेन स्कन्देन च समं सह सरभसाः सहर्षाः साभिनिवेशा वा। रभसो वेगहर्षयोरित्यमरः। तथा दूरम् अत्यन्तम् आवर्जिता आनमिताः मौलयः यैः तथाभूताः सन्तः प्रतीच्छन्ति गृह्णन्ति धनुर्वेदमिति शेषः। शार्दूलविक्रीड़ितं वृत्तम्।

(र) सौदामिनी पूर्वोक्तायाः चामरधारिण्याः संज्ञा।

(ल) अधिगतम् उपदेशरहस्यं यैः तथाभूताः। कुरलाः षट्-

सोखेल्लिणो दट्ठो एदे वट्टन्ति किं उण दूरदेसप्पसरो लक्ख-
विक्खेवो णिविडप्पहारित्तणं च रामबाणाणं सविसेसमा-
लिहिदं एत्थ (८) ।

मातलिः । अहो! (व) महदन्तरं प्रज्ञाप्रकर्षस्य । तथाहि ।

उपदिशति समानं कर्म कृत्स्नं पिनाकी
सममपि च यतन्ते कर्त्तुमभ्यासमेते ।
तदपि भृगुकुलेन्दुः काममुत्कृष्यतेऽसौ
ननु भवति निवीतं द्रव्यमेव क्रियाभिः ॥ १५ ॥ (श)

पुरोऽवलोक्य । अति हि नाम (ष) स्वच्छन्दचरितस्या-
ऽपि देवस्य माध्यस्थ्यम् । तथाहि ।

---

किं पुनर्दूरदेशप्रसरो लक्ष्यविक्षेपो निविड़प्रहारित्वं च रामबाणानां सविशेषमालिखितमत्र ।

---

भ्यासेन खेलन्तीति तथोक्ताः । दूरदेशे प्रसरो गतिः येन तथाभूतः । लक्ष्यस्य शरव्यस्य विक्षेपः विक्षेपणम् । निविड़प्रहारित्वं दृढ़प्रहा-रित्वम् रामस्य परशुरामस्य बाणानां शराणाम् ।

(व) अन्तरं प्रभेदः । प्रज्ञायाः प्रकर्षः उत्कर्षः तस्य ।

(श) उपदिशतीति । पिनाकी हरः कृत्स्नं समग्रं कर्म समानं तुल्यम् उपदिशति । एते च रामादयः समानम् अभ्यासं कर्त्तुं शिक्षि-तुमिति यावत् यतन्ते चेष्टन्ते । तदपि तथा सत्यपि असौ भृगु-कुलेन्दुः भार्गवचन्द्रः कामं सम्यक् उत्कृष्यते हेरम्बादिभ्यः उत्-कृष्टो भवतीत्यर्थः । ननु निश्चितं द्रव्यमेव सामान्यं स्वतन्त्रं वस्तु एव क्रियाभिः वेदविहितानुष्ठानैः निवीतं यज्ञसूत्रं भवति सामान्य-वस्तूनामपि गुणाधाने उत्कर्षसिद्धिरिति भावः । सामान्येन विशेष-समर्थनरूपोऽयमर्थान्तरन्यासः । मालिनीवृत्तम् ।

(ष) स्वच्छन्दचरितस्य यथेच्छचारिणः पक्षपातसमर्थस्यापीति

बर्हिर्ध्वजेऽपि सति सत्यपि दन्तिवक्त्रे
प्रेमोपधानमवधूय पिनाकपाणिः ।
हस्तेन नित्यधृतवासुकिकङ्कणेन
प्राज्ञप्रियः स्पृशति भार्गवमेव पृष्ठे ॥ १६ ॥ (स)

पुरतोऽवलोक्य । कथं (ह) खुरलोखेलनप्रसरत्पृषत्कपङ्क्तीनां त्रिनयनान्तेवासिनां चेतसि विरचितं पदं परस्परस्पर्द्धया ।

पुनरवलोक्य । कोदण्डपाण्डित्यनिबन्धनः प्रवृत्त एव कलहः ।

दशरथः । एवमेवतत् ।

हन्तारब्धविजृम्भितभ्रुकुटिना भालेन रामे मुनौ
कोदण्डं निबिडाङ्गुलीपरिगमादास्फालयत्सु तः ।

---

भावः । माध्यस्थम् औदासीन्यं समदर्शित्वमित्यर्थः पुत्रापेक्षया भार्गवस्य प्रकर्षेऽपि न कश्चित् विराग इति तात्पर्य्यम् ।

(स) बर्हिर्ध्वजे इति । प्राज्ञः प्रज्ञावान् प्रियो यस्य तथाभूतः पिनाकपाणिः हरः बर्हिर्ध्वजे मयूरवाहने कुमारे सत्यपि तथा दन्तिवक्त्रे गजानने सत्यपि च प्रेमोपधानं स्नेहावलम्बं स्नेहपात्रत्वमिति यावत् अवधूय विहाय नित्यं सततं धृतं वासुकि नागराज एव कङ्कणः यस्मिन् तथाभूतेन हस्तेन भार्गवमेव न तु हेरम्बादीनिति भावः एवशब्दोऽत्रान्यव्यवच्छेदकः । पृष्ठे स्पृशति स्नेहेन परामृशति । वसन्ततिलकं वृत्तम् ।

(ह) खुरलीति । खुरलीखेलनेन शरविक्षेपाभ्यासरूपक्रीडनेन प्रसरन्त्यः पृषत्कानां शराणां पङ्क्तयः येषां तथोक्तानां त्रिनयनान्तेवासिनां हरशिष्याणां विरचितं कृतम् । पदं स्थानम् । परस्परस्पर्द्धिन एते संवृत्ता इत्यर्थः । कोदण्डेषु धनुःषु यत् पाण्डित्यं वैचक्षण्यं तदेव निबन्धनं हेतुः यस्य तथाविधः ।

(च) हन्तेति । रामे भार्गवे मुनौ हन्तस्य कलहस्य आरब्धः

ज्यानिर्घोषकषायितोदरजुषां गीर्वाणसेनापतेः
षड्वक्त्रीश्रवसां करोति न करद्वन्द्वं पिधानक्रियाम् ॥१७॥ (क)

सौदामिनी। एस समरङ्गणसमासण्णकेलाससिहरणिवेसी भअवं वुसहलञ्छणो समं विसाहजणणीए देवीए क) पेक्खदि णंदिप्पमुहसेणावदिपरिव्वुदाणं कुमारहेरम्बाणं रामेण सह झत्ति समरसंरम्भविवसिदं (८)।

मातलिः। न केवलं पश्यति (ख) स्वमनीषिकोत्कर्षिणि विषये किमपि प्रीयते। यतः।

---

(८) एष समराङ्गणसमासन्नकैलासशिखरनिवेशी भगवान् वृषभलाञ्छनः समं विशाखजनन्या देव्या प्रेक्षते नन्दिप्रमुखसेनापतिपरिवृतयोः कुमारहेरम्बयो रामेण सह झटिति समरसंरम्भव्यवसितम्।

उद्योगः तेन विजृम्भिना प्रकटिता भ्रूकुटिः भ्रुवोः कौटिल्यं यस्मिन् तादृशेन भालेन ललाटेन उपलक्षणे तृतीया। निविडाङ्गुलीपरिगमात् निविडया दृढया अङ्गुल्या परिगमात् ग्रहणात् अग्रतः पुरतः कोदण्डं कार्मुकम् आस्फालयति सति गीर्वाणानां देवानां सेनापतेः कार्त्तिकेयस्य करद्वयं हस्तयुगलं ज्यानिर्घोषेण रामस्य धनुष्टङ्कारेण कषायितं बधिरितम् उदरं जुषन्तीति तथोक्तानां षड्वक्त्रीश्रवसां षडाननकर्णानां द्वादशानामिति भावः पिधानक्रियाम् आच्छादनं करोति। शार्दूलविक्रीडितं वृत्तम्।

(क) विशाखजनन्या कार्त्तिकेयमात्रा। कुमारहेरम्बयोः कन्दगणपत्योः।

(ख) स्वमनीषिकोत्कर्षिणि स्वस्य मनीषिकया प्रज्ञया उत्कर्षिणि प्राप्तोत्कर्षे।

सम्यक्कोदण्डविद्या विनयचतुरता कुत्र सोल्लेखरेखा
पुत्रान्तेवासिनोर्मे सपदि परिणतेत्येष वेत्तुं विशेषम् ।
देवः श्रीचन्द्रचूडामणिरचलसुतापाणिपद्मावलम्बी
स्थित्वोद्ग्रीवं विटङ्कात् स्फटिकशिखरिणो वीक्षते निश्चलाक्षः १८

दशरथः । अति हि प्रीयते । यतः ।

नन्दन्नन्दिनि चण्डचण्डचरिते हेलाचलच्चन्द्रम-
स्युद्दामद्विरदास्यहास्यरसवत्याविष्टघण्टामुखे ।
भ्राम्यद्भृङ्गिरिटौ च भङ्गुरगणग्रामे सहैवोमया
संग्रामे प्रहरन्नयं दिशि दिशि प्रेम्णा हरेणेक्ष्यते ॥१९॥ (घ)

मातलिः । इत इतः पश्य हास्याङ्कुतयोरधिष्ठानम् ।

---

(ग) सम्यगिति । एषः देवः श्रीचन्द्रचूडामणिः हरः अचलसुतायाः पार्वत्याः पाणिपद्मावलम्बी गृहीतकरकमलः निश्चलाक्षः स्थिरदृष्टिः सन् उद्ग्रीवम् उन्नतग्रीवं यथा तथा स्थित्वा स्फटिकशिखरिणः श्वेतपर्वतस्य विटङ्कात् अग्रात् मे मम पुत्रान्तेवासिनोः पुत्रस्य स्कन्दस्य अन्तेवासिनः शिष्यस्य परशुरामस्य च द्वयोर्मध्ये कुत्र सम्यक् सम्पूर्णा कोदण्डविद्या धनुर्विद्या तथा सोल्लेखरेखा उल्लेखरेखया सह वर्त्तमाना विनयचतुरता च सपदि परिणता इति विशेषं वेत्तुं वीक्षते अवलोकयति स्रग्धरावृत्तम् ।

(घ) नन्दन्निति । नन्दन् नन्दी यस्मिन् तादृशे, चण्डं प्रचण्डं चण्डस्य गणभेदस्य चरितं यत्र तथाभूते हेलया चलन् चन्द्रमा यस्मिन् तथोक्ते, उद्दामः उत्कटः द्विरदास्यस्य गणपतेः यः हास्यरसः तद्वति, आविष्टः प्रवृत्तः घण्टामुखः गणभेदः यस्मिन् तादृशे, भ्राम्यन् भृङ्गिरीटिः यत्र तथोक्ते, तथा भङ्गुराः पलायनपराः गणानां ग्रामाः समूहा यस्मिन् तथाभूते संग्रामे दिशि दिशि प्रहरन् अयं भार्गवः हरेण उमया सहैव प्रेम्णा स्नेहेन ईक्ष्यते दृश्यते । शार्दूलविक्रीडितं वृत्तम् ।

दो:र्दण्डद्वितयाश्रितोन्नतधनुर्यन्त्रप्रसूतेषवः
शुण्डोद्दण्डपरश्वधाः परिणमद्दन्तार्गलाकोटयः ।
एताः कर्णविकीर्णवक्त्रकवचाः संरम्भिणः सङ्गरे
हेरम्बस्य हरन्ति हन्त हृदयं द्राक्कोपविक्रान्तयः ॥२०॥ (ङ)
नरनागक्रियामिश्रा हृतरुद्राम्बकक्रियाः ।
दुर्धरा हन्त हेरम्बरणव्यापारकेलयः ॥ २१ ॥ (च)
सौदामिनी । (छ) कुञ्जराननरणकर्मनिर्माणपरिकोपितेन

---

(२०) कुञ्जराननरणकर्मनिर्माणपरिकोपितेन जामदग्निसूनुनो-

---

(ङ) दोर्दण्डेति । दोर्दण्डद्वितयेन बाहुदण्डयुगलेन आश्रितं धृतम् उन्नतं धनुर्यन्त्रं तस्मात् प्रसूता इषवः शराः यासु ताः, शुण्डायाम् उद्दण्डः परश्वधः परशुः यासु तथोक्ताः, परिणमन्त्यः स्फुरन्त्यः दन्तानाम् अर्गलानामिव कोटयः अग्राणि यासु तथाविधाः, तथा कर्णाभ्यां विकीर्णं वक्त्रस्य मुखस्य कवचम् आवरणविशेषो यासु तादृश्यः एताः सङ्गरे युद्धे संरम्भिणः क्रुद्धस्य हेरम्बस्य गणपतेः द्राक् झटिति कोपविक्रान्तयः सकोपविक्रमाः हन्त हर्षे हृदयं हरन्ति । शार्दूलविक्रीडितं वृत्तम् ।

(च) नरेति । नरस्य नागस्य हस्तिनः क्रियया मिश्राः सम्बलिताः नररूपेण हस्तिरूपेण च उभयथा संमिश्रिताः हृता रुद्राणाम् अम्बकानाञ्च गणभेदानां क्रिया व्यापारा येषु तथाविधाः हेरम्बस्य गणनायकस्य रणव्यापारकेलयः संग्रामक्रीडनानि हन्त हर्षे दुर्धराः दुःसहा इत्यर्थः । पथ्यावक्त्रं वृत्तम् ।

(छ) कुञ्जराननस्य गणेशस्य रणकर्मणां निर्माणेन प्रसङ्गेन परिकोपितेन क्रुद्धेन, गच्छन्तः पलायमानाः गणग्रामा यस्मिन् तत् ।

जमदग्गिसूणुणा उवक्कन्तं किंपि जेण णासन्तगणग्गामं
संमज्जिदं विअ समरङ्गणं पडिहाअदि (१०)।

दशरथः। साधु सौदामिनि! साधु, यथा (ज) समर्थयसे।

अत्रैते प्रमथाः सरन्ति सभियः कैलासशैलान्तरं
नन्दी भृङ्गिरिटिश्च लूनधनुषावत्रेषुधी मुञ्चतः।
हेरम्बस्य च मुक्तमत्र मधुपैस्त्रासादमाद्यन्मुखं
क्रौञ्चारिः परमेष तिष्ठति हसन् सङ्ख्ये शरैः पुङ्खितैः ॥२२॥

पुरोऽवलोक्य। कथं जामदग्न्यस्य पुरतोऽक्षरावली *।

वाचयति।

त्वं पुत्रस्त्रिपुरद्रुहः पुनरहं शिष्यस्तदेतावता
तुल्योऽप्यस्तु कथं तवायमधिकः कोदण्डशिक्षाविधिः।

---

प्रक्रान्तं किमपि येन नश्यद्गणग्रामं संमार्जितमिव समराङ्गणं प्रतिभाति।

---

(ज) समर्थयसे सम्भावयसि।

(झ) अत्रेति। अत्र एते प्रमथाः गणाः सभियः भीताः सन्तः कैलासशैलान्तरं कुवेरशैलविवरं सरन्ति समाश्रयन्ति। अत्र नन्दी भृङ्गिरिटिश्च लूनधनुषौ छिन्नकार्मुकौ सन्तौ इषुधी तूणीरौ मुञ्चतः त्यजतः। अत्र मधुपैः भ्रमरैः त्रासात् भयात् अमाद्यत् अम्लानमदजलं हेरम्बस्य मुखं मुक्तम्। एषः क्रौञ्चारिः स्कन्दः सङ्ख्ये पुङ्खितैः सपुङ्खैः शरैः परम् अत्यर्थं विद्धोऽपीति शेषः हसन् तिष्ठति।

* अक्षरावली लिपिः।

(ञ) त्वमिति। त्वं त्रिपुरद्रुहः हरस्य पुत्रः अहं पुनः शिष्यः। तत् तस्मात् एतावता पुत्रत्वेन शिष्यत्वेनेत्यर्थः तुल्योऽपि समोऽपि कोदण्डशिक्षाविधिः धनुर्वेदशिक्षाव्यापारः अस्तु, तव अयं कोदण्डशिक्षाविधिः कथम् अधिकं स्यादिति शेषः। यदि आर्येयस्य

तत्राधारनिबन्धनो यदि भवत्याधेयधर्मोदय-
स्तद्भोः स्कन्द ! गृहाण कार्मुकमिदं निर्णीयतामन्तरम् ॥ २३ ॥

मारीचः । (ट) भूकाश्यप ! पुरतः पश्य सहसा षण्मुखं संमुखीभूय स्थितवन्तं गजाननं च भृगुपतिः पाशुपतास्त्रेण ज्योतिश्छटाच्छादितरोदःकन्दरकुहरडामरेण हर्षादुपतिष्ठते ।

दशरथः । कथमक्षरावली वाचयति ।

क्रोधोद्बोधव्यतिकरसदृङ्निर्भराभ्यासयोग्यो
मद्दोर्दण्डोपगमसदृशस्त्र्यक्षशिष्योचितस्य ।
दत्तातङ्को विबुधमनसां कर्तुमड्डा कबन्धं
चापादस्मात् प्रसरतु शरः सम्मुखः षण्मुखेऽपि ॥ २४ ॥ (ठ)

---

आश्रयिणो धर्मस्य उदयः अभ्युन्नतिः आधारनिबन्धनः आश्रयहेतुकः भवति तद् तर्हि भोः स्कन्द ! इदं कार्मुकं गृहाण, अन्तरं प्रभेदः आवयोरिति शेषः निर्णीयतां निश्चीयताम् । शार्दूलविक्रीडितं वृत्तम् ।

(ट) भूकाश्यप ! भुवः पृथिव्याः काश्यप ! मारीच ! रामरूपस्य विष्णोर्जनकत्वादिति भावः । पाशुपतास्त्रेण पशुपतिः देवता यस्य तत् पाशुपतं तदेव अस्त्रं पाशुपतास्त्रं तेन । ज्योतिषां छटाभिः समूहैः छादितं रोदसी द्यावापृथिव्योः कन्दरकुहरं गुहाविवरं येन तथोक्तं डामरं प्रचण्डञ्च तेन ।

(ठ) क्रोधेति । क्रोधस्य कोपस्य उद्बोधः उद्रेकः तस्य व्यतिकरः अतिशयः तस्य सदृक् सदृशः अनुरूपः निर्भरः अत्यन्तः यः अभ्यासः शिक्षा तद्योग्यः मम दोर्दण्डेन यः उपगमः ग्रहणं तत् सदृशः त्र्यक्षस्य हरस्य शिष्यः तस्य उचित उपयुक्तः विबुधानां देवानां मनांसि तेषां दत्तातङ्कः प्रदत्तभयः षण्मुखे स्कन्देऽपि सम्मुखः अपराङ्मुखः

मातलिः । अत्रान्तरे किञ्चिज्जातम् ।

किञ्चित्कोपकषायितेन मनसा यावत् सतोमूनवे
नैयत्तं भृगुनन्दनो निजधनुर्यन्त्रे निधत्ते शरम् ।
हेलास्रस्तदुकूलसंवृतिमती विस्रंसिकाञ्चीलता
तावद्व्याकुलनूपुरं भगवती मध्ये मृडानी स्थिता ॥२५॥ (ङ)

दशरथः । पुरतोऽवलोक्य । अयं तु (ढ) प्रकृत्युद्धतो रामः कथमित्थमतिप्रश्रयते । तदस्य त्रिभुवनातिशायि चरिताद्भुतम् । तथाहि ।

दृष्ट्वा रामः किसलयसमं पाणिमुद्यम्य तस्य
मध्ये भूतां गिरिदुहितरं पश्यतस्यात्मनश्च ।
संहृत्यास्त्रं विधृतशरधिर्मुक्तकोदण्डदण्डः
पादौ मार्जयमति नमता प्राग्जटामण्डलेन ॥ २६ ॥ (ण)

---

दुत्यर्थः शरः अद्धा सहसा कवचम् आकालिकं धूमकेतुं कर्तुम् अमङ्गलादिदानं केतुदयं विधातुमित्यर्थः अस्मात् चापात् धनुषः प्रसरतु निर्गच्छतु । मन्दाक्रान्ता वृत्तम् ।

(ङ) किञ्चिदिति । भृगुनन्दनः परशुरामः किञ्चित् ईषत् कोपकषायितेन क्रोधकलुषितेन मनसा उपलक्षितः यावत् सतोमूनवे कार्त्तिकेयाय निजधनुर्यन्त्रे नैयत्तं पाशुपतं शरं निधत्ते संहितवान् तावत् मध्ये भगवती मृडानी पार्वती हेलया स्रस्तेन विगलितेन दुकूलेन वसनेन संवृतिमती अवगुण्ठनवती तथा विस्रंसिनी काञ्चीलता रशनायष्टिर्यस्यास्तथाभूता सती व्याकुलनूपुरं स्खलन्मञ्जीरं यथा तथा स्थिता । शार्दूलविक्रीडितं वृत्तम् ।

(ढ) प्रकृत्युद्धतः स्वभावप्रचण्डः । अतिप्रश्रयते अत्यन्तं विनीतवद् व्यवहरति ।

(ण) दृष्ट्वेति । रामः भार्गवः गिरिदुहितरं पार्वतीं विश-

सौदामिनी। अहो! प्पसादादिसओ रामम्मि चन्दसेहरस्स (त) तत्थभवं! मत्तमण्डलाखण्डल! ता इदो पेक्ख (११)।

दशरथः। दृष्ट्वा।

येनात्र खण्डपरशुः परशूत्तमेन
शम्भुः सुमेरुतटताडनखण्डितेन।
रामाय चाग्रहवते तमसौ कुठार-
मस्मै समर्पयति साञ्जलिसम्पुटाय॥ २७॥ (थ)
दत्ते च विद्यास्थानानि देवस्तस्मै चतुर्दश।
शतभङ्गीभवद्भद्रा महतां हि प्रसत्तयः॥ २८॥ (द)

---

(११) अहो! प्रसादातिशयो रामे चन्द्रशेखरस्य तत्रभवन् मर्त्य-मण्डलाखण्डल! तदितः प्रेक्षस्व।

---

क्षयसमं पल्लवनिभम् अतिकोमलमिति भावः पाणिम् उद्यम्य उत्तोल्य संग्रामनिवारणार्थमिति भावः षण्मुखस्य कार्त्तिकेयस्य आत्मनस्य मध्ये सव्यक् भूतां स्थितां दृष्ट्वा अस्त्रं संहृत्य विधृतः शरधिः तूणीरो येन तथोक्तः तथा मुक्तः परित्यक्तः कोदण्डदण्डः धनुर्यष्टिर्येन तथाविधः सन् प्राक् पूर्वं नमता जटामण्डलेन पादौ मार्जन् स्पृशन् देव्या इति शेषः नमति। मन्दाक्रान्तावृत्तम्।

(त) तत्रभवन्! पूज्य! पूज्यस्तत्रभवान् भवानित्यमरः। मर्त्यमण्डलेषु मनुष्यलोकेषु आखण्डलः इन्द्रः तत्सम्बुद्धौ।

(थ) येनेति। अत्र पर्वते सुमेरोः तटस्य ताड़नेन खण्डितेन दलितेन येन परशूत्तमेन शम्भुः खण्डपरशुः आसीदिति शेषः। असौ शम्भुः आग्रहवते साञ्जलिसम्पुटाय कृताञ्जलये अस्मै रामाय च तं कुठारं समर्पयति ददाति। वसन्ततिलकं वृत्तम्।

(द) दत्ते इति। देवः शिवः तस्मै रामाय चतुर्दश विद्या-

सौदामिनी। संके तदोपहुदि रामो परसुरामोत्ति उच्चदि (१२)।

मातलिः। इदमग्रत पश्य।

यः शृङ्गाग्रैः सरणिमकृणत् क्रौञ्चशैलः सुहेलं
यातुः शम्भोर्धनुरुपनिषत्प्राप्तये पादमूलम्।
सोऽयं कोपादहृति विहितं मार्गणैर्भार्गवस्य
छिद्रद्वारं त्रिदिवसरसीहंसयात्रापवित्रम्॥ २८॥ (ध)

अथेदमग्रतः पश्य अयं हि पितृभक्त्यतिशयः परशु-रामस्य यदुत रेणुकाशिरश्छेदः।

दशरथः। अहह! शान्तं पापं कथं(न)जमदग्न्यपत्यमपि प्रमाद्यति हन्त पुरुहूतसूत!।

---

(१२) शङ्के ततः प्रभृति रामः परशुराम इत्युच्यते।

---

स्थानानि अङ्कप्रभृतीनि। दत्ते ददाति च। हि तथाहि महतां प्रसत्तयः प्रसादाः शतं भङ्गः भेदः यासां ताः शतविधा इत्यर्थः भङ्गाः शुभाश्च भवन्तीति शेषः।

(ध) य इति। यः क्रौञ्चशैलः शृङ्गाग्रैः सहेलं सावज्ञं यथा तथा, धनुरुपनिषत्प्राप्तये धनुर्वेदाधिगमाय शम्भोः पादमूलं यातुः गन्तुः भार्गवस्य सरणिं पन्थानमकृणत् करोध। सोऽयं शैलः कोपात् भार्गवस्य मार्गणैः शरैः विहितं कृतं त्रिदिवसरस्याः मानसे सरसि हंसानां यात्रया गमनेन पवित्रं विशुद्धं छिद्रद्वारं रन्ध्ररूपं द्वारं वहति। मानसयायिनो हंसास्तेनैव छिद्रेण सरन्तीति प्रसिद्धिः। मन्दाक्रान्तावृत्तम्।

(न) जमदग्न्यपत्यं जमदग्नेः सुतः भार्गवः। प्रमाद्यति

सहस्रं हि पितुर्माता गौरवेणातिरिच्यते ।
तत्किं पितृगिरा रामो विधत्ते रेणुकावधम् ॥ ३० ॥ (प)

यद्वा निरपराधवधादेष जमदग्निरपि प्रमाद्यतिस्म । विचिन्त्य । कः पुनरयं मार्गो भार्गवस्य यदिदमपि (फ) प्रस्मर्य्यते ।

गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥ ३१ ॥ (ब)

सौदामिनी । कर्णौ (भ) पिधाय । कहं उण भअवदा भग्गवेण सुदं सवणेहिं सुणिअ वा अणुचिदकज्जं अणुट्ठिद परसुधारावावारेण (१३) ।

---

(१३) कथं पुनर्भगवता भार्गवेण श्रुतं श्रवणाभ्यां श्रुत्वा वाऽनुचितकार्यमनुष्ठितं परशुधाराव्यापारेण ।

---

भक्तो भवति मातृवधादपि न परावर्त्तते इति भावः । पुरुहूतस्य इन्द्रस्य सूत ! सारथे ! ।

(प) सहस्रमिति । माता गौरवेण गुरुत्वेन सहस्रं पितॄन् अतिरिच्यते हि, सहस्रपितृभ्योऽपि मातुर्गौरवमधिकमिति भावः । तत् तदा रामः पितृगिरा पितृवचनेन रेणुकायाः जनन्याः वधं किं कथं विधत्ते करोति ?

(फ) प्रस्मर्य्यते प्रकर्षेण स्मर्य्यते धर्मशास्त्रतया निबध्यते शास्त्रकारैरिति शेषः ।

(ब) गुरोरिति । अवलिप्तस्य उद्धतस्य कार्य्याकार्य्यं हिताहितम् अजानतः उत्पथप्रतिपन्नस्य कुमार्गगामिनः गुरोः पितुरपि परित्यागः विधीयते क्रियते लोकैरिति शेषः ।

(भ) पिधाय आच्छाद्य । श्रुतं मातृवधाज्ञावचनमिति शेषः । परशुधाराव्यापारेण कुठारप्रयोगेण ।

मातलिः। अथायतः पश्य।

दशरथः। दृष्ट्वा। कथं (म) प्रत्यापन्नजीविता पुनरस्य माता।

मातलिः। आश्चर्यमाश्चर्यम्।

यावद्वरं न वृणुते किल जामदग्न्य
स्तुष्टात् पितुः स्वजननीप्रतिमोचनाय।
तावच्छिरः पृथगपि स्थितमस्य मातु-
र्वेगादुपेत्य विदधात्यकबन्धभावम्॥ २२॥ (य)

सौदामिनी। (र) तक्खणजणिदजीविदावदाणस्स सोहइ जणणीसिरच्छेदोवि भअवदो भग्गवस्स (१४)।

दशरथः।

यच्छिन्नं जननीशिरः पितृवराद्भूयोऽपि यत् संहितं
तच्छिष्यस्य पिनाकिनो महदभूच्चित्रं चरित्रं किल।

---

(१४) तत्क्षणजनितजीविताबदानस्य शोभते जननीशिरश्छेदोऽपि भगवतो भार्गवस्य।

---

(म) प्रत्यापन्नेति प्रत्यापन्नं पुनरधिगतं जीवितं यया तथोक्ता।

(य) यावदिति। जामदग्न्यः परशुरामः तुष्टात् आज्ञापालनादिति शेषः पितुः सकाशात् स्वजनन्याः प्रतिमोचनाय पुनरुज्जीवनाय यावत् वरं न वृणुते किल इति अलीके। तावत् वरप्रार्थनाया-त्प्रागेवेत्यर्थः अस्य मातुः शिरः पृथक् स्थितमपि वेगात् उपेत्य उपगम्य स्कन्धदेशमिति शेषः अकबन्धभावम् अपमूर्द्धकलेवरत्वाभावं विदधाति करोति। वसन्ततिलकं वृत्तम्।

(र) तत्क्षणं क्षणमेव जनितं कृतं जीविताबदानं जीवनाख्यानद्भुतं महत् कर्म येन तादृशस्य।

(व) यदिति। यत् जनन्याः शिरः छिन्नं यत् पितृवरात्

तेनैतेन कथाद्भुतेन तु वयं वाचाऽपि लज्जामहे
यद्वा ते गुरवोऽविचिन्त्यचरितास्तेभ्योऽयमस्त्वञ्जलिः ३३ (अ)

मातलिः । इदमन्यद्दृश्यतां द्रष्टव्यम् ।

दशरथः । अयं हि (ब) प्रचण्डदोर्दण्डसहस्रदुःसहो हैहयनरेन्द्रः श्रूयते ।

मातलिः ।

इष्टापूर्त्तपवित्रमाश्रमपदं प्राप्तोऽयमत्रार्जुनो
राजानं जमदग्निरत्र भगवान् सज्जातिथेयोऽर्चति ।
धेनोः कामदुहः कृतोऽत्र च मुनेर्वत्सापहारोऽमुना
प्राणान्मुञ्चति चैष गोग्रहविधावार्चीकिरस्मिन् मुनिः ३४ (स)

---

भूयोऽपि संहितं संयोजितं तत् पिनाकिनः शिष्यस्य भार्गवस्य चित्रम् अद्भुतं महत् चरित्रं किल निश्चितम् अभूत् । तेन प्रसिद्धेन एतेन कथाद्भुतेन अद्भुतकथया वयन्तु वाचापि वक्तुमपीत्यर्थः लज्जामहे । यद्वा अथवा ते गुरवः रामादयः अचिन्त्यचरिताः तेभ्यः गुरुभ्यः अयम् अञ्जलिः अस्तु भवतु कृताञ्जलिस्तान् प्रणमामीति भावः । शार्दूलविक्रीड़ितं वृत्तम् ।

( ब ) प्रचण्डेति । प्रचण्डानां दोर्दण्डानां सहस्रेण दुःसहः । हैहयनरेन्द्रः कार्त्तवीर्य्यार्जुनः ।

( स ) इष्टेति । अत्र अयम् अर्जुनः कार्त्तवीर्य्यः अग्निहोत्रादिकं कर्म इष्टं खातादिकं कर्म पूर्त्तं द्वयोः समाहारः इष्टापूर्त्तं, वापीकूपतड़ागादि देवतायतनानि च । अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते इति मनुः । तेन पवित्रं विशुद्धम् आश्रमपदं जमदग्नेरिति शेषः प्राप्तः । अत्र भगवान् जमदग्निः सज्जातिथेयः आतिथ्ये सज्जः-सन् राजानम् अर्जुनम् अर्चति पूजयति । अत्र च अमुना अर्जुनेन कामदुहः अभीष्टप्रदायिन्याः धेनोः वत्सापहारः वत्सहरणं कृतः।

सौदामिनी । पुरतोऽवलोक्य (य) सविचिकित्सम् । अहह ! अक्खत्तिअगोत्तोचिदं आचरिदं बाहुसहस्सजुत्तेण सहसा अज्जुणेण जं दाणिं समररच्छामुच्छिदभत्तारपरित्ताणणिमित्तं उवरि णिवेसिदणिअसरीरा पडिव्वदाणं पढमोदाहरणं रेणुआ किवाणधाराप्पहारेहिं तहिं झडिदि ताडिदा (१५) ।

दशरथः । कथं महतामपि प्रमादः । तदहो ! किमपि (र) कन्दलितानुरागाः संसारभोगाः ।

मातलिः । पुरतोऽवलोक्य । अयमितो महावीरः (ह) पृष्ठास-

---

(१५) अक्षत्रियगोत्रोचितमाचरितं बाहुसहस्रयुक्तेन सहसार्जुनेन यदिदानीं समररथ्यामूर्च्छितभर्तृपरित्राणनिमित्तमुपरि निवेशितनिजशरीरा पतिव्रतानां प्रथमोदाहरणं रेणुका कृपाणधाराप्रहारैस्तत्र झटिति ताडिता ।

---

यस्मिन् प्रदेशे आर्चीकिः ऋचीकनन्दनः मुनिः जमदग्निरेषः गोपहृतिविधौ वत्सापहरणव्यापारे प्राणान् मुञ्चति त्यजति च । जमदग्निं वत्सापहारं कर्त्तुमदितुमनलम् अर्जुनो निजघानेति पुराणमत्रानुसन्धेयम् । शार्दूलविक्रीडितं वृत्तम् ।

(य) सविचिकित्सं ससंशयम् । बाहुसहस्रयुक्तेन सहस्रबाहुना अर्जुनेन सहसा हठात् अविविच्य इत्यर्थः । समररथ्यायां संग्रामाङ्गणे मूर्च्छितस्य मोहं गतस्य अर्जुनप्रहारेणेति भावः । भर्तुः जमदग्नेः परित्राणनिमित्तं रक्षार्थम् ।

(र) कन्दलितानुरागाः कन्दलितः अपवादितः निन्दित इत्यर्थः अनुरागो येषु तथोक्ताः संसारभोगाः सांसारिकभोग्यवस्तूनीत्यर्थः सांसारिकेषु भोगेषु अनुरागो निन्दनीय इति भावः ।

(ह) पृष्ठेति । पृष्ठे आसञ्जितः आरोपितः तूणीरो येन तथोक्तः ;

ज्जिततूणीरः परमेश्वरोपदिष्टधर्मा सज्जीकृतकार्मुककर्मा परशुधाराज्योतिरुज्जृम्भणडामरः समरपरितोषितामरः सकलारण्यकजननिवेदितवृत्तान्तः साक्षादिव कृतान्तः शिखण्डिकेतुकाण्डावलीभिरप्यपहृतः शशिशेखरसेवानिवृत्तः सरभसमितोऽभ्युपेतः । कथमियमग्रतो वर्णावली । वाचयति ।

विद्वान् दारसखः परं परिणतो नीवारमुष्टिम्पचः

सत्यज्ञाननिधिर्दधत् प्रहरणं होमार्जुनीहेतवे ।

रे दुःक्षत्रिय ! किं त्वया मम पिता शान्तो मया पुत्रवान्

नीतः कीर्त्त्यवशेषतां तदिह ते धिग्धिक्सहस्रं भुजान् ३५ च

---

परमेश्वरेण शम्भुना उपदिष्टः धर्मः यस्य तादृशः । सज्जीकृतं कार्मुकस्य कर्म येन तथाविधः । परशुधारायाः ज्योतिरुज्जृम्भणेन तेजःप्रकाशेन डामरः समुज्ज्वलः । समरेण संग्रामव्यापारेण परितोषिता अमरा येन तादृशः । सकलैः आरण्यकजनैः वन्यैः लोकैः निवेदितः विज्ञापितः वृत्तान्तः अर्जुनकृतपितृनिधनरूपः यस्मै तथाभूतः । कृतान्तः यमः । शिखण्डिनः पुच्छान्ताः केतवः यासां तथोक्ताभिः काण्डावलीभिः शरश्रेणिभिः अपहृतः आकृष्टः । शशिशेखरस्य सेवायाः निवृत्तः सरभसं सवेगम् । अभ्युपेतः उपस्थितः ।

(च) विद्वानिति । रे दुःक्षत्रिय ! विद्वान् ज्ञानी दारसखः सस्त्रीकः परम् अत्यर्थं परिणतः वृद्धः नीवारमुष्टिम्पचः नीवारधान्यमुष्टिजीवीत्यर्थः सत्यस्य ज्ञानस्य च निधिः आश्रयः मया पुत्रवान् मत्पुत्रकः मम शान्तः शमगुणवान् पिता होमार्जुनीहेतवे होमधेनुवत्सरक्षार्थं प्रहरणम् अस्त्रं दधत् त्वया कीर्त्त्यवशेषतां नीतः निहत इत्यर्थः तत् तस्मात् इह संसारे ते तव सहस्रं भुजान् धिक् धिक् । शार्दूलविक्रीडितं वृत्तम् ।

मातुः प्रहारत्रयमाहितं मे
विनापराधादिह हैहयेन ।
निःक्षत्रियां त्वां विनिहत्य तेन
त्रिःसप्तकृत्वो जगतीं करोमि ॥ ३६ ॥ (क)

भो भो (ख) निरवद्यवाचस्तपोधनाः ! किं मम कोपप्रशमं परिमार्गध्वं तदस्मिन् परवान् वर्त्ते ।

सा सूतिश्च्यवनान्वये व्रतविधिः सोऽयं च वैखानस
स्ता एताश्च गुरोरनङ्गदहनात् संस्कारशुद्धाः क्रियाः ।
तत्त्वज्ञानमिदं च यत्किल दया भूतेषु धर्मः परः
सर्वं तत् परिहृत्य मातृवधजः क्रोधानलो जृम्भते ॥ ३७ ॥ (ग)

---

(क) मातुरिति । इह हैहयेन अर्जुनेन अपराधात् विना मे मातुः प्रहारत्रयं त्रयः प्रहाराः आहितं दत्तं पितरं निहत्य मातरि त्रिः प्रहृतमित्यर्थः । तेन हेतुना त्वां विनिहत्य जगतीं पृथ्वीं त्रिःसप्तकृत्वः एकविंशतिवारं निःक्षत्रियां करोमि । उपजातिवृत्तम् ।

(ख) निरवद्यवाचः अनिन्द्यवचनाः । कोपस्य प्रशमं प्रशान्तिं परिमार्गध्वं प्रार्थयध्वं ? शान्तकोपो भवेति भवद्भिरुच्यते इति भावः । अस्मिन् विषये अहं परवान् पराधीनः वर्त्ते भवामि नाहं भवतां वाचः शृणोमीत्यर्थः ।

(ग) सेति । च्यवनस्य भार्गवस्य अन्वये वंशे सा सूतिः उत्पत्तिः ममेति सर्वत्रान्वेति । सः अयं वैखानसः तापसोचितः विधिः अनुष्ठानम् । गुरोः अनङ्गदहनात् हरात् ता एताः संस्कारेण विशुद्धज्ञानेन शुद्धाः पवित्राः क्रियाः अनुष्ठानानि । इदं यत् 'तत्त्वज्ञानं, यच्च भूतेषु प्राणिषु दया किल एव परो धर्मः । तत् सर्वं परिहृत्य

मातलिः । (घ) सत्यसङ्गरः परशुरामः ।

ज्यावल्लीवलयलङ्केश्वरसकलसुहृद्दीनविज्ञापनायां
दत्त्वा यः कर्णमूचे यदुत चिरतरं शिक्षितां राक्षसेन्द्रम् ।)
सोऽपि ज्याक्रान्तबन्धत्रुटितभुजतरुर्भार्गवेणैव रोषात्
कीर्तिस्तन्त्रोपमश्रीः परशुविहृतिभिर्द्राक्कृतः कार्त्तवीर्यः ३८॥

सौदामिनी । सच्चं परसुरामो भअवदो भगस्स सिस्सो किं उण भैरवरूवधारिणो ण उण सदासिवस्स कहं अण्णधा से भुअदण्डखण्डणेक्कमल्ला परक्कमारम्भा । (१६)

दशरथः ।

---

(१६) सत्यं परशुरामो भगवतो भर्गस्य शिष्यः किं पुनर्भैरवरूपधारिणो न पुनः सदाशिवस्य कथमन्यथाऽस्य भुजदण्डखण्डनैकमल्लाः पराक्रमारम्भाः ।

---

त्वङ्का पराभूय इत्यर्थः मातृवधेन प्रहारेण जनितः क्रोधानलः कोपाग्निः जृम्भते वर्द्धते । शार्दूलविक्रीडितं वृत्तम् ।

(घ) सत्यसङ्गरः सत्यप्रतिज्ञः । यत् प्रतिजानीते तत् करोतीत्यर्थः ।

(ङ) ज्येति । यः कार्त्तवीर्य्यः ज्या एव वल्ली लता तथा वलयो यः लङ्केश्वरः तस्य सकलाः सुहृदः बान्धवः पुत्रभ्रात्रादयः तेषां दीना या विज्ञापना कातरोक्तिरित्यर्थः तस्यां कर्णं दत्त्वा राक्षसेन्द्रस्य सुहृद्वचांसि श्रुत्वेत्यर्थः चिरतरं दीर्घकालं राक्षसेन्द्रं रावणं शिक्षितां शिक्षाप्रयुक्तं वचनमित्यर्थः ऊचे उवाच मा पुनरेवं कुर्या इत्येवं शिक्षावाक्यमुक्तवानित्यर्थः यदिति वृत्तपूरणार्थमव्ययम् उतेति दशरथसम्बोधनसूचकमव्ययम् । कीर्तिस्तन्त्रोपमा श्रीः सम्पद् यस्य तथाभूतः सोऽपि एष कार्त्तवीर्यः भार्गवेण रोषात् परशुविहृतिभिः कुठार-

एष त्रिःसप्तकृत्वस्त्रिभुवनतिलको मारकः क्षत्रियाणां
तावद्दा भूतधात्र्याः क्रतुषु गुणवते कश्यपाय प्रदाता।
स्नाता चतास्रवापीष्वतनुषु बहुशः क्रोधवह्निप्रशान्त्यै (च)
पित्रोः किञ्च प्रवीरः सपदि वितरिता तन्निवापाञ्जलीनाम् ३९

पुरोऽवलोक्य। अहो! भार्गवपुङ्गवस्य पराक्रमातिशयो यदियं दशा वर्त्तते महीपालानाम्। तथाहि।

याचन्ते गृहिणीमुखैर्नृपतयः स्वप्राणभिक्षामिमे
वन्दन्तश्चरणाश्रयोर्निपतिताः कण्ठे कुठारान् परे।
लीलादर्पणपाणयो विरचितस्त्रीवेशमेते नताः
किञ्चान्ये विगलन्ति चीवरभृतो द्वार्वेदिकाशायिनः ॥४०॥(छ)

---

प्रहारैः आक्रान्तकण्ठात् त्रुटिताः छिन्ना भुजा एव तरवः यस्य तादृशः द्राक् झटिति कृतः। स्रग्धरावृत्तम्।

(च) एष इति। त्रिभुवनतिलकः प्रवीरः एष भार्गवः त्रिः-सप्तकृत्वः एकविंशतिवारं क्षत्रियाणां मारकः निहत्वा क्रतुषु यज्ञेषु गुणवते विदुषे कश्यपाय भूतधात्र्याः पृथिव्याः तावत् प्रदाता चाशब्दः समुच्चयः। बहुशः वारंवारं उत्कटस्य क्रोधवह्नेः प्रशान्तये उपशमाय अतनुषु विस्तृतासु क्षतानां क्षत्रियाणां अस्रवापीषु रुधिरदीर्घिकासु स्नाता। किञ्च सपदि द्रुतं जनवधानन्तरमेव पित्रोः मातापित्रो पितरावुद्दिश्येत्यर्थः तानेव क्षतरुधिराण्येव निवापाञ्जलयः अञ्जलि-पूर्णतर्पणजलानि तेषां वितरिता प्रदाता। स्रग्धरावृत्तम्।

(छ)याचन्ते इति। इमे नृपतयः गृहिणीनां राज्ञीनां मुखैः स्वप्राण-भिक्षां याचन्ते। भार्गवमितिशेषः परे नृपाः भार्गवस्य कण्ठे स्थितान् कुठारान् वन्दन्तः स्तुवन्तः सन्तः चरणाश्रयोः भार्गवस्येतिशेषः निप-तिताः। एते क्षत्रियाः विरचितः कृतः स्त्रीवेशः यस्मिन् तद्यथा तथा लीलादर्पणं पाणौ येषां तथाभूताः सन्तः नताः। किञ्च अन्ये राजन्याः

मातलिः । पुरोऽवलोक्य । (ञ) तदिदमतिचरमं चरिता-
द्भुतं परमेश्वरशिष्यस्य परशुरामस्य ।

दत्त्वा पृथ्वीं जलधिरशनामर्थिने ब्राह्मणाय
स्फारज्योतिःशरविहृतिभिः सिन्धुमुक्ते परान्ते ।
ब्रह्मावाप्त्यै जयपरशुनास्मिन् समित्काण्डलावः
शिष्यः शम्भोर्विहितवसतिस्तप्यतेऽसौ तपांसि ॥ ४१ ॥ (झ)

दशरथः । किमपरमारम्भपर्य्यवसानयोरखण्डः (ञ) खण्ड-
परशुशिष्यस्य वीरव्रतनिर्वाहः ।

सौदामिनी । उभअं खु एदं अप्पडिहदप्पहावं सुणिमो जं

(१७) उभयं खल्वेतदप्रतिहतप्रभावं शृणुमो यन्नीललोहितभालनो-

चीवरभृतः कौपीनवन्तः तथा द्वारिस्थितायां वेदिकायां शेरते इति तथाभूताः शिशवो निपतन्ति शार्दूलविक्रीडितं वृत्तम् ।

(ञ) अतिचरमं सर्वशेषम् ।

(झ) दत्त्वेति । असौ शम्भोः शिष्यः भार्गवः अर्थिने याचकाय ब्राह्मणाय कश्यपाय जलधिरशनां आसमुद्रामित्यर्थः पृथ्वीं दत्त्वा स्फाराणि प्रभूतानि ज्योतींषि येषां तादृशैः शरैः या विहृतयः प्रहाराः ताभिः सिन्धुना मुक्ते शरप्रहारभयसन्त्रासेन समुद्रेण परित्यक्ते इत्यर्थः अस्मिन् परान्ते समुद्रप्रान्ते विहितवसतिः कृताश्रमपदः जय परशुना समित्काण्डलावः यज्ञकाष्ठसमूहच्छेदी सन् ब्रह्मावाप्त्यै मुक्तयर्थं तपांसि तप्यते चरति । मन्दाक्रान्ता वृत्तम् ।

(ञ) किमपरम् अपरम् अन्यत् किं वक्तव्यमिति शेषः । आरम्भपर्य्यवसानयोः आद्यन्तयोः अखण्डः अस्खलितः समभावापन्न इत्यर्थः खण्डपरशुशिष्यस्य भार्गवस्य वीरव्रतस्य वीराचारस्य निर्वाहः निष्पत्तिः ।

(ट) णीललोहिदणिडाललोअणुल्लासो भअवं हुदवहो जो खण्डीसकोअण्डरहस्सोवदेसणिप्फंदप्पज्जलिदप्पदावप्पसरो परसुरामो त्ति (१७) ।

दशरथः । समन्तादवलोक्य । आर्य्य मातले ! (ठ) महावीरचरितावलोकनपरायत्ते चित्ते न किञ्चित्प्रतिभाति । तत्कथय कतमः पुनरयमस्माभिरवगाहितो यत्र वर्त्तामहे ।

मातलिः । (ड) पुरन्दरनगरीतः सप्तमो मर्त्त्यमण्डलतः प्रथम एष वायुस्कन्धः किं पुनरदूरवर्त्ति वसुधातलादस्मद्रथगतिः । रथवेगं नाटितकेन । सेयं विदेहनगरी तदिदं च विदेहपतिमन्दिरं तदवतीर्य्य महाराजदशरथो मामनु-

---

*चनोल्लासी भगवान् हुतवहो यश्चण्डीशकोदण्डरहस्योपदेशनिस्पन्दप्रज्व-लितप्रतापप्रसरः परशुराम इति ।

---

(ट) नीललोहितस्य हरस्य भाले ललाटे यत् लोचनं तस्मात् उल्लसति उद्गच्छतीति तथोक्तः । हुतवहः अग्निः । चण्डीशस्य शम्भोः कोदण्डरहस्यस्य धनुर्वेदस्य उपदेशेन निस्पन्दं निश्चलं दृढमित्यर्थः यथा तथा प्रज्वलितः प्रतापस्य प्रसरः गतिः यस्य तथाभूतः ।

(ठ) महावीरेति महावीरस्य भार्गवस्य चरितावलोकने परायत्ते पराधीने समासक्ते इत्यर्थः । वर्त्तामहे उपतिष्ठामहे ।

(ड) पुरन्दरनगरीतः अमरावत्याः । मर्त्त्यमण्डलतः मनुष्यलोकात् । वायुस्कन्धः वायोः पवनस्य स्कन्धः स्थानभेदः । विदेहनगरी मिथिला । विदेहपतिमन्दिरं मैथिलस्य गृहम् । मिथिलेन्द्रस्य प्रतीहारः दौवारिकः । अभ्युत्थितः अभिगमनार्थं प्रत्युद्गमनार्थम् उत्थितः ।

आनातु स्वर्गगमनाय सौदामिनीं च । मयं च मिथिलेश्वर-प्रतीहारः प्रत्यभिज्ञाय भवन्तमभ्युत्थितः ।

दशरथः । अवतीर्य । आर्य्य ! मातले ! भद्रे ! सौदामिनि ! (ठ) साधयतं युवामिति ।

प्रविश्य प्रतीहारः प्रणम्य च । इत इतोऽभ्येतु महाराज-दशरथः ।

दशरथः । परिक्रम्य । हंहो सीरध्वजदौवारिक ! अपि (ण) वृत्तविवाहमङ्गलो रामभद्रः ? ।

प्रतीहारः । न केवलं वृत्तविवाहमङ्गलः प्रस्थानोन्मुखश्च वर्त्तते तदर्थं च महाराजसीरध्वजो विश्वामित्रो रामभद्र-लक्ष्मणौ सीताहेमप्रभे च तमिममास्थानमण्डपमधितिष्ठन्ति ।

दशरथः । हृदय ! किमुत्कण्ठसे (त) सवधूटीकं राम-भद्रं पश्य । इति प्रविशतः ।

ततः प्रविशन्ति उपविष्टा यथानिर्दिष्टाः सीरध्वजादयः ।

शतानन्दः सीतायाश्चिबुकमुन्नमय्य । (थ)

यस्यास्ते जननी स्वयं क्षितिरियं योगीश्वरोऽयं पिता
मातर्मैथिलि ! शिष्यते कथय किं तस्याः सुजातेस्तव ।

---

(ठ) साधयतं गच्छतम् ।

(ण) वृत्तेति । वृत्तं सम्पन्नं विवाहमङ्गलं यस्य तथाभूतः ।

(त) सवधूटीकं वधूटी नवोढ़ा वधूः तया सहितम् ।

(थ) यस्या इति । हे मातः मैथिलि ! स्वयम् इयं क्षितिः पृथिवी यस्यास्ते तव जननी, तथा स्वयं योगीश्वरो जनकः पिता ।

स्नेहात् केवलमुच्यते पुनरिदं स्त्रीणां पतिर्दैवतं
तद्भूयास्त्वमपास्य धर्ममपरं छायेव रामानुगा ॥ ४२ ॥ (थ)

सीता लज्जते ।

जनकः । वत्से ! वैदेहि ! (द) यदभिधानीयं तदभिहितं कुलगुरुणाऽऽङ्गिरसेन तथाप्यपत्यस्नेह एष मां वाचालयति ।

अभ्युत्थानमुपागते गृहपतौ तद्भाषणे नम्रता
तत्पादार्पितदृष्टिरासनविधिस्तस्योपचर्य्या स्वयम् ।
सुप्ते तत्र शयीत तत्प्रथमतो जह्याच्च शय्यामिति
प्राच्यैः पुत्रि ! निवेदिताः कुलवधूसिद्धान्तधर्मा श्रमी ४३ (ध)

शतानन्दः । जानकि ! इदं च (न) प्रसङ्गानुगतं शिक्ष्यसे ।

---

तस्याः सुजातेः सत्कुलोत्पन्नायाः तव किं शिक्ष्यते यद् । केवलं स्नेहात् पुनः इदमुच्यते, पतिः स्त्रीणां दैवतं देवस्वरूपः तत् तस्मात् त्वम् अपरं धर्मम् अपास्य विहाय छाया इव रामानुगा रामस्य अनुगामिनी भूयाः । शार्दूलविक्रीडितं वृत्तम् ।

(द) अभिधानीयं वक्तव्यम् ।

(ध) अभ्युत्थानमिति । हे पुत्रि ! गृहपतौ गृहस्वामिनि उपागते उपस्थिते अभ्युत्थानं, तस्य गृहपतेः भाषणे उक्तौ नम्रता नम्रीभावेन ग्रहणम् । आसनविधिः अवस्थाननियमः तस्य गृहपतेः पादयोः अर्पिता दृष्टिः यस्मिन् तथाभूतः प्रतिपदे दृष्टिं निधाय अवस्थातव्यमित्यर्थः । स्वयं तस्य गृहपतेः स्वामिनः उपचर्य्या, परिचर्य्या, तत्र स्वामिनि सुप्ते सति शयीत स्वयमिति शेषः । तस्य पत्युः प्रथमतः उत्थानात् प्राक् इत्यर्थः शय्यां जह्यात् त्यजेच्च इति एवंप्रकारा अमी कुलवधूनां सिद्धान्तधर्माः प्राच्यैः पूर्वदेशीयैः पण्डितैः निवेदिताः कथिताः । शार्दूलविक्रीडितं वृत्तम् ।

(न) प्रसङ्गानुगतं प्रस्तावानुरूपम् ।

निर्व्याजा दयिते ननान्दृषु नता श्वश्रूषु भक्ता भव
स्निग्धा बन्धुषु वत्सला परिजने स्मेरा सपत्नीष्वपि ।
पत्युर्मित्रजने सनर्मवचना खिन्ना च तद्द्वेषिषु
स्त्रीणां संवननं नतभ्रु ! तदिदं श्रेष्ठौषधं भर्तृषु ॥४४॥ (प)

सीता रोदिति ।

जनकः । किञ्च ।

सीते । संवृणु बाष्पवारि भवती मुग्धा ममेदं मनो
व्युत्पन्नापि हि याज्ञवल्क्यगुरुतः संसारभागे स्थितम् ।
किं त्वान्यत्कथयामि मे हृदयतो कौमुद्या प्रोषितं
विश्वामित्रमहामुनेरपि पुरो यल्लोचने साश्रुणी ॥४५॥ (फ)

---

(प) निर्व्याजा इति । हे नतभ्रु ! दयिते प्रिये निर्व्याजा कापट्यरहिता, ननान्दृषु नता विनयवती, श्वश्रूषु भक्ता भक्तिमती, बन्धुषु ज्ञातिभिः श्यालादिषु स्निग्धा स्नेहवती, परिजने परिवारे वत्सला सद्भाववती, सपत्नीषु अपि स्मेरा हास्यमुखी, पत्युः मित्रजने सुहृदि सनर्मवचना सपरिहासभाषिणी, तथा तस्य पत्युः द्वेषिषु शत्रुषु खिन्ना विद्वेषवती च भव, तत् प्रसिद्धम् इदं श्रेष्ठौषधं भर्तृषु स्त्रीणां संवननं वशीकरणम् । उक्तरीत्यनुसारिण्यः भार्याः भर्तृकुलानि वश्यतां नयन्तीति भावः । शार्दूलविक्रीडितं वृत्तम् ।

(फ) सीते इति । हे सीते ! बाष्पवारि नयनजलं संवृणु, भवती त्वं मुग्धा बालिका, मम इदं मनः याज्ञवल्क्यगुरुतः याज्ञवल्क्यात् गुरोः व्युत्पन्ना लब्धज्ञानेनापि संसारभागे संसारांशे स्थितम् । किन्तु अपरं कथयामि, लोचने नेत्रे ममेति शेषः विश्वामित्रमहामुनेः पुरः अग्रतः अपि यत् साश्रुणी अश्रुपूर्णे भवत इति शेषः अतः कौमुद्या लज्जारूपेण सङ्कोचेन कर्त्रा मे मम हृदयतः चित्तात् प्रोषितं गतं प्रपूर्वात् वसतेर्भावे क्तप्रत्ययः । तत्त्वज्ञानिनोऽपि मम

जनकः । कथमिव भगवान् कुशिकनन्दनोऽपि (ब) व्रीडावीजं यस्यास्य ।

सांसारिकैर्वचोभिस्ते सीताविश्लेषजन्मभिः ।
द्रवतीव मनो बाष्पैर्विश्वामित्रमुनेरपि ॥ ४६ । (भ)

राम. । स्वगतम् । कथमिव रोदिति । विभाव्य ।

बाष्पोत्पीडः श्लथपुटतया तावदन्तर्निरुद्ध-
स्तूर्णोत्तीर्णस्तरलनयनस्तारकाभ्यां निपीतः ।
सान्द्रस्यन्दः सपदि चपलैः पक्ष्मभिः प्रान्तकीर्णः
पूर्णस्रोतास्तदनु सुदृशा लोठितोऽवक्रकण्ठम् ॥४७॥ म)

---

वदर्थम् अश्रुपातेन महामुनिसकाशे लज्जेति भावः । शार्दूलविक्रीडितं वृत्तम् ।

( ब ) व्रीड़ावीज लज्जास्पदम् ।

( भ ) सांसारिकैरिति । राजन् ! ते तव सांसारिकैः सीताविश्लेषजन्मभिः जानकीविरहजनितैः वचोभिः करणभूतैः विश्वामित्रमुनेरपि किं वक्तव्यमन्येषा मित्यपिशब्दार्थः । मनः बाष्पैः नेत्रजलैः द्रवतीव गलतीव । पथ्यावक्त्रं वृत्तम् ।

( म ) बाष्पोत्पीड़ इति सुदृशा सुनयनया मैथिल्या अन्तर्निरुद्धः तावत् बाष्पोत्पीड़ः अश्रुप्रकरः श्लथपुटतया शिथिलावरणतया तूर्णम् उत्तीर्णः वहिर्गन्तुं प्रवृत्त इत्यर्थः अतएव तरले चपले नयने यस्मात् तथाभूतः अपिरलाध्याहार्य्यः तारकाभ्यां कनीनिकाभ्यां निपीतः निःशेषं पीतः कवलितः, सपदि झटिति सान्द्रस्यन्दः घनद्रुतः अतएव चपलैः पक्ष्मभिः नेत्रलोमभिः प्रान्तेषु कीर्णः प्रसृतः तदनु तत्पश्चात् पूर्णस्रोताः स्रोतस्वान् सन् अवक्रकण्ठम् अकुटिलकण्ठदेशं लोठितः चलितः मन्दाक्रान्तावृत्तम् ।

ग्रामणीः (द) श्रवणपरम्परोत्पादितकौतुकातङ्कमुद्रो भगवान् भार्गवो दिष्ट्या द्रष्टव्यः ।

लक्ष्मणः । आर्य्ये ! न केवलं द्रष्टव्योऽनुभवितव्यश्च ।

रामः । के वयं भार्गवानुभवे ।

सीता । अपवार्य्य ; पिअसहि ! हेमप्पहे ! चण्डोससिस्सो खत्तिअअन्तअरो अ परसुरामोत्ति सुणिअ (श) पल्लविद-कोदूहलवल्ली पज्जलिदसम्भमरसपरवसा वट्टामि (२०) ।

हेमप्रभा । जुज्जदि पप्फुल्लकोदूहलत्तणं परसुरामदंसणेण उण ससम्भमत्तणं (ष) भग्गधणुद्दण्डचण्डचरिदस्स पुरदो रामअन्दस्स ( २१ ) ।

---

( २० ) प्रियसखि ! हेमप्रभे ! चण्डोग्रशिष्यः क्षत्रियान्तकरश्च परशुराम इति श्रुत्वा पल्लवितकौतुकवल्ली प्रज्वलितसाध्वसरसपरवशा वर्त्ते ।

( २१ ) युज्यते प्रफुल्लकौतुकत्वं परशुरामदर्शनेन पुनः ससाध्वसत्वं भग्नधनुर्दण्डचण्डचरितस्य पुरतो रामचन्द्रस्य ।

---

दग्निज मुनीना तथा इन्द्रः भार्गवः रोषात् अयनः उपैति नूनं । सम्भाव्यते इत्यर्थः । शार्दूलविक्रीड़ितं वृत्तम् ।

( द ) श्रवणेति श्रवणपरम्परया कर्णपरम्परया उत्पादिता जनिता कौतुकस्य आतङ्कायाः भयस्य च मुद्रा आविर्भावो येन तथाभूतः ।

( श ) पल्लवितेति पल्लविता सञ्जातपल्लवा कौतूहलवल्ली कौतूहललता यस्याः तादृशी । प्रज्वलितस्य साध्वसरसस्य भयस्य परवशा पराधीना कौतुकभीतिपरतन्त्रा इत्यर्थः ।

( ष ) भर्गस्य हरस्य धनुर्दण्डे चण्डं चरितं यस्य तथाभूतस्य ।

ततः प्रविशति सरोषसम्भ्रमो जामदग्न्यः।

जामदग्न्यः। भोः! (स) किमसावकाण्डचण्डो निविडकाङ्कारपूरितरोदसीकन्दरोदरमेदुरो निनदनिस्यन्दः। कर्णं दत्त्वा आकाशे। किं ब्रूथ? दाशरथिना रामेण स्थाणवी धनुरारोपितमाकृष्टं भग्नं च तदुद्भवः कोदण्डकोटरकुटीरकटुरसौ सुटङ्कष्टङ्कारः। सविषादम्।

पौलस्त्यस्य तिरस्कृतामरपतेस्ते बाहवो विंशति-
दम्भोलिव्रणगुच्छलाञ्छनभृतो यस्मिन् गताः कुण्ठताम्।
तद्भग्नं यदि कार्मुकं भगवतो रामेण चूडावता
धिग्धिङ्मां तदिदं नमः परशवे स्वस्त्यस्तु रुद्राय च॥५२॥

---

(स) अकाण्डचण्डः सहसा प्रचण्डः। निविडेन घनेन कड़ङ्कारेण ध्वनिविशेषेण पूरितं रोदस्योः द्यावापृथिव्योः कन्दरोदरं गुहाभ्यन्तरं येन तथाभूतः मेदुरः गम्भीरश्च निनदस्य शब्दस्य निस्यन्दः निर्गमः। स्थाणवीय शैवम्। कोदण्ड धनुः तस्य कोटरकुटीरे कटुः तीक्ष्णः सुटङ्कः टङ्कः पाषाणदारणः तस्मात् तज्जनितशब्दादपीत्यर्थः शोभनः उत्कट इत्यर्थः।

(ह) पौलस्त्यस्येति। तिरस्कृतः अमरपतिः देवेन्द्रः येन तादृशस्य दम्भोलेः कुलिशस्य यः व्रणानां प्रहारक्षतानां गुच्छस्य समूहस्य लाञ्छनं चिह्नं बिभर्तीति तथोक्तस्य पौलस्त्यस्य रावणस्य ते प्रसिद्धा विंशतिः बाहवः यस्मिन् धनुषि कुण्ठतां गताः अशक्ता इति भावः, यदि चूड़ावता शिखण्डकधारिणा शिशुनेति भावः रामेण भगवतः देवदेवस्य तत् कार्मुकं भग्नं तदा मां धिग् धिक्। परशवे मत्कुठाराय स्वस्ति अस्तु, रुद्राय गुरवे तस्मै नमोऽस्तु च। शार्दूलविक्रीड़ितं वृत्तम्।

विचिन्त्य। आत्मानं निर्दिश्य। सत्यमङ्गरस्तेष परशुरामः। तदेकवारं मृत्युरपि प्रतिज्ञातमर्थं कथयति। यदित्थं कथयन्ति (च) गुणदोषयोर्युगपदापततोर्गरीयसि प्रयतितव्यम्।

अञ्जलिं बद्ध्वा आकाशगतः।

भोः सर्वे च्यवनादयः! शृणुत मे रामस्य विज्ञापना-
माज्ञां वो न च लङ्घयामि किमु तद्भर्गस्य भग्नं धनुः।
क्षुण्णा क्षत्रियमेकविंशतिमतो वारान् विधातुर्जगद्
द्वाविंशोऽपि ममैष सम्प्रति पुनर्जातः प्रतिज्ञाक्षणः॥५३॥(क)

सहसा परिक्रम्य। धनुर्भङ्गदर्शनं नाटयन्। हा (ख) मधुकरान्दोलनदुर्ललित! हा त्रिपुरदहनडम्बरहठकर्मकर्मठ!

---

(च) गुणदोषयोर्द्वयोः युगपत् समकालम् आपततोः आगच्छतोः मध्ये गरीयसि प्रधाने प्रयतितव्यं यत्नः कर्तव्यः प्रधानापेक्षया स्थितिरिति नियमादिति भावः।

(क) भोरिति भोः सर्वे च्यवनादयः पूर्वपुरुषाः! रामस्य मे मम विज्ञापनां शृणुत यूयमिति शेषः। वः युष्माकम् आज्ञां हिंसानिवृत्तिविषयामिति भावः न च लङ्घयामि भर्गस्य तत् प्रसिद्धं धनुः किमु कथं भग्नं रामेणेति शेषः। अतः अस्मात् कारणात् एकविंशतिं वारान् जगत् क्षुण्णाः क्षत्रिया यत्र तथाभूतं विधातुः कर्तुः मम सम्प्रति एव द्वाविंशोऽपि प्रतिज्ञाक्षणः क्षत्रध्वंसनप्रतिज्ञारूपोत्सवः पुनः जातः उपस्थितः। इमां प्रतिज्ञाम्भङ्गोऽयं भवतामाज्ञां मानयिष्यामीति वाक्यार्थः। शार्दूलविक्रीडितं वृत्तम्।

(ख) मधुकरेति मधुकरस्य करेण यत् आन्दोलनम् आस्फालनं तेन दुर्ललितः सज्जीवान् तत्सम्बुद्धौ। त्रिपुरदहनमेव डम्बरहठकर्म महदुग्राहृष्टकर्मव्यापारः तत्र कर्मठः निपुणः तत्सम्बुद्धौ। शैर्वा-

हा गीर्वाणसारपरमाणुनिर्माण ! हा दुर्जनजनकमदन-
दुर्निक्षेप ! हा नतसकलनाक ! पिनाक ! त्वमपीदृशं
दृश्यसे तदिदमापतितं लूतातन्तुना गन्धगजालानसन्धानं
सूचीतुण्डेन वज्रमणिभेदः ।

तथाहि ।

पार्वत्या निजभर्तुरायुधमिति प्रेम्णा यदभ्यर्चितं
निर्मोकेण च वासुकेर्निचुलितं यत् सादरं नन्दिना ।
निर्दग्धत्रिपुरेन्धनं धनुरिदं तन् मन्मथोन्माथिनः
शिष्ये सत्यपि रामनामनि मयि द्वेधा कृतं दृश्यते ॥५४॥ (ग

---

णानां देवानां सारस्य बलस्य परमाणुभिः निर्माणं यस्य तत्सम्बुद्धौ । दुष्टो जनः दुर्जनः स चासौ जनकः मैथिलश्चेति दुर्जनजनकः निक्षेपणाशानुमोदनात् दुर्जनत्वं मैथिलस्येति भावः । तस्य मदने हे दुर्निक्षेपः अस्थानन्यासभूत इत्यर्थः तत्सम्बुद्धौ । नताः सकला नाकाः स्वर्गाः तद्वासिन इत्यर्थः यस्य तत्सम्बुद्धौ यत् दृष्ट्वा सर्वे देवा नमन्तीति भावः । आपतितम् उपस्थितं लूतातन्तुना क्षुद्रकीटविशेष-तःस्यूतजालविशेषेण गन्धगजस्य मत्तहस्तिनः आलानसन्धानं बन्धनस्तम्भवेष्टनं तथा सूचीतुण्डेन सूक्ष्मपेण वज्रस्य मणेः हीरकस्य दः छिद्रीकरणम् ।

(ग) पार्वत्येति । पार्वत्या देव्या निजस्य भर्तुः हरस्य आयुधम् अस्त्रं ति हेतोः यत् धनुः प्रेम्णा स्नेहेन अभ्यर्चितं सत्कृतम् । नन्दिना सुकेः नागराजस्य निर्मोकेण यत् सादरं सयत्नं निचुलितम् आच्छा-तम् । तदिदं निःशेषेण दग्धं भस्मीकृतं त्रिपुरमेव इन्धनं काष्ठं । तथाभूतं मन्मथोन्माथिनः मदनारेः हरस्य धनुः रामनामनि ष्ये मयि सत्यपि विद्यमानेऽपि द्वेधा कृतं द्विखण्डं कृतं दृश्यते । दूर्लविक्रीडितं वृत्तम् ।

सक्रोधगर्वं समन्तादवलोक्य । भो भोः ! प्रोषितजामदग्न्यं जगद्वीरं मन्यमाना वीरंमन्याः ! च क्षणमात्रमवधत्त । (घ)

चूडापञ्चकमण्डनः क्व नु शिशुश्चण्डः क्व चायं मुनि-
र्नित्याकुण्ठकुठारखण्डितबृहत्क्रौञ्चाद्रिगर्भान्तरः ।
तत् सर्वानपि वः स्वयंवरविधौ राज्ञः समेतान् ब्रुवे
रामं रक्षत शक्तिरस्ति यदि वः क्रुद्धः पुनर्भार्गवः ॥५५ (ङ)

कर्णं दत्त्वा आकाशे । किं ब्रूथ ? वज्रिरिव वज्रभेषज राम एव रामस्य रक्षिता न परवीर्यरक्षणीयं रघुकुलमिति । विभाव्य । न निजवीर्यरक्षणीयं नापरवीर्यरक्षणीयं रघुकुलं नीललोहितान्तेवासिनि च रामेऽभियोक्तरि । विचिन्त्य । अहो ! कालपरिपाकाद् अश्रुतपूर्वाणि वचांसि श्रूयन्ते यदनालोकितचराणि चालोक्यन्ते । सखेदम् । इदं च दुःसहतरं निकारान्तरम् । हस्तमवधूय ।

---

(घ) अवधत्त अवधानं कुरुत ।

(ङ) चूडेति । चूडायाः पञ्चकं मण्डनं भूषणं यस्य तादृशः क्षत्रियबालकचरिता पञ्चचूडत्वस्य बाल्यादिति भावः शिशुः बालः दाशरथिः क्व नु कुत्र खलु दृश्यते इति शेषः, अयञ्च चण्डः नित्यं सततम् अकुण्ठेन कुठारेण परशुविशेषेण खण्डितं विदारितं बृहत् महत् क्रौञ्चाद्रेः गर्भान्तरम् अभ्यन्तरम् येन तादृशः मुनिः अहमिति शब्दः क्व कुत्र युध्यते इति शेषः । तत् तस्मात् स्वयंवरविधौ समेतान् सर्वानपि राज्ञः वः युष्मान् ब्रुवे कथयामि यदि वः युष्माकं शक्तिरस्ति तदा रामं रक्षत भार्गवः पुनः किन्तु क्रुद्धः कुपितः । शार्दूलविक्रीडितं वृत्तम् ।

(च) अभियोक्तरि आक्रामति । अनालोकितचराणि अदृष्टपूर्वाणि । निकारान्तरम् अन्यविधः परिभव इत्यर्थः ।

अद्यापि धिक्किमिव जीवति भार्गवोऽसौ
बाणावलूनगुहवाहनबर्हदाम्नः।
यस्यावमत्य गुरुदत्तमिमं कुठारं
डिम्भोऽपि राम इति नाम यदस्य हर्त्ता॥ ५६ ॥ (क)

कर्णं दत्त्वा आकाशे। किं ब्रूथ? केन न वर्णितं दाशरथेः शङ्करकार्मुकारोपणं को न विस्मितस्तद्भङ्गेन। साक्षेपम्। किमुक्तं केन न वर्णितम्। इत्यादि पठति। तच्छृणुत भोः।

यः कर्त्ता हरचापदण्डदलने यश्चानुमन्ता ननु
द्रष्टा यश्च परीक्षिता च य इह श्रोता च वक्ता च यः।
सद्यः खण्डितकण्ठपीठवलयः केलिं करिष्यत्ययं
कीलालोल्लसितस्य तस्य परशुर्भर्गप्रसादीकृतः॥ ५७ ॥ (ज)

---

(क) अद्येति। अद्यापि असौ भार्गवः किमिव जीवति गर्हितजीवी सन् प्राणान् धारयति, धिक् मामिति शेषः। यत् यस्मात् बाणेन शरेण अवलूनं गुहवाहनस्य कार्त्तिकेयवाहनस्य बर्हदाम पुच्छरूपं माल्यं येन तादृशस्य यस्य अस्य मम गुरुदत्तं गुरुणा हरेण दत्तम् इमं कुठारम् अवमत्य अवज्ञाय डिम्भोऽपि अर्भकोऽपि रामः राम इति नाम हर्त्ता बालकोऽपि मम नामलोपं कर्त्तुमुद्यत इत्यर्थः। वसन्ततिलकं वृत्तम्।

(ज) य इति। ननु भोः! यः हरस्य चापदण्डस्य धनुर्यष्टेः दलने भङ्गे कर्त्ता, यश्च अनुमन्ता, अनुज्ञाता यश्च द्रष्टा, यश्च परीक्षिता य इह श्रोता, यश्च वक्ता। अयं भर्गेण प्रसादीकृतः परशुः सद्य सपदि कीलालोल्लसितस्य रुधिरोच्छलितस्य तस्य तस्य खण्डितानि छिन्नानि कण्ठवलयानि येन तथाभूतः केलिं करिष्यति। शार्दूलविक्रीडितं वृत्तम्।

(झ) सरभसं परिक्रम्य। भो विदेहेश्वरशुद्धान्तसञ्चारिणः! कुब्जवामनकिरातवर्षवरसौविदल्लाः! क्व रामो दाशरथिः। मन्वेष भार्गवोऽभ्युपैति।

लूनक्षत्रियकण्ठमण्डलगलत्कीलालकुल्याभृत-
प्राग्भारेषु सरःसु यस्त्रिषु रुषा चक्रे निवापक्रियाम्।
श्रुत्वा धूर्जटिचापदण्डदलनं नाम्नश्च सापत्नकं
रामो राममयं स्वयं गुहसहाध्यायी समन्विष्यति ॥५८॥ (ञ)

रामः। वत्स! लक्ष्मण! (ट) दूरत्वादविभावितेनापि तारतरेण वचसा सरोषसम्भ्रमो भार्गवो मुनिः प्रतिभाति।

जामदग्न्यस्तदेव पठति।

रामः। सरभसमुपसृत्य। भगवन्! भार्गव! सदयं प्रसीद (ठ) सदाचार इति रामोऽभिवादयितुकामः।

---

(झ) सरभसं सवेगम्। विदेहेश्वरस्य शुद्धान्तचारिणः अन्तःपुरवर्त्तिनः। कुब्जेत्यादि। सौविदल्लाः कञ्चुकिनः। सौविदल्लाः कञ्चुकिन इत्यमरः।

(ञ) लूनेति। यः रुषा क्रोधेन लूनानां छिन्नानां क्षत्रियाणां कण्ठमण्डलेभ्यः गलद्भिः कीलालैः शोणितैः या कुल्या, अल्पा सरित्। कुल्याल्पा कृत्रिमा सरिदित्यमरः। तया भृतः प्राग्भारः प्रकृष्टो भारः येषां तादृशेषु त्रिषु सरःसु निवापक्रियां तर्पणविधिं चक्रे कृतवान्, सोऽयं गुहस्य कुमारस्य सहाध्यायी सब्रह्मचारी रामः भार्गवः धूर्जटेः चापदण्डस्य धनुर्यष्टेः दलनं भञ्जनं नाम्नः राम इति स्वनाम्नः सापत्नकञ्च श्रुत्वा स्वयं रामं दाशरथिं समन्विष्यति मार्गति। शार्दूलविक्रीडितं वृत्तम्।

(ट) अविभावितेन अनिर्णीतेन तारतरेण उच्चतरेण।

(ठ) सदाचारः सताम् आचारः शिष्टाचरणम्।

जामदग्न्यः । विहस्य । नाभिवादनप्रसाद्यो रेणुकासूनुः गरीयान् हि गुरुधनुर्भङ्गापराधः । किं न श्रुतम् ।

अपि कालस्य यः कालः कण्ठे कालो महेश्वरः ।
भार्गवस्तस्य शिष्योऽहं निसर्गनिरवग्रहः ॥ ५९ ॥ (ड)

ततश्च ।

मध्ये नरेश्वरसभं रभसेन येन
मुक्तं धनुस्तडिति च त्रुटितं गुरोर्मे ।
रामोऽपि नाम भजतां भुजदण्डयुग्म-
मुद्दामधामनि तदेतदकाण्डचण्डम् ॥ ६० ॥ (ढ)

रामः । सविनयम् । केयमत्यास्तिर्भगवतो (ण) मुग्धबुद्धिषु मादृशेषु पुत्रभाण्डेषु; पश्यतु हि तपोराशिः ।

बाह्वोर्बलं न कलितं न च कार्मुकस्य
त्रैयम्बकस्य तनिमा तत एष दोषः ।

---

(ड) अपीति । यः कण्ठे कालः नीलकण्ठः महेश्वरः कालस्यापि कालः संहर्त्ता, तस्य शिष्यः अहं निसर्गनिरवग्रहः स्वभावदुर्वारः भार्गवः ।

(ढ) मध्ये इति । येन मध्येनरेश्वरसभं राजसभामध्ये रभसेन वेगेन मे मम गुरोः ईश्वरस्य मुक्तं त्यक्तं न्यस्तमित्यर्थः धनुः तडिति झटिति त्रुटितं भग्नं चकारः पादपूरणार्थः । तदेतत् अकाण्डचण्डम् अतिप्रचण्डं भुजदण्डयुग्मम् उद्दामधामनि अतितेजोयसि रामेऽपि सम्पोत्यर्थः भजतां नाम, तेन भुजेन मया सह युध्यस्वेति भावः । वसन्ततिलकं वृत्तम् ।

(ण) मुग्धबुद्धिषु मूढमतिषु पुत्रभाण्डेषु पुत्रसदृशेषु ।

(त) बाह्वोरिति । हे परशुराम ! बाह्वोः भुजयोः बलं न

तच्चापलं परशुराम ! मम क्षमस्व
डिम्भस्य दुर्विलसितानि मुदे गुरूणाम् ॥ ६१ ॥ (त)

जामदग्न्यः । किं नाम तपोराशिरहं न शौर्य्यराशिः । किञ्च (थ) रे निदर्शितलाघव ! राघव ! स्ववर्णनापरं सगर्वमभिहितं तदाकर्णय यत्ते करोमि ।

त्रुटितनिविड़नाड़ीचक्रवालप्रणाल-
प्रसृतरुधिरधाराचर्च्चितोच्चण्डरुण्डम् ।
मड़मड़िति मृड़ानीकान्तचापस्य भङ्क्तुः
परशुरमरवन्द्यः खण्डयत्यद्य मुण्डम् ॥ ६२ ॥ (द)

---

कलित न विवेचित बाहुबलेन नाहं दृश्यामीति भावः । तैयम्बकस्य कार्मुकस्य तनिमा तनुत्वम् अल्पसारत्वञ्च न कलित इति शेषः एष च दोषः ततः विस्तृतो न च तत् मम चापलं चपलस्य कार्य्यं इत्तमिति शेषः गुरूणां मुदे सन्तोषाय डिम्भस्य बालकस्य मम दुर्विलसितानि दुश्चेष्टितानि क्षमस्व गुरूणां विश्वामित्र जनकादीनामनुरोधात् मया शैवं कार्मुकं भग्नं न तु बलदर्पेण तस्मात् क्षमायोग्योऽहमिति भावः ।

(थ) निदर्शितलाघव ! निदर्शितं प्रकटितं तपोराशिरिति कथनेन इति भावः लाघवं येन तथोक्तः तत्सम्बुद्धौ । स्ववर्णनापरं निजसामर्थ्यप्रकटनसूचकम् ।

(द) त्रुटितेति । अमराणां वन्द्यः परशुः अद्य मड़मड़िति शब्दं कुर्वन इति शेषः मृड़ानीकान्तचापस्य हरधनुषः भङ्क्तुः खण्डयितुः दाशरथेः त्रुटितेभ्य छिन्नेभ्यः निविड़ेभ्यः घनेभ्यः नाड़ीचक्रवालेभ्यः शिरासङ्घेभ्यः प्रणालेभ्य इव प्रसृताभिः निःसृताभिः रुधिरधाराभिः चर्च्चितः अलङ्कृतः उच्चण्डः प्रचण्डः रुण्डः कबन्धः दर्शिस्मन् तद् यथा तथा, मुण्डं शिरः खण्डयतु छिनत्तु । मालिनीवृत्तम् ।

रामः ।

स्वायत्तेन कुठारेण स्वाधीने राममूर्द्धनि ।
यथेष्टं चेष्टतामार्य्यस्त्वदाज्ञां को निषेधति ॥ ६३ ॥ (ध)

जामदग्न्यः । यः (न) प्रेतनाथस्यातिथ्यमनुभवितुकामः ।

रामः । अञ्जलिं बद्ध्वा ।

अनूचानं भक्त्या भृगुभव ! भवन्तं प्रणमति
क्रुधः शान्त्यै रामस्तदिह सुकुमारं कुरु मनः ।
हठान्न्यस्यन् कण्ठे परशुमपि नोत्तेजयसि मां
रघूणां ब्रह्माणः किमपि यदमी गोत्रगुरवः ॥ ६४ ॥ (प)

जामदग्न्यः । विहस्य ।

---

(ध) स्वायत्तेनेति । आर्य्यः भवान् स्वायत्तेन स्वहस्तस्थितेन कुठारेण स्वाधीने स्वस्य भवतः अधीने आदेशवर्त्तिनि रामस्य मूर्द्धनि यथेष्टं चेष्टतां व्यवहरतु, को जनः तव आज्ञां निषेधति निषेद्धुं शक्नोतीत्यर्थः ।

(न) प्रेतनाथस्य यमस्य ।

(प) अनूचानमिति । हे भृगुभव ! भार्गव ! रामः अहमित्यर्थः क्रुधः कोपस्य शान्त्यै प्रशमाय अनूचानं वेदपारगम् अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु य इत्यमरः । भवन्तं भक्त्या प्रणमति । तत् तस्मात् इह अस्मिन् मयि मनः सुकुमारं कोमलं कुरु । हठात् सहसा कण्ठे परशुं कुठारं न्यस्यन्नपि अर्पयन्नपि मां न उत्तेजयसि क्रोधयसि कुठारे कण्ठन्यस्तेऽपि मम क्रोधो न भविष्यतीति भावः । यत् यस्मात् अमी गोत्रगुरवः वंशगुरवः ब्रह्माणः ब्राह्मणाः रघूणां रघुवंश्यानां किमपि अनिर्वचनीयवस्तूनीत्यर्थः रघुकुलेषु ब्राह्मणाः कृतापराधा अपि सततं पूज्यन्ते इति भावः । शिखरिणीवृत्तम् ।

रुद्राणीधर्मसूनुर्विशिखविलिखनच्छिन्नक्रौञ्चाद्रिकुञ्जः
स्कन्दावस्कन्ददायी कृतरणरसिकक्षत्रियक्षोदकेलिः।
दत्तोर्वीनव्यभिक्षः शरविधुतपयोराशिबद्धाश्रमोऽहं
श्रेष्ठः श्रीकण्ठशिष्यो धनुषि धृतरतिर्ब्राह्मणो रैणुकेयः ६५ (क)

शतानन्दः। किमुच्यते (ख) वीरवर्गवरिष्ठः श्रीकण्ठशिष्यः।

जामदग्न्यः। यदिहापि राजन्यपोते भार्गवो धनुर्धारयति तदसावस्यैवापराधो यदुत्फुल्लफणं फणावन्तं न पश्यति। स तस्यैव दोषः।

ततः।

पञ्चकर्पूरनिष्पेषमयं निरपिषत् त्रयम्।
मम व्रीडां च चण्डीशचापं च स्वं च जीवितम् ॥ ६६ ॥ (ग)

---

(क) रुद्राणीति। अहं रुद्राण्याः पार्वत्याः धर्मसूनुः धर्मपुत्रः, विशिखैः शरैः विलिखनेन छिन्नः क्रौञ्चाद्रेः कुञ्जः येन तथाभूतः, स्कन्दस्य कार्त्तिकेयस्य अवस्कन्दः पराभवः तस्य दायी कार्त्तिकेयविजेता इत्यर्थः, कृतः रणरसिकानां संग्रामचतुराणां क्षत्रियाणां क्षोदेन विनाशेन केलिः क्रीड़ा येन तथाविधः, दत्ता उर्वी पृथ्वी एव नव्या नवीना कदाचित् केनाप्यदत्तत्वादिति भावः भिक्षा कश्यपायेति शेषः येन तादृशः, शरैः विधुते निराकृते पयोराशौ समुद्रे बद्धाश्रमः कृताश्रमपदः पृथिव्यां दत्तायां तत्र वासस्य अयुक्तत्वात् समुद्रगर्भे वास इति बोध्यम्। श्रेष्ठः सर्वाग्रणीः श्रीकण्ठस्य हरस्य शिष्यः, धनुषि धृता रतिः अनुरागो येन सः धनुर्वेदरत इत्यर्थः रैणुकेयः रेणुकायाः सुतः ब्राह्मणः। स्रग्धरा वृत्तम्।

(ख) वीरवर्गेषु वरिष्ठः श्रेयान्। राजन्यपोते क्षत्रियशिशौ रामे इत्यर्थः। अस्यैव रामस्यैव। उत्फुल्ला फणा यस्य तादृशं प्रोज्ज्वलितरूपं फणावन्तं पन्नगम्।

(ग) [illegible] मम व्रीडां लज्जाञ्च [illegible]

जनकः । कथं ( म ) सन्न्यस्तशस्त्रग्रहणस्यापि मम पुन रस्त्रग्रहणक्षणो वर्त्तते । नेपथ्याभिमुखमवलोक्य । कः कोऽत्र भोः ! धनुर्धनुः ।

पुरुषः प्रविश्य धनुरुपनीय निष्क्रान्तः ।

जनकः । धनुरादाय ।

चण्डीशचापमवमन्तरि राक्षसेन्द्रे
शस्त्रत्यजाऽपि धृतमेव मया त्वमासीः ।
रामाय कार्मुक ! पुनः परिगृह्यसेऽद्य
वत्सेऽपि वाञ्छितवतेऽनुचितं चरित्रम् ॥ ६७ ॥ ( य )

समाधाय ।

प्रणमति जनकस्त्वां देवि ! दिव्यास्त्रविद्ये !
मम धनुषि पुराणे सन्निकर्षं कुरुष्व ।

---

जनितामिति भावः, चण्डीशस्य हरस्य चापं धनुश्च, स्वं जीवितञ्च एतद् त्रयं पक्वकर्पूरनिष्पेष पक्वकर्पूरमिव निरपिषत् अखण्डयत् ।

( म ) सन्न्यस्तं परित्यक्तं शस्त्रग्रहणं येन तादृशस्य योगित्वादिति भावः । अस्त्रग्रहणस्य क्षणः समयः शिष्योत्क्षिप्ततः रक्षणीयत्वादिति भावः ।

( य ) चण्डीशेति । हे कार्मुक ! राक्षसेन्द्रे रावणे चण्डीशस्य चापं धनुः अवमन्तरि अधिक्षिपति सति शस्त्रत्यजा कृतशस्त्रत्यागेनापि मया त्वं धृतम् आसीः, अद्य पुनः वत्सेऽपि अर्भकेऽपि रामे अनुचितं चरित्रं चेष्टितं वाञ्छितवते रामाय भार्गवाय भार्गवात् रामं रक्षितु-मिति भावः परिगृह्यसे ध्रियसे । वसन्ततिलकं वृत्तम् ।

( र ) प्रणमतीति । हे दिव्यास्त्रविद्ये ! देवि ! जनकः त्वां प्रणमति, मम पुराणे धनुषि सन्निकर्षम् अधिष्ठानं कुरुष्व । मदर्थे

परिभवति मदग्रे भार्गवो रामभद्रं
प्रहिणु तदिह बाणान् वार्द्धकं मां दुनोति ॥६८॥ (र)

दशरथः । सम्बन्धिन् ! जनक ! (ल) कृतं कृतं कार्मुकपरिग्रहेण किमिति प्रादुर्भूतसाहसावतंसमपि जामातरमवजानासि । पश्य ।

यस्योत्पत्तिर्दिनकरकुले यं महाभागधेयं
विश्वामित्रो धनुरुपनिषद्येकशिष्यं व्यधत्त ।
श्रीकण्ठीये बलमविकलं यस्य चापे च दृष्टं
तस्यान्यस्माद्यदि परिभवः स्वस्ति वीरव्रताय ॥ ६९ ॥ (व)

विश्वामित्रः । महाराजसीरध्वज ! यथाह सम्बन्धी ते दशरथः । धनुरर्पणीयं जामदग्न्यं प्रति ।

---

मम पुरतः भार्गवः रामभद्रं परिभवति । तत् तस्मात् इह भार्गवे बाणान् प्रहिणु चालय, वार्द्धकं वृद्धत्वं मां दुनोति तापयति वृद्धस्य मम बाणप्रयोगे स्वयमक्षमत्वात् तव साहाय्यप्रार्थनेति भावः ।

(ल) कृतं कृतम् अलमलम् । प्रादुर्भूतः प्रकटितः धनुर्भङ्गेनेति भावः साहसस्य पराक्रमप्रकाशस्य अवतंसः अलङ्कारविशेषः येन तादृशम् ।

(व) यस्येति । दिनकरस्य कुले सूर्यकुले यस्य उत्पत्तिः जन्म । विश्वामित्रः यं महाभागधेयं महाभाग्यवन्तं धनुरुपनिषदि धनुर्वेदे एकशिष्यम् अद्वितीयं छात्रं व्यधत्त कृतवान् । श्रीकण्ठीये चापे हरधनुषि यस्य अविकलं सम्पूर्णं बलं दृष्टञ्च, तस्य रामस्य यदि अन्यस्मात् जनात् परिभवः पराजयः स्यादिति शेषः तदा वीरव्रताय स्वस्ति शुभमस्तु वीरव्रतं परित्यज्यतामिति भावः । मन्दाक्रान्तावृत्तम् ।

रामः शिष्यो भृगुभव (य) भवान् भागिनेयीसुतो मे
वामे वाहावुत तदितरे कार्य्यतः को विशेषः ।
दिव्यास्त्राणां तव पशुपतेरस्य मत्तस्तु लाभ-
स्तत् त्वां याचे विरम कलहादार्य्यकर्मारभस्व ॥७०॥

जामदग्न्यः । मातुर्मातुल ! न (ष) किञ्चिदन्तरं भव भवानीवल्लभस्य च न किञ्चिदन्तरं क्षत्रियवटोस्त्वदन्तवासिनः क्षत्रियान्तकरस्य शङ्करशिष्यस्य वा ।

शतानन्दः । (स अतिनिरर्गलवाग् भार्गवो यदनुरूपं नानुरुध्यते ।

जामदग्न्यः । किञ्च भोः ! (ह स्वभुजोपार्जितब्रह्मभाव न शस्त्रग्रहणाधिकारः सम्बन्धमनुरुध्यते ।

---

(य) राम इति । हे भृगुभव ! रामः दाशरथिः मे शिष्य भवान् मे भागिनेयीसुतः भागिनेय्यास्तनयः । वामे उत अथा तदितरे दक्षिणे बाहौ कार्य्यतः कार्य्येण कः विशेषः प्रभेदः न कोऽपि त्यर्थः । तव पशुपतेः सकाशात् अस्य दाशरथेस्तु मत्तः सकाशात् दिव्यास्त्राणां लाभः अधिगमः, तत् तस्मात् त्वाम् अहं याचे प्रार्थं कलहात् विवादात् विरम, आर्य्यं शिष्टानुष्ठेयं कर्म आरभस्व कुरुष्व मन्दाक्रान्तावृत्तम् ।

(ष) अन्तरं प्रभेदः । क्षत्रियवटोः राजन्यकुमारस्य रामस्य । सोल्लुण्ठनोक्तिरियम् ।

(स) अतिनिरर्गलवाक् यथेच्छवादी ।

(ह) स्वभुजेति स्वेन भुजेन उपार्जितः अधिगतः ब्रह्मभावः ब्रह्मत्वं येन तत्सम्बुद्धौ । एतेन काल्पनिकं ब्रह्मत्वं तवेति सोल्लु-ण्ठनोक्तिरनुभवनीया ।

रामः। ब्रह्मर्षे! जामदग्न्य! कः पुनरयं ब्रह्मब्रह्मणाधिकारो यद् गुरुष्वपि तिरस्कारः।

जामदग्न्यः। (सभ्रुकुटीभङ्गम्।) आः (घ) क्षत्रियखेट! वटो! वाचाटोऽसि।

भग्नरुद्रधनुःखण्डप्रोतेन शिरसा तव।
मुण्डधारी व्रती चाहमुपस्थास्ये कपालिनम् ॥७१॥ (क)

रामः। भगवन्! किं पुनरिमाः (ख) सर्वङ्कषा रोषवाचः।

सर्वत्यागी परिणतवयाः सप्तमः पद्मयोनेः
शिष्यः शम्भोरिति च यदि वः प्रश्रयी रामभद्रः।
तत् किं भीमा भ्रुकुटिघटना तामिमां नास्मि सोढा
वोढा वीरव्रतविधिमयं यद् गुरुर्व्रीडमेति ॥ ७२ ॥ (ग)

---

(घ) क्षत्रियखेट! क्षत्रियाधम!।

(क) भग्नेति। मुण्डधारी मुण्डितशिराः व्रती व्रतपरायणश्च अहं भग्ने रुद्रधनुषि प्रोतेन (खातेन) तव शिरसा कपालिनं हरम् उपस्थास्ये अर्चयिष्यामि।

(ख) सर्वङ्कषाः मर्मच्छेदिन्यः।

(ग) सर्वत्यागीति। सर्वत्यागी पृथिव्या दानात् त्यक्तसर्वस्वः निस्पृह इत्यर्थः परिणतवयाः स्थविरः पद्मयोनेः ब्रह्मणः सप्तमः अधस्तनसप्तमपूरुषपुरुषः शम्भोः शिष्यश्च भवानिति शेषः इत्येवं कारणात् रामभद्रः अहमित्यर्थः वः युष्माकं प्रश्रयी, विनयी युष्मान् प्रति सविनयं व्यवहरतीत्यर्थः। तत् भीमा भीषणा भ्रुकुटिरचना किं किमर्थं क्रियते इति शेषः भीषणायाः भ्रुकुट्याः पात्रं नाहमिति भावः। अस्मि अहं ताम् इमां भ्रुकुटिरचनां न सोढा न सोढुं शक्नोमीत्यर्थः। वीरव्रतविधिं वीराचारानुष्ठानं वोढा वक्ष्यामि वीरोचिताचारिष्यामीत्यर्थः यत् यस्मात् अयं गुरुः विश्वामित्रः व्रीडं

जामदग्न्यः। ततः किम्।

रामः। ततश्चेदम्।

यस्याचार्य्यकमिन्दुमौलिरकरोत् स ब्रह्मचारी चिरं
जातो यत्र गुहश्चकार च भुवं यङ्गीतवीरव्रताम्।
तत्कोदण्डरहस्यमद्य भगवन्! दृष्ट्वैव रामः स ते
हेलोज्जृम्भितजृम्भकेण धनुषा यत्र च नालम्बयम्॥ ३॥ ष

जामदग्न्यः। साधु रे क्षत्रियडिम्भ! साधु साधु मातृ-मातुलमिश्र! साधु साधु ङ। ताडिततताडकाकुटुम्बक! साधु साधु भग्नभर्गबाणासन! साधु साधु रैणुकेयरथ-दर्शक! साधु, किन्तु।

चापं वृषाकपिनिरस्तसमस्तसारं
द्वेधा विधाय रघुनन्दन! मा स्म दृप्यः।

---

लज्जाम् एति प्राप्नोति विश्वामित्रं गुरुं प्रति तत्र परिहासेन लज्ज-वालं द्रष्टुं नाहं शक्ष्यामीति भावः। मन्दाक्रान्तावृत्तम्।

(ष) यस्येति। इन्दुमौलिः शिवः यस्य आचार्य्यकम् आचार्य्यकर्म अकरोत् यत्र आचार्य्यकर्मसमये इत्यर्थः चिरं सब्रह्मचारी जातः गुहः कार्त्तिकेयः भुवं यस्य गीतं वीरव्रतं यस्या तथाभूता चकार च। हे भगवन्! अद्य एष सः रामः तस्य ते तव तत्कोदण्डरहस्यं धनुर्वेद-शिक्षां दृष्ट्वा इच्छति, हेलया अवलीलया उज्जृम्भितानि जृम्भकाणि तदाख्यानि अस्त्राणि येन तादृशेन धनुषा यत्नं यातं तेजः न अवलम्बं न आश्रयम्। शार्दूलविक्रीडितं वृत्तम्।

(ङ) ताडितं निहतं ताडकायाः कुटुम्बकं येन तत्सम्बुद्धौ।

(च) चापमिति। हे रघुनन्दन! वृषाकपिना हरेण निरस्तः निष्कासितः समस्तः समग्रः सारो यस्मात् तादृशं चापं धनुः द्वेधा

वैकुण्ठकार्मुकमकुण्ठकठोरभाव-

मारोपयैतदिह चेत् तव शक्तिरस्ति ॥ ७४ ॥ (च)

इति धनुरर्पयति ।

लक्ष्मणः । पुरोभूयादाय च धनुः । आर्य्य ! आर्य्य ! (छ) आर्य्या-लाभपणैकप्रणयिनि शङ्करकार्मुकारोपणे के नामान्ये दोर्दण्डचण्डिममात्रारोप्ये तु वैष्णवे धनुषि सति पदाति-लवे लक्ष्मणे न प्रभुरार्य्यः ।

सीता । स्वगतम् । वच्छ ! लक्खण ! सुलक्खणोसि जो राहवकुलोचिदचरिदधुरं धारेसि (२२) ।

विश्वामित्रः । रामभद्रे भग्नधूर्जटिधनुषि ज्यायसि कनी-यसो भ्रातुरुचितमेव माधवीयं चापमारोपयितुं भङ्क्तुं वा ।

(२२) वत्स ! लक्ष्मण ! सुलक्षणोऽसि यो राघवकुलोचित-चरितधुरं धारयसि ।

विधाय भङ्क्त्वा भाव इत्यः दर्पं मा कुरु । चेत् यदि इह धनुर्वेद-रहस्ये तव शक्तिरस्ति तदा अकुण्ठः कठोरभावः यस्य तादृशम् एतत् वैकुण्ठस्य नारायणस्य चापं धनुः आरोपय मौर्व्या सङ्गमय । वसन्त तिलकं वृत्तम् ।

(छ) आर्य्येति आर्य्यायाः मैथिल्या लाभ एव पणः तस्य प्रणयिनि सम्बन्धिनि । अन्ये आर्य्यादपरे के नाम ? न कोऽपि शक्ता इत्यर्थः । दोर्दण्डस्य बाहुदण्डस्य चण्डिमा चण्डत्वं तेन आरोप्ये आरोपणीये यस्य बाहोश्चण्डत्वमस्ति स एव इदमारोप-यितुं शक्नोतीति भावः । वैष्णवे विष्णुदैवताके । पदातिलवे क्षुद्र-पदातौ लक्ष्मणे मयि विद्यमाने आर्य्यः न प्रभुः नाधिकारी, न हि

लक्ष्मणः। आरोपयति।

रामाः गन्धः।

दोर्दण्डन्यासलीलानमदटनि तडत्कारि नारायणीयं
सद्यः सज्जीकृतज्यं विरचयति धनुर्लक्ष्मणे श्यामलक्ष्म।
रामस्याद्यस्य दत्तं मुखशशिनि पदं कालिकालाञ्छनेन
न्यस्तं नव्यस्य भव्ये कुमुदवनभुवा द्राक्स्मितज्योत्स्नया च ॥७५(ञ)

विश्वामित्रः। योगिन्! जनक! सखे! दशरथ! रामभद्रस्यातिलमति हि (झ) निर्व्यूढमिक्ष्वाकुकुललक्ष्मणा लक्ष्मणस्य।

हेमप्रभा। सहि! जाणइ! पेक्ख देवरस्स दे भत्तु-सरिसं परक्कमं ता सुभणिदं अज्जेण णिद्दलिदसङ्करसरासणो

---

२२) सखि! जानकि! प्रेक्षस्व देवरस्य ते भर्तृसदृशं पराक्रमं

---

(ञ) दोर्दण्डेति। लक्ष्मणे सद्यः तत्क्षणं दोर्दण्डयोर्न्यासस्य अर्पणस्य या लीला विलासः तेन आनमन्ती अटनी क्या यस्य तादृशम् अतएव तडत्कारि तडत्कारध्वनियुक्तं सज्जीकृता ज्या यत्र तादृशं नारायणीयं वैष्णवं धनुः विरचयति आरोपयति सति आद्यस्य प्रथमस्य रामस्य भार्गवस्य मुखशशिनि कालिकालाञ्छनेन कालिम्ना श्यामलक्ष्म पदं दत्तं नव्यस्य नवीनस्य रामस्य दाशरथेः मुखशशिनि द्राक् झटिति कुमुदवनभुवा स्मितज्योत्स्नया पदं न्यस्तं अर्पितम्। स्रग्धरावृत्तम्।

(झ) निर्व्यूढं समाप्तम्। इक्ष्वाकोः कुलं तस्य लक्ष्मणः चिह्नभूतस्य इत्यामकेन्दस्ये रुम्णस्य

जेट्ठे कणिट्ठभादुणो समुचिदं जेव्व वैकुण्ठबाणासणविणा-
सणम् । अण्णं कधेमि (२३) ।

धणुविब्भमोमज्झणिविट्ठमुट्ठिणिबन्धरणन्तणिअदण्डम् ।
चलदि जेट्ठअणिवडन्तचडुलगुणवग्घरुम्मुसम् ॥ ७६ ॥ (ञ)
ब्रह्मण्डभण्डभिन्दणवाउलपडुरवगुणमिस्सो ।
सन्धिज्जइ प्पअडपओदमण्डलाडम्बरड्डामरो ॥ ७७ ॥ (ट)

तत् सुभाषितसार्थेन निर्दलितखरदूषणशासने ज्येष्ठे कनिष्ठभ्रातुः समुचितमेव वैकुण्ठबाणासनविनाशनम् । अन्यत् कथयामि ।

धनुर्विभ्रममध्यनिविष्टमुष्टिनिबन्धरणन्निजदण्डम् ।
चलति जय्यापराजयनिपतच्चटुलगुणघर्घरोच्छोषम् ॥
ब्रह्माण्डभाण्डभेदव्यग्रपटुरवगुणमिश्रः ।
सन्धीयते प्रकटपयोदमण्डलाडम्बरोड्डामरः ॥

(ञ) धनुरिति । धनुः भार्गवस्येति शेषः विभ्रमेण हेलया मध्ये निविष्टो यो मुष्टिः लग्नस्थानस्येति भावः तेन निबन्धेन हेतुना रणन् ध्वनन् निजस्य स्वस्य दण्डः यस्य तादृशं तथा जयस्य पराजयस्य भार्गवस्य निपतन् व्याविर्भवन् चटुलस्य चपलस्य गुणस्य मौर्व्याः घर्घरस्य ध्वनिविशेषस्य उच्छोषः यस्य तथाभूतं सत् चलति च्यवति ।

(ट) ब्रह्माण्डेति । ब्रह्माण्डमेव भाण्डं तस्य भेदने व्यग्रेण उद्यतः पटुः महान् रवो यस्य तादृशेन गुणेन मौर्व्या मिश्रः संवलितः धनुर्दण्ड इति शेषः प्रकटस्य प्रचण्डस्य पयोदमण्डलस्य जलधरसमूहस्य आडम्बरः गर्जितं तस्य उड्डामरः प्रचण्डः सन् सन्धीयते परामृश्यते आकृष्यते [illegible] शेषः ।

सवणन्तघडिअगुणलट्ठिणीविडकुडिलन्तकोडिकुण्डलिअम् ।
झणझणइ झत्ति पुणरुत्तिमञ्जुसिञ्जारवं चावम् ॥७८॥ (ठ)
भुअजुअलदण्डमण्डलिअचण्डकोअण्डदण्डभङ्गभवो ।
पिण्डिज्जइ अह व बम्हण्डभण्डए कडुकडक्कारो ॥७९॥ (ड)
इअ वलइअस्स अक्कट्ठिअस्स धणुहो णरेन्दसदणेसु ।
रहुउलविक्कममेक्कं कहइ व विटलणटङ्कारो ॥८०॥ (ढ)

श्रवणान्तघटितगुणयष्टिनिविडकुटिलान्तकोटिकुण्डलितम् ।
झणझणायते झटिति पुनरुक्तमञ्जुसिञ्जारवं चापम् ॥
भुजयुगलदण्डमण्डलितचण्डकोदण्डदण्डभङ्गभवः ।
पिण्ड्यते अथ च ब्रह्माण्डभाण्डे कटुकटत्कारः ॥
इति वलयितस्य व्याकृष्टस्य धनुषो नरेन्द्रसदनेषु ।
रघुकुलविक्रममेकं कथयतीव विदलनटङ्कारः ॥

(ठ) श्रवणेति । चापं कार्मुकं भार्गवदत्तं वैष्णवमिति शेषः श्रवणान्ते कर्णान्ते घटिता आकृष्टा गुणयष्टिर्यस्य तथाभूतं निविडं दृढं यथा तथा कुटिलान्ता वक्रान्ता कोटिः यस्य तथोक्तं कुण्डलितं चक्रीकृतं आकर्षणेनेति भावः पुनरुक्तम् अधिकः मञ्जुः मनोज्ञः सिञ्जारवः मौर्वीध्वनिर्यस्य तथाविधं सत् झटिति झणझणायते ।

(ड) भुजेति । अथ च अधुनापि भुजदण्डयुगलेन मण्डलितः आकर्षणेन चक्रीकृतः यः चण्डः प्रचण्डः कोदण्डदण्डः धनुर्यष्टिः तस्य भङ्गात् भवतीति तथाभूतः ब्रह्माण्डभाण्डे जगदन्तरे कटुः तीव्रः कटत्कारः ध्वनिविशेषः पिण्ड्यते घनीभूतः श्रूयते इत्यर्थः ।

(ढ) इतीति । [illegible] इत्य नरेन्द्र[illegible]षु राजवेश्मसु वलयितस्य चक्रीकृतस्य [illegible] आकृष्टस्य धनुषः विदलनटङ्कारः भङ्गध्वनिः एकम् [illegible] लस्य वि[illegible] मीव ।

जनकः।

हरधनुषि हठाधिरोपणेन
क्षितितनयापरिभाषितः पणोऽभूत्।
विहितमपरिभाषितं पणत्वं
पुनरिदमूर्मिलया मुरारिचापे॥ ८१॥ (ण)

हस्तमुद्यम्य भोः सर्व्वान्विन्! दशरथ! साऽपि वत्सा मम ऊर्मिला पारितोषिकं लक्ष्मणस्यास्तु।

दशरथः। अस्तु।

विश्वामित्रः। ते अपि माण्डवी श्रुतिकीर्त्तिश्च कुशध्वज-दुहितरौ भरतशत्रुघ्नयोः स्ताम्।

शतानन्दः। अतः किमपि प्रियं नः।

जामदग्न्यः। अति हि दशरथडिम्भौ (त) प्रगल्भेते तदेतदपरं समरसंरम्भक्षमां मिथिलोपकण्ठभूमामवतराम इत्यवतरति।

---

(ण) हरेति। हरस्य धनुषि हठाधिरोपणे। सहसा ज्या-संयोगेन क्षितितनयायाः सीतायाः परिभाषितः प्रतिज्ञातः पणः अभूत् यः हरधनुः आरोपयिष्यति स एव पृथ्वीसुतां परिणेष्यतीति पूर्वं पणः कृतोऽभूत् इति वाक्यार्थः। पुनः ऊर्मिलया मम दुहित्रा इति शेषः अपरिभाषितम् अप्रतिज्ञातं पणत्वं मुरारेः विष्णोः चापे धनुषि विहितम्। वैष्णवधनुर्भङ्गेनानेन अगणितामपि ऊर्मिलां परितुष्टो लक्ष्मणाय ददामीति भावः। [illegible]ताख्यावृत्तम्, अयुजि नदुगरेफतो यकारो युजित [illegible] प्रकटलगाश्च पुष्पिताग्रेति लक्षणात्। गज्जो[illegible]

(त) प्रगल्भेते स्पर्द्धेते [illegible]

नेपथ्यं प्रति। अये माठर ! धनुर्धनुः ।

प्रविश्य शिष्यः। इदं धनुः।

जामदग्न्यः। आदाय।

हर्षोत्क्षिप्तामृतार्द्रद्युसदनसुमनोदामसम्पर्कजीव-
न्मद्बाणक्षुण्णवीराद्भुतरणमहारम्भनर्मायितानि।
वर्त्तन्तां नव्यपत्युत्सुकविबुधवधूवाञ्छितच्छेदखेद-
व्याधूताविद्धपाणिप्रविचलवलयास्फालकोलाहलानि॥८२॥(थ)

ततश्च।

विधाय धरणीमस्मरामामपलक्ष्मणम्।
अनृणो गुरुपादानां गन्ताऽस्मि निजमाश्रमम्॥८३॥ (द)

---

(थ) हर्षेति। हर्षेण आनन्देन उत्क्षिप्तानाम् अमृतार्द्राणां सुधाक्लिन्नानां द्युसदनसुमनोदाम्नां देवपुष्पमाल्यानां सम्पर्केण स्पर्शेन जीवन्तः मम बाणैः क्षुण्णाः निहताः वीराः येषु तादृशानि अतएव नव्येषु अभिनवेषु पतिषु संग्रामहतवीरेष्विति भावः उत्सुकाः याः विबुधवध्वः सुरसुन्दर्यः तासां वाञ्छायाः अभिलाषस्य नवपतिलाभविषयस्येति भावः छेदेन भङ्गेन अमृतस्पर्शेन तेषां पुनरुज्जीवितत्वादिति भावः यः खेदः दुःखं तेन व्याधूताः चालिताः आविद्धाः शिरसि आहताः इत्यर्थः ये पाणयः कराः तेषु प्रविचलानि चञ्चलानि यानि वलयानि हस्तभूषणानि तेषाम् आस्फालस्य कोलाहलानि कलकलध्वनयः अद्भुतः महान् यः रणमहारम्भः संग्राममहोद्योगः तस्य नर्मायितानि नर्मवदाचरितानि सन्ति वर्त्तन्तां भवन्तु। स्रग्धरावृत्तम्।

(द) विधायेति। भुवं यथा भूतलम् अरामं रामशून्यम् अपलक्ष्मणं लक्ष्मणरहितञ्च विधाय द्वितीयं पादानाम् ... निजम् आश्रमं गन्ता गमिष्यामि

राम.। भगवन्! भार्गव!

करस्थे सति कोदण्डे तूणीरस्थेषु पत्निषु।
विधत्स्व स्वयमेवौर्य्यं किं वीरस्य विकत्थया ॥८४॥ (घ)

इति परिक्रम्य निष्क्रान्ताः सर्वे।

भार्गवभङ्गो नाम चतुर्थोऽङ्कः।

---

## अथ पञ्चमोऽङ्कः।

---

ततः प्रविशत्याकाशगा. . . भविष्यति।

प्रविश्य मायामयः परिक्रम्य च साक्षेपम्। हंहो! (क) निसर्ग निरर्गलचरितैकनिबन्धन! विधे! इदमुपालभ्यसे कः पुनः प्रकारस्तव यद्रत्नाकरेऽपि क्षारभावः सुधादीधितावपि लाञ्छनच्छाया पुलस्त्यापत्येऽपि मतिविपर्य्यासो यदादिष्टोऽस्मि राक्षसराजेन यद्गच्छ त्वं रघुराजधानीमयोध्यां तत्र च चण्डीशकोदण्डनिर्दलनलब्धजानकीजनितगर्वगरिमा प्रथमदाशरथिर्वाच्यः।

---

(घ) करस्थे इति। कोदण्डे धनुषि करस्थे हस्तवर्त्तिनि सति तथा पत्रिषु शरेषु तूणीरस्थेषु सत्सु स्वस्य यशोयोर्य्यं विजयकरः वीर्य्यं बलं विधत्स्व प्रकटय वीरस्य विकत्थया आत्मश्लाघया किम्? न खलु वीराः विकत्थन्ते इति भावः।

---

(क) निसर्गेति। निसर्गेण प्रकृत्या निरर्गलं यथेच्छं चरितं चेष्टितं निबध्नाति सङ्घटयतीति तत्सम्बुद्धौ। उपालभ्यसे अभिक्षिप्यसे।

मैथिली यदि धनुर्ग्रहो भवे-
त्तद्गुणात् प्रथमतस्तदीशिनः ।
राम ! विद्धि तव मोहमित्यमुं
विष्टपत्रयपतेर्ममास्तु सा ॥ १ ॥ (ख)

किञ्च रे राजन्यपोत ! न श्रवणगोचरं गता राक्षसराजप्रतिज्ञेयम् । कुर्वन्नौद्धत्यादि पठति । भद्र ! मायामय ! स इत्यभिहितस्तामर्पयिष्यति सा तु तदर्पिता ।

अस्मद्विक्रमचेष्टितानि निखिलत्रैलोक्यलीलाजय
प्रह्वीभूतसुरासुराणि भवतो भूमेः सुता शृण्वती ।
पत्यौ हेपककषायितेन मनसा स्निग्धा मयि स्थास्यति
स्त्रीणां प्रेम यदुत्तरोत्तरगुणग्रामस्पृहाचञ्चलम् ॥ २ ॥ (ग)

---

रत्नानामाकरे उत्पत्तिक्षेत्रे सागरेऽपि क्षारभावः लवणाक्तत्वम् । शशाङ्के च्छाया कलङ्कचिह्नम् । पुलस्त्यस्य अपत्ये रावणेऽपि मतिविपर्यासः बुद्धिवैलक्षण्यम् । चण्डीशस्य कोदण्डदलनेन धनुर्भङ्गेन लब्धया जानक्या जनितः उत्पादितः गर्वस्य अहङ्कारस्य गरिमा गौरवं यस्य तादृशः प्रथमदाशरथिः दाशरथीनां दशरथापत्यानां प्रथमः ज्येष्ठः राम इत्यर्थः ।

(ख) मैथिलीति । राम ! मैथिली जानकी धनुषः हरकार्मुकस्य ग्रहः पणः तद्गुणात् तस्मिन् गुणारोपणात् भवेत् यदि, तत् तदा प्रथमतः पूर्वम् ईशिनः प्रभोः पणजयित्वादिति भावः । तव तत् सीतारूपं वस्तु इति इत्थं तव मोहं भ्रमं विद्धि जानीहि, सा सीता विष्टपत्रयस्य त्रिभुवनस्य पतेः मम अस्तु भवतु मम त्रिभुवनस्वामित्वात् सीतायास्तदन्तर्गतत्वाच्च ममैव तस्यां प्रभुत्वमिति भावः ।

(ग) अस्मदिति । भूमेः पृथिव्याः सुता जानकी भवतः सकाशात् निखिलस्य समस्तस्य त्रैलोक्यस्य हेलया अनायासेन यः

विचिन्त्य। तत्कथमसौ निसर्गनिशाचरशत्रुर्वसिष्ठविश्वामित्रसनाथ इत्थमभिधातव्यो भवति सोऽयं (घ) कालकूटकवलनग्रहस्तदिदं यमदंष्ट्राङ्कुरशलाकाकर्षणम्। विभाव्य भवतु तदिदमसमञ्जसं चेष्टितं देवस्य नयज्ञानवते माल्यवते निवेदयामि स खल्वस्माकं मतिनौविप्लवे कर्णधारः। सपरिक्रममवलोक्य। कथमयममात्यो माल्यवान् किमपि चिन्तयन् लेखहस्त आस्ते। विभाव्य। तन्महाराजरावणदुर्नीतिपरम्परायत्तचित्तेनानेन भवितव्यं न हि तरणिकिरणस्पर्शादन्यो व्याधिरिन्दीवरवनस्य।

सुखिनः परसौख्येन परदुःखेन दुःखिताः।
जायन्ते कवयः काव्ये नयतन्त्रे च मन्त्रिणः ॥ ३ ॥

ततः प्रविशति यथानिर्दिष्टो माल्यवान्।

अय. तेन पक्ष्विभूता नम्रीभूता वशङ्कताः सुराः असुराश्च [illegible] तानि अस्माकं विक्रमचेष्टितानि [illegible] पत्यौ [illegible] रामे [illegible]यिने। [illegible] कलुषितेन [illegible] स्याद्यति [illegible]: यत् यस्मात् [illegible] प्रेम [illegible] परस्य गुणाग्रमेषु स्पृहया वत्सलं चपलं भवति। सामान्येन विशेषसमर्थनरूपः अर्थान्तरन्यासः। शार्दूलविक्रीडितं वृत्तम्।

(घ) कालकूटे[illegible] कालकूटस्य कवलने भक्षणे ग्रहः आग्रहः वत्स इत्यर्थः, यमस्य दंष्ट्राङ्कुर एव शलाका तस्याः आकर्षणं रामसमीपे इत्थं [illegible]वचनं हलाहलपानमिव यमदंष्ट्राकर्षणमिव भयावहमिति [illegible]। असमञ्जसम् अयुक्तम्। मतिरेव नौस्तरणिः तस्या विप्लवे विप[illegible] कर्णधारः नाविकः। तरणिकिरणस्पर्शात् सूर्यकरस्पर्शात्। [illegible]वरवनस्य नीलोत्पलकाननस्य।

माल्यवान्। मिथिलापुरीनिवासिना (ङ) स्पशेन लेखः प्रहितस्तदमुं निरूपयामि। उन्मुच्य वाचयति। स्वस्ति लङ्कायां मतिमन्तं माल्यवन्तं विदेहनगरीतः कश्चित् सविनयमवबोधयति श्रेयोऽन्यत्।

सीतास्वयंवरविधौ धनुरीश्वरस्य
चक्रीकृतं भुजबलेन बभञ्ज रामः।
श्रुत्वा च तन्मुनिवृषा वृषकेतुशिष्यो
रोषाज्ज्वलन्निव पुरीं मिथिलामवाप॥ ४ ॥ (च)

तदेतद् वो विदितमेव। इदमिदं निवेद्यते तत्र च (छ) शरनिकरवर्षणे क्षितितलनिघर्षणे सुभटवर्षणे कातरमनोधर्षणे परस्परप्रतिहतिमर्षणे कीलालप्रकर्षणे लोमहर्षणे च महारम्भे समरसंरम्भे।

---

(ङ) स्पशेन चरेण। अपसर्पश्चरः स्पश इत्यमरः।

(च) सीतेति। रामः सीतायाः स्वयंवरविधौ भुजबलेन चक्रीकृतं ईश्वरस्य शिवस्य धनुः बभञ्ज। मुनिवृषाः तापसेन्द्रः वृषकेतोः हरस्य शिष्यः भार्गवः तत् श्रुत्वा रोषात् ज्वलन्निव मिथिलां पुरीम् अवाप प्राप्तवान्। वसन्ततिलकं वृत्तम्।

(छ) शरेति शरनिकराः बाणपरम्पराः वृष्यन्ते अस्मिन्निति तथोक्ते अधिकरणे ल्युट्। एवमुत्तरत्रापि बोध्यम्। क्षितितलं निघृष्यते अस्मिन्निति तादृशे, सुभटाः सुवीराः वृष्यन्ते अस्मिन् शरपरम्पराभिरिति तथोक्ते, कातराणां भीतानां मनांसि धृष्यन्ते आकुलीक्रियन्ते अस्मिन् तथाविधे, परस्परस्य प्रतिहतिः प्रतिघातः मृष्यते प्रतिक्रियते अस्मिन् इति तादृशे, कीलालानि रुधिराणि प्रकृष्यन्ते निःसार्यन्ते अस्मिन्निति तथाभूते, लोमहर्षणे रोमाञ्चोत्पादिनि महारम्भे महोद्योगे समरसंरम्भे संग्रामव्यापारे।

शम्भोः शिष्यं कुशिकमुनितः प्राप्तविद्योपविद्यः
क्षुण्णक्षत्रं दशरथभुवामग्रणीः क्षत्रियाणाम्।
वृद्धं बालश्च्यवनकुलजं भास्वतो वंशजन्मा
रामं रामो व्यजयत गतिच्छेदिना सायकेन ॥५॥ (ज)

विचिन्त्य। महती वार्त्ता। विभाव्य। तस्यापि कलत्रे राक्षसराजोऽनुरज्यत इति न सुखोदर्कं तर्कयामि।

मायामयः। विलोक्य। कथमधीतलेखस्तद्यावदुपसर्पामि।

परिक्रम्य। कनिष्ठमातामह! मायामयोऽभिवादयते।

माल्यवान्। अपि सुखं भद्रस्य महाराजरावणः किं कुरुते।

मायामयः। (झ) यदपङ्कजासनसम्भवान्वयः कुरुते।

माल्यवान्। किमिव।

मायामयः। यदादिष्टोऽस्मीति पठति।

माल्यवान्। हसित्वा। (ञ) वृद्धबुद्धिर्हि प्रथमं पश्यति चरमं कार्यदुर्योगोऽवतरति अन्यथा धूर्जटिधनुरधिक्षेपणतः

---

(ज) शम्भोरिति। कुशिकसुतः विश्वामित्रात् प्राप्ताः अधिगताः विद्याः धर्मशास्त्राणि उपविद्याः धनुर्वेदरहस्यानि येन तादृशः, दशरथभुवः दाशरथीनां क्षत्रियाणाम् अग्रणीः ज्येष्ठः, भास्वतः सूर्यस्य वंशे जन्म यस्य तथोक्तः बालः शिशुः रामः स्वर्गगतिरोधकेन सायकेन शरेण शम्भोः शिष्यं क्षुण्णक्षत्रं क्षत्रियान्तकं च्यवनकुलजं वृद्धं रामं परशुरामं पराजितवान्। मन्दाक्रान्तावृत्तम्।

(झ) अपङ्कजेति पङ्कजं पद्मम् आसनं यस्य सः पद्मासनः ब्रह्मा तस्मात् सम्भवतीति तथोक्तः अन्वयः वंशः यस्य सः न भवतीति तथोक्तः। ब्रह्मकुलजो यत् न करोति तत् कुरुते इत्यर्थः।

(ञ) [illegible] प्रथमं कार्यसम्भावनायाः प्राक्

प्रभृति मतिचक्षुषा दृष्टमेव यदुत दशकन्धरोऽनुधास्यति सीताहरणम् ।

मायामयः । ततस्ततः ।

माल्यवान् । ततश्च मया मन्दोदरीपितुर्मायागुरोर्मयस्य प्रथमशिष्यो विशारदनामा यन्त्रकारः सबहुमानं नियुक्तः सीताप्रतिकृतिकरणाय विरचिता च सा तेन रावणापच्छन्दनार्थमभिहितं च ।

सूत्रधारचलद्दारुगात्रेयं यन्त्रजानकी ।
वक्त्रस्थसारिकालापा लङ्केन्द्रं वञ्चयिष्यति ॥ ६ ॥ ट।

मायामयः । सकौतुकम् ।

दृष्टा मातामहेनासौ कीदृशी यन्त्रजानकी ।

माल्यवान् ।

मायामय ! मया दृष्टा यादृशी सत्यजानकी ॥ ७ ॥

तस्मादेव च सीताधात्रेयिकाऽपि कारिता सिन्दूरिका नाम । प्रतिशिरसि परामृश्य । तद्देवस्य मिथिलागमनं वीतविघ्नोपशमनं तद्वचनादुचितं तदुपवर्णनं तेन ना

पश्यति अवलोकयति जानातीत्यर्थः, काव्यस्य दर्शने पुरतस्थस्य चरम पश्चात् अनन्तरं द्रष्टुमिति शेषः अनुधास्यति चिन्तयिष्यति । रावणापच्छन्दनार्थं रावणस्य वञ्चनार्थम् ।

(ट) सूत्रेति । सूत्रधारस्य चलत् दारुगात्रं काष्ठमयं शरीरं यस्याः तादृशी तथा वक्त्रस्था मुखाभ्यन्तरवर्तिनी या सारिका तया आलपतीति तथाविधा इयं यन्त्रजानकी [illegible] लङ्केन्द्रं रावणं वञ्चयिष्यति ।

(ठ) कृतकर्मविधानेन निरन्तरप्रेमोपार्जनं च सत्यापयितु-मिदानीं निशाचरपतिर्वाच्यः। देव! परपरिणीताऽपि सा।

तव त्रिलोकीविजयैकजन्मभि-
र्गुणैरुदारैरनुरञ्जितापि सा।
अनभ्यनुज्ञार्जनितं करग्रहं
निषेधते हन्त नतेन मौलिना ॥ ८ ॥ (ड)

मायामय.। अप्येवं प्रतिपत्स्यते दशाननः।

माल्यवान्। (ढ) प्रतिपत्स्यते वचसा न मनसा। उभौ हसतः।

माल्यवान्। तदिति (ण) प्रतिपन्नवति दर्शनीयम्।

मायामयः। एवं कृते किं कृतं भवति।

माल्यवान्। शृणु यत् कृतं भवति सीताप्रतिकृतिदर्शनेन दशाननः प्रलोभितो भवति प्रलोभनेन च काललाभः

---

(ठ) कृतकर्मविधानेन कपटानुष्ठानेन। सत्यापयितुं सत्यं कर्त्तुम्। परपरिणीता परेण त्वदन्येन रामेण परिणीता ऊढापि।

(ड) तवेति। सा जानकी तव त्रिलोकीविजयेन एकं केवलं जन्म येषां तथाभूतैः उदारैः गुणैः अनुरञ्जिता प्रलोभितापि हन्त हर्षे नतेन मौलिना शिरसा अनभ्यनुज्ञया अनुज्ञां विना जनितं कृतं कर-ग्रहं पाणिग्रहणं निषेधते निवारयति मम अनुमतिं विना भवता नाहं बलात् कर्त्तव्योऽपि अभिलषतीति भावः। वंशस्थविलं वृत्तं, वदन्ति वंशस्थविलं जतौ जराविति लक्षणात्।

(ढ) प्रतिपत्स्यते स्वीकरिष्यति।

(ण) प्रतिपन्नवते स्वीकृतवते तस्मै निशाचरपतये दर्शनीया सीताप्रतिकृतिरिति शेषः। प्रयोगश्चायम् अनुष्ठानसंहतिं बन्द-

कालनाभो हि नयविदां प्रयोगधाम कन्दलयति प्रयोग-परतन्त्रा च कार्य्यसिद्धिः ।

मायामयः । यथादिष्टमार्य्येण ।

माल्यवान् । प्रयोगक्षमश्च कालो विलम्बनीयः (त) सत्या-पनाय ।

मायामयः । यदादिशत्यार्य्यः ।

माल्यवान् । तद्गच्छ त्वं यथाभिमतसिद्धये । अहमपि (थ) मन्त्रिमण्डपिकामध्यासिष्य इति निष्क्रान्तौ । विष्कम्भकः ।

ततः प्रविशति रावणः प्रहस्तश्चामरधारिणी च ।

रावणः ।

न प्रीते परमेश्वरेऽपि शिरसां छेदेन होमेन वा
ज्यावल्लीनहनेन चामरपतौ द्वारार्गलासङ्गिनि ।
संयत्यैलविलात्तथा न च हृते विश्वातिथौ पुष्पके
दृष्टव्या जनकात्मजेत्यथ यथा लङ्केश्वरो मोदते ॥८॥ (द)

---

कार्य्याणि विवेचयितुं ददाति । प्रयोगपरतन्त्रा अनुष्ठानपराधीना ।

(त) सत्यापनाय सत्यकरणाय ।

(थ) मन्त्रिमण्डपिकां सचिवशालाम् ।

(द) नेति । अथ इदानीं जनकात्मजा दृष्टव्या इति हेतोः यथा लङ्केश्वरः रावणः मोदते हृष्यति शिरसां छेदेन वा होमेन परमेश्वरे शूलिनि प्रीते प्रसन्नेऽपि अमरपतौ देवेन्द्रे ज्यावल्लीनहनेन मौर्वीलतायाः बन्धनेन द्वारस्य अर्गलासङ्गिनि द्वारार्गलायां मौर्व्या बद्धे च इत्यर्थः संयति संग्रामे ऐलविलात् कुवेरात् विश्वातिथौ सर्ववाञ्छनीये पुष्पके विमाने हृतेऽपि च तथा न लङ्केश्वरो मोदते इत्यनेनान्वयः । शार्दूलविक्रीड़ितं वृत्तम् ।

विचिन्त्य । हंहो हृदय ! न (ध) प्रसर्त्तव्यं यद्यावेदि तमसृतमयाक्षरं मायामयेन । यथा किल ।

सौधादुद्विजते त्यजत्युपवनं द्वेष्टि प्रभामैन्दवीं
द्वारात्त्रस्यति चित्रकेलिसदसो वेषं विषं मन्यते ।
आस्ते केवलमब्जिनीकिसलयप्रस्तारशय्यातले
सङ्कल्पोपनतत्वदाकृतिरसायत्तेन चित्तेन सा ॥ १० ॥

तत्प्रहस्त ! शीघ्रं प्रवेशय जानकीं न कालहरणक्षमाः प्रियजनसमागममहोत्सवाः ।

प्रहस्तः । निष्क्रम्य सीतासिन्दूरिकामायामयैः सह प्रविष्टः ।

मायामयः । इयं सा ।

रावणः । इयं सा । विभाव्य ।

चक्षुः स्मेरमवारिजं कुवलयं वक्त्रस्य मित्रं विधु-
र्भूलेखा स्मरतोरणं स्मितलवो लीलालतापल्लवः ।
उच्छिष्टं कलकण्ठवाक् च वचसां शङ्के तदेणीदृशः
सर्वाङ्गीणमहो विधेः परिणतं विज्ञानचित्रं चिरात् ॥ ११ (प)

---

(ध) प्रसर्त्तव्यं स्मरणीयम् ।

(न) सौधादिति । सा सीता सङ्कल्पेन कल्पनया उपनता उपस्थिता या त्वदाकृतिः तव शरीरं तस्यां यो रसः अनुरागः तदायत्तेन तदधीनेन चित्तेन उपलक्षिता सौधात् हर्म्यात् उद्विजते, उपवनं त्यजति, ऐन्दवीं चान्द्रीं प्रभां द्वेष्टि, चित्रकेलिसदसः चित्रगृहस्य क्रीडागृहस्य च द्वारात् त्रस्यति बिभेति, वेषं परिच्छदं विषं मन्यते च । केवलम् अब्जिनीकिसलयप्रस्तारशय्यातले पद्मपत्रशयनीये आस्ते तिष्ठति । स्रग्धरावृत्तम् ।

(प) चक्षुरिति । एणीदृशः मृगाक्ष्याः सीतायाः चक्षुः अना-

सिन्दूरिका। देव! दसाणण! चावारोहणदिअहम्मि ईसि दिट्ठाइं जाणई तुज्झ वअणाइं कुणइ एह्निं (फ) दंसण-उणरुत्तपेअाइं (२४)।

रावणः। भद्रे! जानासि मदनपराधीनं जनमवस्था-पयितुम्।

सिन्दूरिका। अणधा वा रक्खसचक्कवत्तिणो विणवी-अदि (२५)।

रावणः। सोल्लासम्। तत्कथय येन युगपदनुभवामि विंशतिधा श्रोत्रामृतम्।

सिन्दूरिका। इदं विणवीअदि (२६)। संस्कृतमाश्रित्य।

यन्मुग्धामपि चन्द्रिकां गमयति प्रावृत्य चीनांशुकं
स्वस्मै कुप्यति पञ्चमं रचयते यत्कण्ठनालाय च।

---

(२४) देव! दशानन! चापारोपणदिवसे ईषद्दृष्टानि जानकी तव वदनानि करोति इदानीं दर्शनपुनरुक्तप्रेयानि।

(२५) अन्यथा वा राक्षसचक्रवर्त्तिनो विज्ञाप्यते।

(२६) इदं विज्ञाप्यते।

---

रिजम् अजलजं कैरं विकसितं कुवलयं नीलोत्पलम्। वक्त्रस्य मुखस्य मित्रं विधुः चन्द्रः। भ्रूलेखा स्मरस्य कामस्य तोरणम्। स्मितस्य लवः बिन्दुः लीलालतायाः विलासवल्लर्याः पल्लवः। वचसाम् उच्छिष्टं कलकण्ठवाक् कोकिलध्वनिः। तत् तस्मात् शङ्के मन्ये विधेः विधातुः विज्ञानचित्रं सृष्टिनैपुण्यं चिरात् क्रमागतसृष्टिव्यापा-रैश्वर्यः सर्वाङ्गीणं सर्वाङ्गसम्पूर्णं यथा तथा परिणतं परिपक्वम्। अहो इति आश्चर्ये। शार्दूलविक्रीडितं वृत्तम्।

(फ) दर्शनानां पुनरुक्तेन पौनःपुन्येन प्रेयानि। पुनः पुनः

यच्चान्यत्परिहृत्य पक्ष्मलदृशस्त्वत्संकथास्वादरो
लोकस्तत्र निरर्गलं प्रलपति त्वं ब्रूहि किं मन्यसे ॥१२॥ (ब)

रावणः। सहर्षम्। ततस्ततः।

चन्द्रिका। भूयः संस्कृतमाश्रित्य।

एतस्याः स्मरसंज्वरः करतलस्पर्शैः परीक्ष्यो न यः
स्निग्धेनाऽपि जनेन दाहभयतः शोषप्रदः पाथसाम्।
निर्वीर्यीकृतचन्दनौषधिविधौ तस्मिंस्तडित्कारिणो
लाजस्फोटममी स्फुटन्ति मणयो विश्वेऽपि हारस्रजाम् १३ (भ)

---

ते वदनानि पश्यतीति भावः। विंशतिधा दशसु मुखेषु श्रोत्राणां विंशतिसंख्यकत्वादिति भावः।

(ब) यदिति। चीनांशुकं प्रावृत्य आच्छाद्य मुग्धां मनोज्ञां चन्द्रिकां यत् गमयति यापयति अतिक्रामतीत्यर्थः पञ्चमं स्वरमिति शेषः रचयते उच्चरते स्वस्मै निजाय कण्ठनालाय यत् कुप्यति जानकीति शेषः त्वदासक्तचित्ताया अस्याश्चन्द्रिकायाः तथा पञ्चमस्वरस्य कोकिलस्वरत्वेन विरहोद्दीपकत्वादिति भावः। पक्ष्मलदृशः घनरोमशचक्षुषः अस्याः अन्यत् परिहृत्य त्वत्संकथासु तव आलापेषु यत् आदरः, लोकः तत्र विषये निरर्गलं निर्बाधं यथा तथा प्रलपति भीते! कथमेषा तव मनोविकृतिरिति कथमति त्वं किं मन्यसे विवेचयसि ब्रूहि। शार्दूलविक्रीडितं वृत्तम्।

(भ) एतस्या इति। एतस्याः मैथिल्याः यः स्मरसंज्वरः कामसन्तापः पयसां जलानां शोषप्रदः शोषक इत्यर्थः अतएव स्निग्धेन वत्सलेनापि जनेन बन्धुजनेनेत्यर्थः अपि दाहभयतः दाहभयात् करतलस्पर्शैः न परीक्ष्यः न द्रष्टुं शक्य इत्यर्थः, निर्वीर्यीकृताः चन्दनानाम् ओषधानाञ्च विधयः येन तादृशे तस्मिन् स्मरसंज्वरे हारस्रजां मुक्ता- [illegible] इति शेषः। तडित्का-

रावणः। अयि सीताधात्रेयिके! तत्किमिति मैथिली मां प्रति (म) साचीकृतवक्त्रमास्ते।

धात्रेयी। णवाणुराओ एत्थ अवरज्झद्द ण उण पिअसही जदो (२७)।

वक्कं च वत्तितंसं णिमेन्ति देहेण झत्ति वलिएण।
पढमुणअवल्लहसङ्गमेण णडिआओ मुद्धमहिलाओ ॥१४॥ (य)

रावणः। किमुच्यते सीतायाः प्रियसखी खल्वसि (र) केतकसम्पर्कि सिचयमपि किमप्यामोदाय। सीतां प्रति। अयि! स्वागतं जनकराजजन्मनो जनस्य।

सीता। सख्याः कर्णे। एवमेवम्।

---

(२७) नवानुरागोऽत्रापराध्यति न पुनः प्रियसखी। यतः।
वक्त्रं च वर्त्तितांसं नियमयन्ति देहेन झटिति वलितेन।
प्रथमोपनतवल्लभसङ्गमेन नटिता मुग्धमहिलाः॥

---

रिणः तड़दिति शब्दं कुर्वन्तः सन्तः लाजस्फोटं लाजवदित्यर्थः स्फुटति। शार्दूलविक्रीड़ितं वृत्तम्।

(म) साचीकृतवक्त्रं वक्रीकृतवदनम्।

(य) वक्त्रमिति। मुग्धाः अप्रौढाः महिलाः नार्य्यः प्रथमोपनतेन वल्लभसङ्गमेन प्रियसङ्गेन नटिताः लज्जिताः झटिति वलितेन चलितेन देहेन उपलक्षिताः सन्तः वर्त्तिताऽंसं विवर्त्तितस्कन्धं यथा तथा वक्त्रं नियमयन्ति वदनं परावर्त्तयन्ति।

(र) सिचयं प्रान्तदेशः।

सिन्दूरिका। लङ्केश्वर! (ल) सहीसञ्चारिदक्खरा जाणई विसवेदि अज्ज साअदं मन्दोदरीदइददंसणेण। (२८)।

रावणः। स्वगतम्। वाढं स्निह्यति मयि वैदेही (व) ईर्ष्यायितं हि स्त्रीणां प्रकाशकं प्रेमभरस्य। विहस्य प्रकाशम्। ननु जानकीदयितदर्शनेनेति सम्प्रति वक्तव्यं भवति। सहर्षम्। हंहो हृदय! मनोरथानामुपरि वर्त्तसे। यतः।

प्रेमरम्यमुभयोः समं दिशोः
कामिनां यदिह चाषपिच्छवत्।
एकतस्तु न चकास्ति साध्वपि
श्यामपृष्ठमिव बर्हिणश्छदम्॥ १५॥ (श)

सीता। सख्या कर्णे। एवमेवं भण।

---

(२८) लङ्केश्वर! सखीसञ्चारिताक्षरा जानकी विज्ञापयति अद्य स्वागतं मन्दोदरीदयितदर्शनेन।

---

(ल) सखीति सख्यां सञ्चारितानि अक्षराणि कथा यया सा।

(व) ईर्ष्यायितं सेर्ष्याचरणं प्रेमभरस्य प्रेमातिशयस्य प्रकाशकं व्यञ्जकम्।

(श) प्रेमेति। इह संसारे कामिनां मध्ये यत् चाषपिच्छवत् मयूरपिच्छमिव उभयोः दिशोः समं तुल्यं प्रेम्णा रम्यं य· कामी उभयोः प्रेम्णा बद्ध इति भावः, तत् कामिरूपं वस्तु इत्यर्थः साध्वपि समानुरागसम्पीत्यर्थः एकतः एकस्यां दिशि नायिकायाञ्च श्यामपृष्ठं बर्हिणः नीलकण्ठस्य छदं पत्त्रमिव न चकास्ति न शोभते।

[illegible]

सिन्दूरिका। (ष) विसज्जिअलज्जाकण्ठबन्धं अप्पणा भण जदो सअंदूदी दूदीणं वरिट्ठा (२९)।

सीता। सवाक्स्तम्भम्। जधा समत्थिदं लङ्केसरेण ता एत्थ वत्थुणि मए विरइदाइं कदिचि वअणाणि सुणीअदु (३०)।

एक्कदिसारम्मेणवि अलं सिणेहेण सिहिदलच्छविणा।
थुणिमो समदीवासं पेच्छं अ पिच्छोवमं पेम्मम् ॥१६॥ (स)

रावणः। तर्हि (ह) घनप्रेमनिविड़प्रेमा दशकण्ठो विजयते।

सीता। सुदरं जअदि दसकण्ठो (३१)।

---

(२९) विसर्जितलज्जाकण्ठबन्धमात्मना भण यतः स्वयं दूती दूतीनां वरिष्ठा।

(३०) यथा समर्थितं लङ्केश्वरेण। तदत्र वस्तुनि मया विरचितानि कतिचित् वचनानि श्रूयन्ताम्।

एकदिक्रम्येणापि अलं स्नेहेन शिखिदलच्छविना
स्तुमः समद्विपार्श्वं प्रेक्ष्यं च पिच्छोपमं प्रेम ॥

(३१) सुतरां जयति दशकण्ठः।

---

(ष) विसर्जितेति विसर्जितः परित्यक्तः लज्जायाः कण्ठबन्धः कण्ठालिङ्गनं यस्मिन् तत् यथा तथा लज्जां परित्यज्येति भावः।

(स) एकेति। एकस्यां निशायां रम्येण उज्ज्वलेन शिखिदलच्छविना मयूरपिच्छकान्तिना स्नेहेन अलं, समद्विपार्श्वं तुल्योभयपक्षं प्रेक्ष्यं सुदृश्यं पिच्छोपमं प्रेम स्तुमः प्रशंसामः।

(ह) घनः सान्द्रः निविड़ः दृढ़ः प्रेमा यस्य तथाविधः।

समपेम्मरसं समरूवजोव्वणं समविलासवेअड्ढम् ।
समसुहदुःखं अ जणं समपुण्णेहिं जणो लहइ ॥१७॥ (च)

रावणः । अहो ! (क) सूक्तिपाको जनकसुतायाः । यतः ।

स्वादूनां प्रथमाय रूपविभवं मिथ्या मिथस्तन्वते
प्रेम्णे स्वस्ति मनोभवैकसुहृदे यस्य प्रसादादिह ।
दम्पत्योरनपेक्षितप्रियसखीचित्रप्रकारोक्तयो-
र्जायन्ते प्रहरान्तरेऽपि शतशः कोपप्रसादोदयाः ॥१८॥ (ख)

सीरध्वजात्मजे ! देवि ! तदिदं विज्ञाप्यसे ।
दृग्लीलासु सकौतुकं यदि मनस्तन्मे दृशां विंशति-
र्निःसन्धौ परिरम्भणे रतिरथो दोर्मण्डली दृश्यताम् ।

---

(१७) समप्रेमरसं समरूपयौवनं समविलासवैशिष्टम् ।
समसुखदुःखं च जनं समपुण्यैर्जनो लभते ॥

---

(च) समेति । स्पष्टम् ।

(क) सूक्तिपाकः शोभनाया उक्तेः पाकः परिपक्वता ।

(ख) स्वादूनामिति । स्वादूनां स्वाद्यरसानां प्रथमाय श्रेष्ठाय मिथः परस्परं रूपविभवं सौन्दर्यप्रभावं मिथ्या तन्वते विस्तारयन्ते रूपेण किं प्रेमैव सार इति व्यज्यते इत्यर्थः मनोभवस्य कामस्य एकसुहृदे अद्वितीयमित्राय प्रेम्णे स्वस्ति शुभमस्तु इह संसारे यस्य प्रेम्णः प्रसादात् प्रभावात् अनपेक्षिताः प्रियसखीनां चित्रप्रकाराः विचित्राः उक्तयः येषु तथाविधाः दम्पत्योः स्त्रीपुंसयोः शतशः बहुश इत्यर्थः कोपप्रसादोदयाः क्रोधप्रसादानाम् उदयाः प्रहरान्तरेऽपि जायन्ते । प्रेमप्रभावात् क्षणान्तरेऽपि विना सखीनामनुरोधवचांसि मानभङ्गः स्यात् यूनोरिति भावः । शार्दूलविक्रीडितं वृत्तम् ।

(ग) दृगिति । हे वैदेहि ! यदि दृग्लीलासु दृष्टिविभ्रमेषु

प्रेमा चेत्परिचुम्बने दशमुखी वैदेहि। सज्जा पुरः
पौलस्त्यस्य च राघवस्य च महत् पश्योपचारेऽन्तरम् ॥१९॥(ग)

अपिच जानकि! लङ्कास्वामित्वे सति।

मदनघभुजदण्डग्रामचण्डप्रताप-
प्रतिहतदयितानां खेचरीणां शिरःसु।
तव करपुटचेष्टासज्जसेवाञ्जलीनां
चरणनखशिखाली शेखरीभावमेतु ॥ २० ॥ (घ)

---

सकौतुकं मन' ते इति शेषः सर्वत्र योज्यम्। तत् तदा मे दृशां विंशतिः वीक्ष्यतां दृश्यताम् अथ यदि निःसङ्कौ गाढे दृत्यर्थः परिरम्भणे रतिः अभिलाषः तदा मे दोर्मण्डली भुजसमूहो वीक्ष्यतां चेत् यदि परिचुम्बने प्रेमा अनुरागः तदा मे दशानां मुखानां समाहारः दशमुखी पुरः अग्रतः सज्जा प्रस्तुतेत्यर्थः। अतः उपचारे सेवायां पौलस्त्यस्य रावणस्य च राघवस्य रामस्य च महत् अन्तरं प्रभेदं पश्य। रामो हि द्वाभ्यां नेत्राभ्यां बाहुभ्याञ्च मुखेनैकेन च तव मनोरथं पूरयति अहन्तु विंशत्या लोचनैः विंशत्या बाहुभिः दशभिर्मुखैश्च ते मनोरथं पूरयामीति अन्तरस्य महत्त्वमिति भावः। शार्दूलविक्रीड़ितं वृत्तम्।

(घ) मदिति। मम अनघानाम् अपापानां शुभानामित्यर्थः बाहुदण्डग्रामाणां भुजदण्डसमूहानां विंशतेर्भुजानामित्यर्थः चण्डैः उग्रैः प्रतापैः प्रतिहताः पराजिताः दयिताः पतयः यासां तासां अतएव करपुटैः सज्जाः सेवाञ्जलयः याभिः तादृशीनां खेचरीणां देवीनां शिरःसु तव चरणनखानां शिखाली शिखाश्रेणिः शेखरीभावं शिरोदामत्वम् एतु गच्छतु। मम लङ्कायाः स्वामिनीं त्वां देव्यः सेविष्यन्ते इति भावः। मालिनीवृत्तम्।

सीता । अां दसाणण । अां (ङ) पुरिसविसेसपरिसं-कुक्करिसिणीओ जेव्व पुरन्धीओ होन्ति (३२) ।

रावणः । किञ्चिदुपसृत्य । सुन्दरि ! किमद्यापि सन्दिह्यते । तदेहि ।

लीलोद्याने यदि सुरपतेरस्ति वाञ्छा विहर्त्तुं
मेरोः शृङ्गे यदि च विसरत्तारकाचन्द्रदाम्नि ।
चण्डाभोगोड्डमरपुलकां देहि वैदेहि ! तन्मे
लङ्काभर्त्तुर्निविडितकुचामादरादङ्कपालीम् ॥२१॥ (च)

इति धारयति । सचमत्कारम् । (छ) कथमयमश्लेषः संस्पर्शः ।

---

(३२) अां दशानन ! अां पुरुषविशेषपरिशङ्कोत्कर्षिण्य एव पुरन्ध्र्यो भवन्ति ।

---

(ङ) पुरुषेति पुरुषविशेषात् या परिशङ्का भयं तया उत्कर्षिण्यः उत्कर्षभाजः । पुरन्ध्र्यः स्त्रियः । पुरुषविशेषात् भयेन महामान्यानामपि माननीया भवन्ति तत्प्रेयस्य इति भावः ।

(च) लीलेति । यदि सुरपतेः इन्द्रस्य लीलोद्याने नन्दने, यदि च विसरत् विस्तारं गच्छत् तारकाणां चन्द्रस्य च दाम माल्यं यस्मिन् तादृशे चन्द्रताराभिरलङ्कृते इत्यर्थः मेरोः शृङ्गे शिखरे विहर्त्तुं वाञ्छा अभिलाषः अस्ति तवेति शेषः, तत् तदा हे वैदेहि ! चण्डः विशालः यः आभोगः विस्तारः तस्मिन् उड्डमराः उत्फुल्ला पुलकाः लोमाञ्चाः यस्यां तादृशीम् अङ्कपालीम् उत्सङ्गदेशम् आदरात् लङ्काभर्त्तुर्मे मम देहि आलिङ्गनम् इत्यर्थः । मन्दाक्रान्ता-वृत्तम् ।

(छ) अश्लेषः अस्लीकः ।

रूपसम्पदमरीषु नेदृशी
स्पर्श एष च दृषत्सहोदरः ।
तन्मतिर्मम विदेहजन्मनो
मां परीक्षितुमियं विजानतः ॥ २२ ॥ (ञ)

पुनर्निरूप्य । अये ! सारिकाधिष्ठितवक्त्रं सीताप्रतिकृतियन्त्रम् । अहो ! मतिमान् मायामयस्छलितोऽसि जनकराजपुत्र्याः प्रतिकृतिसमर्पणेन तद्गच्छ मद्विनोदार्थमिमां भवनस्थां कुरु । इति सीताशिन्दूरिके मायामयश्च निष्क्रान्ताः ।

रावणः । मदनाकूतमभिनीय । प्रभञ्जनिके ! लीलोद्यानमार्गमादिश येन (झ) युगपदुपस्थितरात्रिन्दिवे युगपदभ्युदितसूर्य्याचन्द्रमसि युगपद्विभक्तसर्वर्त्तुनि तत्र सीताविरहदुःखिनमात्मानं विनोदयामि । भोः प्रहस्त ! तदितो गत्वा सन्निधीयतां शिशिरः पदार्थसार्थो विप्रकृष्यतां तदितरः ।

प्रहस्तः । परिक्रामन् ।

---

(ञ) रूपेति । अमरीषु देवीषु ईदृशी रूपसम्पत् न अस्तीति शेषः एष च स्पर्शः दृषत्सहोदरः पाषाणसदृशः, तत् तस्मात् विजानतः विदेहजन्मनः जनकस्य मां परीक्षितुम् इयं मतिः ईदृशी बुद्धिः उत्पन्नेति शेषः । इन्द्रवज्राछन्दः ।

(झ) युगपत् समकालम् । उपस्थितेति उपस्थितं रात्रिन्दिवं यत्र तादृशे । विभक्ताः विभज्य स्थापिताः सर्वे ऋतवः यस्मिन् तथाभूते । सन्निधीयताम् उपस्थाप्यतां शिशिरः शीतलः पदार्थसार्थः वस्तुसमूहः । विप्रकृष्यतां निराक्रियतां दूरीक्रियतामित्यर्थः तस्मात् शिशिरात् इतरः अन्यः उष्णपदार्थ इत्यर्थः ।

कस्त्वं चैत्र ! किमत्र पुष्पधनुषः का शक्तिरिन्द्रोरपि
व्यावर्त्तस्व वसन्तवात ! विरम त्वं काकलीपञ्चम !
देवेऽस्मिन् दशकन्धरे भवत मा संरम्भगर्भक्रमाः
प्रागल्भी भवतां हरा विजयिनी तस्मिन्नहल्यापतौ ॥ २३ ॥ (ञ)

निष्क्रान्तः । नेपथ्ये ।

राहो ! तर्जय भास्करं वरुण ! हे निर्वाप्यतां पावकः
सर्वे वारिमुचः ! समेत्य कुरुत ग्रीष्मस्य दर्पच्छिदम् ।
प्रालेयाचल ! चन्द्र ! दुग्धजलधे ! हेमन्तमन्दाकिनि !
द्राग्देवस्य गृहानुपेत भवतां सेवाक्षणो वर्त्तते ॥२४॥ (ट)

प्रतीहारी । इदो इदो एदु देवो इमं लीलुज्जाणम् (३३)

उभौ प्रविशतः ।

---

(३३) इत इत एतु देवः एतल्लीलोद्यानम् ।

---

(ञ) कस्त्वमिति । हे चैत्र ! मधुमास ! त्व कः ? अत्र अस्मिन् लङ्कापुरे पुष्पधनुषः कामस्य किम् ? इन्द्रोरिन्द्रस्यापि का शक्तिः ? हे वसन्तवात ! मलयसमीर ! व्यावर्त्तस्व निवर्त्तस्व, हे काकलीपञ्चम ! कोकिल ! त्वं विरम, अस्मिन् दशकन्धरे देवे संरम्भगर्भक्रमाः संरम्भः कोपः । संरम्भः सम्भ्रमे कोपे इत्यमरः । गर्भे यस्य तादृशः क्रमः व्यापारः येषां तथाभूताः मा भवत यूयमिति शेषः । तस्मिन् अहल्यापतौ अहल्याजारे इत्यर्थः हरिरिव इन्द्रे भवतां विजयिनी विजयसाधनी प्रागल्भी पराक्रमः अस्तु इति शेषः । शार्दूलविक्रीड़ितं वृत्तम् ।

(ट) राहो इति । हे राहो ! भास्करं सूर्यं तर्जय निर्भर्त्सय ग्रसेत्यर्थः । हे वरुण ! पावकः अग्निः निर्वाप्यताम् । हे वारिमुचः ! जलदाः ! । सर्वे यूयं समेत्य मिलित्वा ग्रीष्मस्य दर्पच्छिदम्

रावणः । भद्रे ! सकलर्त्तुसमलङ्कृतानुद्यानश्रेणीम् द्रष्टुमिच्छामि ।

प्रतीहारी । ता इदो इदो एदु दसाणणदेवो (३४) ।

रावणः । परिक्रामति ।

प्रतीहारी । एसो (ठ) सलिलसोसदुरूढ़खण्डदपुण्डरीअमण्डलो जलद्दासंदाणिदसुन्दरीदेहकन्दलसलीलपरिरम्भपज्जलिदकामिअणअणुण्हो गिम्हो (३५) ।

रावणः । अये ! ग्रीष्मः । इह हि ।

यावन्नालं कमलकलिकाः प्रातरेव स्फुटन्ति
श्यामामध्ये विकचयति चेन्नीलमब्जं मृगाङ्कः ।

---

(३४) तदित इत एतु दशाननदेवः ।

(३५) एष सलिलशोषदुरूढ़खण्डितपुण्डरीकमण्डलो जलार्द्रासन्दानितसुन्दरीदेहकन्दलसलीलपरिरम्भपज्ज्वलितकामिजनानुष्णो ग्रीष्मः ।

---

महङ्कारनाशम् उपशममित्यर्थः कुरुत । हे प्रालेयाचल ! हिमशैल ! हे चन्द्र ! हे दुग्धजलधे ! हे क्षीरनिधे ! हे हेमन्त ! हे मन्दाकिनि ! सुरनदि ! द्राक् झटिति देवस्य रावणस्य गृहान् उपेत आगच्छत यूयमिति शेषः, भवतां युष्माकं सेवायाः क्षणः समयः वर्त्तते । शार्दूलविक्रीड़ितं वृत्तम् ।

(ठ) सलिलेति सलिलस्य जलस्य शोषेण दुरूढ़खण्डितानि दुरोद्गदखण्डानि पुण्डरीकमण्डलानि सिताम्बुजपुञ्जाः यस्मिन् तादृशः । जलार्द्रेति जलार्द्राभिः सजलैः व्यजनैः सन्दानितानां सेवितानां सुन्दरीदेहकन्दलानां कामिनीगात्रनिचयानां सलीलपरिरम्भेण सविलासालिङ्गनेन पज्ज्वलितेषु आनन्दमुकुलितेषु कामिजनेषु अनुष्णः शीतलः उष्णत्वेन अप्रतीयमान इत्यर्थः ।

(ड) यावदिति । अस्मिन् जरठितः परिणतः प्रतिदिन

ग्रीष्मेऽमुष्मिन् अरठितरवौ रागिणां गात्रदेयाः
सद्यः शुष्कैरिव च सलिलैः संक्लिद्यन्ते जलार्द्राः ॥२५॥ (ड)

अपिच। (ढ)

कर्णे स्मेरं शिरीषं शिरसि विकचितस्रग्लताः पाटलिन्यः
कण्ठे माला विशाला वपुषि च नलिनीमूलकाण्डाः कलापाः।
सामोदं चन्दनाम्भः स्तनभुवि नयने म्लानमाञ्जिष्ठपृष्ठे
गात्रं लोलज्जलार्द्रं जयति मृगदृशां ग्रैष्मिको वेष एषः॥२६॥

तापातिरेकमभिनीय।

---

इत्यर्थः रवि· यस्मिन् तादृशे ग्रीष्मे कमलकलिकाः प्रातरेव यावन्नालं यावन्ति नालानि यावन्नालमित्यव्ययीभावः। चेत् यदि स्फुटन्ति विकसन्ति तथा श्यामामध्ये रात्रिमध्ये मृगाङ्कः चन्द्रः नीलम् अब्जं नीलोत्पलमित्यर्थः चेत् विकचयति विकासयति तदा रागिणां कामिनां गात्रदेयाः जलार्द्राः सजलव्यजनानि सद्यः तत्क्षणं शुष्कैः सलिलैरिव संक्लिद्यन्ते पुनः पुनः सलिलैः आर्द्रीक्रियन्ते इति भावः। मन्दाक्रान्तावृत्तम्।

(ढ) कर्ण इति। मृगदृशां हरिणाक्षीणाम् एषः ग्रैष्मिकः नैदाघः वेषः जयति। कः कोऽसावित्याह कर्ण इति कर्णे स्मेरं विकसितं शिरीषं शिरीषकुसुमम्। शिरसि पाटलिन्यः पाटलकुसुमग्रथिताः विकचितस्रग्लताः विकसितमाल्यवल्ली। कण्ठे विशाला दीर्घा माला मुक्ताहारः। वपुषि गात्रे नलिन्याः मूलकाण्डाः मूलमृणालानि कलापा भूषणानि वा काञ्चयः। स्तनभुवि कुचपरिसरे सामोदं सौरभयुक्तं चन्दनाम्भः चन्दनजलं नयने नेत्रयुगलं म्लानं रागहतमित्यर्थः माञ्जिष्ठं मञ्जिष्ठारागः पृष्ठे ययोः तादृशे। तथा गात्रं शरीरं लोलद्भिः पतद्भिः जलैः आर्द्रम्। स्रग्धरावृत्तम्।

मयि शिशिरतरोपचारयोग्ये
द्वितयमिदं युगपन्न सह्यमेव ।
जरठितरविदीधितिश्च कालो
दयितजनेन समं च विप्रयोगः ॥ २७ ॥ ( ख )

तदग्रतो दर्शय ।

प्रतीहारी । पटान्तरे स्थित्वा । एस (त) णीसेसमिलिदबन्धवो भग्गपथिअमग्गो लङ्गलीकुसुमालिङ्गिदचङ्गत्तणो विआस-जज्जरिज्जन्तजरठकेसरकुडुम्बडम्बरो कुसुमाउहविलासवि-क्कमेक्कारम्भो वरिसारम्भो ( २६ ) ।

रावणः । अपि वर्षा ऋतुः । इह हि ।

---

(२६) एष निःशेषमिलितबान्धवो भग्नपथिकमार्गो लाङ्गलीकुसु-मालिङ्गितसौन्दर्यो विकासजर्जरज्जरठकेसरकुटुम्बडम्बरः कुसुमायुध-विलासविक्रमैकारम्भो वर्षारम्भः ।

---

(ख) मयीति । शिशिरतरस्य अतिशीतलस्य उपचारस्य सेवायाः योग्ये मयि जरठितः परिणतः अतितीव्रः रविदीधितिर्यत्र तथाभूतः कालः दयितजनेन प्रियजनेन मैथिल्या इति भावः समं सह विप्र-योगः विरहश्च इदं द्वितयं युगपत् समकालं न सह्यमेव । पुष्पि-ताग्रावृत्तम् ।

( ग ) निःशेषेति निःशेषं मिलिताः प्रवासात् प्रतिनिवृत्ताः बान्धवाः प्रियजनाः यस्मिन् तथोक्तः वर्षासु पथिकानां स्वदेशागमनस्य प्रसिद्धत्वादिति भावः । भग्नाः नष्टाः पथिकानां मार्गाः गतागतयोः पन्थानः यत्र तादृशः । लाङ्गलीकुसुमैः लाङ्गल्याख्यपुष्पैः आलि-ङ्गितं प्राप्तं सौन्दर्यं यस्मिन् तथाभूतः, वर्षासु लाङ्गल्यः स्फुटन्तीति प्रसिद्धिः । विकासेन जर्जरन् स्खलन् जरठानां चिरविकसितानां

पञ्चेषोर्गुणघोषणाग्रगुणकस्त्रैलोक्यचिन्तातिथे
स्तूर्यं ताण्डवसंविधासु शिखिनां हंसप्रवासानकः ।
सूतिस्वस्त्ययनं विदूरवसुधारत्नाङ्कुराणामयं
गम्भीरस्तनितध्वनिर्जलमुचां रोदोऽन्तरं गाहते ॥ २८ ॥ (य)

अपि च ।

सम्पिण्डीकृतजीर्णजीरककणश्रेणीश्रियः केशरान्
स क्षुद्रं परितो निरन्तरदलैर्द्रोणीनिवेशैस्त्रिभिः ।
प्रान्तभ्रान्तमधुव्रतीवलयितं स्वस्ति प्रियासङ्कटे
गन्धग्राह्यमवाह्यवृत्ति दलति क्रीडावने केतकम् ॥२९॥ (द)

सोत्कण्ठम् ।

---

केसरकुटुम्बानां बकुलसङ्घानां डम्बरः विस्तारः यस्मिन् तथाभूतः । कुसुमायुधस्य कामस्य यो विलासविक्रमस्य लीलाचेष्टितस्य एकःमुख्य आरम्भः उद्योगः यस्मिन् तथाविधः ।

(य) पञ्चेषोरिति । त्रैलोक्यस्य चिन्तातिथेः मनोभवस्य पञ्चेषोः कामस्य गुणघोषणासु अग्रगुणकः अग्रदूतः शिखिनां मयूराणां ताण्डवसंविधासु नर्त्तनव्यापारासु तूर्यं वाद्यभेदः, हंसानां प्रवासाय प्रवासगमनाय इत्यर्थः आनकः पटहरवः वर्षासु हंसाः पृथिवीं विहाय मानसं यान्तीति प्रसिद्धेः । तथा विदूरवसुधायाः विदूराख्यपर्वत-भूमेःरत्नाङ्कुराणां मणिशलाकानां सूतेः उत्पत्तेः स्वस्त्ययनं शुभसूचक वचनं विदूरभूमिर्नवमेघशब्देन रत्नानि प्रसूते इति प्रसिद्धिः विदूर-भूमिर्नवमेघशब्दादुद्भिन्नया रत्नशलाकयेवेति कालिदासः । अयं जलमुचां जलदानां गम्भीरः स्तनितानां गर्जितानां ध्वनिः रोदोऽन्तरं द्यावा-पृथिव्योरन्तरालं गाहते पूरयतीत्यर्थः । स्रग्धरा वृत्तम् ।

(द) सम्पिण्डीकृतेति । सम्पिण्डीकृतानां एकत्र स्थितानां

विरम जलदकाल ! स्वस्ति ते भद्र ! भूया-
दनुचितपरिवारस्त्वं तवैते तथा हि ।
विरहमविरहं वा नानुरुन्धन्ति मेघाः
सुखिनमसुखिनं वा सर्वमुत्कण्ठयन्ति ॥ ३० ॥ (ध)

तदग्रतो दर्शय ।

प्रभञ्जनिका पदान्तरे स्थित्वा । एस (न) करन्दिओदारसुन्दरी

---

( २७ ) एषा करन्दिकावतारसुन्दरी दलितनीलेन्दीवरवना बन्धू-

---

जीर्णानां पुरातनानां जीरककणानां श्रेण्याः श्रीरिव श्रीर्येषां तादृशान् केशरान् किञ्जल्कान् किञ्जल्कः केशरोऽस्त्रियामित्यमरः । परितः सर्वतः केशराणां चतुर्दिक्षु इत्यर्थः द्रोण्याः काष्ठाम्बु-वाहिन्याः द्रोणी काष्ठाम्बुवाहिनीत्यमरः । इव निवेशः संस्थानं येषां तादृशैः त्रिभिः निरन्तरैः अविच्छिन्नैः दलैः सनद्धं व्याप्तं प्रान्तेषु भ्रान्ताभिः भ्रमन्तीभिः मधुव्रतीभिः भ्रमरीभिः वलयितम् आवृतम् । प्रियासङ्कटे प्रियायाः सीतायाः सङ्कटे वियोगे स्वस्ति शुभं विनोदकमिति यावत् गन्धग्राह्यं गन्धेन विकासोन्मुखत्वेन प्रतीयमानमित्यर्थः अवाह्या वहिरदृश्या वृत्तिः विकासव्यापारः यस्य तथाविधं विकासोन्मुखमिति भावः केतकं केतकीकुसुमं क्रीडावने दलति विकसति । शार्दूलविक्रीडितं वृत्तम् ।

( ध ) विरमेति । हे जलदकाल ! वर्षर्त्तो ! विरम निवर्त्तस्व, हे भद्र ! ते तव स्वस्ति शुभं भूयात् त्वम् अनुचितः अयाच्य इत्यर्थः परिवारो यस्य तथाविधः तथाहि तव एते मेघाः विरहं वा अविरहं न अनुरुन्धन्ति न पश्यन्ति न विवेचयन्तीत्यर्थः, सुखिनं प्रियसङ्गेन सुखसक्तं वा असुखिनं प्रियाविरहतप्तं सर्वं जनं उत्कण्ठ-यन्ति व्याकुलयन्ति । वसन्ततिलकं वृत्तम् ।

( न ) करन्दिकेति । करन्दिकानां पुष्पविशेषाणाम् अवतारेण

दलिदणीलेन्दीवरवणो बन्धूअविच्छाइदमहिन्दकोअण्डो विरलोकिदकेअईकुसुमवासप्पसरा मनोहरीकिदणीसेसमरओ सरओ (३७) ॥

रायणः । अयि ! भरत !

अवतरति घनात्ययः किमन्य-
च्छ्रितकुङ्कुमकेसरावतंसः ।
परिसरपुलिनेषु निम्नगानां
सपदि समागतराजहंसयूथः ॥ ३१ ॥ (प)

अपि च ।

---

कविच्छायितमहेन्द्रकोदण्डा विरलीकृतकेतकीकुसुमवासप्रसरा मनोहरीकृतनिःशेषसरा शरत् ।

---

विकसितानि सुन्दराणि रमणीयानि दलितानि विकासं गतानि नीलेन्दीवराणि वर्णा यस्याः तथोक्ता । बन्धूकैः पुष्पविशेषैः विच्छायितं विवर्णीकृतम् अनुकृतमित्यर्थः महेन्द्रकोदण्डम् इन्द्रधनुः यस्यां तथोक्ता विरलीकृताः ह्रासं गमिताः केतकीकुसुमानां वासप्रसराः सौरभसञ्चारा यस्या तथाभूता मनोहरीकृतानि निःशेषाणि सरांसि यस्यां तादृशी ।

(प) अवतरतीति । अन्यत् किम् ? नान्यत् किमपीत्यर्थः सपदि झटिति विकसितः कामिनीकपोलेषु शोभां गतः कुङ्कुमकेशर एव अवतंसः कर्णभूषणविशेषः यत्र तथोक्तः तथा निम्नगानां नदीनां परिसरपुलिनेषु प्रान्तसैकतेषु समागतानि सम्मिलितानि राजहंसयूथानि यस्मिन् तथाविधः घनात्ययः शरदृतुः अवतरति आविर्भवति । पुष्पिताग्रा वृत्तम् ।

कुर्वाणाः कैरवाणां मधुकरहरणं कूजितं रञ्जयन्तो
हंसालीकण्ठनालीष्वविकलकमलामोदमैत्रीपवित्राः ।
शेफालीफुल्लपालीपरिमलमिलनाशुम्बिताश्चञ्चरीकैः
कह्लाराह्लादकाराः कुवलयसुहृदः शारदा वान्ति वाताः ॥२१॥

साभिलाषम् ।

कुवलयमप्सु दिवीन्दुः सिन्धुषु पुलिनानि वाक् च हंसीषु
इत्यवयवैर्विभक्तां सीतां दर्शयति शरदेषा ॥२२॥ (ब)

तापमभिनीय । सोऽयमपरः शरन्नामा ग्रीष्मः । तदग्रतो दर्शय

प्रतीहारी । पदान्तरे स्थित्वा । एस (भ) अणहिणन्दिदलीला

---

(१८) एष अभिनन्दितलीलानञ्जनोन्मज्जनप्रसारिणीरम्भ-

---

(फ) कुर्वाणा इति । कैरवाणाम् उत्पलानां मधुकराणां हरणं कुर्वन्तः हंसालीनां हंसश्रेणीनां कण्ठनालीषु कूजितं रवं रञ्जयन्तः रञ्जितं कुर्वन्तः अविकलानां प्रफुल्लानां कमलानां पद्मानां कलमानामिति पाठे धान्यानाम् आमोदेन सौरभेण या मैत्री सङ्गः तेन पवित्राः विशुद्धाः रम्या इत्यर्थः शेफालीनां फुल्लाः विकसिताः या पाल्यः राजयः तासां परिमलैः गन्धैर्मिलन्तीति तथोक्ताः चञ्चरीकैः भ्रमरैः चुम्बिताः आघ्राता इत्यर्थः कह्लाराणां रक्तोत्पलानां कह्लारं रक्तसन्ध्यके इत्यमरः । आह्लादं विकासं कुर्वन्तीति तादृशाः तथा कुवलयानां नीलोत्पलानां सुहृदः सखिनः शारदाः वाताः वायवः वान्ति वहन्ति । स्रग्धरावृत्तम् ।

(ब) कुवलयमिति । एषा शरत् अप्सु जलेषु कुवलयं नीलोत्पलं दिवि आकाशे इन्दुः चन्द्रः सिन्धुषु नदीषु पुलिनानि सैकतानि हंसीषु वाक् च इति एवं रूपैः अवयवैः अङ्गैः नेत्रादिभिः विभक्तां विभज्य निर्मितां सीतां दर्शयति प्रकाशयति । आर्य्यावृत्तम् ।

(भ) अनभिनन्दितेति ।

मज्जणुम्मज्जणो पसरिदणीरन्धलोद्धरअपुञ्जपिञ्जरिददिम्मुहो अणिअन्तिदकोञ्चीकुलकोलाहलाडम्बरकर विदसीमन्तो हेमन्तो (३८)।

रावणः। अये हेमन्तः।

इह हि वहति कामं कामकोदण्डयष्टिं
द्रविडयुवतिगण्डश्यामिकां कोशकारः।
चिरविरहितहंसीकण्ठकाण्डावपाण्डुः
स्फुरति च रुचिमत्ता पर्वणां पुण्ड्रकस्य॥ ३४॥ (म)

अपिच।

---

लोध्ररजः पुञ्जपिञ्जरितदिङ्मुखोऽनियन्त्रितक्रौञ्चीकुलकोलाहलाडम्बर-करम्बितसीमान्तो हेमन्तः।

---

विलासेन मज्जनम् उन्मज्जनं सलिलादिनिर्भाव यस्मिन् तथाविधः अनाहतजलक्रीड इत्यर्थः प्रसारितैः विस्तारं गतैः नीरन्ध्रैः सान्द्रैः लोध्राणां लोध्राख्यतरुकुसुमानां रजःपुञ्जैः परागतल्लैः पिञ्जरितानि पिङ्गलीकृतानि दिशां मुखानि येन तथोक्तः। अनियन्त्रितानाम् अप्रतिबद्धानां क्रौञ्चीकुलानां कोलाहलाडम्बरैः कलरवसमूहैः करम्बितः स्पृष्टः सीमान्तः जनपदपर्यन्तभागः यस्मिन् तथाभूतः।

(म) इहेति। इह हेमन्ते कोशकारः भाण्डारी कामस्येति शेषः। द्रविडयुवतीनां द्राविड़तरुणीनां गण्डस्येव श्यामिका मालिन्यं यस्यां तथाभूतां कामस्य कोदण्डयष्टिं धनुर्दण्डं निश्चितं कामं वहति हेमन्ते कामधनुषः प्रयोगाभावेन मालिन्यमिति भावः। किञ्चेति चार्थः पुण्ड्रकस्य इक्षुदण्डस्य पर्वणां ग्रन्थ्यन्तर्गतांशानां रुचिमत्ता दीप्तिः चिरविरहितानां हंसीनां कण्ठकाण्डवत् अवपाण्डुः अतिधवला सती स्फुरति राजते। मालिनी वृत्तम्।

लम्पाकीनां किरन्तश्चिकुरविरचनां रल्लकाञ्छ्वासयन्त-
श्चुम्बन्तश्चन्द्रभागासलिलमविकलं भूर्जकाषैकचण्डाः।
एते कस्तूरिकैणप्रणयसुरभयो वल्लभा बाह्लवीनां
कौन्तालीकेलिकाराः परिचयितहिमं हैमना वान्ति वाताः॥३५॥(च)

तापमभिनीय।

सर्वाङ्गमदनोद्दाहः स कोऽपि मम वर्त्तते।
अप्येष हन्त हेमन्तो यत्रोष्णसमयायते॥ ३६॥ (र)

तदग्रतो दर्शय।

---

(च) लम्पाकीनामिति। लम्पाकीनां तदाख्यदेशभवनारीणां चिकुराणां कुन्तलानां चिकुरः कुन्तलो वालः कचः केशः शिरोरुह इत्यमरः। विरचनां किरन्तः कारयन्त इत्यर्थः हेमन्ते ताः केशविन्यासं कुर्व्वन्तीति प्रसिद्धिः। रल्लकान् मृगभेदान् श्वासयन्तः आह्लादयन्त इत्यर्थः, चन्द्रभागाया नद्याः सलिलम् अविकलं सम्यक् चुम्बन्तः स्पृशन्तः, भूर्जानां भूर्जत्वचां काषे घर्षणे कम्पने इत्यर्थः एकचण्डा अतिपटवः भूर्जत्वचः कम्पयन्त इत्यर्थः कस्तूरिकैणानां गन्धमृगाणां प्रणयेन सङ्गेन सुरभयः मृगनाभिगन्धा इत्यर्थः बाह्लवीना बाह्लवदेशीयानां नारीणां वल्लभाः प्रियाः तथा कौन्तालीनां तदाख्यदेशभवयुवतीनां केलिकाराः हैमनाः हेमन्तभवा वाताः वायवः वान्ति। स्रग्धरावृत्तम्।

(र) सर्व्वेति। स प्रसिद्धः कोऽपि अनिर्व्वचनीयः मम सर्व्वेषु अङ्गेषु मदनस्य कामस्य उद्दाहः उत्तापः वर्त्तते। यत्र कामोपतापे सति हन्त खेदे एषः हेमन्तोऽपि उष्णसमयायते निदाघवत् आचरति। पथ्यावक्त्रं वृत्तम्।

प्रतीहारी । पटान्तरे स्थित्वा । एस (ल) हिमुल्लसिदतरुणदमणअकन्दलो णिबिडन्ततुहिणकणुक्केरणिव्विग्घमहग्घिदपरिरम्भो अवदंसीकिदतरुणतरणिकिरणुक्केरो पुराणदप्पणविच्छाअमिअलञ्छणो णिज्जिदणीसेससिरी सिसिरो (३८) ।

रावणः । अये । शिशिरः । इह हि ।

वह्नेः शक्तिर्जलमिव गता दर्शनाद्दाहवृत्ते-
र्नित्योन्मन्थो नवमदभरे वर्त्तते पुष्पकार्य्यम् ।
शीतात्त्रासं दधदिव रविर्याति चाशां कृशानो-
र्नीहारार्त्तैरिव च दिवसाः साम्प्रतं सङ्कुचन्ति ॥३७॥ (व)

---

(३८) एष हिमोल्लसिततरुणदमनककन्दो निविड़निपतत्तुहिनकणोत्करनिर्विघ्नमहार्घितपरिरम्भोऽवतंसीकृततरुणकिरणोत्करः पुराणदर्पणविच्छायमृगलाञ्छनो निर्जितनिःशेषश्रीः शिशिरः ।

---

(ल) हिमेति । हिमेन प्रालेयेन उल्लसितः उल्लासं गतः तरुणानां अभिनवानां दमनकानां कुन्दतरूणां कन्दलः नवाङ्कुरः यस्मिन् तथाभूतः, निविड़ेन घनेन निपतता तुहिनकणानां हिमविन्दूनां उत्करेण समूहेन निर्विघ्नं हिमनिपातेन निस्तब्धतया एकान्तावस्थानादिति भावः निर्बाधं यथा तथा महार्घितः दुष्प्राप इत्यर्थः परिरम्भः दम्पत्योरन्योन्यालिङ्गनं यत्र तथाविधः, अवतंसीकृतः आदृतः तरणेः सूर्य्यस्य किरणोत्करः मयूखमाला यस्मिन् तादृशः, पुराणदर्पणवत् विच्छायः शिशिराच्छन्नत्वात् मलिनः मृगलाञ्छनः चन्द्रः यस्मिन् तादृशः, निर्जिता निःशेषाणां सर्वेषां वस्तूनां श्रीः सौन्दर्य्यं येन तथोक्तः सर्वपदार्थश्रीहारक इत्यर्थः ।

(व) वह्नेरिति । दाहवृत्तेः दहनव्यापारस्य अदर्शनात् वह्नेः शक्तिः दाहिकेत्यर्थः जलमिव गता, नित्यः उत्पन्नः उदयः यत्र

अपिच।

चूडागर्भनिवेशि दामविकलं मुक्ताफलं भूषणं
स्त्रीणां कुङ्कुमपिच्छिलः स्तनभरो गूढोदरं मन्दिरम्।
द्वित्राः स्थूलपटाः प्रसर्पदगुरुग्रामश्च धूमोद्गमः
सम्भोगाय भवन्ति चात्र कृतिनां दीप्रा विलासाग्नयः ३८(ग)

मखेदम्।

नगरपरिघदीर्घौ बाहुदण्डौ ममैतौ
विजितकलभकुम्भौ सा च तस्याः कुचश्रीः॥
तव शिशिर। समीरश्चैष नीहारसार-
स्त्रयमिति हि समेतं दुर्लभं रावणेन॥ ३९॥ (घ)

तद्दयतो दर्शय।

---

तादृशे सततोदयशालिनीत्यर्थः नवे मरुवके वृक्षविशेषे पुष्पकाख्यं कुसुमोत्पत्तिः। रविः सूर्यः शीतात् त्रासं भयं दधदिव धारयन्निव कृशानोः अग्नेः आशां दिशं पूर्वदक्षिणयोरन्तरमित्यर्थः याति, गच्छति, दिवसाश्च नीहारार्त्तैरिव शीतपीडयेव साम्प्रतं सङ्कुचन्ति क्षुद्रीभवन्ति। शार्दूलविक्रीडितं वृत्तम्।

(ग) चूडेति। अत्र शिशिरे स्त्रीणां चूडागर्भेषु निविशन्तीति तथोक्तं दामविकलं मालाशून्यं मुक्ताफलं भूषणम् अलङ्कारः स्तनयोः भरः परिसरः कुङ्कुमैः पिच्छिलः आवृत इत्यर्थः मन्दिरं गृहं गूढं हिमागमभयात् आच्छादितम् उदरं यस्य तथाभूतं द्वित्राः द्वौ वा त्रयो वा स्थूलाः घनाः पटाः वस्त्राणि तथा प्रसर्पन्तः अगुरूणां ग्रामाः यस्मिन् तादृशः धूमोद्गमश्च तथा दीप्राः उष्णाः विलासाग्नयः ग्राम्यक्रीडाद्रव्याणि च कृतिनां पुण्यवतां सम्भोगाय भवन्ति। शार्दूलविक्रीडितं वृत्तम्।

(घ) नगरेति मम एतौ बाहुदण्डौ नगरस्य परिघवत्

पर्ण गारी । पदान्तरे स्थित्वा । एस (म)फलिदफलिणीवण-न्तरो णिरन्तरपल्लविदकङ्केल्लिदण्डो णिविडुग्गीदकल-कण्ठकण्ठो कुडजगण्ठिजडिलपुण्णाअणिवहो भग्गकुसु-मिदसोहञ्जणसाही मरणसंदेहारोविदसअलप्पवसन्तो वसन्तो (४०)।

गायति । अये । वसन्तः । इह हि ।

---

(४०) एष फलितफलिनीवनान्तरो निरन्तरपल्लवितकङ्केल्लि-दण्डो निविडोद्गीतकलकण्ठाकण्ठः कुटजग्रन्थिजटिलपुन्नागनिवहो भग्नकुसुमितशोभाञ्जनशाखो मरणसन्देहारोपितसकलप्रवासन् वसन्तः ।

---

श्यामल इव [illegible] । तस्याश्च सा कुचयोः स्तनयोः श्रीः शोभा किंचित् [illegible] वरिमावकस्य कम्बो यस्याः तादृशी । हे शिशिर ! तव च एव सम्भारः स्वच्छ नीहारसारः हिममय इत्यर्थः इति त्वयं समेत [illegible] दुर्लभ हि दुष्प्रापमेव देहे शिशिरे काले मद्वाङ्गि [illegible] कृत्वाक्रमसमर्द्दन न प्राप्यते इति भावः । मालिनी-वृत्तम् ।

(म) फलितेति । फलितं सञ्जातफलं फलिनीनां वनान्तरं विशेषः यस्मिन् तथाविधः, निरन्तरं नीरन्ध्रं यथा तथा पल्लविताः सञ्जातपल्लवाः कङ्केल्लिनां दण्डा यस्य, यत्र तथोक्तः, निविडम् अनवरतम् उद्गीतः उच्चैर्गीतपरः कलकण्ठीनां कोकिलानां कण्ठो यस्मिन् तादृशः, कुटजानां ग्रन्थिषु जटिलाः पुन्नागानां तरु-विशेषाणां निवहाः समूहाः यत्र तथाविधः, भग्नाः कुसुमिताः पुष्पिताः शोभाञ्जनशाखिनः यत्र तथाभूतः तथा मरणसन्देहम् आरो-पिताः सकलाः प्रवसन्तः पथिकाः यस्मिन् तादृशः ।

ते सम्प्रति दुग्धमुग्धसुभगं पुष्पोद्गमं मल्लिका
ल्लीकोदृशनव्रणाद्रणदलैः पत्रैरशोकोऽर्चित।
डीलङ्घितकोटि किंशुकमिदं किञ्चिद्विडम्बायते
ञ्जिष्ठैर्मुकुलैश्च पाटलितरोरन्यैव काचिल्लिपिः ॥४०॥ (ह)

किञ्च।

सपदि सखीभिर्निभृतं विरहवतीस्त्रातुमत्र भज्यन्ते।
सहकारमञ्जरीणां शिखोद्गमग्रन्थयः प्रथमे ॥ ४१ ॥ (च)

सव्यङ्ग्‌निरूप्य सोत्कण्ठम्। (क) सीतावयवशोभासंवाद... 
द्विगुणप्रणयिनी मे मधुलक्ष्मीः। तथाहि।

---

(ह) स्रुतेति। सम्प्रति वसन्ते मल्लिका दुग्धमिव ... 
ुभगं सर्वजनप्रियं पुष्पोद्गमं पुष्पचयं स्रुते निःसारयति। ...
ल्लीकीनां तदाख्यदेशभवसुन्दरीणां दशनव्रणानि ... 
ाक्षणानि दलानि पलाशाः येषां तादृशैः पत्रैः अर्चित ...
त्यर्थं द्रढं भङ्ग्या लङ्घिता आक्रान्ता कोटिर्येन तादृशं किंशुक
त्वाग्रपर्णं किञ्चित् ईषत् विडम्बायते ... 
टलितरोः माञ्जिष्ठैः मञ्जिष्ठारागोज्ज्वलैः मुकुलैः ... 
धा एव काचित् अनिर्वचनीया लिपिराकृति ... । शार्दूल-
विक्रीडितं वृत्तम्।

(च) सपदीति। अत्र वसन्ते सखीभिः सहचरीभिः विरह-
तीः विरहिणीः त्रातुं रक्षितुं प्रथमे आद्याः सहकारमञ्जरीणा
शिखानाम् उद्गमग्रन्थयः सपदि झटिति दृढैवेत्यर्थः भज्यन्ते भग्नाः
क्रियन्ते। आर्या वृत्तम्।

(क) सीतेति। सीतायाः ... ङ्गानां या शोभा
त्वयी तत्संवादात् तत्सादृश्यात् ... गुणा अधिका प्रण-
यिनी अतिप्रियसौख्यर्थः। म... ...लक्ष्मीः।

लावण्याढ्यं मधूकान्यनुवदति दृशावुत्पलानां सनाभी
दन्तश्रीर्मल्लिकाभिः सह चरति सुहृत्सौरभं केसरस्य ।
वैदेह्याः पाटलानां सुजनयति रुचं किञ्च बिम्बाधरोष्ठः
क्रीडाभिश्चित्र ! चैत्र ! त्वमसि तदिह मे वल्लभो दुर्लभश्च॥४२ (ख)

दमभ्रुतिका । अलं दमिणा । उक्कण्ठाकारीणं धुरन्धर
एसो (४१) ।

रावणः । उत्कण्ठामभिनीय ।

घर्मर्त्तो ! दमय वसन्तमुत्कयन्तं

सन्तापमभिनीय ।

द्राग्ग्रीष्मं स्थगयतु वार्मुचामनीहा ।

---

(४१) अलमनेन । उत्कण्ठाकारिणां धुरन्धर एषः ।

---

(ख) लावण्याढ्यमिति । वैदेह्याः सीतायाः लावण्यस्य मधूकानि पुष्पाणि अनुवदति अनुकरोति मधूक पुष्पं लावण्य सदृशमित्यर्थः । दृशौ नेत्रे उत्पलानां नीलोत्पलानां सनाभी । नीलोत्पलं नेत्रसदृशमित्यर्थः । दन्तानां श्रीः शोभा मल्लिकाभिः चरति मल्लिकाकुसुमश्रीः दन्तसदृशी इत्यर्थः, सौरभं सौगन्ध्यं केशरस्य वकुलस्य सुहृत् मित्रम् । किञ्च बिम्बा पाटलानां पाटलपुष्पाणां रुचं कान्तिं सुजनयति अनुकरोति तस्मात् हे चित्र ! मनोज्ञ ! चैत्र ! मधुमास ! त्वं क्रीडाभिः [illegible]दिभिः [illegible]इत्यनुकरणरूपाभिः मे मम वल्लभः प्रियः [illegible] भवसि । स्रग्धरावृत्तम् ।

(ग) घर्मर्त्तो इति । हे घर्मर्त्तो निदाघ ! उत्कयन्त [illegible] प्रियाविरहार्दित भाव. वसन्तं दमय स्वाग्निभिः [illegible] इत्यर्थः । वार्मुचा मेघा[illegible] काल: वर्षर्त्तुरित्य

ऋतुकण्ठामभिनीय ।

त्वं वर्षाः शमय घनान्त !

भूयः सन्तापमभिनीय ।

वारिदान्तं ।

हेमन्तः सह शिशिरेण हन्त हन्तु ॥ ४३ ॥ (ग)

प्रभञ्जनिका । देव ! दिट्ठं सअलं (घ) रिदुचक्कवालं ता किम्पि मअरन्दमुच्चन्तबहल सीअरासारं सअं परिब्भमन्त-जंततालवित्तं णिग्गण्ठिदग्गण्ठिलकणअकदलिआकवलणलुद्ध-गन्धहरिणणाहिकोसमुअन्धदसदिसं जाणइविरहवेदणावि-णोदट्ठाणरअणसिलाचउक्किअं अलङ्करेदु देओ (४२) ।

रावणः । यदभिरुचितं भवत्यै । परिक्रामितकेन सर्वेदम् ।

(४२) देव ! दृष्टं सकलमृतुचक्रवालं तत्किमपि मकरन्द-मुच्चद्बहलसीकरासारां स्वयं परिभ्रमद्यन्त्रतालवृन्तां निर्ग्रन्थितग्रन्थि-लकनककदलिकाकवललुब्धगन्धहरिणनाभिकोशसुगन्धदशदिशां जानकी-विरहवेदनाविनोदस्थानरत्नशिलाचतुष्किकामलङ्करोतु देवः ।

झटिति ग्रीष्मं स्थगयतु स्वाविर्भावेन निराकरुष्व । हे घनान्त ! शर-दृतो ! त्वं वर्षाः शमय स्वाविर्भावेन शान्तिं नय । हेमन्तः शिशि-रेण सह हन्त खेदे वारिदान्तं शरदृतुं हन्तु स्वाविर्भावेन नाशयतु ।

(घ) ऋतुचक्रवालम् ऋतूनां ग्रीष्मादीनां चक्रवालं मण्डलम् । मुच्चद्बहलमकरन्दसीकरासारां मुञ्चन्तः वर्षन्तः बहुलाः मकरन्दानां पुष्प-रसानां सीकरासाराः बिन्दुधारासम्पाताः यस्यां तादृशीं स्वयं विना अन्य-जनचालनमाभिनिभावः परिभ्रमत् चलत् यन्त्रतालवृन्तं यस्या तथाभूताम् । निर्ग्रन्थितेति । निर्ग्रन्थितानां ग्रन्थिरहितानां ग्रन्थिलानां ग्रन्थियुक्ता-नाञ्च कनककदलीनां कवले ग्रासे लुब्धा ये गन्धहरिणाः कस्तूरिमृगाः

आत्तश्रान्तमिदं विषसममुना नीचैरनेन स्थितं
कम्पोऽस्मिन्निह जृम्भितं प्रलपितं चैतेन तूष्णीमदः ।
एतद्ध्यानपरं घर्मोऽत्र पुलकः स्रस्तं च बाष्पैरितः
सीतादुर्विनयेन मे दशमुखी हा ! धिक्कथं वर्त्तताम् ॥४४॥

मधुरिका । स्वगतम् । जधा मअणो आणवेदि । प्रकाशमा-
टितकेन । अअं रअणचउक्किआकेलिपल्लङ्को ता उअविसदु
देवो (४३) ।

रावणः । उपविश्य सकोपम् ।

---

(४३) यथा मदन आज्ञापयति । अयं रत्नचतुष्किकाकेलि
पल्यङ्कस्तदुपविशतु देवः ।

---

तेषां नाभिक्षोभेन मृगनाभिना इत्यर्थः सुगन्धा दश दिशः यस्य
तथाभूताम् । जानकीति जानक्याः सीतायाः विरहखेदविनोदस्था
रत्नेन्द्रा मणिप्रस्तरः यस्यां तादृशीं चतुष्किकां चत्वरभूमिम् ।

(ङ) आत्तेति । इदं मे मुखम् आत्तश्रान्तं गृहीतश्रमं विदो
प्रलापादिति भावः, अमुना मुखेन विषमं विषादः अवलम्बित इत्या
अनेन मुखेन नीचैः मन्दं स्थितं, अस्मिन् मुखे कम्पः, इह अस्मि
मुखे जृम्भितम्, एतेन मुखेन प्रलपितम्, अदः मुखं तूष्णीं स्थि
मिति शेषः । एतत् मुखं ध्यानपरं चिन्तापरम् अत्र मुखे घ
र्मान्तः पुलकः लोमाञ्चः, इत इत्यव्ययम् इदमित्यर्थः मुखं बाष्पं
स्रस्तं सृतम् । हा इति शोकसूचकं धिगिति निन्दासूचकमव्ययम्
मे मम दशानां मुखानां समाहारः दशमुखी सीतादुर्विनयेन जानकी
निच्छेदेन कथं केन प्रकारेण वर्त्ततां तिष्ठतु ? शार्दूलविक्रीडि
तम् ।

तां गाढं प्रहरस्व मां परिहरन्

सावज्ञम्।

तां मां च मा वा वधीः

सानुकम्पम्।

तां हन्तुं परिकल्पितैरपि शरैर्मामेव वा ताडय।

सानुरागम्।

यद्वा मन्मथ! तां च मां च युगपद्विध्येः समग्रायुधो
येनाहं जनकात्मजा च सदृशं प्रेम प्रपद्यावहे ॥४५॥ (चं)

तद्भद्रे! सन्निधापय (छ) शिशिरोपचारसामग्रीः।

प्रभञ्जनिका। देव! देवदाओ आअदाओ। तन्निवेदिदा दाव सिसिरोवआरसामग्गी सव्वा सण्णिहिदा ता किं णाम ण चिन्तिदोवणदं (ज) लङ्केसरस्स? (४४)।

(४४) देव! देवता आगताः। तन्निवेदिता तावत् शिशिरोपचारसामग्री सर्वा सन्निहिता तत् किं नाम न चिन्तितोपनतं लङ्केश्वरस्य?।

---

(च) तामिति। हे मन्मथ! मां परिहरन् परित्यजन् तां जानकीं गाढं दृढं प्रहरस्व वा अथवा तां माञ्च मा वधीः न प्रहर। वा अथवा तां हन्तुं परिकल्पितैः सुनिर्मितैः अपि शरैः मामेव ताड़य प्रहर। यद्वा अथवा समग्रायुधः समग्रशरवर्षी सन् युगपत् समकालं ताञ्च माञ्च विध्येः प्रहर, येन अहं जनकात्मजा सीता च सदृशम् अनुरूपं प्रेम प्रपद्यावहे प्राप्नुवः आवामिति शेषः। शार्दूलविक्रीड़ितं वृत्तम्।

(छ) सन्निधापय उपस्थापय। शिशिरोपचारसामग्रीः शीतसेवनद्रव्याणि।

(ज) चिन्तितोपनतं चिन्तितं सत् उपनतम् उपस्थितम्।

रावणः । पुरोऽवलोक्य ।

सलिलकलशपाणिर्जायतां मन्दरस्त्री
तुहिनगिरिकुटुम्बिन्यस्तु नीहारहस्ता ।
सपदि मलयजाया चन्दनाम्भो निधत्तां
व्यजतु चमरदण्डैः किन्नु नेपालपाली ॥ ४६ ॥ (झ)

शिशिरोपचारमभिनीय । अलमलं भवतीभिः । पर्वतबालता- णि यं युष्मदङ्गसङ्गः सुतरां तापाय । अन्यतोऽवलोक्य ।

यासां जन्म विवस्वतो भगवतश्चण्डाच्च मार्त्तण्डत-
श्चण्डीशेक्षणतश्च मन्मथमथस्ताः सन्तु हर्म्याद्बहिः ।
याः सार्द्धं सुधया समं कमलया साकं मृगाङ्केण च
क्षाराब्धेरमराङ्गनाः समभवंस्तास्त्वन्तिके सन्तु मे ॥४७॥ (ञ)

---

(झ) सलिलेति । मन्दरस्य पर्वतभेदस्य स्त्री सलिलकलसः पाणौ यस्याः तादृशी जायतां भवतु जलकुम्भं गृह्णातु इत्यर्थः । तुहिनगिरेः हिमाचलस्य कुटुम्बिनी गृहिणी मेनेत्यर्थः नीहारहस्ता प्रालेय- पाणिः अस्तु नीहारं गृह्णातु इत्यर्थः । मलयस्य पर्वतविशेषस्य जाया पत्नी सपदि झटिति चन्दनाम्भः चन्दनवारि निधत्तां धारयतु । किञ्च नेपालपाली नेपालदेशीयपर्वतराजपत्नी चमरदण्डैः चामरैः व्यजतु वीजयतु । मालिनीवृत्तम् ।

(ञ) यासामिति । यासां नारीणामिति शेषः. चण्डात् अतितीव्रात् भगवतः विवस्वतः दीप्तिमतः मार्त्तण्डात् सूर्यात् तथा मन्मथमथः मदनदाहकात् चण्डीशेक्षणतः हरतृतीयनेत्रादित्यर्थः जन्म उत्पत्तिः, ताः हर्म्यात् प्रासादात् बहिः सन्तु सूर्याग्निसम्भवा नार्यः मम प्रासादं नागच्छन्तु इत्यर्थः । याः अमराङ्गनाः अप्सरस इत्यर्थः सुधया अमृतेन सार्द्धं तथा कमलया लक्ष्म्या मृगाङ्केण चन्द्रमसा च समं क्षीराब्धेः क्षारसमुद्रात् मथ्यमानादिति शेषः समभवन् समु-

ततश्च ।

रम्भा रम्भादलाग्रैर्व्यजतु विहरतां दावदानेन हारा
तारा ताराधिपश्रीरधितनु तनुतां चन्दनस्यन्दमेकम् ।
प्रम्लोचा मोचपाकच्छविरवतु बिसन्यासभङ्ग्या ममाङ्गा-
न्यङ्गुद्राद्राग्जलार्द्रांमुरसि च दधती मेनका मे नका च ४८ (ट

पुनः सन्तापितकेन । यासां मद्विजितवल्लभविरहिणीनां (ठ
भवतीनां सन्निधिरपि सन्तापाय किं पुनरुपचारः । अन्यतो-
ऽवलोक्य ।

तस्थुः ताः तु एव मे मम अन्तिके समीपे सन्तु भवन्तु आगच्छन्तु इति यावत् । शार्दूलविक्रीड़ित वृत्तम् ।

( ट ) रम्भेति रम्भा तदाख्यः अप्सरोविशेषः रम्भादलाग्रैः कदलीपत्राग्रैः व्यजतु हारा नाम सुरसुन्दरी दावदानेन विहरतां चेष्टतां यथा तापशान्तिर्भवेत् तथा चेष्टतामित्यर्थः ताराधिपश्रीः चन्द्रकान्तिः तारा अधितनु तनुषु एकं केवलं चन्दनस्यन्दं चन्दनविलेपनं तनुतां करोतु । मोचपाकस्य पक्वरम्भायाः छविरिव छविर्यस्याः तादृशी प्रम्लोचा नामाप्सराः मम अङ्गानि बिसन्यासभङ्ग्या मृणालविरचनक्रमेण अवतु रक्षतु । अङ्गुद्रा नाम अप्सराः द्राक् झटिति जलार्द्रां तालवृन्तं दधती मम अङ्गानि तथा मेनका मे उरसि स्थितेति शेषः मम अङ्गानि का च कापि अन्या न मम अङ्गानि अवतु इत्यनेनान्वयः सर्वत्र बोध्यः । स्रग्धरावृत्तम् ।

( ठ ) मया विजिताः वल्लभाः यासां ताः अतएव विरहिण्यः तासां सन्निधिः समीपावस्थानं सन्तापाय विरहतापजननादिति भावः । उपचारः अङ्गलेपनादिसेवनमित्यर्थः ।

पार्श्वं मुञ्चतु वेत्त्यनङ्गगृहिणी नाङ्गोपचारक्रियां (ड)
चण्डी चामरभूषणैर्व्यजतु मां द्वात्रिंशता पाणिभिः।
भास्वत्पत्नि! सरोरुहैरलमलं घर्मा यदेषां प्रियाः
स्वान्दारान्नय सन्निधिं जलनिधे! नद्यस्तवान्तःपुरम्॥४९॥

सहर्षमवलोक्य।

पादौ पीडय ताम्रपर्णि! मुरले! हस्तौ हृदि स्थाप्यतां
भोः कावेरि! मृणालदाम वितर द्राङ्नर्मदे! वीजय।
त्वं गोदावरि! देहि चन्दनरसं हे तापि! तापोष्मणः (ढ)
शान्त्यर्थं सृज चन्द्रवारि विरही लङ्केश्वरः सीदति॥५०॥

---

(ड) पार्श्वमिति। अनङ्गगृहिणी कामपत्नी रतिरित्यर्थः पार्श्वं ममेति शेषः मुञ्चतु त्यजतु, यतः सा अङ्गोपचारक्रियां शरीरसेवां न वेत्ति न जानाति। चण्डी देवी चामराणि भूषणानि येषां तैः सचामरैरित्यर्थः द्वात्रिंशता पाणिभिः एतेन चण्ड्या द्वात्रिंशत् पाणित्वं सूचितं मां व्यजतु वीजयतु। हे भास्वत्पत्नि! सूर्य्यकान्ते! सरोरुहैः कमलैः अलम् अलं कमलोपचारेण तव मत्सेवनं व्यर्थमिति भावः। यत् यस्मात् घर्म्मा निदाघाः एषां सरोरुहाणां प्रियाः सूर्य्यकिरणस्पर्शेन विकाशादिति भावः हे जलनिधे! स्वान् निजान् दारान् नदीरित्यर्थः सन्निधिं ममेति शेषः नय प्रापय, यतः नद्यः तव अन्तःपुरम् अन्तःपुरचारिण्य इत्यर्थः। शार्दूलविक्रीडितं वृत्तम्।

(ढ) पादाविति। हे ताम्रपर्णि! पादौ चरणौ ममेति सर्वत्र योज्यं पीडय सेवस्व, हे मुरले! हृदि वक्षसि हस्तः स्थाप्यतां भोः कावेरि! मृणालदाम वितर देहि, हे नर्म्मदे! द्राक् झटिति वीजय। हे गोदावरि! त्वं चन्दनरसं देहि, हे तापि!

भूयः सन्तापमभिनीय । एता अपि (ण) मदनाङ्कुरितमतङ्ग-सङ्गात्परिक्वथन्ति । सक्रोधम् । प्रभञ्जनिके ! मत्प्रमाददुर्ललिताः खल्वेते ममाप्याज्ञां न गणयन्ति तदादिश्यन्तां किङ्करा यदुत ।

कम्पाघातैः सुरभिरभितः सत्वरं ताडनीयो
गाढाक्रान्तं मलयमरुतः शृङ्खलादाम दत्त ।
कारागारे क्षिपत तरसा पञ्चमं रागराजं
चन्द्रं चूर्णीकुरुत च शिलापट्टके पिष्टबिम्बम् ॥५१॥ (त)

द्वाराभिमुखमवलोक्य । काः पुनरिमा द्वारि ।

---

तापोष्मणः शान्त्यर्थं यन्त्रवारि सृजन्तः लङ्केश्वरः विरही सन् सीदति क्लिश्यति । शार्दूलविक्रीडितं वृत्तम् ।

(ण) मदनेति । मदनेन अङ्कुरितस्य मन्मथस्य मतङ्गस्य महेन्द्रस्य सङ्गात् संसर्गात् परिक्वथन्ति तापयन्तीति यावत् । मदिति मम प्रमादेन अनवधानेन दुर्ललिताः स्वच्छन्दाः ।

(त) कम्पेति । सुरभिः सुगन्धः अभितः सर्वतः कम्पाघातैः कम्पयन्ति वेपयन्ति एभिरिति कम्पाः वेपथुजनकाः ये आघाताः प्रहाराः तैः सत्वरं शीघ्रं ताडनीयः युष्माभिरिति शेषः । यथा वासो न निःसरेदिति भावः, मलयमरुतः मलयसमीरस्य गाढाक्रान्तं दृढसंयमं यथा तथा शृङ्खलादाम बन्धनरज्जुं दत्त यूयमिति शेषः । यथा न वहेदिति भावः, पञ्चमं रागराजं स्वरविशेषं तरसा बलेन कारागारे क्षिपत बध्नीतेत्यर्थः यथा सङ्गीतं न स्यादिति भावः, किञ्चेति-चार्थः शिलापट्टके पिष्टं बिम्बं मण्डलं यस्मिन् तद्यथा तथा चन्द्रं चूर्णीकुरुत । मन्दाक्रान्ता वृत्तम् ।

प्रभञ्जनिका । वारुणी (थ) लक्ष्मी सरस्सई । (४५)

रावणः । सावज्ञम् ।

दूरे तिष्ठतु वारुणी विरहिणां का नाम रत्नस्पृहा
लक्ष्मीः क्षीरमहोदधेरपि सुता स्वाहेव दाहे पटुः ।
वाचालासि सरस्वति ! व्रज गृहान् कः सूक्तिगोष्ठीक्षणो
यन्नाद्यं न ममाद्य किञ्च न मुदे सीताप्रसादं विना ॥५२॥ (द)

ऊर्ध्वमवलोक्य स्वगतम् । तथाप्येवं तावत् । प्रकाशम् ।

हंहो (ध) विबुधापसदाः ! किमिदं येन शिशिरोपचारं कर्त्तु-मुद्दिष्टा उष्णोपचारं रचयथ तर्हि विस्मृतो वः प्रकृत्यमर्षणो

---

(४५) वारुणी लक्ष्मी सरस्वती ।

---

(थ) वारुणी वरुणः जलाधिपः तत्सम्बन्धिनी शक्तिः वारुणी ।

(द) दूरे इति । वारुणी रत्नाकरस्य स्वामित्वेन रत्नान्यादाय रावणमुपचरितुमागतेति भावः दूरे तिष्ठतु विरहिणां जनानां रत्नेषु स्पृहा का । नैव रत्नस्पृहेत्यर्थः लक्ष्मीः क्षीरमहोदधेः सुतापि स्वाहा अग्निपत्नीव दाहे भस्मीकरणे पटुः समर्था लक्ष्मीमन्तो हि सततं सोष्माणोभवन्तीति भावः । हे सरस्वति ! वाणि ! त्वं वाचाला बहुभाषिणी असि, अतः गृहान् व्रज गच्छ सूक्तेः शोभनायाः उक्तेः वचसः या गोष्ठी सभा तस्याः क्षणः समयः न ममेति शेषः इदानीं सुभाषितपरम्परया न मे तृप्तिरिति भावः यत् अतः अद्य अधुना सीता प्रसादं विना किञ्च किमपि मम मुदे हर्षाय न सत्यं नैव हर्षायेत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ।

(ध) विबुधापसदाः देवाधमाः । शिशिरोपचारं शैत्य-
झटिति
नियुक्ताः । उष्णोपचारम् उत्तापमेवां रचयथ

दग्धकण्ठः। विचिन्त्य। यद्वा प्रसादचिन्तकाः खल्वेते मम तन्न तेषु पक्षमभिधास्ये। जलार्द्रामभिनीय।

चन्द्र! ज्योत्स्नाजलार्द्रामपनय यदिदं दह्यते देहदाहैः

सेकमभिनीय।

(न)क्षीराब्धे! दुग्धसेको मदनहुतभुजा पिण्डभावं बिभर्ति।

नलिनीपचारमभिनीय।

हेमाम्भोज! (प)स्रजस्ते विशद! महते प्लोषपोषाय निष्ठाः

हिमतापानुभवमभिनीय।

(फ) प्रालेयाद्रे! दवीयांस्तव हिमदवथुर्दृष्ट एवाम्बुजेषु ५२

प्रभञ्जनिका। अहो! मन्मथवामता (ब) अहो! दैवप्रति-

---

(४६) अहो! मन्मथवामता अहो! दैवप्रतिकूलता यदिदानीं दक्षिणीयमप्युद्वेजनीयं शिशिरमप्युष्णं प्रतिभाति।

---

कूलत्वं। प्रकल्प्यमर्षणः स्वभावकोपनः जलार्द्रां जलसिक्तातालवृन्तव्यजनमभिनीय अनुभूय।

(न) क्षीराब्धे इति। हे क्षीराब्धे! क्षीरनिधे! दुग्धसेकः तव दुग्धेन गात्रलेपनं मदनहुतभुजा कामाग्निना पिण्डभावं घनीभावं बिभर्ति अग्न्युत्तापेन दुग्धं घनीभवतीति प्रसिद्धिः।

(प) हे विशद निर्मल! हेमाम्भोज! स्वर्णकमल! ते तव स्रजः माल्यानि महते उत्कटाय प्लोषपोषाय दहनवृद्धये निरतिशयं तिष्ठन्तीति निष्ठाः।

(फ) हे प्रालेयाद्रे! हिमाचल! दवीयान् अतिदूरवर्त्ती ते तव हिमदवथुः हिमतापः हिमप्रादुर्भाव इत्यर्थः अम्बुजेषु एव दृष्टः न तु मयीति भावः। एव शब्दोऽन्यव्यवच्छेदकः। स्रग्धरावृत्तम्।

(ब) मन्मथवामता कामस्य प्रातिकूल्यम्। ... कूलेति

कलहा ज द्वाग रमाखेज्जं वि उव्वेअणिज्जं सिसिरं वि उह्न पडिहाअदि। (४६)

रावणः। साभ्यर्थनावष्टम्भम्।

शेषाहे! त्वत्फणानां पिबतु दशशती मारुतं चैत्रमित्रं राहो! जिह्वालता ते शशधरवपुषश्चन्द्रिकामेव लेढु।
सङ्कोचं पुष्पवन्तौ! सपदि वितरतं पङ्कजेन्दीवराणां त्वां याचे पञ्चबाणः पुरदहन! पुनर्दह्यतामर्द्धदग्धः॥५४॥ (भ)

विचिन्त्य। कथममी तापोत्कर्षेऽपि मम (म) प्रत्यनीकाप्रोत्साहनेनापि न विरमन्ति तदेवं तावत्। साक्षेपम्।

मास्म श्वाससटाः समीर! विरतः का कैतवी रावणे धाराम्बूणि कणीकुरुष्व वरुण! त्वत्केलयः खल्विदम्।
इंहो पावक! तापमल्पय तनौ त्वत्तो जगद्दाहिका व्यावर्त्तस्व वसन्त! हन्त मदनः स्यादेव वीतायुधः॥५५॥ (य)

---

(भ) शेषाहे इति। हे शेषाहे! अनन्तनाग। तव फणानां दशशती फणासहस्रमित्यर्थः चैत्रस्य मधुमासस्य मित्रं मारुतं मलयसमीरमित्यर्थः पिबतु। हे राहो! ते तव जिह्वा एव लता शशधरवपुषः चन्द्रमूर्त्तेरेव चन्द्रिकां लेढु आस्वादयतु। हे पुष्पवन्तौ! दिवाकरनिशाकरौ! सपदि द्रुतं पङ्कजानां पद्मानाम् इन्दीवराणाम् उत्पलानाञ्च सङ्कोचं वितरतं विधत्तम्। हे पुरदहन! त्रिपुरारे! त्वां याचे अभ्यर्थये अर्द्धदग्धः न तु सम्यक् तथात्वे कथं तस्य प्रादुर्भाव इति भावः पञ्चवाणः कामः पुनः दह्यतां भस्मीक्रियताम्। स्रग्धरावृत्तम्।

(म) प्रत्यनीकेति। प्रत्यनीकाः रिपवः तेषु प्रोत्साहनेन अपकारार्थं प्रवर्त्तनेन।

झटिति

हे समीर! पवन! श्वासानां निश्वासानां

स्वगतम्। तत्कः पुनरत्र प्रकारस्तापापगमने। विचिन्त्य। भवत्वेवं तावत्। प्रकाशम्।

हे संवर्त्ताः! कुरुत करकावृष्टिभिर्मां विकीर्णां
द्राक्सम्भूय व्यजनचरितं धत्त कल्पान्तवाताः!
क्रीडावापी भव हिमगिरे! बुध्नबन्धाद्विलीनो
लङ्काभर्त्तुर्मनसिजशिखी नान्यथा शंशमीति ॥ २६ ॥ (र)

सविशेषसन्तापमूर्ध्वमवलोक्य। किञ्च।

---

सटाः परम्पराः अनवरतदीर्घनिश्वासा इत्यर्थः। मा स्म न भवन्तु इति यावत् रावणे चिरतः व्यापिनीत्यर्थः कैतवी कापट्य्या? वञ्चकत्वं रावणं मां कैतवेन मा प्रतारयस्वेति भावः। हे वरुण! जलाधिप! धाराश्रूणि निरन्तराश्रुधाराः क्षणीकुरुष्व यथा मे निरन्तरम् अश्रुधारा न निपतेयुस्तथा कुरु इत्यर्थः खलु यतः इदं अश्रुपात इत्यर्थः त्वत् केलयः तव विलसितमित्यर्थः। हंहो पावक! अग्ने! तनौ मम शरीरे तापम् अल्पय सान्त्वय यतः त्वम् जगद्दाहिका जगतां दाह इत्यर्थः दहतेर्भावे नकप्रत्ययः। हे वसन्त! व्यावर्त्तस्व निवर्त्तस्व स्वप्रादुर्भावादिति शेषः येन तव अप्रादुर्भावेन मदनः कामः वीतं विगतम् आयुधम् अस्त्रम् पुष्परूपं यस्य तथाविधः स्यात् हन्तेति खेदसूचकम् अव्ययम्। शार्दूलविक्रीडितं वृत्तम्।

(र) हे संवर्त्ता इति। हे संवर्त्ताः! महामेघविशेषाः करकावृष्टिभिः शिलावर्षणैः मां विकीर्णां आच्छन्नां कुरुत येन मे तापोपशमः स्यादितिभावः। हे कल्पान्तवाताः प्रलयपवनाः! यूयं सम्भूय मिलित्वा द्राक् झटिति व्यजनचरितं तालवृन्तकार्य्यं धत्त कुरुत, हे हिमगिरे! बुध्नं मूलमेव बन्धः तस्मात् आरभ्य सर्वथैव पञ्चमी, आमूलादित्यर्थः विलीनः द्रवीभूतः सन् क्रीडावापी केलिसरः भव। अन्यथा लङ्काभर्त्तुः रावणस्य मनसिज शिखी कामाग्निः न शंशमीति न सम्यक् शाम्यतीत्यर्थः। मन्दाक्रान्तावृत्तम्।

सूत्रीक्रतासु तरुणेन्दुकरच्छटासु
नक्षत्रबिम्बमयमौक्तिकगुम्फनाभिः ।
सीतावियोगविधुरस्य नवीनमार्गैः
सम्पाद्यतां दशमुखस्य विलासहारः ॥ ५७ ॥ (ल)

अथवा किमेभिः क्षुद्रनक्षत्रमणिभिः । ततश्च ।

हस्तद्वयीनिविडपीडितपार्वणेन्दु-
निस्यन्दितामृतरसेन निषिच्य किञ्चित् ।
अङ्गानि मे स्मरमहाज्वरतापभाञ्जि
स्वस्मै स्वयं ननु भिषज्यति राक्षसेन्द्रः ॥ ५८ ॥ (व)

प्रभञ्जनिका । (अ) देवस्स देवेण वेज्जत्तणं पडिवस्स मिअल-ञ्छणस्स उण का वत्ता । (४७)

---

(४७) देवस्य देवेन वैद्यत्वं प्रतिपन्नं मृगलाञ्छनस्य पुनः का वार्त्ता ।

---

(ल) सूत्रीति । सीतावियोगेन विधुरस्य व्याकुलस्य दशमुखस्य तापशान्तये इति शेषः असूत्राणि सूत्राणि कृताः तासु तरुणस्य इन्दोश्चन्द्रस्य करच्छटासु किरणश्रेणीषु नक्षत्रबिम्बमयानि एव मौक्तिकानि तेषां गुम्फनाभिः विरचनाभिः नवीनमार्गैः नूतनप्रकारैः विलासहारः केलिस्रक् सम्पाद्यतां क्रियतां भृत्यान् प्रति उक्तिरियम् ।

(व) हस्तेति । राक्षसेन्द्रः हस्तद्वय्या हस्ताभ्यां निविडं यथा तथा पीडितः यः पार्वणेन्दुः पूर्णचन्द्रः तस्मात् निस्यन्दितेन अमृतरसेन स्मरमहाज्वरतापभाञ्जि कामसन्तप्तानि मे अङ्गानि किञ्चित् निषिच्य स्वस्मै स्वयं ननु निश्चितं भिषज्यति भिषगिवाचरति आत्मानं चिकित्सतीत्यर्थः । वसन्ततिलकं वृत्तम् ।

रावणः। यद्वा किमनेनापि (च) सीतावदनबन्धुना विधुरीकृतेन। चन्द्रं प्रति सकरुणम्।

हंहो चन्द्र! विमुच्यतां चरणयोः पर्य्यन्तसेवाक्रम-
स्त्वं पीयूषरसस्य रागशशिनः पात्रं तु लङ्केश्वरः।
तन्मे वक्तृपरम्परापरिचिताः प्लोषं करिष्यन्त्यमी
मा कश्चिद्भवतोऽपि बिम्बवलये श्वासाश्चमत्कारिणः॥५८॥(छ)

मदनवेदनामभिनीय।

आः काम! मय्यपि विमुञ्चसि नाम बाणान्
किं रावणो न विदितः शमितामरो यः
यद्वा स एष तव राघवपक्षपात-
स्त्वामसौ प्रतिकरिष्यति चन्द्रहासः॥६०॥(ह)

---

(ग) देयस्य स्वस्य अर्थे इति शेषः। प्रतिपन्नम् अङ्गीकृतं कुरङ्ग-लाञ्छनस्येति कुरङ्गलाञ्छनस्य चन्द्रस्य निपीड़ितस्य इत्यर्थः का वार्त्ता समाचारः प्राणरक्षणोपाय इति भावः।

(च) सीतावदनस्य बन्धुः मित्रं तेन प्रियवस्तुनः मित्रस्य प्रियत्वादिति विधुरीकृतेन क्लेशितेनेत्यर्थः।

(छ) हंहो इति। हंहो! चन्द्र! चरणयोः पर्य्यन्तसेवाक्रमः आचरणसेवन परम्परा विमुच्यतां त्यज्यताम्। त्वं पीयूषरसस्य अमृतरसस्य पात्रम् आश्रयः, लङ्केश्वरस्तु रागशशिनः प्रेमशुभ्रांशोः पात्र-मिति शेषः, तत् तस्मात् मे मम वक्तृपरम्पराभिः वदनश्रेणिभिः परिचिताः अमी श्वासाः निश्वासमरुतः चमत्कारिणः अद्भुतवस्तुनः भवतोऽपि बिम्बवलये प्रतिबिम्बमण्डले कञ्चित् प्लोषं दाहं मा करि-ष्यति न प्रतिबिम्बं दहन्तु इति भावः। शार्दूलविक्रीड़ितं वृत्तम्।

(ह) आ इति। आ इति विरक्तिसूचकं सम्बोधनसूचकम् वा। आः काम! मयि अपि बाणान् शरान् विमुञ्चसि नाम रावणः किं न

परिक्रामन्नग्रतोऽवलोक्य । कथमियं (ङ) केलिकमलिनी ।
सहर्षम् ।

नवमरकतपात्रीरोचिषः पत्रपङ्क्ती-
स्तव कमलिनि ! वन्दे चक्षुषोश्चार्पयामि ।
यदिह नयनलेह्यं दोर्लतामध्यरोध
स्तनतटपरिणाहं सूचयन्ति प्रियायाः ॥६४॥ (च)

अन्यतोऽवलोक्य । अये ! कथममी ब्रह्मविमानहंसाः सीताविभ्रमगमनमवहृत्य (छ) परिक्रामन्तो मह्यमात्मान रोचयन्ते । साक्षेपम् । आः ! क्षीरजलपृथक्करणपाण्डित्य

---

शेषः । रोषविषस्वरूपं तु मम क्रोधाविषोत्पादकमित्यर्थः । तु ऋा वल्लभायाः सीतायाः वेणिं केशपाशं अनुधावति अनुकरोति ते क्रोधविषोत्पादकत्वेन हेतुना इत्यर्थः एषः कृपाणः असिः त्वर युष्मान् निहन्तु मिति शेषः तेन च वल्लभाया वेण्यनुकरणेन च इ मौलिमाला मम शिरःश्रेणी युष्मान् नमति प्रणमतीत्यर्थः वसन्त तिलकं वृत्तम् ।

(ङ) केलिकमलिनी क्रीड़ापद्मिनी ।

(च) नवेति हे कमलिनि ! तव मरकतपात्रीणां मरक भाजनानां रोचिरिव, रोचिर्यासां ताः पत्राणां दलानां पङ्क्त श्रेणीः वन्दे प्रणमामि चक्षुषोश्च अर्पयामि ददामि, यत् यस्मात् इ नयनलेह्यं दृष्टिप्रियं प्रियायाः सीताया दोर्लतयोः भुजलतयो र्म ध्य इत्यर्थः रुणद्धीति तयोक्तः यः स्तनतटयोः परिणाहः विस्त रं सूचयन्ति विस्तारविशेषेण शोभयन्तीत्यर्थः एताः पत्रपङ्क्तय इ शेषः । मालिनी वृत्तम् ।

(छ) अवहृत्य चोरयित्वा परिक्रमन्तः गच्छन्तः । क्षीरज दुग्धसलिलयोः पृथक् करणे यत् पाण्डित्यं नैपुण्यं तेन संस्कृ

संस्तृहीताः सितशकुनयः ! केयं लुण्ठाकता । विचिन्त्य ।
भवतु नलिनासनमेव तावदभिदधे । अञ्जलिं बद्ध्वा ।

हंहो पितामह ! निषेध विमानहंसान्
लीलागतं मृगदृशस्तव इमे हरन्ति ॥
नोचेन्ममोपदिश तेषु यदाचरामि
त्वं येन दण्डनविधेः प्रथमप्रणेता ॥ ६५ ॥ (ञ)

विलोक्य । कथं सत्वरं मामवलोक्य स्थितास्तम्भ
भङ्गयाङ्गलिस्तेयं (झ) परित्यक्तमेतैः । तन्न प्रत्यादिशामि
यदित्थं कथयन्ति सकृद्विहितदोषं दोषेभ्यो विनिवर्त्तम
साधुवद्वीक्षेत । अन्यतोऽवलोक्य । रे पुरन्दर ! मम पु
सीतामालिङ्गसि तवेयमहल्या मुनिपत्नी । चन्द्रहास !
इत एष विडौजसि समादिश्यसे ।

---

आहृताः लोकैरिति शेषः । सितशकुनयः हंसाः । लुण्ठा
तस्करता चौर्य्यवृत्तिरित्यर्थः । नलिनासनं पद्मयोनिम् ।

(ञ) हंहो इति । हंहो पितामह ! विधातः ! विमानहं
भवद्यानवाहिनो मरालान् निषेध निवारय, ते तव इमे ह
मृगदृशः सीतायाः लीलागतं विलासगमनं हरन्ति चोरय
नोचेत् यदि न वारयसि इत्यर्थः तदा तेषु हंसेषु यत् आचर
यथा तान् दण्डयामीति भावः । तत् मे उपदिश, वद, येन हेतुन
दण्डविधेः शासनविधानस्य प्रथमः आद्यः प्रणेता स्रष्टा त्वमेव
दण्डविधिं प्रवर्त्तितवानित्यर्थः । वसन्ततिलकं वृत्तम् ।

(झ) गतिस्तेयं विलासगमनचौर्य्यं तत् तस्मात् न प्रत्यादिश
दण्डयामि एतानिति शेषः । यत् यस्मात् कथयन्ति वदन्ति बुधा
शेषः । विहितदोषं कृतापराधं वीक्षेत पश्येत् । विडौजसि वि

प्रभञ्जनिका । पुरतः स्थित्वा । देव ! कहिं इह महेन्दो कहिं वा सीदा ? । ( ५० )

रावणः । निपुणं निरूप्य । हन्त हन्त ! सादृश्यादिप्रलब्धोऽस्मि (ञ) । इन्दीवराकरोऽयं न विकस्वरलोचनः शचीरमणः । जलचन्द्रप्रतिमैषा तरङ्गदोर्घा न वैदेही ।

प्रभञ्जनिका । स्वगतम् । अमदो हंसिअ अवक्खिवामि से हिअआवक्खेवम् । प्रकाशम् । इदो इदो पेक्खदु दसाणणो देवो । ( ५१ )

रावणः । साक्षेपम् । आः पन्नगाः ! प्रियतमामादाय पातालं प्रविशथ वैनतेय । वैनतेय ! ( ट ) निवारयैतान् यद्वा ममापि रावणस्य सहायापेक्षा । तदेषोऽहमेव परिसर्पामि । इति संरम्भते ।

---

( ५० ) देव ! केह महेन्द्रः क्व वा सीता ? ।

( ५१ ) अन्यतो दर्शयित्वापक्षिपाम्यस्य हृदयावक्षेपम् । इत इतः प्रेक्षतां दशाननो देवः

---

विश्वं व्याप्नोतीति विट् तादृशं ओजः बलं यस्य स तस्मिन् इन्द्रे विड़ौजाः पाकशासन इत्यमरः । समादिश्यसे प्रेर्य्यसे ।

(ञ) विप्रलब्धः वञ्चितः । इन्दोति इन्दीवरस्य नीलोत्पलस्य आकारः अवयवः । विकस्वराणि लोचनानि यस्य तथोक्तः शचीरमणः इन्द्रः । जलेति । जले चन्द्रस्य प्रतिमा प्रतिबिम्बम् । तरङ्गेण दीर्घा दीर्घवत् प्रतीयमाना इत्यर्थः ।

(ट) वैनतेय ! गरुत्मन् ! परिसर्पामि धावामि । संरम्भते कुप्यति ।

प्रभञ्जनिका । पादयोर्निपत्य । कहिं एत्थ पसग्गा क
एत्थ जाणई । (५२)

रावणः । निरूप्य । यथाह भवती ।

अयं तोयावर्त्तो बत न वितलं नागवसतेः ?
अयं वीचीच्छेदो न खलु फणिनामेष निवहः ? ।
इयं भृङ्गश्रेणी न पुनरलकानां विरचना ?
इदं हेमाम्भोजं विकसति न सीतामुखमिदम् ? ॥ ६६ ॥

विचिन्त्य । तदितः स्थलकमलिनीमतो विलासक
मृगपक्षिजातांश्च लीलोद्यानैकदेशान्निरूपयामि । परि
सितकेनावलोक्य ।

सारङ्ग ! दृष्टिलसिते कलभाषिते च
पुंस्कोकिल ! सितसरोरुह ! सौरभे च ।
दिव्येभ ! विभ्रमगतौ च सदैव यस्याः
शिष्याः स्थ तां कथयत स्वगुरुं प्रियां मे ॥ ६७ ॥ (ड

---

(५२) क्वात्र पन्नगाः क्वात्र जानकी ।

---

(ठ) अयमिति बत खेदे अयं तोयानां जलानामावर्त्तः भ्र
स्यादावर्त्तोऽम्भसां भ्रम इत्यमरः । न नागानां वसतिः वितलं पात
भेदः ? अयं खलु निश्चितं वीचीनां तरङ्गाणां छेदः भङ्गिविशे
नैषः फणिनां नागानां विग्रहः शरीरं ? इयं भृङ्गश्रेणी भ्रमराव
अलकानां केशानां प्रियाया इति शेषः । विरचना विन्यासः न पु
इदं हेमाम्भोजं स्वर्णकमलं विकसति, सीताया मुखमिदं न
शिखरिणी वृत्तम् ।

(ड) सारङ्गेति । हे सारङ्ग ! मृग ! त्वं दृष्टिलसिते दृ
विलासे, हे पुंस्कोकिल ! त्वं कलभाषिते मधुरभाषणे, हे सितसरो

विलोक्य । कथममी मद्वयास्सर्वेऽप्यप्रतिपत्तिमुखास्ति-ष्ठन्ति (ढ) केवलमैरावतो मदवशात्कण्ठगर्जं करोति जाने प्रेयस्या यावदपहृतमनेन भवत्वेनमेव तावदाभाषे ।

कुम्भाभ्यां कुचसम्पदूरुविभवो हस्तेन लीलागतं
केलीचङ्क्रमितेन गण्डतलयोः कान्तिश्च दन्तद्युता ।
स्वःस्तम्बेरमनाथ ! पद्मलदृशो यस्यास्त्वयेदं हृतं
तां मे दर्शय येन सम्मदवता स्तेयं मया क्षम्यते ॥ ६८॥ (ण)

विलोक्य । कथं मामनादृत्य निजप्रियामभ्रमु (त) प्रति

---

श्वेतकमल ! त्वं सौरभे सौगन्ध्ये, हे दिव्येभ ! ऐरावत ! यद्य विभ्रम-गतौ गतिविलासे सदैव यस्याः सीतायाः शिष्याः कान्ताः स्थ भवथ तां स्वगुरुं युष्मद्गुरुं मे प्रियां जानकीं कथयत कुत्र स्थितेति वदत युष्माकमन्तेवासित्वात् गुरोरवस्थानस्य अवश्यं ज्ञातव्यत्वादिति भावः । वसन्ततिलकं वृत्तम् ।

(ढ) अप्रतिपत्तिमुखाः अप्रतिपत्तिः किं कर्त्तव्यविमूढता मुखे विषादसूचके इति भावः येषां तादृशाः ।

(ण) कुम्भाभ्यामिति । हे स्वःस्तम्बेरमनाथ दिव्यैरावत ! त्वया यस्याः पद्मलदृशः प्रशस्तरोमराजिशोभितनयनायाः प्रियायाः कुच-सम्पद् स्तनसमृद्धिः कुम्भाभ्यां उरुविभवः ऊर्वोर्विलासः हस्तेन शुण्डादण्डेन लीलागतं विलासगतिः केलीचङ्क्रमणेन क्रीड़ा-गतिविशेषेण, गण्डतलयोः कपोलदेशयोः कान्तिश्च दन्तद्युता दशन-कान्त्या इदमित्यव्ययं इदं अनेन प्रकारेणेत्यर्थः हृतं सामान्यत्वान्नपुं-सक मिति बोध्यं तां मम प्रियां मे मह्यं दर्शय, सम्मदवता हर्षदायि-नेत्यर्थः येन प्रियादर्शनेन मया स्तेयं प्रियायास्तत्तच्चौर्यं तवेति शेषः क्षम्यते । शार्दूलविक्रीड़ितं वृत्तम् ।

(त) अभ्रमुं स्वपत्नीम् । कात्यायनीति कात्यायन्याः केशरो

प्रहस्तः । साक्षेपम् । रेरे कात्यायनीकेसरिकिशोर ! शिक्ष यैनम् । विचिन्त्य । अथवा शिक्षितचर एवायम् ।

कण्ठार्पितमहापाशश्चरणार्पितशृङ्खलः ।
बध्यते द्युकरी द्वारि कोऽस्त्यन्यो दण्डडम्बरः ॥६८॥ (थ)

अन्यतोऽवलोक्य । कथमद्यापर्वणि ( द ) चन्द्रग्रहणं वसुमतीवर्त्ति तदेतदद्भुतम् ।

प्रभञ्जनिका । देव ! किसणपक्खदिअसेसु चन्दग्गहणंति झति जुत्तं ण पडिहाअदि । (५२)

रावणः । प्रभञ्जनिके । यथात्थ । सम्यग्विलोक्य किञ्चिद्विहस्य च ।

जितनवनवनीतं धाम नो चन्द्रिकेयं ?
स्मितकुवलयनीले चक्षुषी नो कलङ्कः ? ।

---

( ५२ ) देव ! कृष्णपक्षदिवसेषु चन्द्रग्रहणमिति झटिति युक्तं न प्रतिभाति ।

---

सिंहः तस्य किशोरः शावकः तत्सम्बुद्धौ । शिक्षितचरः पूर्वं शिक्षितः चरट् भूतपूर्वे इति चरट् प्रत्ययः ।

( थ ) कण्ठेति कण्ठे अर्पितः महान् पाशो यस्य सः, चरणयोरर्पिता शृङ्खला यस्य तादृशः द्युकरी दिव्येभः ऐरावत इत्यर्थः द्वारि ममेति शेषः बध्यते, अन्यः अपरः दण्डस्य डम्बरः प्राबल्यं कः अस्ति ? नैवास्तीत्यर्थः ।

( द ) अपर्वणि पौर्णमास्यतिरिक्ते काले इत्यर्थः । वसुमतीवर्त्ति क्षितितलस्थम् ।

( ध ) जितेति जितं नवं नवनीतं येन तादृशं धाम कान्तिः

सरलभुजगभङ्गिर्वेणिरेषा न राहुः ?

मुखमिदमिह तस्या नैष राकामृगाङ्कः ? ॥७०॥ (ध)

विचिन्त्य । क्व पुनरत्र सीतावदनेन्दुरपि । विहस्य । ध्यातं ध्यानानीतया सीतया मुहुर्मुहुर्विप्रलभ्यामहे । अन्यतोऽवलोक्य । अयं विलासकुरङ्गाग्रणीः (न) समीरणसारङ्गः । विचिन्त्य । कथं जानकीनयनलीलामलिम्लुचः । साक्षेपम् ।

शास्योऽसि मारुत ! हृते त्वन्मृगेण तदीक्षणे ।

स्वामी भृत्यापराधेन दण्डनीय इति स्थितिः ॥७१॥ (प)

पुरतोऽवलोक्य । (फ) सरीसृपचक्रवर्त्तिन् ! वासुके ! गण्डूषयैनं यद्वा समानपरिग्रहदोषं चन्द्रमपि तावदाक्षिपामि ।

---

इयं चन्द्रिका ज्योत्स्ना नो ? सितं विकसितं यत् कुवलयं नीलोत्पलं तद्वत् नीले चक्षुषी एते कलङ्कः नो ? सरलः यः भुजङ्गः तस्येव भङ्गिर्यस्यास्तादृशी वेणिः एषा, राहुर्न ? इदमिह तस्याः सीतायाः मुखम्, एष राकामृगाङ्कः पूर्णशशधरः न ? मालिनीवृत्तम् ।

(न) विलासकुरङ्गाणां क्रीडामृगाणाम् अग्रणीः श्रेष्ठः समीरणसारङ्गः वातमृगः । जानकीति जानक्याः नयनलीलायाः मलिम्लुचः तस्करः ।

(प) शास्य इति । हे मारुत ! तव मृगेण वातमृगेणेत्यर्थः तस्याः ईक्षणे नयने हृते चोरिते सति शास्यः दण्डनीयोऽसि यतः भृत्यानामपराधेन स्वामी दण्डनीयः भवति इति स्थितिः लोकमर्य्यादा यस्य भृत्योऽपराध्यति तस्य स्वामी दण्ड्यते इति दर्शनीयम इति भावः ।

(फ) सरीसृपाणां पन्नगानां चक्रवर्त्तिन् ! सम्राट् ! गण्डूषय गिल एनं वातमृगम् । समानेति समानः परिग्रहेण आश्रयदानेन

रजनीश ! विमुञ्च लाञ्छनैणं
दयितालोकनहृन्ममैष बध्यः।
यदि चास्य परिग्रहं दधीया-
स्तदितो मूढ ! दृशाननं न पश्येः ॥ ७२ ॥ (ब)

सैंहिकेय ! सैंहिकेय (भ) ! कवलीकुरु कुरङ्गलाञ्छनम्।

प्रभञ्जनिका। (म) केलीकन्दोट्टवणविसट्टवसं परिणक्कक-प्पूरपिण्डपण्डुरग्गं मुअलञ्छणमुच्छिन्दाणेण देवेण मणस्सि-णीमाणमुद्दाविद्दावणे किं कादव्वम्। (५४)

रावणः। भवति प्रभञ्जनिके ! सर्वदैव प्रसादपात्रं ममैषः। तदेकवारं तावच्छिंचयामि।

---

(५४) केलीकमलवनविकसितवर्णं परिपक्वकर्पूरपिण्डपाण्डुरं मृगलाञ्छनमुच्छिन्दता देवेन मनस्विनीमानमुद्राविद्रावणे किं कर्त्तव्यम्।

---

दोषो यस्य तादृशं वायुर्यथा मृगस्य आश्रयदानेन दोषी, तथा चन्द्रमा अपीति भावः। आक्षिपामि तिरस्करोमि।

(ब) रजनीशेति। हे रजनीश ! निशाकर ! लाञ्छनैणं कलङ्करूपम् एणं मृगं विमुञ्च, दयितायाः आलोकनं हरतीति तथाविधः एषः मृगः मम बध्यः। यदि च अस्य मृगस्य परिग्रहं दधीथाः, हे मूढ ! तत् तदा इतः अस्मिन् लोके दृशाननं न पश्येः न द्रक्ष्यसीत्यर्थः त्वं निपातितः सन् मम दर्शनं न प्राप्स्यसीति भावः।

(भ) सैंहिकेय ! राहो ! कुरङ्गलाञ्छनं चन्द्रं कवलीकुरु ग्रस।

(म) केलीकमलवनस्येव विकसितः वर्णः कान्तिर्यस्य तादृशं मतिपक्वः सदृशः यः कर्पूरपिण्डः तद्वत् पाण्डुरः शुभ्रकान्तिः मन-स्विनीनां मानिनीनां मानमुद्रायाः मानरूपस्य प्रणयावरोधस्य विद्रा-वणे ताड़ने।

हे चन्द्रमस्त्यज मृगं कुरु रावणाज्ञां
तत्कारिणस्तव सुखद्वितयेन योगः ।
तन्मैथिलीनयनकान्त्यपहारदोषो
लुप्तश्च ते भवति बिम्बमलाञ्छनं च ॥ ७३ ॥ (य)

पुरतोऽवलोक्य । जानकि ! जानकि ! किमिव मयापकृतं यदवगुण्ठ्य स्थिताऽसि । यद्वा (र) प्रसादरसोन्मुख मनसोऽपि विलासहेतोः कामिन्यः कुप्यन्ते तत्प्रसादयामि ।

इति प्रणमति ।

प्रभञ्जनिका । का उण एत्थ जाणई ? । (५५)

रावणः । इयमियम् ।

प्रभञ्जनिका । कहिं सा ? । (५६)

रावणः । हस्तं व्यापारयन् । हा हतोऽस्मि मन्दभाग्यः ।

इयं लता कापि निरन्तरच्छदा
प्रसूनगन्धाहृतषट्पदावलिः ।

---

(५५) का पुनरत्र जानकी ? ।

(५६) क्व सा ? ।

---

(य) हे चन्द्रम इति । हे चन्द्रमः ! मृगं त्यज, रावणस्य आज्ञां कुरु पालय । तत्कारिणः रावणाज्ञापालिनः तव सुखद्वितयेन योगः भवेदिति शेषः किं किं तत् सुखद्वयमित्याह तदिति सः मैथिल्या नयनकान्तेः अपहारदोषः चौर्य्यदोषः लुप्तश्च गतश्च बिम्बं तव मण्डलम् अलाञ्छनम् अकलङ्कं भवति च । वसन्ततिलकं वृत्तम् ।

(र) प्रसादेति । प्रसादरसे प्रसन्नतायाम् उन्मुखं मनो यासां ताः ।

(ल) इयमिति । निरन्तरा अविच्छिन्नाः छदा दलाः यस्याः

अधो दधाना हरितं नवांशुकं
न मैथिली नीलदुकूलगुण्ठना ॥ ७४ ॥ ( ल )

अन्यतोऽग्रेऽवलोक्य । कथममी चकोराः शकुन्तयः । अहो ! चारुचरितं (व) चित्रमेतेषामन्यविहङ्गमवर्गासाधारणं यत्किल चन्द्रिकाचान्तिचातुर्य्यम् । तान् प्रति ।

अयि पिबत चकोराः ! कृत्स्नमुन्नामिकण्ठ-
क्रमकवलनचञ्चच्चन्द्रकान्तीरमिश्राः ।
विरहविधुरितानां जीवितत्राणहेतो-
र्भवति हरिणलक्ष्मा येन तेजोदरिद्रः ॥ ७५ ॥ (श)

किञ्च रे हतशकुनयः !

---

तादृशी, प्रसूनानां पुष्पाणां गन्धैः आहूताः आकृष्टाः षट्पदानाम् आवलयः यया तथोक्ता कापि लता इयम् । हरितं हरिद्वर्णं नवांशुकं नववसनम् अधो दधाना परिदधाना इत्यर्थः नीलं दुकूलं गुण्ठनम् आच्छादनं यस्यास्तादृशी मैथिली जानकी न । वंशस्थविलं वृत्तम् ।

( व ) चारु मनोज्ञं चरितं यत्र तत् चित्रम् आलेख्यम् । चन्द्रिकायाः चान्तिः पानं तत्र चातुर्यं नैपुण्यम् ।

(श) अयीति । अयि इति । कोमलामन्त्रणे । हे चकोराः ! उन्नामी उन्नतः यः कण्ठक्रमः तेन यत् कवलनं ग्रसनम् तस्मिन् चञ्चन्त्यः राजन्त्यः याश्चन्द्रस्य कान्तयः ताः अमिश्राः पृथक् स्थिताः अपीति अध्याहार्य्यं कृत्स्नं समग्रं पिबत, येन युष्माकं पानेन हरिणलक्ष्मा मृगाङ्कः विरहविधुरितानां वियोगार्त्तानां जीवितत्राणाय तेजोभिः रश्मिभिः दरिद्रः रहितः भवति । मालिनीवृत्तम् ।

चेतोभुवश्चरितविभ्रमसंविधानं
नूनं न गोचरमभूद्दयिताननं वः ।
तत्कान्तिसम्पदमवाप्स्यथ चेच्चकोराः !
पानोत्सवं किमकरिष्यत चन्द्रिकासु ? ॥ ७६ ॥ (च)

प्रविश्य पटाक्षेपेण छिन्ननासा कृतावगुण्ठना शूर्पणखा साक्रन्दं पादयोर्निपत्य । अज्ज ! (स) एक्कमादुक ! पेक्ख तक्खअचूडामणी उप्पाडिदो वडवाणलजालाकलावओ चुल्लिदं दसकण्ठकणिट्ठबहिणीए अच्चाहिदम् (५७) । इति शिर उद्घाट्य दर्शयति ।

रावणः । सक्षोभम् !

---

(५७) आर्य्यैकमातृक ! प्रेक्षस्व तक्षकचूडामणिरुत्पाटितो वडवानलज्वालाकलापकं चूर्णितं दशकण्ठकनिष्ठभगिन्या अत्याहितम् ।

---

(च) चेत इति । चेतोभुवः मनसिजस्य चरितविभ्रमस्य संविधानम् आश्रयभूतं दयितायाः प्रियायाः सीताया आननं वः युष्माकं गोचरं न अभूत् नूनं मन्ये, हे चकोराः ! चेत् यदि तस्याः कान्तिसम्पदं लावण्यमयूखम् अवाप्स्यथ, तदा चन्द्रिकासु किं पानोत्सवम् अकरिष्यत ? नैव अकरिष्यतेत्यर्थः ।

(स) एकमातृक ! एका माता यस्य तत्सम्बोधने सहोदर इत्यर्थः, तक्षकस्य नागपतेः चूडामणिः शिरोरत्नम् उत्पादितः बलादुद्धृतः, वडवानलस्य ज्वालाकलापकं शिखासमूहः चूर्णितः निर्वापित इत्यर्थः । अत्याहितम् अमङ्गलम् । रावणभगिन्याः शूर्पणखाया नासाच्छेदः तक्षकचूडामणिहरणमिव तथा वाडवाग्निशिखानिर्वापणमिवेति भावः ।

पौलोम्याप्यत्र वीरे समरभुवि भयाद्याचिते भर्तृभिक्षां
वैदेह्योदत्तशौर्य्यव्रतमदनजिते यद्यभूमप्यवज्ञा ।
तत्किं कस्यापि तस्य त्वयि विधुरमिदं कुर्वतः कर्म भग्न-
स्वर्गेभोद्दामदानस्रुतिरयमपि मे विस्मृतश्चन्द्रहासः ॥७७॥ (छ)

तद्वत्से । कथय ।

परस्परविघट्टनामुखरदन्तपत्रान्तर-
प्रवृत्तरसनं महाकटकटारवैर्भैरवैः ।
इदं मम महोद्भटं सभयशेषवक्त्रेक्षितं
प्रचण्डकुटिलोत्कटभ्रुकुटि भुग्नभालं मुखम् ॥ ७८ ॥ (च)

---

(छ) पौलोम्येति हे वत्से ! पौलोम्या शच्यापि समरभुवि संग्रामस्थले भयात् भर्त्तृभिक्षां स्वामिप्राणभिक्षां याचिते प्रार्थिते, वैदेह्या सीतया दत्तं शौर्य्यव्रतं पराक्रमः यस्मै तादृशेन मदनेन जिते पराभूते इन्द्रजयिनि किन्तु कामविजिते इत्यर्थः अत्र वीरे मयि यदि अवज्ञा अभूत् इन्द्रविजयी अपि कामजितोऽयं किमस्माकं करिष्यतीत्येवं रूपा अवमानना अभवत् तद् भवतु इति शेषः किन्तु त्वयि इदं विधुरम् अत्याहितं कर्म कुर्वतः कस्यापि तस्य मे मम भग्ना स्वर्गेभस्य ऐरावतस्य उद्दामा उत्कटा दानानां मदजलानां स्रुतिः स्रावः येन तादृशः अयं चन्द्रहासः असिः किं विस्मृतः ? स्रग्धरावृत्तम् ।

(च) परस्परेति । परस्परविघट्टनया अन्योन्यदंशनेन मुखराः सशब्दा दन्ता एव पत्राणि तेषाम् अन्तरे अभ्यन्तरे प्रवृत्ता चलिता रसना जिह्वा यस्य तथोक्तम् । भैरवैः भीषणैः महद्भिः कटकटारवैः महोद्भटं अतिभीषणं सभयैः भययुक्तैः शेषवक्त्रैः अवशिष्टैर्नवभिरित्यर्थः मुखैः ईक्षितं दृष्टम् इदं मम मुखं प्रचण्डा कुटिला उत्कटा भ्रु---

शूर्पणखा। स्वगतम्। रहुउलराअहाणीपरिट्ठिदे रामलक्खणे अहिसारअन्तो अणिच्छन्तेहिं तेहिं बलक्कारक्कमेण एत्थावत्था कइत्ति कधं जेट्ठभादुणो कधइस्सं ता एव्वं दाव। प्रकाशम्। देव! अओज्झाणअरीए रामेत्ति खत्तिअकुमारो अत्थि। (५८)

रावणः। स्वगतम्। अस्ति यः सीतायाः पतिः। प्रकाशम्। किं तस्य।

शूर्पणखा। तस्स भरिआ भुवणेक्कसुन्दरी सीदा णाम(५९)।

रावणः। साकूतमात्मगतम्। त्रिभुवनसुन्दरीति वक्तव्ये भुवनसुन्दरीत्याह। प्रकाशम्। ततः किं तस्याः।

शूर्पणखा। लङ्केस्सरस्स समुचिदत्ति अपहरन्ती तेहिं कवालवट्टजोग्गा कदह्मि (६०)।

रावणः। अये! दाशरथिविनाशाय कारणद्वयी

(५८) रघुकुलराजधानीपरिस्थितौ रामलक्ष्मणावभिसरन्ती अनिच्छद्भ्यां ताभ्यां बलात्कारक्रमेणेदृशावस्था कृतेति कथं ज्येष्ठभ्रातुः कथयिष्यामि तदेवं तावत् देव! अयोध्या नगर्यां राम इति क्षत्रियकुमारोऽस्ति।

(५९) तस्य भार्या भुवनैकसुन्दरी सीता नाम।

(६०) लङ्केश्वरस्य समुचितेति अपहरन्ती ताभ्यां कापालिकव्रतयोग्या कृतास्मि।

---

भ्रुकुटिर्यत्र तथाभूतं तथाभुग्नभालं कुटिलललाटं वर्त्तते इति शेषः। पृथ्वी वृत्तम्।

सम्पन्ना सीता शूर्पणखा च । प्रकाशम् । वत्से ! मा विषीद निर्जित जामदग्न्यशस्त्रव्यापार एवासौ ततश्च ।

त्रुट्यद्दोर्दण्डखण्डोड्डमरपुरुपतत्कण्ठकोष्ठप्रकोष्ठं
स्फारस्फिक्पृष्ठपीठं हठदलितशिराकन्धराकाण्डखण्डम्
सस्तम्भं चत्रडिम्भं चटदितिविचटन्मुण्डपिण्डं प्रचण्ड-
चण्डीशोच्चण्डदंष्ट्राक्रकच इव दृढं चन्द्रहासस्तृणेढु ॥७८॥

इति परिक्रम्य निष्क्रान्त ।

॥ उन्मत्तदशाननो नाम पञ्चमोऽङ्कः ॥

---

(क) त्रुट्यदिति । चण्डीशस्य हरस्य उच्चण्डः उत्कटः दंष्ट्रा एव क्र अस्त्रविशेष इव प्रचण्डः चन्द्रहासः त्रुट्यत् स्खलत् दोर्दण्डखण्डं यस्य तथोक्तः उड्डमरं तीव्रं तथा पुरु भीषणं यथा तथा पतन् कण्ठः को उदरं प्रकोष्ठः कूर्पराधोभागश्च यस्मिन् तत्, तथा हठदलितं सह छिन्नं शिराणां कन्धराकाण्डस्य ग्रीवास्कन्धस्य खण्डं यस्मिन् तत् त चटदिति विचटत् ध्वनत् मुण्डस्य पिण्डं अंशः यस्मिन् तत् यथा ता स्फारं विशालं स्फिक् पृष्ठपीठं यस्य तथाभू॰ सस्तम्भं स्तम्भितं विष दर्शनचर्कमिति यावत् चत्रडिम्भं क्षत्रियशिशुं तं राममिति शेषः तृणे ढिनस्तु स्रग्धरावृत्तम् ।

पञ्चमोऽङ्कः समाप्तः ।

# अथ षष्ठोऽङ्कः।

अतः परं निर्दोषदशरथो भविष्यति ।

ततः प्रविशतः शूर्पणखामायामयौ ।

शूर्पणखा । अज्ज ! अहिसादं तए मादामहस्स (क) त-
क्कालमन्तिदं जधा किल रामे सुबद्धवेरा सुप्पणहा कुल-
उत्तओ माआमओ ता दुवेवि एदे कज्जसिद्धीए कारणेत्ति
णिउत्ता (१) ।

मायामयः । बुद्धिप्रकर्षं प्रति किमुपवर्ण्यते तत्रभवतो
माल्यवतः । किमभीष्टं चन्द्रमसः कुमुद्वतीवल्लभस्येति (ख) ।

नीतितन्त्रे द्वयं दृष्टं सिद्धये कृत्यवस्तुनः ।
समानः कार्य्ययोगश्च प्रभुशक्तिश्च निश्चला ॥ १ ॥ (ग)

तदेहि दशाननमातामहमेवोपतिष्ठावहे ।

---

(१) आर्य ! अभिज्ञातं त्वया मातामहस्य तत्कालमन्त्रितं यथा किल रामे सुबद्धवैरा शूर्पणखा कुलपुत्रको मायमयस्तौ द्वावप्येतौ कार्यसिद्धेः कारणे इति नियुक्तौ ।

---

(क) मातामहस्य माल्यवतः ।

(ख) किमिति । कुमुद्वतीवल्लभस्य चन्द्रमसः किम् अभीष्टं केन वर्ण-यितुं शक्यते इति भावः ।

(ग) नीतीति । कृत्यवस्तुनः कार्य्यरूपस्य विषयस्य सिद्धये सम्पाद-नाय नीतितन्त्रे नीतिशास्त्रे समानः कार्य्ययोगश्च निश्चला प्रभुशक्तिश्च एतद् द्वयं दृष्टं कारणमिति भावः

शूर्पणखा । एवं करस्व (२) । परिक्रम्यावलोकितकेन ।

मायामयः ।

नैऋताधिपकार्य्याणामुपायापायकर्मणि ।
आर्यो यन्माल्यवानास्तेऽव्यस्तलक्षेण चक्षुषा ॥ २ ॥ (घ)

ततः प्रविशति माल्यवान् ।

माल्यवान् । स्मृतिमभिनीय शूर्पणखानिकारदर्शनसमुत्तेजितोऽपि दशकण्ठो रघुराजधानीयात्रातो निवर्त्तितस्तावदिदमुपदिश्य चारकैर्यदुत देवस्य वैदेह्या संदिष्टं यथा । (ङ)

स्वयं मया प्रेमपरीक्षणाय
प्रवर्त्तितः स्वाकृतियन्त्रयोगः ।
अथाहमेवागणितैरहोभि-
र्दशाननान्तं नियतं प्रवत्स्ये ॥ ३ ॥ (च)

(२) एवं कुर्मः ।

(घ) नैर्ऋतेति । यत् यस्मात् आर्य्य. मान्यवर. माल्यवान् नैर्ऋताधिपस्य दशाननस्य कार्य्याणाम् उपायस्य अपायस्य च कर्मणि अनुष्ठाने प्रवृत्ते सतीति शेषः अव्यस्तलक्षेण निश्चलेन इत्यर्थः । चक्षुषा आस्ते तिष्ठति किमपि कार्य्यतत्त्वं चिन्तयतीति भावः ।

(ङ) शूर्पणखेति । शूर्पणखाया निकारस्य अवमाननस्य नासाच्छेदनरूपस्य दर्शनेन समुत्तेजितः संक्रुद्धः रघुराजधान्यामयोध्यायां यात्रातः संग्रामार्थं प्रयाणात् । चारकैः चरैः । सन्दिष्टं वाचिकमुदन्तम् ।

(च) स्वयमिति । मया प्रेमपरीक्षणाय दशाननो मयि कीदृशः

विचिन्त्य ।

इत्थं मिथ्या विप्रलब्धोऽपि देव-
स्त्यक्त्वावेशं सोदरीवैकृतेऽपि ।
जातः सीतासङ्गमायत्तचित्तो
न्यक्कृत्यान्यज्जृम्भते मन्मथाज्ञा ॥ ४ ॥ (क)

कृतिनाटितकेन । न जाने किं वृत्तं वा कैकेयीद
श्योः । उपसर्पितकेन ।

मायामय । जयति जयत्वार्य्यः

शूर्पणखा । जअदु जअदु कणिट्ठमादामहो (२) ।

---

(२) जयतु जयतु कनिष्ठमातामह ।

---

प्रं भवानिति विज्ञानाय स्वयं स्वाकृतियन्त्रयोगः यन्त्ररूपनिजाङ्ग
योगः प्रवर्त्तितः विहितः । अथ इदानीम् अहं अगणितैः
ख्यातैः एव अहोभिः दिनैः अतिशीघ्रमिति यावत् नियतं नि
दशाननस्य अन्तं समीपं समीपे इत्यर्थः प्रवत्स्ये प्रकर्षेण निस्वल
वत्स्यामीत्यर्थः । उपेन्द्रवज्रावृत्तम् ।

(क) इत्थमिति । इत्थम् अनेन प्रकारेण मिथ्या विप्रलब्धः
रितः अपि देवः दशाननः सोदर्य्याः शूर्पणखायाः वैकृते नासाच्छे
विकृतिकरणेऽपि आवेशं क्रोधावेगं त्यक्त्वा सीतायाः सङ्गमे आय
अधीनं चित्तं यस्य तादृशः जातः । तथाहि मन्मथस्य कामस्य आ
आदेशः अन्यत् कार्य्यं न्यक्कृत्य अभिभूय जृम्भते प्रकाशते कार्य्यान्त
प्रबलीभवतीति भावः । अत्र कारणेन कार्य्यसमर्थनरूपोऽर्था
न्यासोऽलङ्कारः । तदुक्तं कश्चित् विशेषः सामान्यात् सामान्यं
विशेषतः । कार्य्यञ्च कारणेनेदं कार्य्येण च समर्थ्यते । साधर्म्येण
वार्थान्तरन्यासोऽष्टधा ततः इति । इन्द्रवज्रावृत्तम् ।

माल्यवान् । अथ तत्र किं वृत्तम् ? ।

मायामयः । यथादिष्टमार्येण ।

माल्यवान् । सहर्षम् तद्विस्तारतः कथ्यताम् ।

मायामयः । अथैकदा दयितस्नेहमय्या तया सममसुरानीकविजयाय पूरितसुहृन्मनोरथे दशरथे त्रिपिष्टपतिलकभूतं पुरुहूतं प्रभाववति समुपस्थितवति तद्रूपधारिणा कुवलयदलाभिरामं रामं सपदि छलयितुमयोध्यां शूर्पणखाऽहं च प्राप्तवन्तौ । विहितजनरञ्जनेन वृन्दारकवन्दिव्यञ्जनेन गीतसंस्तुतसहचरेण निशाचरेण (ज) ।

दैत्यग्रामं रणपरिगमे कुर्वता नामशेषम्
येन न्यस्ता दिशि दिशि यशःकन्दलीनां प्ररोहाः ।
हासज्योत्स्नां सुरपतिवधूवक्त्रचन्द्राय दत्त्वा
सार्धं दारैर्दशरथनृपः स्वां पुरीं सोऽयमेति ॥ ५ ॥ (झ

---

(ज) दयितेति । दयिते स्वामिनि स्नेहमय्या अतिप्रणयिन्या तया कैकेय्या समं सह असुराणां अनीकस्य सैन्यस्य विजयाय पूरितः सम्पादितः सुहृदः देवराजस्य मनोरथः अभिलाषः येन तथाविधे । त्रिपिष्टपस्य त्रिभुवनस्य तिलकभूतं ललाटभूषणस्वरूपं पुरुहूतम् इन्द्रम् । प्रभाववति अतिप्रभावसम्पन्ने । तद्रूपेति तयोः कैकेयीदशरथयोः रूपधरौ । कुवलयदलाभिरामं नीलोत्पलदलश्यामतया अभिरामं मनोहरम् । विहितजनरञ्जनेन कृतलोकप्रीतिना वृन्दारकाणां देवानां वन्दी स्तुतिपाठकः तद्व्यञ्जनेन तद्वेशधारिणा इत्यर्थः । गीतेन स्तुतः सहचरः येन तथाभूतेन निशाचरेण उद्गीतमिति शेषः ।

(झ) दैत्यग्राममिति । येन रणपरिगमे संग्रामव्यापारे दैत्यानां ग्राम समूहं नामशेषं कुर्वता विनाशयता इत्यर्थः सता दिशि दिशि यशः-

माल्यवान् । ततस्ततः ? ।

शूर्पणखा । तदो तस्स वअणप्पसरणमाअण्णिअ सव्वदो वज्जन्तणिरवज्जतुरं गाअन्तगन्धव्वजणघुम्मन्तणटीसत्थं उब्भिज्जन्तविअडद्धअवडाआयुगं णिवज्झन्तचित्तवन्दणमालअं सच्छरत्थाचत्तरचउक्कपइण्णपिट्ठातअचुण्णं तं पुरं सव्वड्ढिअं आसि (४) ।

माल्यवान् । ततस्ततः ? ।

मायामयः । ततश्च यावत मायाकैकेयी शूर्पणखा दशरथो मायामयश्च यथास्थानमपविष्टौ तावत्के

---

(४) ततस्तस्य वचनप्रसरणमाकर्ण्य सर्वतो वाद्यमाननिरवद्यतूर्य गन्धर्वजन घुम्मितनटीसार्थम् उद्भिद्यमानविकटध्वजपताकायुगं निबध्यमानचित्रवन्दनमालकं स्वच्छरथ्याचत्वरचतुष्कप्रकीर्णपिष्टातचूर्णं तत् पुरं सर्वर्द्धिकमासीत् ।

---

कन्दलीनां कीर्त्तिपताकानां प्ररोहा अङ्कुराः न्यस्ता अर्पिता दशरथो नृपः सुरपतेः वध्वाः शच्याः वक्रचन्द्राय मुखचन्द्राय नेत्रोत्सवं दत्त्वा शत्रुविजयेन देवराजमहिलां सन्तोष्य इति दारैः पत्न्या कैकेय्या सार्द्धं सह स्वां पुरीं अयोध्याम् एति आग

(ज) वचनप्रसरणं वाक्यावलीम् । वाद्यत् निरवद्यम् तूर्यं यत्र तत् गायद्भिः गन्धर्वजनैः घुम्मिताः नटीनां न सार्थाः यस्मिन् तथाभूतम् उद्भिद्यमानं उत्थाप्यमानं विकटं ध्वज कायुगं यस्मिन् तथोक्तं तोरणेषु निबध्यमाना चित्रा वन्द यस्मिन् तादृशं तथा स्वच्छेषु परिष्कृतेषु रथ्याचत्वर च प्रकीर्णानि पिष्टातकचूर्णानि यत्र तथाविधम् ।

मायामयः । आर्य्ये ! किमपि द्विषतामुदात्तजनचरित-मावर्जकं (द) पश्य ।

क्रूरक्रमा किमपि राक्षसजातिरेका
तत्रापि कार्य्यपरतेति मयि प्रकर्षः ।
रामेण तु प्रवसता पितुराज्ञयैव
बाष्पाम्बुसामहमपीह कृतो रसज्ञः ॥ ८ ॥ (ध)

अपि च । दशकण्ठमातामह !

अप्युज्झतो निजमहान् सुखसारबन्धून्
कान्तारवासमनसः पितृशासनेन ।
रामस्य सा स्थितवती मुखमेत्य लक्ष्मीः
पद्मस्य या शरदि या च निशाकरस्य ॥ १० ॥ (ण)

(द) द्विषतामपि शत्रूणामपि उदात्तजनानां महात्मनां चरितं आवर्जकं मानकम् आदरीकारकमिति यावत् ।

(ध) क्रूरेति । एका केवला राक्षसजातिः किमपि क्रूरः क्रमः नियमः यस्यास्तादृशी राक्षसजातिरेव तावत् अतिर्य्यदनीयनिष्ठुरप्रकृतिरित्यर्थः । तत्रापि तादृश्यां जातावपि कार्य्यपरता कार्य्येषु इष्टेषु तत्परता प्रयत्न इति हेतोः मयि प्रकर्षः आर्य्यं तत्पर इति मां सर्व्वे प्रशंसन्तीति भावः । रामेण तु पितुराज्ञया आदेशेन एव प्रवसता अरण्यं गच्छता अहमपि तादृशनिष्ठुरस्वभावोऽपीत्यर्थः इह संसारे बाष्पाम्बु-साम् अश्रुजलानां रसस्य आस्वादाभिज्ञः कृतः रामं प्रवसन्तं दृष्ट्वा अहमपि सत्वं प्रारोदिषमिति भावः । वसन्ततिलकं वृत्तम् ।

(न) अपीति । शरदि पद्मस्य या, निशाकरस्य च या लक्ष्मीः, सा सुखसारा बन्धवः येषु तान् निजमहान् उज्झतः त्यजतोऽपि तथा पितृशासनेन पितुराज्ञया कान्तारे दुर्गमे अरण्ये वः आसः तस्मिन्

पूर्णयशाः । तदो अम्हे तं पविसाविअ सअदसरहागम-
णसङ्किणो झडिदि अणुकम्पा भविअ किं हविस्सदित्ति आ-
चिदु तक्खणं तहिं जेव्व ठिदा अह तत्थ मउत्ता पोरलो-
अस्स हलहवुल्लावा (प) जधा केहिं वि किरकेकईदस-
रहरूवधारीहिं छलिदो रामभद्दोत्ति । (७)

माल्यवान् । ततस्ततः ? ।

मायामयः । ततश्च वामदेवप्रभृतिभिर्यथावृत्तमभिधाय
सपदोपग्रहं वारितोऽपि तदिदमभिधाय स्थितः ।

मया मूर्ध्नि प्रह्वे पितुरिति धृतं शासनमिदं
स यक्षो रक्षो वा भवतु भगवान् वा रघुपतिः ।
निवर्त्स्यें सोऽहं भरतक्षतरक्षां निजपुरीं
समाः सम्यक्तीर्त्वा वनभुवि चतस्रश्च दश च ॥ ११ ॥ (फ)

---

(७) ततो वयं तं प्रवास्य सत्वदशरथागमनशङ्किनो झटिति अनुकम्पा भूत्वा किं भविष्यतीति ग्राहं तत् क्षणं तत्रैव स्थिताः । अथ तत्र प्रवृत्ताः पौरजनस्य मन्दोल्लापा यत् काभ्यामपि हतकेकयीदशरथरूपधारिभ्यां छलितो रामभद्र इति ।

---

मनो यस्य ताहशस्य रामस्य शुश्रूषैव प्राय स्थितवती । एताहशावस्थायामपि रामस्य शुश्रूषीर्न मलिनाभीदिति भावः । वसन्ततिलकं वृत्तम् ।

(प) मन्दोल्लापाः मन्दा अल्पाः शनैः शनैः प्रयुक्तत्वादिति भावः उल्लापाः संलापाः ।

(फ) मयेति । मया प्रह्वे नम्रे मूर्ध्नि पितुरिति हेतोः इदं शासनं

कार्यशेषनिष्पत्तये यथोचितं मातामह एव जानातीति । इति निष्क्रान्ताः । विष्कम्भकः ।

ततः प्रविशति मातलिसारथिना रथेन कैकेय्या सह दशरथः ।

दशरथः । आर्य मातले ! कियद्दूरमद्यापि रघुराजधानी ? ।

मातलिः । य एष दृश्यते सरयूसरितः स्रोतसा परिक्षिप्तप्राकारो (ब) धरणितलैकदेशः सा तु इयमयोध्या । रथवेगनाटितकेन ।

कैकेयी । पच्चामि भअवदिं सरऊं जा पुव्वं दीसमाणा अअणपेऊसगण्डूसकवलं (भ) करेन्ती आसि सा संपदं हलाहलकवलपडिरूआ पडिहाअदि किं पुण मे अओज्झादंसणे वि अकारणपज्जाउलं हिअअं ता जदि वच्छाणं

धृतं गृहीतं स पितृरूपधारी यक्षो वा रक्षो राक्षसो वा, भगवान् रघुपतिः पिता वा अथवा रघुवंशपतिः सूर्य्यः वा भवतु इति शेषः स प्राप्तपितृनिदेशः अहं वनभुवि अरण्यस्थले चतस्रः दश च समाः वत्सरान् सम्यक् नीत्वा यापयित्वा भरतेन कृता रक्षा यस्यास्तादृशीं निजपुरीम् अयोध्यां निवर्त्तिष्ये । शिखरिण्योवृत्तम्

(ब) परिक्षिप्तेति । परिक्षिप्तः वेष्टितः प्राकारो वरणः यस्य तथाभूतः प्राकारो वरणः साल इत्यमरः ।

(भ) नयनेति । नयनयोः पीयूषगण्डूषस्य, सुधाम्बुनः कवलं ग्रासम् । हालाहलस्य कालकूटस्य यत् कवलं तत् प्रतिरूपा तदनुकारिणी ।

रामभद्रभरतलक्ष्मणशत्रुघ्नाणां वधूणां च सीतामाण्डवीउ-
र्मिलाश्रुतकीर्त्तीणं दंसणेण णिव्वासइस्सदि (८)।

दशरथः। अयि कैकेयि!।

एतच्छान्तविचित्रचत्वरपथं विश्रान्तवैतालिक-
श्लाघाश्लोकमगुञ्जिमञ्जुमुरजं विध्वस्तगीतध्वनि।
व्यावृत्ताध्ययनं निवृत्तशुकाविक्रीडासमस्यं नम-
न्निद्वाटकयं कथं पुनरिदं मौनव्रतं वर्त्तते॥ १२ ॥ (म)

अवतरणानाटितकेन।

---

(८) प्रणमामि भवतीं सरयू या पूर्वं दृश्यमाना नयनपीयूषगण्डू-
षत्वमलं कुर्वन्ती आसीत् सा साम्प्रतं कालाहलकवलप्रतिरूपा प्रतिभाति।
किं पुनर्मे ऽयोध्यादर्शनेऽपकारपर्याकुलं हृदयं तत् यदि वत्साना रामभ-
द्रभरतलक्ष्मणशत्रुघ्नाना वधूना च सीतामाण्डव्यूर्मिलाश्रुतकीर्तीना दर्श-
नेन निर्वापयिष्यति।

---

(म) एतदिति। एतत् नगरं शान्तानि उत्सवनिवृत्तानि विचि-
त्राणि चत्वरपथानि यस्मिन् तत् तथोक्तं विश्रान्ता. रहिताः वैता-
लिकानां वन्दिनां श्लाघाश्लोका. स्तोत्रालापा. यस्मिन् तत् तथाविधम्,
अगुञ्जिनः नि:शब्दाः मञ्जुमुरजाः मनोज्ञवाद्यभेदाः यत्र तत्।
विध्वस्ता विनष्टा गीतध्वनयः यस्मिन् तथोक्तं व्यावृत्तं निवृत्तम्
अध्ययनं शास्त्रपाठः यत्र तथाभूतं निवृत्ताः शुकवीनां क्रीडासमस्याः
कौतुकप्रश्ना. यत्र तादृशं तथा नमन्ती निवर्त्तमाना विदुषा वादकथा
तर्कवितर्कव्याहारः यत्र तथाभूतम्, अतः इदं किं पुनः मौनव्रते वर्त्तते
तिष्ठति? शार्दूलविक्रीडितं वृत्तम्।

मातलिः । मच्छ महाराज ! सम्भावयस्व (य) सद्मनमह-मपि बिड़ौजसं बिड़ौजसमुपतिष्ठामि इति निष्क्रान्तः ।

परिक्रामितकेन दशरथः । कः कोऽत्र भोः ? ।

नेपथ्ये अयमहं काम्पिल्यः सौविदल्लः ।

दशरथः । आहूय सुमन्त्रवामदेवौ ।

प्रविश्य वामदेवः । स्वस्ति महाराजदशरथाय देव ! सन्निहितोऽत्र सुमन्त्रः ।

दशरथः । अनाकर्णितकेन एतक्क्रान्तम् इत्यादि पुनः पठति ।

वामदेवः । सास्रं स्वगतं च ।

हे महाक्षि ! निजां विमुञ्च वसतिं द्राग्देहि यात्रां बहिः

राजानं प्रति ।

देव ! स्तम्भय चेतनावचनयोरप्येति शुष्काशनिः ।

दम्पती । आकुलं नाटयतः ।

वामदेवः ।

त्वद्भूपाद्विपिनाय चीवरधरो धन्वी जटी शासनं
रामः प्राप्य गतः कुतश्चन वनं सौमित्रिसीतासखः ॥१३॥(र)

---

(य) सम्भावयस्व प्रविश । निबिड़ं दृढ़म् ओजः बलं यस्य तम् ।

(र) हे महाक्षि इति । हे महाक्षि मम सरस्वति ! निजां वसतिं मदास्यमित्यर्थः विमुच्य त्यज, द्राक् झटिति बहिः यात्रां देहि । हे देव ! स्तम्भय आत्मानं स्थिरीकुरुष्व । चेतनावचनयोरपि शुष्काशनिः शुष्कं कठिनम् एति पततीत्यर्थः अथवा चेतनां मम वचनं नाशयतीत्यर्थः । रामः सौमित्रिसीतासखः सीतालक्ष्मणाभ्यां सहेत्यर्थः विपिनाय वनगमनाय चीवरधरः वल्कलधरः धन्वी धनुष्पाणिः जटी जटा-

उभौ मूर्च्छितः।

वामदेवः। देव ! समाश्वसिहि समाश्वसिहि। देवि कैकेयि ! समाश्वसिहि समाश्वसिहि।

दशरथः। केन पुनः कारणेन ?।

वामदेवः। येन केकयकुलस्योपरि दुर्यशःपांशुपातः।

कैकेयी। ण हु जादभरदस्स दुच्चरिदं किंपि अथवा दसरहणरिन्दो से पिदा (९)।

वामदेवः। प्रान्त क्व पुनः सुधादीधिति आतपस्यन्दो। (ख)

दशरथः। स्फुटं कथय पर्य्याकुलोऽस्मि।

वामदेवः। केकयस्य सुतया वरयुग्मं
याचितोऽसि भवता च वितीर्णम्। (ग)

दशरथः। किं तत् ?।

वामदेवः।

यत्किलास्तु भरतो युवराजः

कैकेयी। हा हदम्हि मन्दभाइणी (१०)।

दशरथः। किम् ?।

---

(९) न खलु जातभरतस्य दुश्चरितं किमपि। अथवा दशरथनरेन्द्रोऽस्य पिता।

(१०) हा हतास्मि मन्दभागिनी।

---

यान् यत् स्वरूपात् तरङ्गप्रचारिणः कृतवान् अगात् प्राप्य आशामिति शेषः अर्थ मतः। शार्दूलविक्रीडितं वृत्तम्।

(ख) आतपस्यन्दी सूर्यरश्मिवर्ती।

(ग) वितीर्णं दत्तम्।

वामदेवः ।

स प्रयातु वनमद्य च रामः ॥ १४ ॥

दशरथः । हा हा ! धिक्कष्टम् ।

नरेन्द्रो वृद्धः स्त्रीवश इति मयि न्यस्तमयशो
निषण्णा दौरात्म्येष्विति मलिनिता केकयसुता ।
मतं तस्याप्यस्मिन्निति च भरते लक्ष्म लिखितं
न जाने वा कोऽस्मिन् रघुकुलकलङ्के कविरभूत् ॥१५॥(अ)

क्व पुनस्तौ कैकेयीदशरथौ ?।

वामदेवः । रामभद्रं प्रवास्यापसृतौ ।

कैकेयी । ता किंत्ति ण वारिदो वच्छो मे रामभद्दो।(११)

वामदेवः । निवेदितवृत्तान्तः सपादोपग्रहं वारितोऽपि तदिदमभिधाय स्थितः ।

मया मूर्ध्नि प्रह्वे पितुरिति धृतं शासनमिदं
स यज्ञो रक्षो वा भवतु भगवान् वा रघुपतिः ।
निवर्त्स्यें सोऽहं भरतकृतरक्षां निजपुरीं
समाः सम्यङ्नीत्वा वनभुवि चतस्रश्च दश च ॥ १६ ॥

---

(११) तत् किमिति न वारितो वत्सो मे रामभद्रः ।

---

(अ) नरेन्द्र इति । वृद्धो नरेन्द्रः नरपतिः स्त्रीवश्य इति मयि अयशः न्यस्तम् अर्पितं दौरात्म्येषु दुराचारेषु निषण्णा स्थिता इति केकयसुता मलिनिता कलङ्किता दुराचारिणीति कैकेय्याम् अयशः पातितमिति भावः । तथापि भरतस्य अस्मिन् विषये मतमस्तीति भरते लक्ष्म कलङ्कः लिखितं चित्रितं पातितमित्यर्थः । अस्मिन् रघुकुलकलङ्के कः कविः प्रणेता अभूत् न वा नैव जाने । विचारणीयमिदम् ।

दशरथः । हा हा वत्स रामभद्र ! अति हि नाम असाम्प्रतिकता (घ)यत्रचापि गुरुजनाप्रातिक्रमः ।

कैकेयी । हा ! हदाऽसि तीए दुज्जसदाई सुठ्ठु चउत्थीचन्दो (ङ) दिट्ठोत्ति ।

सकरुणं भअवदि ! रामभद्दसासुए ! सीदाजणणि ! वसुन्धरे ! रक्खं देहि(च)अअं पणइजणो मागादि रहुउलवधूसमागमे पडिक्खिदा ण जीविदुं पारिस्सं । हा जाद भरद ! अलिअदुज्जसकलङ्किदा कधं दे मुहं दंसइस्सं हा ताद ! संभाविदोऽसि दुक्खेण हा अज्ज ! विडम्बिदाऽसि हा कोसल्ले ! खलिदाऽसि हा सुमित्ते ! सरीरमेत्तीकदाऽसि(१२) इति रोदिति ।

---

(१२) हा हतासि त्वया दुर्यशोदायी सुष्ठु चतुर्थीचन्द्रो दृष्ट इति । भगवति ! रामभद्रश्वश्रु ! सीताजननि ! वसुन्धरे ! रक्षां देहि अयं प्रणयिजनो याचते । रघुकुलवधूसमागमे प्रतिक्षिप्ता न जीवितुं पारयिष्ये । हा जात भरत ! अलीकदुर्यशःकलङ्किता कथं ते मुखं दर्शयिष्यामि । हा तात ! सम्भावितोऽसि दुःखेन । हा आर्य ! विडम्बितासि । हा कौसल्ये ! खलितासि । हा सुमित्रे ! शरीरमात्रीकृतासि ।

---

(घ) असाम्प्रतिकता अयौक्तिकता ।

(ङ) चतुर्थीचन्द्रः भाद्रीयचतुर्थ्यामुदितः चन्द्रः नष्टचन्द्र इत्यर्थः ।

(च) रक्षां त्राणम् अवकाशमित्यर्थः । प्रतिक्षिप्ता निरस्ता वञ्चिता इत्यर्थः । सम्भावितः निर्भिन्नः । विडम्बिता प्रतारिता । खलिता विह्वलका । शरीरमात्रीकृता अतिक्लेशिता पुत्रवियोगेनेति भावः ।

ततः प्रविशतः कौशल्यासुमित्रे ।

कौशल्या । सहि सुमित्ते ! अलं संतप्पिदेण संपदं सो आदरामभद्दो दिणणाहस्स उले उप्पस्सो जेण मायागुरुअ-णस्स वि सासणणिव्वाहणेण (घ) बालराहवेण भविअ जरापरिणदराहवाणं पच्छाकदं चरिदम् ।(१३)

सुमित्ता । अइ (ङ) अलिकावट्ठमहसुत्थिदे ! किदं वाआवित्थ-रेण एहि पढमपलत्तदूसहमहादुक्खं महाराअं संभावेम्ह (१४) इति परिक्रामतः ।

दशरथः । अवस्थोचितं परिक्रम्य । अयि हृदय ! (च) साअ-विलाअं विलीयस्व कौशल्यासुमित्रे दृश्येते ।

---

(१३) सखि सुमित्रे ! अलं सन्तापितेन साम्प्रतं स जातरामभद्रो दिननाथस्य कुले उत्पन्नो येन मायागुरुजनस्यापि शासननिर्वाहणेन बाल-राघवेण भूत्वा जरापरिणतराघवाणां पश्चात् कृतं चरितम् ।

(१४) अयि ! अलीकावष्टम्भसुस्थिते ! कृतं वाचा विस्तरेण । एहि प्रथमपतद्दुःसहमहादुःखं महाराजं सम्भावयामः ।

---

( घ ) शासननिर्वाहणेन आज्ञाप्रतिपालना ।

( ङ ) अलीकेति । अलीकेन मृषा अवष्टम्भेन धैर्य्येण सुस्थिते सुखिनि ! । प्रथमेति प्रथमं पतद् दुःसहं महादुःखं यस्य तादृशम् । सम्भावयामः सान्त्वयामः ।

( च ) साक्षेति । अक्षाणि इन्द्रियाणि तैः सह साक्षं तत् यथा तथा विलीय साक्षविलायम् आभक्ष्ण्ये णमुल्प्रत्ययः । इन्द्रियैः सह इत्यर्थः विलीयस्व विनश्य । यतः कौशल्यासुमित्रे दृश्येते । कथं कौश-ल्यायाः सुमित्रायाश्च मुखं द्रक्ष्यामीति भावः ।

कैकेयी। सम्मुखमुत्थाय। अइ हिअअणिहिददूसहदुःख-सल्ले कोसल्ले ! अइ (ग)रामाणुसरणसलक्खणलक्खणपवित्ते सुमित्ते ! एसा रामणिव्वासिणी भरददुज्जससंपादिणी केकेई सीददु (१५) इति सर्वा रुदन्ति।

दशरथः। सखे वामदेव ! अथ तदाकर्ण्य किमभिहितं वत्सलक्ष्मणेन ?।

वामदेवः। (घ) हृदयकरीषङ्कषं कथमपि लक्ष्मणवचनं देवादेश इति निवेद्यते।

तातः प्रेम यतः करोत्यनुचितं त्याज्यः स पूज्योऽपि सन् (ङ)
कैकेय्याः कुचरित्रमित्यमथ चेत्तत्रास्मि व्युत्क्रमः।
आर्यश्चेद्भरतो विकर्त्तनकुले कर्त्तुं कलङ्कं स्थितो
गुञ्जज्ज्यामुखरं धनुर्ननु मयाप्यत्रैव सम्भाव्यते ॥ १७ ॥

(१५) अयि हृदयनिहितदुःसहदुःखशल्ये कौशल्ये !। अयि रामानुसरणसलक्षणलक्ष्मणपवित्रे सुमित्रे ! एषा रामनिर्वासिनी भरतदुर्यशःसम्पादिनी कैकेयी सीदतु।

---

(ग) रामेति। रामस्य अनुसरणेन अनुगमनेन सलक्षणः सुलक्षणसम्पन्नः यः लक्ष्मणः तेन प्रसूतेनेति भावः पवित्रे विशुद्धे। सीदतु क्लेशं प्राप्नोतु।

(घ) हृदयेति। हृदयमेव करीषं शुष्कगोमयं कषति दहतीति तादृशम्। देवस्य आदेशः प्रशस्तरूपा आज्ञा इति हेमः।

(ङ) तात इति। तातः पिता यतः यस्मात् अनुचितं गर्हितं प्रेम प्रणयं कैकेय्यामिति शेषः करोति, अतः सः पूज्योऽपि सन् त्याज्यः। कैकेय्याः इत्थं कुचरितम्।

ऊर्मिला। किं पुण अविदिदवुत्तन्तो मायामअसुप्पणहाणं वच्छलक्खणो (१६)

दशरथः। रामभद्रेण किं प्रतिपन्नम्।

वामदेवः। इदं कथ्यते।

तातादेशात् कियदिदमहो! यद्वनान्ते निवासो
यस्मिन् सेव्याः प्रशमनिधयो धाम निःश्रेयसानाम्।
अप्येकाकी किमु पितृगिरा गाढ़गूढ़ाचलेन्द्रै-
र्बद्धा सेतुं लवणजलधौ हेलया सञ्चरामि॥ १८ ॥(च)

दशरथः। प्रकृतिसुकुमारया तु जानक्या किमभिहितम्?

वामदेवः। वत्से जानकि! (छ) पितृश्वशुरसम्पादितस्वस्थ-

---

(१६) किं पुनरविदितवृत्तान्तो मायामयशूर्पणखानां वत्सलक्ष्मणः।

---

(च) तातादेशादिति। तातस्य पितुरादेशात् इदं कियत्, यत् वनान्ते निवासः, पितुरादेशेन वननिवासः अतितुच्छ इति भावः यस्मिन् वनान्ते निःश्रेयसानां शुभानां धाम निकेतनं प्रशमनिधयः शमैकधना मुनय इत्यर्थः सेव्याः। एकाकी अपि विना पितुराज्ञामिति भावः पितृगिरा पितुर्वचसा किं वक्तव्यं गाढ़गूढ़ाचलेन्द्रैः गाढ़ं सुदृढं यथा तथा गूढ़ैः व्यापितैः अचलेन्द्रैः पर्वतश्रेष्ठैः लवणजलधौ सेतुं बद्धा हेलया अवलीलया सञ्चरामि भ्रमामि। मन्दाक्रान्तावृत्तम्।

(छ) पित्रिति। पित्रा जनकेन श्वशुरेण च सम्पादिता स्वस्था प्रकृतस्वभाविनी स्थितिः यस्याः तथाभूता। गर्भभरोभिः अन्तःपुरचारीभिः। उभयकुलक्रमेण पितृश्वशुरोभयकुलक्रमेण मङ्गलरिश्चाभिः आनि-नाय्यागिः नारीभिरित्यर्थः। लज्जावशोभात् शोकजनितवाष्पेणेति भावः।

क्षितिरिवसैव त्वं रामभद्रागमनं प्रतिपालय अशौरी-भिर्भवादृशीभिर्दुरतिक्रमणीया विन्ध्यमहीधरभुव इत्युक्त्वा क्रममहत्तरिकाभिरभिहिता यदुत्सवती सीता तदिह पत्रिकायामास्ते सा दृश्यतां कण्ठाकरोधात्वाचनीयान्य-क्षराणि इति पत्रिकां क्षिपति ।

ऊर्मिला । गृहीत्वा वाचयति ।

किं तादेण णरिन्दसेहरसिहालीढग्गपादेण मे ?
किं वा मे ससुरेण वासवसहासींहासणद्धासिणा ? ।
उद्देसा गिरिणो ण ते वणमही सा णेव मे वल्लहा
कोसल्लातणअस्स जत्थ चलणे वन्दामि णन्दामि अ (१७) ॥ (ज)

कौशल्या । सास्रम् आत्मगतम् ।

रामे वणाअ चलिदे पिदुसासणेण
तं लक्खणे अणुगदे सह जाअईए ।

---

(१७) किं तातेन नरेन्द्रशेखरशिखालीढाग्रपादेन मे ?
किं वा मे श्वशुरेण वासवसभासिंहासनाध्यासिना ? ।
उद्देशा गिरयश्च ते वनमही सा चैव मे वल्लभा
कौशल्यातनयस्य यत्र चरणौ वन्दे च नन्दामि च ।

---

(ज) किमिति । नरेन्द्राणां राज्ञां शेखरशिखाभिः आलीढं स्पृष्टम् अग्रपादं पादाग्रं यस्य तथाभूतेन तातेन पित्रा मे किम् ? । वासवस्य इन्द्रस्य सभायां यत् सिंहासनं तदध्यासिना इन्द्रेण सह एकासनोपविष्टेन इत्यर्थः मे श्वशुरेण वा किम् ? यत्र स्थिताहं कौशल्यातनयस्य रामस्य चरणौ वन्दे च नन्दामि हृष्यामि च इह इति शेषः ते गिरयः उद्देशाः प्रदेशाः, सा च वनमही अरण्यभूमिः मे मम वल्लभाः प्रियाः ।

आणन्दबाहसमए विहुरामुपूर-
भुम्भन्तएहिं णअणेहिं विडम्बिदह्मि (१८) ॥ २० ॥ (भ)

विचिन्त्य सकरुणप्रमोदम् ।

किं अस्सेण सुदेण णाम जणणीतारुण्णणिव्वासिणा ?
एक्कं मस्सध जादमत्थ विमले रामं रहूण कुले ।
रज्जं वज्जिअ तादसासणपरो को पत्थिदो काणणं
किं वुड्ढेण वि राहवेण चरिदं एदं किदं केणवि ? (१९) ॥ (ञ)

---

(१८) रामे वनाय चलिते पितृशासनेन
तं लक्ष्मणोऽनुगते सह जानक्या ।
आनन्दबाष्पसमये विधुराम्बुपूर-
मुज्भद्भ्यां नयनाभ्यां विडम्बितास्मि ।

(१९) किमन्येन सुतेन नाम जननीतारुण्यनिर्वासिना ?
एकं मन्यध्वं जातमत्र विमले रामं रघूणां कुले ।
राज्यं वर्जयित्वा तातशासनपरः कः प्रस्थितः काननं
किं वृद्धेनापि राघवेण चरितमिदं कृतं केनापि ? ॥

---

(भ) रामे इति । आनन्दबाष्पसमये पितृशासनप्रतिपालनात् राम-
स्येति भावः । विधुरं कातरतान्यञ्जकम् अम्बुपूरम् उज्भद्भ्यां त्यज-
द्भ्याम् । विडम्बिता प्रतारिता वञ्चिता इत्यर्थः ।

(ञ) किमिति । अन्येन जननीतारुण्यनिर्वासिना मातृयौवनविना-
शिना पुत्रेण इत्यर्थः पुत्रप्रसवेन मातुर्यौवनापगमादिति भावः ।
सुतेन किं प्रयोजनमिति शेषः ? न किमपि प्रयोजनमित्यर्थः अत्र
विमले निर्मले रघूणां कुले एकं केवलं जातं रामं मन्यध्वम् । कः अपरः
रामादन्य इत्यर्थः तातस्य शासनपरः आज्ञावर्ती सन् राज्यं वर्जयित्वा
काननं प्रस्थितः ? न कोऽपीत्यर्थः । किं केनापि वृद्धेन राघवेण रघु-
वंश्येन इदं चरितं कृतं ? न केनापीत्यर्थः ।

दशरथः । क्व पुनस्तापसगृहस्थवेषयोर्विनिमयः कृतो वत्सेन ।

वामदेवः ।

छिन्ना दाम जटाकृतास्तव सुतस्यास्मिन् घनाः कुन्तलाः (ट)

दशरथः । हंहो हृदय ! किमद्यापि श्रोथसि ।

वामदेवः ।

छिन्नं चात्र दुकूलमत्र वसितं रामेण तद्वल्कलम् । (ठ)

कैकेयी । एस पोम्मराअमणिणो कंचणबन्धविद्धंसणेण वारिआक्खेवणपरिक्खेवो (२०) (ड) ।

वामदेवः ।

भ्रातुस्त्वीकृतमत्र चानुविहितं सौमित्रिणाऽपि व्रतं (ढ)

दशरथः । वत्स लक्ष्मण ! त्वच्चरितेनामुना विषीदति प्रसीदति च मे मनः ।

---

(२०) एष पद्मरागमणेः काञ्चनबन्धविध्वंसनेन वारिजाक्षेपणपरिक्षेपः ।

(ट) छिन्नेति । अस्मिन् प्रदेशे तव सुतस्य रामस्य कर्त्तरि षष्ठी-प्रयोगः । दाम मालां छित्त्वा त्यक्त्वा घनाः निविडाः कुन्तलाः केशाः जटाः कृताः ।

(ठ) छिन्नेति । अत्र च प्रदेशे दुकूलं वसनं छित्त्वा विहाय रामेण तत् वल्कलं चीरं वसितं परिहितम् ।

(ड) काञ्चनबन्धनस्य स्वर्णवेष्टनस्य विध्वंसनेन परित्यागेन वारिजं पद्मकम् एव आक्षेपणम् आभरणं तस्मिन् परिक्षेप निक्षेपः रत्नार्पितमिति यावत् ।

(ढ) भ्रात्रिति । अत्र च सौमित्रिणा सुमित्रानन्दनेन लक्ष्मणेनापि भ्रात्रा रामेण स्वीकृतम् अवलम्बितं व्रतं चीरधारणादिकम् अनुविहितं कृतम् ।

वामदेवः ।

भर्तुः स्वानुगताविह क्षितिभुवा श्वश्रूजनो वन्दितः ॥२२॥ (ण)

कैकेयी । सासूणं परं अहं मन्दभाइणी जा (त)पवसन्त-रामभद्दवहूपादवन्दणेण वञ्चिदा (२१) ।

वामदेवः । इयमपरा विषादहर्षयोरुत्कर्षसीमा ।

याः स्नेहाज्जनकेन वेणिरचनां नीताः स्वयं विभ्रमात् (थ)
मैत्रेय्या परिचुम्बिताः प्रणमने या याज्ञवल्क्येन च ।

कैकेयी । सोत्कम्पम् । ता किं ताणम् (२२) ।

वामदेवः ।

ता सीताप्यतिकान्तकुन्तलसटाः कर्त्तुं जटाः प्रस्तुता ।
पादौ मूर्ध्नि निधाय संभ्रमवशात् सौमित्रिणाऽस्मिन् धृताः॥२३

(२१) श्वश्रूणां परमहं मन्दभागिनी या प्रवसद्रामभद्रवधूपादवन्दनेन वञ्चिता ।

(२२) तत् किं तासाम् ।

(ण) भर्तुरिति । इह च क्षितिभुवा जानक्या भर्तुः स्वामिनः अनुगतौ अनुगमनार्थं श्वश्रूजनः कौशल्यादिः वन्दितः ।

(त) परं केवलं प्रवसन्त्या प्रवासं गच्छन्त्या रामभद्रवध्वा सीतया पादवन्दनेन वञ्चिता पादावनभिवन्द्य मम परित्यागादिति भावः ।

(थ) या इति । जनकेन स्नेहात् स्वयं न तु अपरकर्त्तृकत्वेन विभ्रमात् भङ्गिक्रमेण याः वेणिरचनां नीताः प्रापिताः, याः मैत्रेय्या याज्ञवल्क्यपत्न्या याज्ञवल्क्येन च प्रणमने प्रणामकरणे पादयोः पतनकाले इति शेषः परिचुम्बिताः, सीतापि ताः अतिकान्तकुन्तलसटाः अतिमनोहरकेशकलापाः जटाः कर्त्तुं प्रस्तुता प्रवृत्ता । अस्मिन् प्रदेशे सौमित्रिणा

कैकेयी । अम्मो ! पच्चुज्जीविदम्हि अज्ज वामदेव ! वक्कल-णिवसणपसारिदहत्थे (द) रामभद्दे वच्छाए किं पडिवण्ण-म्हि (२३) ।

वामदेवः । देवि ! जनकजाता यत् प्रतिपद्यते । पश्य ।

सीताप्युपाहिततनुत्वचि रामभद्रे
वल्कांशुकं हृदयसीम्नि समर्पयन्ती ।
कौशल्यया चरणयोः प्रणिपत्य शीघ्र-
माघ्राय मूर्ध्नि विहता शपथैस्तैस्तैः ॥ २४ ॥ (ध)

दशरथः । रामजननि ! महदुपकृतं(न)यद्द्विधा भवदा-रितं हृदयं दशरथस्य ।

(२३) अहो ! प्रत्युज्जीविताऽस्मि आर्य वामदेव ! वल्कलनिवसनप्रसा-रितहस्ते रामभद्रे वत्सा किं प्रतिपन्नासीत् ।

याहो मैथिल्या इति शेषः मूर्ध्नि निधाय सम्भ्रमवशात् आवेगात् धृताः जटाः कर्तुं न दत्ता इति भावः शार्दूलविक्रीडितं वृत्तम् ।

(द) वल्कलेति । वल्कलस्य निवेशनाय परिधानाय प्रसारितः हस्तः येन तथाभूते । प्रतिपन्नं विहितम् ।

(ध) सीतेति । सीतापि रामभद्रे उपाहिता परिहिता तनुत्वक् वल्कलं येन तथाभूते सति हृदयसीम्नि हृत्प्रदेशे वल्कांशुकं वल्कलवसनं समर्पयन्ती कौशल्यया शीघ्रं सत्वरं चरणयोः प्रणिपत्य मूर्ध्नि आघ्राय तैस्तैः शपथैः यदि त्वं वल्कलं धारयेः, तदा मद्वधपातकिनी भवितासि इत्यादिरूपैः दिव्यैः विहता निवर्त्तिता । वसन्ततिलकं वृत्तम् ।

(न) द्विधा भवत् द्विखण्डं भवत् ।

वामदेवः। किं नाम वारितं इदमत्रापि बहु श्रोतव्यमस्ति। पश्य।

दयितमनुसरन्तीं मैथिलीमीक्षमाणा
स्वहितमनुयियासुर्जानकी सा कनिष्ठा।
गुरुगुरुजनलज्जानम्रवक्त्राम्बुजेन
भ्रुकुटिपुटनिबन्धाद्वारिता लक्ष्मणेन ॥ २५ ॥(प)

दशरथः। किमुच्यते सच्चरितेषु रामभद्रस्यान्तेवासी लक्ष्मणः। ततस्ततः?।

वामदेवः।

निष्कर्णिकाऽस्तवलयोज्झितहारयष्टि-
र्निर्नूपुराप्यपहृताङ्गदमेखला च।
त्वत्कः प्रसाद इति केवलमेव वेणौ
चूडामणिं निदधती चलिता वधूस्ते ॥ २६ ॥ (फ)

---

(प) दयितमिति। दयितं प्रियम् अनुसरन्तीम् अनुगच्छन्तीम् मैथिलीम् ईक्षमाणा पश्यन्ती सा कनिष्ठा जानकी जनकदुहिता ऊर्मिलेत्यर्थः स्वहितं स्वामिनं लक्ष्मणम् अनुयियासुः अनुजिगमिषुः। लक्ष्मणेन गुर्वी या गुरुजनेषु लज्जा तया नम्रं वक्त्राम्बुजं वदनकमलं यस्य तादृशेन सता भ्रुकुटिप्रतिबन्धात् तु भ्रूभङ्गिप्रदर्शनेनेत्यर्थः वारिता निवर्त्तिता। मालिनीवृत्तम्।

(फ) निष्कर्णिकेति। ते तव वधूः सीता निष्कर्णिका कर्णभूषणरहिता, अस्तवलया त्यक्तवलयभूषणा, उज्झिता त्यक्ता हारयष्टिर्यया तादृशी, निर्नूपुरा मञ्जीररहीना, अपहृते परित्यक्ते अङ्गदमेखले केयूरकाञ्च्यौ यया तथाभूता च सती केवले च त्वत्कः त्वदीयः प्रसा-

भरत ।

स्मर्तव्यासि चिरं चकोरदयिते ! दात्यूहि ! तुभ्यं नमः

दृष्टस्त्वं शितिकण्ठ ! संहर गिरो गच्छाम्यहं सारिके ! ।

हे लीलाशुक ! विस्मरिष्यसि न मामित्येकमत्यादरा-

दित्यामन्त्र्य तया विलासवयसां खिन्ने वयं रोदिताः॥२७ (य)

कैकेयी । पिअकेलिसउन्ता ज्जेव्व मे वच्छा (२४) । (र)

वामदेवः ।

केलीहंसो गतिमनुसरन् कारितः पञ्जरे यत्

पश्चाद्गत्वा प्रमदहरिणी वारिता यत् सखीभिः ।

यद्वैदेह्या गृहशुकगिरो नादृतास्तु व्रजन्त्या

तत्किं मास्यां पुरि न कदितं मोदितः साधुवादः ॥२८। (ल)

---

(२४) प्रियकेलिशकुन्तैव मे वत्सा ।

---

रेण दत्त इत्यर्थः प्रसादः पारितोषिकमिति हेतोः वेणौ चूडामणिं निदधती धारयन्ती चलिता प्रस्थिता ।

(य) स्मर्तव्येति । हे चकोरदयिते चकोरि ! चिरं स्मर्तव्या असि मयेति शेषः अहं त्वां चिरं स्मरिष्यामीत्यर्थः । हे दात्यूहि ! तुभ्यं नमः, हे शितिकण्ठ मयूर ! त्वं दृष्टः मयेति शेषः, गिरः वाचः संहर मा आलप इत्यर्थः । हे सारिके ! अहं गच्छामि, हे लीलाशुक ! मां न विस्मरिष्यसि इति इत्थम् अत्यादरात् विलासवयसां क्रीड़ापक्षिणाम् एकैकम् आमन्त्र्य सम्भाष्य तया सीतया खिन्ने सर्वे वयं रोदिताः । गाढ़ं विक्रोशितं इत्यम् ।

(र) प्रियेति । प्रियाः केलिशकुन्ताः क्रीड़ापक्षिणः यस्याः तथोक्ता ।

(ल) केलीति । व्रजन्त्या कानननुसरन्त्या वैदेह्या गतिमनुसरन्

विचिन्त्य । देव ! अयमपरः चते चारावसेको (य) यदिद-मपि राजपुत्रीवचनं निवेद्यते ।

तुभ्यं स्वस्ति विलासवापि ! भवतीं प्रेचे पुनर्दर्शनं (र)
क्रीडाक्रीड ! विमुच्यसेऽद्य कथितं हे केलिदोले ! तव ।
वासागार ! नमोऽस्तु ते गुणनिकाः ! सर्वाः सुखं स्थीयताम्
एषा वः परिचारिका वनभुवं रामानुगा गच्छति ॥२८॥

दशरथः । हा रघुकुलचन्द्र ! रामचन्द्र ! कोऽयं दिलीपकुले चरितविपर्यासः (ल) ।

वृद्धो दशरथः सोऽयमुपास्ते गृहमेधिताम् ।

---

केलीहंसः क्रीडामरालः यत् पञ्जरे कारितः स्थापित इत्यर्थः, पश्चात् नम्ना अनुसरन्ती प्रमदहरिणी प्रमत्तहरिणी सखीभिः यत् वारिता निर्भर्त्सिता, यच्च गृहशुकस्य गिरः वाचः न आहृताः, तत् तस्मात् अस्याः परि केन जनेन न रुदितम् ? केन वा साधुवादः न उदितः उच्चारितः ? । मन्दाक्रान्तावृत्तम् ।

(य) चारावसेकः चारस्य अवसेकः अर्पणम् ।

(र) तुभ्यमिति । हे विलासवापि ! क्रीडासरसि ! तुभ्यं स्वस्ति शुभमस्तु इति शेषः, भवतीं त्वां पुनर्दर्शनं पुनर्दृष्ट्वेत्यर्थः प्रेचे सम्भावये इत्यर्थः । हे क्रीडाक्रीड़ ! लीलोद्यान ! अद्य त्वं विमुच्यसे मयेति शेषः । हे केलिदोले ! तव कथितं त्वया सह सम्भाषितम् । हे वासागार ! वासभवन ! ते तुभ्यं नमः अस्तु, हे सर्वाः गुणनिकाः ! पुनः-पुनरुक्ताः भक्तोलिनिकेतनानि इत्यर्थः सुखं स्थीयताम् एषा वः युष्माकं परिचारिका सेविका रामानुगा राममनुगच्छन्ती वनभुवं गच्छति । शार्दूलविक्रीडितं वृत्तम् ।

(ल) चरितविपर्यासः चारित्रवैपरीत्यम् ।

त्वया तु क्षीरकण्ठेन वनवासो निषेव्यते ॥ ३० ॥ (व)

वामदेवः। सखे! भूकाश्यप! रामभद्रप्रवसनव्यसने (श)

तु पौराणां कथं कथ्यतां विक्लवता।

गाढोरःस्थलताडनत्रुटिच्युतैर्हारावलीमौक्तिकैः

सन्दिग्धीकृतबाष्पविन्दुरुदितं पौराङ्गनाभिस्तथा।

आमूलश्लथपक्षतिस्थितिनतग्रीवाग्रतुण्डं यथा

वीथीपञ्जरवर्त्तिभिः शुककुलैरप्युत्कमुत्कूजितम् ॥ ३१ ॥ (ष)

दशरथः।

हे प्राणाः! स गतो रामस्तदनु व्रजत द्रुतम्।

जरसा जर्जरैरङ्गैः शक्तिर्दशरथस्य का? ॥ ३२ ॥ (स)

---

(व) वृद्ध इति। सोऽयं वृद्धो दशरथः गृहमेधितां गार्हस्थ्यम् उपास्ते सेवते, क्षीरकण्ठेन दुग्धपोष्येण तु त्वया वनवासः निषेव्यते आश्रीयते।

(श) रामेति। रामभद्रस्य प्रवसनम् अरण्यगमनमेव व्यसनं विपद् तस्मिन् विक्लवता व्याकुलता।

(ष) (३१) गाढ़ेति। पौराङ्गनाभिः पुरवासिनीभिः नारीभिः गाढ़ं दृढ़ं यत् उरःस्थलेषु ताडनम् आघातः तेन या त्रुटिः छेदः तया च्युतैः पतितैः हारावलीनां मौक्तिकैः सन्दिग्धीकृता संशयिता बाष्पविन्दवः यस्मिन् तत् यथा तथा, तथा रुदितं, यथा वीथीपञ्जरवर्त्तिभिः रथ्या-पञ्जरस्थितैः शुककुलैरपि आमूलात् श्लथा या पक्षत्योः स्थितिः तथा नतं ग्रीवाग्रेषु तुण्डं यस्मिन् तत् यथा तथा उत्कम् उत्कण्ठितञ्च यथा तथा उत्कूजितं रुदितमित्यर्थः। शार्दूलविक्रीडितं वृत्तम्।

(स) हे प्राणा इति। हे प्राणाः! स रामः गतः, तदनु तत् पश्चात् द्रुतं व्रजत गच्छत। जरसा वार्द्धक्येन जर्जरैः अङ्गैः दश-रथस्य का शक्तिः? युष्माकं रक्षणे इति भावः।

चन्द्रातपमभिनीय । अयि रामजननि कौशल्ये !
शशिकान्तः कथं ग्रावा भजते वह्निरत्नताम् ? ।
रामस्तु चन्दनं भूत्वा जातो मे दावपावकः ॥३३॥ (ङ)

वामदेवं प्रति । सखे ! ततस्ततः ? ।

वामदेवः । ततश्च कृतानुगमनाग्रहग्रन्थिमपि भरतं निजपादुकाराधनाय नन्दिग्रामे निवेश्य पितृरक्षितराज्यरक्षणे शत्रुघ्नं स्वशपथैः संस्थाप्य मां च तच्चिन्तने नियुज्य सुमन्त्रमात्रपरिकरः प्रस्थितस्ते पुत्रः (च) ।

ततः प्रविशति सुमन्त्रः ।

सुमन्त्रः । आर्यावर्त्तमतिक्रम्य दक्षिणां दिशं प्रवसता कुमाररामभद्रेण निवर्त्तितोऽस्मि द्राघीयसीं च तीर्थयात्रां कृत्वा पुनरयोध्यां प्राप्तस्तन्न जाने महाराजदशरथः स्वर्गनगरीतो निवर्त्तितो न वेति । राजप्रवेशितनाटितकमवलोक्य । कथमागत एव भगवतो मघोनः सखा ? उपसृत्य । स्वस्ति महाराजदशरथाय देव ! सुमन्त्रसञ्चारिताचरो दुस्तरकान्तारपथिको रामभद्रोऽभिवादयते (छ) ।

---

(ङ) शशीति । शशिकान्तः चन्द्रकान्तः ग्रावा मणिः कथं वह्निरत्नतां सूर्यकान्ततां भजते ? रामस्तु चन्दनं भूत्वा मे मम दावपावकः दावानलः जातः ।

(च) कृतेति । कृतः अनुगमने आग्रहग्रन्थिः यत्नातिशयः येन तादृशम् । पितृरक्षितस्य राज्यस्य रक्षणकर्मणे रक्षाकार्ये । सुमन्त्रमात्रपरिकरः सुमन्त्रमात्रसहचरः ।

(छ) आर्यावर्त्तमिति । आर्या यत्र आवर्त्तन्ते वसन्तीति आ-

दशरथः । सवाष्पस्तम्भम् । पूर्णवनवासव्रतो भवतु मे वत्सः (ख) ।

राघवः ! अपि कुशलं तस्य सकलत्रस्य रामभद्रस्य लक्ष्मणस्य च ? (२५) ।

सुमन्त्रः । कथं न नाम कुशलं येषां चरितानि जनानामाशिषो भवन्ति (ग) ।

दशरथः । सखे सुमन्त्र ! निवेदय वैदेहिकत्वं गर्भरूपाणाम् ।

सुमन्त्रः । देव ! रघुराजधानीत इदं निवेद्यते ।

सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी
गत्वा जवात्त्रिचतुराणि पदानि सीता ।
गन्तव्यमस्ति कियदित्यसकृद् ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम् ॥ २४ ॥ (घ)

---

(२५) अपि कुशलं तस्य सकलत्रस्य रामभद्रस्य सलक्ष्मणस्य च ? ।

---

यार्यावर्त्तः विन्ध्यहिमाचलयोरन्तरवर्त्ती भूभागः आर्य्यावर्त्तः पुण्यभूमिर्मध्यं विन्ध्यहिमागयोरित्यमरः । द्राघीयसीम् अतिदीर्घां बहुदूरवर्त्तिनीमित्यर्थः । मघोनः इन्द्रस्य । सुमन्त्रे मन्त्रारितानि प्रेषितानि रूपाणि वाचिकवचांसि येन तथोक्तः ।

(ख) पूर्णेति । पूर्णं वनवासव्रतं यस्य तादृशः ।

(ग) आशिषः शुभसाधनानि । वैदेहिकत्वं प्रवासित्वं गर्भरूपाणां पुत्राणाम् ।

(घ) सद्य इति । शिरीषमृद्वी शिरीषकुसुमकोमला सीता पुरी-

राघवः । हा कष्टम् । वच्छे ! जाणइ ! लीलाभवणमणिकु-ट्टिमकेलिपरिक्कमणदुल्ललिआ (ङ) भविअ पामरीजणजोग्गे णिवडिदासि (२६) ।

दशरथः । अहह ! निष्करुणो विधिः । मालतीमुकुलैर्मं-कूलं कल्पयति । ततस्ततः ? ।

सुमन्त्रः । पुरोपरिसरत्यागे तु ।

रूढोलपस्तृतवतीषु वसुन्धरासु
दाक्षिण्यतः प्रचलितामवलोक्य सीताम् ।
रामाश्रयेऽपि परिपन्थिनि यत्तदुक्त्या
सौमित्रिणाऽर्द्धपथ एव कृतो निवासः ॥ ३५ ॥ (च)

---

(२६) वत्से जानकि ! लीलाभवनमणिकुट्टिमकेलिपरिक्रमणदुर्ललिता भूत्वा पामरीजनयोग्ये निपतितासि ।

---

परिसरे नगरीविभागेऽपि जवात् वेगात् त्रिचतुराणि पदानि गत्वा गन्तव्यं कियदस्तीति असकृत् पुनःपुनः ब्रुवाणा वदन्ती सती रामस्य अश्रुणः बाष्पसलिलस्य प्रथमावतारं प्रथमं पातं कृतवती । वसन्ततिलकं वृत्तम् ।

(ङ) लीलेति । लीलाभवनेषु क्रीडाग्टहेषु ये मणिकुट्टिमाः रत्नमयाभ्यन्तरभूमयः तेषु केलिपरिक्रमणे सविलासचङ्क्रमणे दुर्ललिता कादरवती कृताभ्यासा इत्यर्थः । पामरीजनानां नीचमहिलानां योग्ये प्रदेशे इति शेषः ।

(च) रूढेति । रूढैः जातैः उलपैस्तृणविशेषैः स्तृतम् आच्छादनं विद्यते यासां तादृशीषु वसुन्धरासु वनभूमिषु इत्यर्थः दाक्षिण्यतः

कैकेयी । सोम्ममुह जाद लक्खण ! अवसरमन्तणअ ! किं भणामि (छ) (२७) ।

सुमन्त्रः । तत्र च कुशशयने निशामतिवाह्य प्रत्यूष एव पुनः प्रवृत्ता गन्तुं तत्र च ।

मसृणचरणपातं गम्यतां भूः सदर्भा
विरचय सिचयान्तं मूर्ध्नि घर्मः कठोरः ।
तदिति जनकपुत्री लोचनैरश्रुगर्भैः
पथि पथिकवधूभिर्वीक्षिता शिक्षिता च ॥ २६ ॥ (ज)

कतितिथेऽपि च प्रयाणे भागीरथ्याः परं पारं निश्चित्य प्रचलिताः । सन्तताध्वपरिश्रान्तया च सीतया कलमगो-

---

(२७) सौम्यमुख जात लक्ष्मण ! अवसरमन्त्रणक ! किं भणामि ।

---

दक्षिणभागेन प्रचलितां सीताम् अवलोक्य रामस्य आगते अभिप्राये परिपन्थिनि विरोधिनि अपि रामस्यानिच्छायामपीत्यर्थः सौमित्रिणा लक्ष्मणेन यत्तदुक्त्या यत्किञ्चित् कथनेन राममनुज्ञाप्य इत्यर्थः अर्द्धपथ एव विश्रामः कृतः । वसन्ततिलकं वृत्तम् ।

(छ) अवसरमन्त्रणक । अवसरे यथा समये मन्त्रयतीति अवसर-मन्त्रणकः तत्सम्बुद्धौ ।

(ज) मसृणेति । सदर्भा कुशास्तृता भूः मसृणः मन्दः चरण-पातो यस्मिन् तद् यथा तथा शनैः शनैरिति यावत् गम्यतां यतः घर्मः निदाघः कठोरः अतितीव्रः तत् तस्मात् मूर्ध्नि शिरसि सिचयान्तं वसन-प्रान्तं विरचय अर्पय । पथिकवधूभिः पान्थमहिलाभिः पथि जनक-पुत्री सीता इति इत्थं शिक्षिता, अश्रुगर्भैः सवाष्पैः लोचनैः वीक्षिता दृष्टा च । मालिनीवृत्तम् ।

पीजनः स्त्रीस्वभावसुलभेन विश्रम्भेण मार्गं पृष्टः। निवे-
दितं च तेन (झ)।

पुरो भूः शालेयी कलमपरिपाकोत्सुकशुका
पुरः फुल्लाम्भोजा तिलकयति वो वर्त्म सरसी।
अथाग्रे सीमानो हलदलितमुस्तासुरभय-
स्ततोऽदूराद्दिव्या नयनविषयं यास्यति सरित् ॥३७॥ (ञ)

राघवः। कधं जा सा अह्माणं पुराणससुरस्स भअवदो भगीरधस्स जयपदाआ गङ्गादेवी विद्धमहेसिमुहादो सुवन्ती आसि तस्सिं दाव सपत्तं राहवकुडुम्बं तदो-तदो ? (ट) (२८)।

(२८) कथं या साऽस्माकं पुराणश्वशुरस्य भगवतो भगीरथस्य जय-पताका गङ्गा देवी वृद्धमहर्षिमुखात् श्रूयमाणा आसीत् तस्यां तावत् साम्प्रतं राघवकुटुम्बम्। ततस्ततः ?।

(झ) कतितिथे कतिपयदिवसीये। कलमगोपीजनः धान्यरक्षि-स्त्रीवर्गः विश्रम्भेण विश्वासेन तेन कलमगोपीजनेन।

(ञ) पुर इति। पुरः अग्रतः कलमानां धान्यानां परिपाके उत्सुकाः शुका यत्र तादृशी शालेयी शालिः धान्यं तत्सम्बन्धिनी शालिपूर्णा इत्यर्थः भूः क्षेत्रम्। पुरः अग्रतः फुल्लानि अम्भोजानि यस्यां तथा-भूता सरसी वः युष्माकं वर्त्म मार्गं तिलकयति अलङ्करोति। अथ अन-न्तरम् अग्रे पुरतः सीमानः भूप्रदेशाः हलैः लाङ्गलैः दलिताभिर्मर्दि-ताभिर्मुस्ताभिः सुरभयः सुगन्धाः। ततः परम् अदूरात् दिव्या सरित् नयनविषयं दृष्टिपथं यास्यति। शिखरिणीवृत्तम्।

(ट) वृद्धेति। वृद्धस्य महर्षेः वशिष्ठस्य मुखात्। राघवकुटुम्बं रघुपरिवारः अस्तीति शेषः।

सुमन्त्रः। ततश्च त्रियामासमये समासाद्य त्रिस्रोतसं नावमारूढाः।

कैकेयी। साकूतम्। भअवदि भाईरधि! भईरधाराहणं समरिअ सुहुत्तारा होइ (ठ) (२९)।

दशरथः। सतर्कम्। अयि सुमन्त्र! प्रस्तुतकर्णधारा (ड) नौः?।

सुमन्त्रः। किमुच्यते लक्ष्मणमितं निषादाधिपतिर्गुहः कर्णधारः।

कौशल्या। तदोतदो? (३०)।

सुमन्त्रः।

शम्भोर्मौलौ शशितिलकिते क्लृप्तकेलिप्रचारां
स्रोतःसूत्रैः कृतविरचनां भूर्भुवःस्वस्त्रयस्य।
तामुत्तीर्य त्रिदशसरितं लोचनैरश्रुगर्भै-
रन्तर्वेदीप्रवचनविदां ते पदं प्राप्तवन्तः॥ ३८॥ (ढ)

---

(२९) भगवति भागीरथि! भगीरथाराधनं स्मृत्वा सुखोत्तारा भव।
(३०) ततस्ततः?।

---

(ठ) सुखोत्तारा अनायासतरणीया।
(ड) कर्णधारः नाविकः।
(ढ) शम्भोरिति। शशिना तिलकिते सञ्जाततिलके शम्भोः हरस्य मौलौ शिरसि क्लृप्तः कृतः केलिप्रचारः क्रीड़ाविहारः यया तां स्रोतांसि सूत्राणीवेति तैः भूर्भुवः स्वस्त्रयस्य त्रिभुवनस्य कृतं विरचनं यया तथोक्तां त्रिलोकव्यापिनीं मन्दाकिनी गङ्गा भोगवती-

राक्षसः। अम्मो! सुट्ठाणे ठिदा ते जणा तदोतदो ? (२१)।

सुमन्त्रः। ततश्च पश्चिमेन प्रयागं रात्रिमेकामतिवाह्य समुत्तीर्य्य कलिन्दनन्दिनीं नानाधातुविचित्रं चित्रकूटाचलं गताः ? (ण)।

दशरथः। देवि दक्षिणकोशलाधिपतिपुत्रि! सुकुमारा राजपुत्री दुःसञ्चारा चित्रकूटगिरेररण्यानी (त)।

सुमन्त्रः। तत्र च।

आर्द्रैलपाकृतनवोटजानां
सौमित्रिणा नीतफलोदकानाम्।
कथाप्रसङ्गस्मृतबान्धवानां
तेषामभूत्तत्र चिरं प्रवासः॥ ३८॥ (थ)

---

(२१) अहो! सुस्थाने स्थितास्ते जनाः।

---

रूपेणेति भावः। तां त्रिदशसरितं देवनदीम् उत्तीर्य्य ते रामादयः अश्रुगर्भैः साश्रुभिः लोचनैः उपलक्षिताः सन्तः अन्तर्वेदीप्रवचनविदां तापसानामभिलष्यः पदं स्थानं प्राप्तवन्तः। मन्दाक्रान्तावृत्तम्।

(ण) प्रयागं पश्चिमेन प्रयागस्य पश्चिमे इत्यर्थः कलिन्दनन्दिनीं यमुनाम्।

(त) दक्षिणकोशलेति। दक्षिणकोशलानां अधिपतेः राज्ञः पुत्रि! कौशल्ये इत्यर्थः दुःसञ्चारा दुःखेन सञ्चर्यते इति तथाभूता।

(थ) आर्द्रैति। तत्र चित्रकूटे आर्द्रैः अपक्वैः उलपैः आकृप्तं नवम् उटजं कुटीरं यैः तथोक्तानां सौमित्रिणा लक्ष्मणेन आनीतानि फलानि उदकानि जलानि च येषां तादृशानां तथा कथाप्रसङ्गेन स्मृता

किञ्च।

त्वक्ताखी निवसनं मृगचर्म शय्या
गेहं गुहा विपुलपत्रपुटा घनाश्च।
मूलं दलं च कुसुमं च फलञ्च भोज्यं
पुत्रस्य जातमटवीरुहसंगिनस्ते॥ ४०॥ (द)

कौशल्या। अज्ज! कधेसु कीदिसं पुत्तं वणवासिणीए सोदाए घरिणित्तणं (१२)।

सुमन्त्रः। इदं निवेद्यते।

यदास्वाद्यं सीता वितरति तदग्रे स्वगृहिणे
सुमित्रापुत्राय प्रणिहितमशेषं च तदनु।
यदामं वा नामं यदनतिरसं यच्च विरसं
फलं वा मूलं वा रचयति तु तेन स्वमशनम्॥४१॥ (ध)

---

(१२) आर्य! कथय कीदृशं पुण्यं वनवासिन्याः सीताया गृहिणीत्वम्।

---

बान्धवाः पित्रादयः यैः तादृशानां तेषां रामादीनां चिरं दीर्घकालं प्रवासः अवस्थितिः अभूत्।

(द) त्वगिति। अटवीरुहसंगिनः वनरुहिणः ते तव पुत्रस्य रामस्य ताखी तरुसम्बन्धिनी त्वक् वल्कलमित्यर्थः। निवसनं परिधानं मृगचर्म शय्या, विपुलानि पत्रपुटानि यासु ताः घनाः निबिडाश्च गुहाः पर्वतकन्दराः गेहं सदनं मूलं दलं पत्रं कुसुमञ्च फलञ्च भोज्यं खाद्यं जातम्। वसन्ततिलकं वृत्तम्।

(ध) यदेति। यत् फलमूलादिकम् आस्वाद्यं सुस्वादमित्यर्थः, सीता अग्रे तत् स्वगृहिणे रामाय वितरति ददाति। तदनु तत्पश्चात

कौशल्या । पुत्ति सीदे ! कहिं पुण महाराजराजजादाए भविअ णिसग्गदरिद्दघरिणित्तणं तए सिक्खिदम् (म) (२३) ।

दशरथः । देवि ! दैवं शिक्षयति ।

सुमन्त्रः । इदमपरमावेद्यते हृदयकरीषङ्कषं वचो यदुताध्वखेदजनकेषु प्रयाणकेषु (प) ।

उत्थाय संभ्रमवशस्खलितोत्तरीया
कृत्वा धनुर्निचुलके मृगयानिवृत्तौ ।
सीताऽञ्चलेन तरलेन समुल्लसन्ती
रामाननान्नमितपक्ष्मरजः प्रमार्ष्टि ॥ ४२ ॥ (फ)

---

(२३) पुत्रि सीते ! कुत्र पुनर्महाराजजातया भूत्वा निसर्गदरिद्रगृहिणीत्वं त्वया शिक्षितम् ।

---

सुमित्रापुत्राय लक्ष्मणाय प्रविष्टितम् अवशिष्टम् अशेषम् समग्रम् आस्वाद्यमिति शेषः वितरतीति शेषः । यत् आमम् अपक्वं वा नामम् अपक्वं पक्वमित्यर्थः, यत् अमतिविरसम् अतिवैरस्यरहितं यच्च विरसम् अस्वादु फलं वा मूलं तेन स्वम् अशनं भोजनं रचयति कल्पयति । शिखरिणीवृत्तम् ।

(म) निसर्गदरिद्रगृहिणीत्वं आजन्मदरिद्रस्य रमणीत्वम् ।

(प) हृदय-रीषङ्कषं चित्तगोमयदाहकं प्रयाणकेषु गमनेषु ।

(फ) उत्थायेति । मृगयानिवृत्तौ मृगयायाः प्रत्यावृत्तौ सत्यां रामस्येति शेषः सीता सम्भ्रमेण आवेगेन स्खलितम् उत्तरीयं यस्यास्तादृशी तथा समुल्लसन्ती प्रियदर्शनेन उल्लासिनी सती उत्थाय निचुलके नटाख्ये वृक्षविशेषे धनुः कृत्वा प्रियहस्तात् गृहीत्वा संस्थाप्य रामाननात् रामस्य मुखात् तरलेन चालितेन अञ्चलेन नमितं पक्ष्मरजः नेत्रलोमपतितं पांशुं प्रमार्ष्टि अपनयति । वसन्ततिलकं वृत्तम् ।

दशरथः। ततस्ततः ?।

सुमन्त्रः। ततश्च (ब) जानकीहरणकृतोद्यमविराधविध्वंसनेन सीतायात्रनिवेशितनखरोल्लेखस्य च धाराधरवायसस्य काणीकरणेन सुखान्याश्रमपदानि विधाय दक्षिणं महाकान्तारमधिकृत्य प्रस्थितास्ते।

दशरथः। अयि सुमन्त्र। नववधूटीलक्ष्मणयोः(भ) प्रथमपथिकता विक्लवयति।

सुमन्त्रः। किं नाम विक्लवयति न पुनरानन्दयति।

धरणितलनिषण्णं वल्लविश्रान्तिहेतो-
र्व्यजति जनकपुत्री वाससः पल्लवेन।
अगणितनिजखेदः पादसंवाहनाभिः
परिचरति प्रहृष्टं लक्ष्मणो रामभद्रम्॥ ४२॥ (म)

(ब) जानकीति। जानक्या हरणे कृतः उद्यमो येन तादृशस्य विराधस्य तन्नाम्नः राक्षसस्य विध्वंसनेन वधेन। सीताया गात्रेषु निवेशितः अर्पितः नखरोल्लेखः येन तादृशस्य धाराधरनाम्नः वायसस्य काकस्य काणीकरणेन ऐषिकास्त्रेण एकनेत्रपातेन इत्यर्थः।

(भ) प्रथमपथिकता नूतनपान्थता विक्लवयति व्याकुलयति।

(म) धरणीति। जनकपुत्री वल्लवयोः रामलक्ष्मणयोः विश्रान्तिहेतोः विश्रमार्थं वाससः वसनस्य पल्लवेन प्रान्तेन अञ्चलेनेत्यर्थः धरणितलनिषण्णं इत्यमूलस्थितं रामं व्यजति वीजयति। लक्ष्मणः अगणितः निजस्य खेदः श्रमः येन तथाभूतः स्वं श्रममगणयित्वेत्यर्थः पादसंवाहनाभिः प्रहृष्टं सानन्दं रामभद्रं परिचरति सेवते। मालिनीवृत्तम्।

रामभद्रः। हा देव! कहिं उण गब्भेसरेहिं(य)भविअ जाण-ईलक्खणेहिं पहिअजणजोग्गं गुरुसुस्सूसणं सिक्खिदम्(२४)।

लक्ष्मणः। उचिदकारित्तणे अस्सुदसिक्खिदाइं महा-भाअजणचरित्ताइं (२५)।

दशरथः। जाने जानकीतोऽपि प्रसादवान् वत्सलश्च रामभद्रः।

सुमन्त्रः। यथादिष्टं देवेन।

ताराप्रेक्षणपीतबाष्पपयसो यत्नेन सञ्चारिताः
सीतायाः सविधस्थितेषु च मृगद्वन्द्वेषु वीरुत्सु च।
बाले वत्से कृते प्रवासिनि जवादुत्सृज्य गम्भीरतां
सौमित्रौ निपतन्ति वत्सलतया पुत्रस्य ते दृष्टयः॥४४॥(र)

(२४) हा देव क! पुनर्गर्भेश्वराभ्यां भूत्वा जानकीलक्ष्मणाभ्यां पथिकजनयोग्यं गुरुशुश्रूषणं शिक्षितम्।

(२५) उचितकारित्वेऽश्रुतशिक्षितानि महाभागजनचरित्राणि।

---

(य) गर्भेश्वराभ्यां महास्वामिना महास्वामिन्या च इत्यर्थः।

(र) तारेति। यत्नेन सञ्चारिताः अतएव ताराया नेत्रकनीनिकाया-प्रेक्षणेन चालनेन पीतं बाष्पपयः अश्रुजलं याभिः तथाभूताः ते तव पुत्रस्य रामस्य दृष्टयः सीतायाः सविधस्थितेषु समीपवर्त्तिषु मृगद्वन्द्वेषु च वीरुत्सु लतासु च तथा जवात् वेगात् सहसेत्यर्थः गम्भीरतां धैर्य्यम् उत्सृज्य परित्यज्य प्रवासिनि अनुगामिनि बाले प्रियौ सौमित्रौ लक्ष्मणे च वत्से कृते अश्रुपरिश्रमहेतोः वत्सलतया स्नेहेनेत्यर्थः निपतन्ति अद्भुते शिशुरयं कियन्तं क्लेशं प्राप्नोतीति सदयं लक्ष्मणे दृष्टिं पात-यति रामभद्र इति भावः। शार्दूलविक्रीडितं वृत्तम्।

इतरौ । अपि शिवाः पन्थानो वत्सानां सुशकुनया (ल) सीतया ।

सुमन्त्रः । देव ! रामचन्द्रदर्शनमेव सर्वेषामपि (व) सुशकुनम् करुणाकौतुकाभ्यामागताभिर्वैखानसवधूभिर्हस्तचिबुकेन चिबुके चुम्बन्तीभिरभिहिता सीता पुत्रि पतिव्रते वैदेहि ! अप्रमत्तजनसञ्चारणीयानि गिरिकान्ताराणि तस्माद्वेदनावत्यप्यनुरामभद्रं सञ्चर किं न पश्यसि ?

वप्रे यूथं चरति करिणां कन्दरास्वच्छभल्लाः
कुञ्जे सिंहैः स्थितिरुपहिता द्वीपिभिर्मेखलासु।
गोलाङ्गूलास्तरुषु सरणौ भ्रान्तिमन्तःपुलिन्दा
विन्ध्ये सत्त्वं तदिह कतरद्यन्न हिंस्रं न रौद्रम् ? ॥४५॥ (श)

(ल) सुशकुनया सुलक्षणया ।

(व) सुशकुनं सुलक्षणं शुभकरमित्यर्थः । वैखानसवधूभिः तापसीभि । हस्तचिबुकेन हस्तेन चिबुकेन च इत्यर्थः । अप्रमत्तैः अवहितैः जनैः सञ्चारणीयानि ।

(श) वप्रे इति । वप्रे तटे पर्वतस्येति सर्वत्र योज्यं करिणां गजानां यूथं चरति, कन्दरासु गुहासु अच्छभल्लाः भल्लूकाश्चरन्तीति शेषः । कुञ्जे लतादिवेष्टिते स्थाने निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे इत्यमरः । सिंहैः, मेखलासु नितम्बेषु, द्वीपिभिः शार्दूलैः, स्थितिः उपहिता कृता । तरुषु गोलाङ्गूलाः कृष्णमुखवानराः । तथा सरणौ वर्त्मनि पुलिन्दाः व्याधाः भ्रान्तिमन्तः भ्रमन्तीत्यर्थः । तत् तस्मात् इह विन्ध्ये कतरत् सत्त्वम् अस्तीति शेषः यत् हिंस्रं न, रौद्रञ्च न, सर्वमेव हिंस्रं रौद्रञ्च इत्यर्थः । मन्दाक्रान्तावृत्तम् ।

अपि च । सीरध्वजसुवासिनि ! (ष)

ग्रावग्रन्थिं परिहर पुरः कण्टकिन्यत्र वीरु-
द्धस्तप्रान्तं दवदहनतः किञ्चिदुच्चैः कुरुष्व ।
शाखास्तिर्यग्विनमय शिरः पश्य वल्मीकरन्ध्रं
वंशस्तम्बे चरति च करी तत्स्थिरा तावदास्स्व ॥४६॥(स)

सुमित्रा । अहह ! कधं णु क्खु कक्करोक्करवक्कलणिविलासु गिरिवसुन्धरासु (ज) वसुन्धरापुत्ती णिसग्गसुकुमारा संचरदि (३६) ।

(३६) अहह ! कथं नु खलु कर्करोत्करवल्कलनिबिडासु गिरिवसुन्धरासु वसुन्धरापुत्री निसर्गसुकुमारा सञ्चरति ।

(ष) सीरध्वजेति । सीरध्वजे जनके तदावासे इत्यर्थः सुवासिनि ! अथवा सीरध्वजस्य सुवासः सौरभं यस्य इत्यर्थः तद्विभाविनि ! ।

(स) ग्रावेति । पुरः अग्रतः ग्रावग्रन्थिं प्रस्तरसन्धिं परिहर परित्यज सन्धिविश्लेषे सहसा विपत्सम्भवादिति भावः, अत्र वीरुत् लता कण्टकिनी कण्टकावृता । हस्तप्रान्तं हस्तमाङ्गुलं दवदहनतः दावाग्नेः किञ्चित् उच्चैः कुरुष्व यथा नाग्निस्पर्शो भवेदिति भावः । अत्र शाखाः तिर्यक् वक्रगामिन्यः, अतः शिरः विनमय विनतं कुरु यथा शिरसि शाखास्पर्शो न स्यादिति भावः । वल्मीकानां कीटविशेषाणां रन्ध्रं विवरं पश्य, करी हस्ती वंशस्य स्तम्बे गुल्मे चरति भ्रमति च तत् तस्मात् स्थिरा अवहिता सती तावत् आस्स्व तिष्ठ । मन्दाक्रान्तावृत्तम् ।

(ज) कर्करेति । कर्कराणाम् उत्करैः निचयैः वल्कलैः तरुत्वग्भिश्च निबिडासु समाक्रान्तासु गिरिवसुन्धरासु पर्वतभूमिषु ।

कुसुमः। इदं कथ्यते यथा सञ्चरति।

मुञ्चत्यग्रे किसलयचयं लक्ष्मणो याति सीता
पादाम्भोजे विसृजदसृजी तत्र सञ्चारयन्ती।
रामो मार्गं दिशति च ततस्तेऽखिलेनाऽपि चाह्ना
शैलोत्सङ्गप्रणयिनि पथि क्रोशमेकं वहन्ति ॥ ४७ ॥(क)

ततश्च।

जरदजगरश्वासत्रासप्रनष्टमृगाकुलं
हरिनखमुखन्यासादस्तद्विपोज्झितचीत्कृतम्।
शबरवनितोत्खातैः कन्दैः स्फुटस्थपुटान्तरं
तदनु सरितां बन्धुं विन्ध्यं गतास्त इमे गिरिम् ॥ ४८ ॥ (ख)

---

(क) मुञ्चतीति। लक्ष्मणः अग्रे किसलयचयं मुञ्चति विक्षिपति, सीता तत्र किसलयास्तृते प्रदेशे विसृजन्ति निःसरन्ति असृञ्जि शोणितानि याभ्यां तादृशे पादाम्भोजे चरणकमले सञ्चारयन्ती विक्षिपन्ती सती याति गच्छति। रामः मार्गं पन्थानं दिशति च दर्शयतीत्यर्थः ततः अनन्तरं ते सर्वे अखिलेनापि समग्रेणापि अह्ना दिवसेन शैलोत्सङ्गप्रणयिनि पथि एकं क्रोशं वहन्ति चलन्ति। मन्दाक्रान्तावृत्तम्।

(ख) जरदिति। तदनु तदनन्तरं ते इमे रामादयः जरताम् अजगराणां श्वासात् प्रनष्टाः पलायिताः मृगाकुलाः यस्मात् तादृशं हरीणां सिंहानां नखमुखानां न्यासात् प्रहारात् अस्तैः विद्रुतैः द्विपैः करिभिः उज्झितं त्यक्तं कृतमित्यर्थः चीत्कृतं यस्मिन् तथाभूतं तथा शबरवनिताभिः किरातीभिः उत्खातैः कन्दैः स्फुटं स्थपुटस्य विषमोन्नतप्रदेशस्य अन्तरं यस्य तथाविधं सरितां नदीनां बन्धुं विन्ध्यं गिरिं गताः। हरिणीवृत्तं न समरसलगाः षड्वेदैर्हयैर्हरिणी मतेति लक्षणात्।

कौशल्या । जा(ग) कविञ्जलकेलिजुद्धे वि विब्भन्ती आसि सा कधं पुण वाणरमुक्कबुक्कारवसङ्किअपहिअं किराअजालभल्लाहअवेल्लमाणअच्छभल्लकीलालकवलणकेलिकोदूहलिदकेसरिकिसोरदीहजीहालिहिज्जन्तपोम्मराअखाणिं विंझगिरिं पेक्खन्ती सुणा मे पदाइं धारइस्सदि। हा हद देव्व ! साम्लं केलिकदलीकन्दली मत्तकरिसुण्डावेढं सहावीअदि हंहो ! दिलीपकुलदेवदाओ ! सुरक्खिदं कुणध वणे राहवकुडुम्बम् (३९) ।

---

(३७) या कपिञ्जलकेलियुद्धेऽपि विभ्यत्यासीत् सा कथं पुनर्वानरमुक्तबुक्कारवशङ्कितपथिकं किरातजालभल्लाहतवेल्लदच्छभल्लकीलालकवलनकेलिकौतूहलितकेसरिकिशोरदीर्घजिह्वालिह्यमानपद्मरागखनिं विन्ध्यगिरिं प्रेक्षमाणा स्नुषा मे पदानि धारयिष्यति । हा हत दैव ! साम्लं केलिकदलीकन्दली मत्तकरिशुण्डावेष्टनं साह्यते हंहो ! दिलीपकुलदेवताः ! सुरक्षितं कुरुत वने राघवकुटुम्बम् ।

---

(ग) कपिञ्जलेति । कपिञ्जलानां पक्षिभेदानां केलियुद्धे क्रीड़ायुद्धे । वानरेति । वानरैः मुक्तेन बुक्कारवेण शङ्किताः पथिका यस्मिन् तादृशं किरातेति किरातजालानां व्याधसङ्घानां भल्लैः अस्त्रविशेषैः हताः प्रहृताः अतएव वेल्लन्तः ज्वालया विचरन्तः ये अच्छभल्लाः भल्लूकास्तेषां कीलालस्य जलस्य कीलालमसृतं जलमित्यमरः । कवलनं पानमेव केलिः तेन कौतूहलितैः तद्दर्शनेन कौतुकाविष्टैरित्यर्थः केशरिकिशोरकैः सिंहशिशुभिः दीर्घजिह्वाभिः लिह्यमानः आस्वाद्यमानः पद्मरागाणां खनिः आकरः यत्र तथाभूतम् । साह्यते सहं क्रियते त्वयेति शेषः ।

दशरथः । किं करोतु वराको क्व पुनर्मालतीकलिका दर्भगुणग्रथनाकदर्थनां (घ) क्षमते ।

सुमन्त्रः । शृणु यथा क्षमते ।

मूले मूले पथि विटपिनां खेदिनी दीर्घमास्ते
शुष्यत्कण्ठी पिबति सलिलं निर्झरे निर्झरे च ।
जातत्रासा निमिषति दृशं कन्दरे कन्दरे च
स्थाने स्थाने वहति च मतिं बद्धवासाभिलाषा ॥ ४९ ॥ (ङ)

निःश्वस्य । देव ! इदं पुनरतिकष्टतरं श्रावयामि ।

विन्ध्याध्वानो विरलसलिलास्तर्षिणी तत्र सीता
यावन्मूर्च्छां कलयति किल व्याकुले रामभद्रे ।
द्राक्सौमित्रिः पुटककलशीं मालुधानीदलानां
तावत्तासां द्रवति भृतां वारिणा नैर्झरेण ॥ ५० ॥ (च)

(घ) दर्भाणां कुशानां गुणग्रथने माल्यग्रन्थने या कदर्थना क्लेशः सा क्षमते सहते ।

(ङ) मूले इति । पथि विटपिनां तरूणां मूले मूले खेदिनी श्रान्ता सती दीर्घम् आस्ते उपविशति । शुष्यन् कण्ठो यस्याः तादृशी सती निर्झरे निर्झरे सलिलं पिबति च, जातत्रासा सभया सती कन्दरे कन्दरे प्रतिगुहं दृशं निमिषति निमीलयति च । स्थाने स्थाने बद्धः वासे अभिलाषो यया तादृशी सती मतिं वहति च । मन्दाक्रान्ता छन्दः ।

(च) विन्ध्येति । विन्ध्यस्य अध्वानः पन्थानः विरलानि अल्पानि सलिलानि येषु तथाभूताः, तत्र तर्षिणी तृषार्ता सीता यावत् मूर्च्छां कलयति प्राप्नोति, किल तावत् रामभद्रे व्याकुले सति सौमित्रिर्लक्ष्मणः द्राक् झटिति मालुधानीनां लताविशेषाणां ये दला पत्राणि तेषां

सर्वे समुपसर्पन्ति ।

कौशल्या । लक्खण लक्खण ! (छ) उवणेहि ! चलणकमलाइं सीसेन ते धारइस्सं (३८) ।

कैकेयी । सहि कोसल्ले ! उट्ठेहि उट्ठेहि कहिं एत्थ रामो लक्खणो वा अदिक्कन्तं (ज) क्खु भणीअदि (३९) ।

दशरथः । एष विषादहर्षयोरन्तरे वर्त्ते ।

कौशल्या । हा रामभद्द ! केण उण दिणअरकुलकुमारएण भविअ विंझगिरिवासदुःखं अणुभूदम् (४०) ।

सुमित्रा । सहि कोसल्ले ! ण सव्वो रामभद्दो (४१) ।

कैकेयी । णअरे णअरे (झ) कैकेयी (४२) ।

(३८) लक्ष्मण ! लक्ष्मण ! उपनय चरणकमले शीर्षेण ते धारयिष्यामि ।

(३९) सखि कौशल्ये ! उत्तिष्ठोत्तिष्ठ कुत्र रामो लक्ष्मणो वा अतिक्रान्तं खलु भण्यते ।

(४०) हा रामभद्र ! केन पुनर्दिनकरकुलकुमारकेण भूत्वा विन्ध्यगिरिवासदुःखमनुभूतम् ।

(४१) सखि कौशल्ये ! न सर्वो रामभद्रः ।

(४२) नगरे नगरे कैकेयी ।

इटकमेव कबर्यो नैर्ऋरेण वारिणा अतिभृतां परिपूरितां दधत् धारयन् सन् तावत् प्राप्तः उपस्थितः । मन्दाक्रान्तावृत्तम् ।

(छ) उपनय अर्पय ।

(ज) अतिक्रान्तम् अतीतं भण्यते कथ्यते सुमन्त्रेणेति शेषः ।

(झ) नगरे नगरे कैकेयी कलहिनीति श्रूयते इति भावः ।

कौसल्या। तदो तदो? (४३)।

सुमन्त्रः। ततश्च।

विहितशयनोऽनेकन्यासैरशोकलतापल्लवैः
कलितकलशीपालिः कुम्भीदलैश्च पुटीकृतैः।
अथ विरचितः किञ्चित्तालप्रभेऽह्नि सुतेन ते
परिसरसरिज्जम्बूकुञ्जे निकेतपरिग्रहः॥ ५१॥ (अ)

दशरथः। सविशेषकरुणम्। ततस्ततः?।

सुमन्त्रः। तदित्थं कतितिथे च प्रयाणे।
गिरिषु जयपताका विन्ध्यशैलस्य पाणि-
र्द्विपकुलनिचिताभाः प्रेयसी पश्चिमाब्धेः।
नयनपथमथागान्नर्मदा देव! तेषां
झिरिझिरितजलमिन्दोश्चन्द्रिकेव प्रसूता॥ ५२॥ (ट)

(४३) ततस्ततः।

(अ) विहितेति। अथ ते तव सुतेन परिसरसरित प्रान्तवर्त्तिन्या नद्याः जम्बूकुञ्जे किञ्चित् ईषत् ताले तालद्रुमे प्रभा सूर्यरश्मिर्यस्य तादृशे अह्नि अपराह्णे इत्यर्थः तदैव तालवृक्षोपरिभानुमयूखोत्पतना-दिति भावः। अनेके बहवः न्यासाः निक्षेपा येषां तथाभूतैः अशोकलतानां तरूणां पल्लवैः विहितं प्रस्तुतं शयनं शय्या यस्मिन् तादृशः, पुटीकृतैः कम्भीनां लताविशेषाणां दलैः कलितः निर्मितः कलशीनां जलकुम्भानां पालिः श्रेणिर्यस्मिन् तथाविधः निकेतपरिग्रहः आवासकुटीराश्रयः विरचितः कृतः। इत्यन्वितम्।

(ट) गिरिष्विति। हे देव! अथ अनन्तरं गिरिषु जयपताका विन्ध्यशैलस्य पाणिः हस्तस्वरूपा इत्यर्थः द्विपकुलैः हस्तिवृन्दैः निचि-

दशरथः । या किल भगवत्यार्य्यावर्त्तदक्षिणापथयोर्विभाग-रेखा (ठ) ।

सुमन्त्रः । ततश्चाहमनुगमनकृताग्रहग्रन्थिरपि (ड) देव-द्रोहं निगदता रामभद्रेण विनिवृत्तये स्थापितः । किञ्च देव !

कृत्वा पाणौ शिरसि जटिले पद्मकोशायमानौ
रामेण प्राक्प्रणतिविनयो देव ! विज्ञापितस्ते ।
बाष्पासारातरलनयनस्तम्भितोऽप्युज्जिहानः
पश्चान्मुक्तः श्वसितविधुरो वन्दितेनाननेन ॥५३॥ (ढ)

कौशल्या । अज्ज ! तए विमुक्को रामभद्दो (४४) ।

(४४) आर्य्य ! त्वया विमुक्तो रामभद्रः ।

तम् आलोडितम् अम्भ यस्यास्तादृशी पश्चिमाब्धेः पश्चिमसागरस्य प्रेयसी पश्चिमसागरगामिनीति भावः नर्मदा इन्दोश्चन्द्रात् प्रसूता चन्द्रिकेव तेषां रामादीनां शिशिरं शीतलीकृतं जलम् अम्बु यस्य तादृशम् आनन्दजन्यं नेत्रजलं शिशिरं भवति नर्मदादर्शने तेषामानन्दोदय इति भावः नयनपथं दृष्टिगोचरम् अगात् प्राप । मालिनी-वृत्तम् ।

(ठ) विभागरेखा प्रभेदसीमा इत्यर्थः ।

(ड) अनुगमनेति । अनुगमने कृतः आग्रहग्रन्थिः निर्बन्धोऽपि यस्य तेन तादृशा । देवद्रोहं महाराजस्य अनिष्टम् अप्रियाचरणमि-त्यर्थं निगदता कथयता । स्थापितः नियोजितः ।

(ढ) कृत्वेति । हे देव ! रामेण प्राक् पूर्वं जटिले जटायुक्ते शिरसि पद्मकोशायमानौ कमलकोरकोपमौ पाणी कृत्वा अञ्जलिं विधाय इत्यर्थः ते तव प्रणतिविनयः प्रणामरूपं वस्तु विज्ञापितः

सुमन्त्रः । देवि ! सर्वे वयं रामभद्रेण परित्यक्ताः ।

कौशल्या । तदोतदो ? (४५) ।

सुमन्त्रः । ततश्च ।

नीत्वा कालं तरुणतरणिं स्निग्धजम्बूनिकुञ्जे
धाराकूर्मोन्मितसिकतासद्मना क्रीडनेन ।
रेवां देव ! स्खलितचरणा पिच्छिलाभिः शिलाभि-
स्तामुत्तीर्णा पथिकतरलन्यस्तहाहा वधूस्ते ॥५४॥ (ण)

सुमित्रा । तदोतदो ? (४६) ।

---

(४५) ततस्ततः ।

(४६) ततस्ततः ।



---

निवेदितः प्रणामः विज्ञापित इत्यर्थः । पश्चात् वन्दितेन सर्वजनपूजितेन आननेन मुखेन तारया तरलाभ्यां चञ्चलाभ्यां नयनाभ्यां स्तम्भितोऽपि स्वीकृतोऽपि उज्जिहानः उद्गच्छन् दयितेन निश्वासेन विधुतः स्पन्दितः बाष्पः अश्रुजलं मुक्तः । मन्दाक्रान्तावृत्तम् ।

(ण) नीत्वेति । हे देव ! धीरा ते तव वधूः स्निग्धे जम्बूनिकुञ्जे कूर्माणां रचितानाम् उन्मथितानां सिकतासद्मनां वालुकारचितगृहाणां क्रीडनेन वालुकाभिः गृहविरचनरूपेण क्रीडनेनेत्यर्थः । तरुणः तीव्रतरणिः सूर्यः यस्मिन् तादृशं कालं मध्याह्नसमयमित्यर्थः । नीत्वा अतिवास्य पिच्छिलाभिः मसृणाभिः शिलाभिः स्खलितचरणा अतएव पथिकतरलैः पथिकेषु पान्थेषु तरलैः अधीरैः परदुःखासहिष्णुभिरिति भावः । न्यस्तः कृतः हाहा हा हेति शोकजनकरवः यस्यास्तादृशी सती सीताया नर्मदातरणं दृष्ट्वा पथिकैः दुःखार्त्तैः हाहारवः कृत इति भावः । तां रेवां नर्मदाम् उत्तीर्णा मन्दाक्रान्तावृत्तम् ।

सुमन्त्रः। ततोऽहं तानवलोकयन्नर्वाक्कूले एव तां रजनी-मुषितस्ते तु परपारे। अथान्येद्युः। (त)

जित्वा वाष्पं किमपि कलया स्फारितैर्नेत्रपातै-
रर्वाक्कूले विहितवसतिं वीक्षमाणाः क्षणं माम्।
ते दिग्भागं स्तिमितवचसो नर्मदायाः परस्ता-
ल्लोपामुद्रापतितिलकितं देव! गन्तुं प्रवृत्ताः॥ ५५॥(थ)

दशरथः। वत्स रामभद्र! मन्ये ममेव मलयाचल-वासिनः प्रियवयस्यस्य जटायोरपि सर्वङ्कषो भविष्यसि।(द)

ततः प्रविशति गगनाद्भ्रवतरणनाटितकेन समप्रहारव्यथो रक्त-सिक्ताङ्गः।

चन्द्रहासप्रहारो[illegible]जयन् मूर्च्छां नभोऽनिलैः।

(त) अर्वाक्कूले अपरतटे।

(थ) जित्वेति। हे देव! ते रामादयः कलया शनैः शनैरित्यर्थः किमपि केनापि प्रकारेणेत्यर्थः वाष्पं नेत्रवारि जित्वा निरुध्य इत्यर्थः स्फारितैः प्रसारितैः नेत्रपातैः अर्वाक्कूले विहिता कृता वसतिः येन तं कृतावस्थानमित्यर्थः मां क्षणं वीक्षमाणाः [illegible] था स्तिमित-वचसः निःशब्दाः दुःखेन मौनिन इत्यर्थः सन्तः स्तिमितपयस इति पाठे स्तिमितं स्थिरं पयः जलं यस्यास्तादृश्याः नर्मदायाः परस्तात् परपारे लोपामुद्रायाः पतिः अगस्त्यः तेन तिलकितं सञ्जाततिलकम् अलङ्कृतमित्यर्थः वनमिति शेषः गन्तुं प्रवृत्ताः। मन्दाक्रान्तावृत्तम्।

(द) सर्वङ्कषः सर्वसुखविध्वंसीत्यर्थः। यथा त्वद्वियोगेन मम सर्व-सुखनिवृत्तिः तथा त्वदर्थं म्रियमाणः जटायुरपि सर्वसुखविरहितो भवि-ष्यतीति सम्भावयामीति भावः।

अयोध्यामवतीर्णोऽस्मि कथञ्चित् श्लथपक्षतिः ॥ (ध)

विचिन्त्य एवं स्थितोऽपि ।

एषोऽहं जलमयरत्नकामधेनुं
पक्षाभ्यां सपदि विघूर्ण्य ताम्रपर्णीम् ।
द्राक्कृत्वा मलयतरून् द्रुताहिपाशा-
न्नादेशाद्दशरथमागतो जटायोः ॥ ५६ ॥ (न)

तथावस्तत्रभवन्तं भूपालरूपं पश्यामि । गगनार्द्धक्रमेणाव-लोक्य । एष महाराजदशरथः । कः कोऽत्र भोः ? । निवेद्यतामजनन्दनाय नरेन्द्राय ।

जटायोर्गृध्रराजस्य सुहृदस्तव शैशवात् ।
दूतो रत्नशिखण्डोऽस्मि तन्निदेशादुपागतः ॥ ५७ ॥ (प)

---

(ध) चन्द्रहासेति । श्लथा पक्षतिः पक्षमूलं यस्य तादृशः अहं चन्द्रहासस्य रावणासेः प्रहारोत्थाम् आघातजनितां मूर्च्छां कथञ्चित् नभोऽनिलैः आकाशवायुभिः अपनयन् अपनयन् सन् अयोध्याम् अवतीर्णः ।

(न) एष इति । एषः अहं सपदि शीघ्रं जलमयरत्नानां कामधेनुं सततरत्नवर्षिणीं ताम्रपर्णीं नदीं पक्षाभ्यां विघूर्ण्य पक्षवातेन घूर्णयित्वा इत्यर्थः तथा द्राक् झटिति मलयतरून् द्रुताः पलायिताः अतएव भुजङ्गाः पाशा वेष्टनरज्जव इव येभ्यः तथाविधान् कृत्वा जटायोः आदेशात् दशरथम् आयातः प्राप्तः । प्रहर्षिणीवृत्तं त्र्याशा-भिर्मनजरगाः प्रहर्षिणीयमिति लक्षणात् ।

(प) जटायोरिति । शैशवात् शैशवमारभ्य तव सुहृदः मित्रस्य गृध्रराजस्य जटायोः दूतः रत्नशिखण्डो नामाहं तस्य जटायोः निदेशात् उपागतः उपस्थितोऽस्मि । पथ्यावक्त्रं वृत्तम् ।

सुमन्त्रः। इत इतः।

रत्नशिखण्डः। अवतरणनाटितकेन। स्वस्ति महाराज-
दशरथाय।

दशरथ। अपि कुशलं जटायोर्वयस्यस्य?।

रत्नशिखण्ड। प्रियसुहृदुपयोगेन न (फ) पुनः शरीरेण।

दशरथ। भद्र! समुपविश्य कथ्यतां व्याकुलोऽस्मि।

रत्नशिखण्ड। उपविश्य। अद्य (ब) प्रगेतनप्रचारविनिर्ग-
तैरन्वयशकुन्तिभिर्वान्तधाराश्रुविसरैरागत्य करुणं क्रन्दद्भि-
र्निवेदितं शकुन्तराजाय जटायवे यदुतोपासितप्रथमसन्ध्ये
साकं जानक्या लक्ष्मणलक्ष्मण्युटजाङ्गणमधितिष्ठति सप्रम-
दमदे रामभद्रे तत्प्रदेशवर्त्तिभिरुद्घोषि।

सञ्चारी रोहणाद्रेः किमयमविकलः कीलसम्पातमूर्त्तिः
कोदण्डः पिण्डिताङ्गः किमुत सुरपतेर्जङ्गमत्वं गतोऽसौ।
चित्रं वा भूतधात्र्याः प्रकृतिबलमिदं कल्पयन्नाग्नितर्का-
न्नित्यं वैखानसीनामितिलक्षितभुवनं भूतमभ्येति किञ्चित्॥ (भ)

(फ) प्रियसुहृदुपयोगेन प्रियसुहृदः तव उपयोगेन उपकारेण।

(ब) प्रगेतनेति। प्रगे भवः प्रगेतनः प्रातःकालीन इत्यर्थः यः
प्रचारः गतं विनिर्गतैः अन्वयशकुन्तिभिः पक्षिकुलैः वान्ता उद्गीर्णा
धाराश्रूणाम् अश्रुधाराणां विसरा यैः साश्रुलोचनैरित्यर्थः उतेति
सम्बोधनसूचकमव्ययम् उपासिता प्रथमसन्ध्या प्रातःसन्ध्या येन तादृशे।
साकं सह साकं सार्द्धं सम सहेत्यमरः। लक्ष्मणलक्ष्मणि सुलक्षणे
इत्यर्थः उटजाङ्गणं कुटीरचत्वरम्। सप्रमदमुदे प्रमदस्तुष्टा हर्षविकाश
तथा सहिते सहर्षे इत्यर्थः, उद्घोषि उद्घोषितम्।

(भ) सञ्चारीति। अयम् अविकलः समग्रः सर्वाङ्गपूर्ण इत्यर्थः

अभिहितं च रामभद्रेण जानकि ! कारय चक्षुषोपारणां पश्य पश्य ।

अश्मीपर्य्यग्नरत्नव्यतिकरकलनाचित्रिताङ्गः कुरङ्गः
कान्त्या दूरस्थितानामपि सलिलमुचां सन्दधच्चापचिह्नम् ।
वेगेनान्वीतमार्गो मुनिवटुभिरलं कौतुकोत्तानिताक्षै-
र्भूयो भूसन्निवेशे चरति रचयति व्योम्नि किञ्चित् प्लुतानि॥(म

तदवलोकनकुतूहलिना चाभिहितं लक्ष्मणेन । आर्य्ये ! दृश्यतां द्रष्टव्यम् ।

---

कोमलव्याघ्रमूर्त्तिः क्रीडनार्थं स्फीतशरीर इत्यर्थः अतएव सञ्चारी जङ्गमः रोहणाद्रिः तदाख्यरत्नशैलः किम् ? उत अथवा असौ पिण्डिताङ्गः सङ्कुचिताकृतिः जङ्गमत्वं गतः प्राप्तः सुरपते इन्द्रस्य कोदण्डः धनुः किम् ? वा किं वा भूतधात्र्याः पृथिव्याः चित्तमनोहरं प्रकृतिवनमिदं किम् ? इत्थं वैखानसीनां तापसीनां वाग्वितर्कान् सन्दिग्धवचनानि कल्पयत् जनयत् तिलकितभुवनम् अलङ्कृतजगत् किञ्चित् किमपि भूतं प्राणिविशेषः अभ्येति विचरति । स्रग्धरावृत्तम् ।

(म) अश्मीति । अश्मीपर्य्यग्नाणां अपिविद्धानां यथास्थानमिवेशितानामित्यर्थः रत्नानां व्यतिकरेण योजनेन या कलना रचना तया चित्रितानि अङ्गानि यस्य तादृशः कुरङ्गः मृगः कान्त्या देहप्रभया दूरस्थितानाम् आकाशचारित्वादिति यावत् अपि सलिलमुचां मेघानां चापचिह्नं कार्मुकलक्षणं सन्दधत् सन् अत्यर्थं कौतुकेन उत्तानितानि स्फारितानि अक्षीणि यैः तथाविधैः मुनिवटुभिः तापसकुमारैः वेगेन अन्वीतः अनुसृतः मार्गः यस्य तथाभूतः सन् भूयः बाहुल्येन भूसन्निवेशे भूतले चरति व्योम्नि आकाशे किञ्चित् प्लुतानि रचयति च । स्रग्धरावृत्तम् ।

आपुच्छाद्दाचतुण्डान्मरकतरचितां पृष्ठपीठीं दधानो-
नीरन्ध्रासक्तमुक्ताफलपटलचयापाण्डुरां क्रोडपालीम् ।
पादैर्बालप्रवालच्छदपुटघटितैरच्छवैदूर्य्यमय्या
दृष्ट्याऽयं दण्डकायां भुवि वनहरिणोऽभ्येति विस्मापयन्नः ॥(व)

कौशल्या । तदोतदो ? (४७) ।

रामलक्ष्मणः । ततश्च (र) विचित्ररचनाकर्मणि तत्रमणि सीताकौतूहलिकतामवगत्य तद्ग्रहणार्थं लक्ष्मणमवस्थाप्य समनुसृतो रामभद्रः कियतीषु च कालकलासु गतासु किं नवाद्भुतभूते भविष्यत्यार्य्यपुत्रस्येति जाताशङ्कां वैखानसपत्नीनां समर्प्य जानकीं सौमित्रिरपि राममनुसृतः ।

---

(४७) ततस्ततः ? ।

---

(व) आपुच्छादिति । आपुच्छात् लाङ्गूलपर्य्यन्तम् आ च तुण्डात् तुण्डपर्य्यन्तञ्च पुच्छावधितुण्डपर्य्यन्तमित्यर्थः मरकतैः रचितां पृष्ठपीठीं पृष्ठरूपं पीठं तथा नीरन्ध्रं यथा तथा आसक्तानां रचितानां मुक्ताफलपटलानां चयः समूहः तद्वत् आपाण्डुरां क्रोडपालीम् उत्सङ्गदेशं दधानः अयं वनहरिणः बालैरभिनवैः प्रवालच्छदानां पुटैः घटिताः निर्म्मिताः तैः पादैः तथा अच्छं निर्म्मलं यत् वैदूर्य्यं मणिविशेषः तन्मय्या तद्रूपया दृष्ट्या नेत्रेण च दण्डकायां भुवि दण्डकारण्ये नः अस्मान् विस्मापयन् विस्मितान् कुर्वन् अभ्येतीति विचरति । स्रग्धरा-वृत्तम् ।

(र) विचित्रेति । विचित्रं मनोहरं रचनाकर्म्मनिर्माणकौशलं यस्य तादृशे । सीतायाः कौतूहलिकत्वं लिप्सामित्यर्थः । कालकलासु क्षणांशेषु ।

कौशल्या। किञ्चिदुत्थाय। जाद लक्खण! अलमलं मारिण-कुरङ्गेण मारुव मारुव, एदाणिं जाणइं अडइकन्तार परिव्वअसु (४८) इति धारयितुमिच्छति।

सुमन्त्रः। देवि! अतिक्रान्तवर्णनायामलमलमतिमोहेन।

दशरथः। ततस्ततः?

रत्नशिखण्डः।

आकर्णाकृष्टचापार्पितविशिखभृतानुद्रुतस्तालगोत्रान्
मायिक्याद्रेः कुरङ्गः सपदि धृतजवो जानकीवल्लभेन।
सीतां चाधाय मध्ये मणिवलभि ततो रावणः पुष्पकेण
स्वां गन्तुं राजधानीं सकलसुरवधूचण्डवृत्तः प्रवृत्तः॥ ६१॥ (क)

दशरथः। धनुर्धनुः।

सुरेन्द्रवैरिविषमा छद्मविद्यापराजिताः।

(४८) जात लक्ष्मण! अलमलं मायिकुरङ्गेण मारय मारय, इदानीं जानकीमटवीकान्तारं परित्यज।

(क) आकर्णेति। सपदि तत्क्षणं जानकीवल्लभेन आकर्णाकृष्ट-चापार्पितं धनुषि योजितं विशिखं बिभर्तीति तथोक्तेन सता अन-न्तयायान् दीर्घकायः धृतजवः वेगवान् मायिक्याद्रेः स्वकपट इत्यर्थः कुरङ्गः मृगः अनुद्रुतः अनुधावितः सकलसुरवधूनां बलात् हरणं हठ-हरणं तेनैव चण्डवृत्तः ततो सकाशात् रावणश्च मध्ये मणिवलभि उपरिस्थगृहाख्यमणिमयवलभौ इत्यर्थः सीतां च आधाय संस्थाप्य पुष्पकेण रथेन स्वां राजधानीं लङ्कां गन्तुं प्रवृत्तः। स्रग्धरा वृत्तम्।

दशवक्त्रस्य वक्त्राणि लुनन्तु मम सायकाः ॥ ६२ ॥ (ब)

इत्यु्त्थातुमिच्छति ।

सुमन्त्रः । देव ! तदिदमपक्रान्तोपवर्णनं कोऽयमायुध-ग्रहणकालः ।

दशरथः । उपविश्य । हा हा धिक्कष्टमयमपूर्वो रघुराजकुलकलङ्कावतारः । विचिन्त्य । नहि मायामयः ।

मायामृगेण रामोऽपि हृत इत्यद्भुतं महत् ।

मतिर्वा सर्वभाग्यानां पश्यन्त्यपि न पश्यति ॥६३॥ (भ)

लक्ष्मिला । पुत्ति सीदे । (च) कवलिदहालाहलस्स जणस्स एस संपदं सोपो । जा देसन्तरे वि रक्खसेण हीरसि(४८) ।

(४८) पुत्रि सीते ! कवलितहालाहलस्य जनस्य एष साम्प्रतं शोको या त्वं देशान्तरेऽपि राक्षसेन ह्रियसे ।

(ब) सुरेन्द्रेति । सुरेन्द्रस्य देवराजस्य ये वैरिणः दैत्याः तत्कृतं तेषां विरहं छेदविद्यासु परीक्षिताः पारदत्वेन निर्णीताः दैत्यविध्वं[illegible] दर्श्याः मम सायकाः शराः दशकण्ठस्य रावणस्य वक्त्राणि शिरांसि लुनन्तु छिन्दन्तु ।

(भ) मायामृगेणेति । मायामृगेण रामोऽपि हृतः इति महत् अद्भुतम् आश्चर्यम् । वा अथवा सर्वभाग्यानां अभाग्यानां मतिः पश्यन्ती अपि विपदमिति शेषः न पश्यति । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ।

(च) कवलितेति । कवलितं पीतं हालाहलं येन तादृशस्य । अयं भावः, मादृशो जनः पूर्वं मद्भाग्यमतः ततनात् अधुना तदर्थं शोचतीति ।

कैकेयी। कैकेईदुज्जसमहाकन्दस्स (क) एस दुदीओ कन्दलुब्भेओ (५०)।

दशरथः। उपविश्य सवैलक्ष्यम् (ख)। ततस्ततः ?।

रत्नशिखण्डः। एतद्व्यतिकरमव्ययवयोवदनेभ्यः (ग) श्रुत्वा स ते सखा गृध्रकपोतैः परिवृतो दुःसहकृपापहारतिरस्कारो मलयाचलादुच्चलितः।

यत्नान्तरे विदशवक्रविमुच्यमान
दृग्गोचरस्य रजनीचरभर्तुरग्रे।
मार्गं निरुध्य कृतवान् गगनावगाह-
मामूलविस्तृतपतत्रपुटो जटायुः॥६४॥ *

दशरथ.। साधु वयस्य! साधु ततस्ततः ?।

रत्नशिखण्डः। यस्य वर्त्म दिनमणिरयं वासरस्यैककर्ता
यद्विस्तारे भवति रजनीगर्भिता जीवलोकः।

(५०) कैकेयीदुर्यशोमहाकन्दस्य एष द्वितीयः कन्दलोद्भेदः।

(क) कैकेयीति। कैकेय्या दुर्यशः दुष्कीर्तिः तदेव यः महान् कन्दः मूल तस्य। कन्दलोद्भेदः नवाङ्कुरोदयः।

(ख) सवैलक्ष्यं सलज्जं पुत्रवधूहरणादिति भावः।

(ग) एतद्व्यतिकरम् एतां घटनाम् अव्ययवयसा वृद्धपक्षिणां वदनेभ्यः। दुःसहेति। दुःसहः सोढुमशक्यः कृपाया हरणेन तिरस्कारः अधिक्षेपः यस्य तथाभूतः सन् पुत्रवधूहरणेन नितान्तमवमानित इत्यर्थः।

* यत्नान्तर इति। यत्नान्तरे इत्यवसरे आमूलं विस्तृतं पतत्रपुटे पक्षपुटे येन तथाभूतः जटायुः विदशैः देवैः वक्रं कुटिलं यथा तथा विमुच्यमानः परिहार्यमाणः दृशाम् गोचरो यस्य देवानामपि भया-

ताभ्यां वन्ध्यमरुणतनयो रोदसी पक्षतिभ्यां
जातो योद्धुं त्रिभुवनरिपोरग्रतो रावणस्य ॥ ६५ ॥ (क)

दशरथः। किमुच्यते सम्पातिसहोदरो मन्त्रितमाकर्णि-स्मि। ततस्ततः?।

राक्षसविदूषकः। ततस्ताभिहितमभिमानोद्धुरं (ख) गृध्रराजेन।

सम्प्राप्तोऽहं जटायुर्मलयगिरिगुहाकन्दरक्रोडनीड-
डः! सीतापहारिन्! बिभृहि करवरे कुत्रचिच्चन्द्रहासम्।
येन त्वत्कृत्तचूडारुणमणिनिकरं मल्लचञ्चूग्रतुण्ड-
व्यापारैः स्रंसमानं सपदि शकुनयो मांसगर्धा ग्रसन्ताम्॥(ग)

र्थ इति भावः। तथाभूतस्य रजनीचरभर्त्तुः रावणस्य अग्रे पुरतः मार्गप्रस्थानं निरुध्य आच्छाद्य गगनावगाहि कृतवान् नभोमण्डलात् अवतीर्णवान्। वसन्ततिलकवृत्तम्।

(क) यदिति। ययोः पक्षयोः कृत्ते संवरणे अयं दिनमणिः भास्वान् वासरस्य दिवसस्य एककर्त्ता भवतीति शेषः, ययोः विस्तारे जीवलोकः रजन्या रञ्जितः मन्त्रोषितः भवति ययोः पक्षयोः वस्तुतः विस्तारौ दिवसरजन्योः कारकावित्यर्थः अरुणतनयः जटायुः ताभ्यां पक्षतिभ्यां पक्षाभ्यां रोदसी द्यावापृथिव्यौ रुन्धन् आवृण्वन् त्रिभुवनरिपोः रावणस्य अग्रतः योद्धुं जातः प्रवृत्तः। मन्दाक्रान्तावृत्तम्।

(ख) अभिमानोद्धुरम् अहङ्कारोर्जितम्।

(ग) सम्प्राप्त इति। मलयगिरेर्गुहाकन्दरं गुहाभ्यन्तरमेव क्रोडः स एव नीडः कुलायः यस्य तथाभूतः मलयाचलगुहावासीत्यर्थः जटायुः अहं सम्प्राप्तः उपस्थितः, तत् तस्मात् भोः सीतापहारिन्! कुत्रचित् करवरे प्रधानहस्ते चन्द्रहासं खड्गं गृहीत्वा मया सह युध्यस्वेति भावः। येन हेतुना मांसगर्धाः मांसलोलुपाः शकुनयः पक्षिणः मम इमे मल्लाः मटोत्काः चञ्चवः अतितीक्ष्णाः उग्राः भीषणाः ये तुण्डव्यापाराः चञ्चु-

रामः। अहो ! निरुपममोजायितं (घ) वेगविजित-वायोर्जटायोः।

कौशल्या। भअवदि सङ्गामसिरि ! जई भोदु तत्तभवं जडाऊ। तदो तदो ? (५१)।

रत्नशिखण्डः। तत्सर्वैरेवास्माभिरकणगरुडान्वयप्रसवैः शकुन्तिभिरन्तरितस्तातजटायुर्योद्धुं चारब्धं ततश्च।

कर्णाभ्यर्णेष्वलिकफलकेष्वायते नेत्रतन्त्रे
नासावंशेष्वधरपुटकेष्वंसवक्षःस्थलीषु।
यो यो भागः सुरपतिरिपोः स्वामिना स्पृष्ट आसीत्
तं तं गृध्राः कवलकलितं लूनवन्तो नखाग्रैः ॥ ६० ॥ (ङ)

ततश्च सकलैरेव शकुन्तिवीरैराकुलितेन राक्षसराजेन

---

भगवति संग्रामश्रीः ! जयी भवतु जटायुः। ततस्ततः ? ।

---

...ानि तैः सपदि सहसा संममानं तत्र कृतुन्नानां चुडासि...नाम् ...मणीनां पद्मरागाणां निकरं समूलं पतन्तां मांसमुष्ट्या भक्षयन्...ः।

(घ) वेगेति। वेगेन जवेन बलेनेति यावत् विजित वायुः येन तथाभूतस्य अन्तरितः परिहृतः।

(ङ) कर्णेति। सुरपतिरिपोः इन्द्रारेः रावणस्य कर्णानामभ्यर्णेषु समीपेषु अलिकफलकेषु ललाटपट्टेषु आयते विशाले नेत्रयोः तन्त्रे विभागे नासावंशेषु अधरपुटकेषु अंसवक्षःस्थलीषु स्कन्धेषु उरःस्थलेषु च यो यः भागः स्वामिना पक्षिराजेन स्पृष्टः विद्धः आसीत् गृध्राः तं तं भागं नखाग्रैः कवलकलितं ग्रासीकृतं यथा तथा लूनवन्तः छिन्नवन्तः। मन्दाक्रान्ताछन्दः।

चन्द्रहासव्यापारेणास्माभिमुखं प्रवृत्तं हन्यमानेषु च महापतत्रिभटेषु जटायुना पुनः सर्वे वयमन्तरिताः । (च)

ततश्च ।

चित्रे तत्र पतत्त्रिशाचररणे नाङ्गं जटायोरभू-
न्नो कृत्तं दशकन्धरेण कणशो यच्चन्द्रहासासिना ? ।
लङ्काभर्त्तुरपि प्रचण्डकुलिशव्यापारनीराजितं
यत्तुण्डेन न खण्डितं खगपतेर्यद्वा न लूनं नखैः ? ॥ ६८ ॥ (छ)

कौशल्या । भअवदि ! सङ्गामसिरि ! मुञ्चदु सीदां बन्दि-ग्गहादो (५२)

दशरथः । ततस्ततः ? ।

रत्नशिखण्डः ।

तदनु दिवि जटायुश्चञ्चुसन्दंशमुद्रा-
कवलनविधिवेगप्रस्खलच्चन्द्रहासः ।

(५२) भगवति संग्रामश्रीः ! मुञ्चतु सीतां बन्दिग्रहात् ।

(च) अन्तरिता पश्चात् कृताः ।

(छ) चित्रे इति । तत्र तस्मिन् चित्रे अद्भुते पतत्त्रिशाचररणे पक्षिराक्षससंग्रामे जटायोः अङ्गं शरीरं दशकन्धरेण रावणेन चन्द्रहासासिना यत् कृत्तं खण्डितं नो अभूत् इति न, खण्डितमभूदेवेत्यर्थः । यस्य खगपतेः जटायोः तुण्डेन लङ्काभर्त्तुः रावणस्यापि प्रचण्डेन तीक्ष्णेन कुलिशव्यापारेण वज्रप्रहारेण नीराजितम् अलङ्कृतं शरीरं न खण्डितम् ? यद्वा नखैः न लूनं छिन्नम् ? अपितु खण्डितं छिन्नञ्चेत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ।

दशभिरपि नखाग्रैर्दिग्गजेन्द्राङ्कुशाभैः

सपदि दशमुखानि प्राद्रवद्रावणस्य ॥ ६९ ॥ (ज)

दशरथः । साधु गरुडाग्रज ! साधु साधु दिनमणिसारथे ! साधु जटायुना पुत्रेण ।

कौशल्या । तं कदं अज्ज जटाउणा जं सहिसुसाहरणं (झ) कीरदि । तदोतदो ? (५३)

नेपथ्ये । ततश्च ।

द्राक्चन्द्रहासपरिखण्डितचञ्चुकोटि-

श्चञ्चुप्रहारपरिखण्डितचन्द्रहासः ।

नाडिंध्वमे तडिति कण्ठतटे स तेन

कुन्तेन कुन्तनखरः प्रहतः शकुन्तः ॥ ७० ॥ (ञ)

---

(५३) तत् कृतं जटायुना यत् सखिस्नुषापहरणे कीर्त्यते । ततस्ततः ?

---

(ज) तदिति । तदनु तदनन्तरं जटायुः चञ्चुसन्दंश एव मुक्ता-व्यापारः स एव कवलनविधिः ग्रासविधानं तेन प्रस्खलन् चन्द्रहासः यस्य तथाभूतः चञ्चुदंशनेन चन्द्रहासं प्रस्खलयन्निति यावत् दिग्गजेन्द्राणाम् ऐरावतानाम् अङ्कुशाभैः शासनदण्डनिभैः दशभिरपि नखाग्रैः सपदि शीघ्रं रावणस्य दशमुखानि प्राद्रवत् अखण्डयत् । मालिनीवृत्तम् ।

(झ) सखिस्नुषाहरणे सख्युः स्नुषाया हरणे ।

(ञ) द्रागिति । तेन रावणेन कुन्ता अस्त्रविशेषा इव नखरा यस्य तथाभूतः स शकुन्तः जटायुः द्राक् झटिति चन्द्रहासेन परिखण्डिता चञ्चुकोटिर्यस्य तथाभूतः । चञ्चुप्रहारेण परिखण्डितः विध्वंसितः चन्द्रहासो येन तथाविधः सन् कुन्तेन अस्त्रेण नाडिं कण्ठ-

# अथ सप्तमोऽङ्कः ।



अतः परमसमपराक्रमो भविष्यति ।

ततः प्रविश्य वैतालिकः समन्तादवलोक्य नेपथ्यं प्रति । भद्र चन्द्रमचण्ड ! परित्यज निद्रामुद्रां (क) विमुञ्च त्रिकोटजाभ्यन्तरं प्रभातप्राया रजनी तथाहि ।

ताराणां तगरत्विषां परिकरः सङ्ख्येयशेषः स्थितः
स्पर्द्धन्तेऽस्तरुचः प्रदीपकशिखाः सार्द्धं हरिद्राङ्कुरैः ।
मन्त्रस्तम्भितपारदद्रवजडो जातः प्रगे चन्द्रमाः
पौरस्त्यञ्च पुराणसीधुमधुरच्छायं नभो वर्त्तते ॥ १ ॥ (ख)

---

(क) निद्रामुद्रां निद्रया निमीलनम् ।

(ख) ताराणामिति। प्रगे प्रभाते तगरवत् त्विट् कान्तिः यासां तथोक्तानां ताराणां नक्षत्राणां परिकरः निचयः संख्येयः गणनीयः शेषः यस्य तथाविधः अल्पावशिष्ट इत्यर्थः स्थितः। प्रदीपकानां शिखाः अस्तरुचः विगतप्रभाः सत्यः हरिद्राङ्कुरैः प्ररोहैः सार्द्धं एव स्पर्द्धन्ते । चन्द्रमाः मन्त्रेण स्तम्भितः निश्चलीकृतः यः पारदद्रवः तद्वत् जड़ः निष्प्रभ इत्यर्थः पौरस्त्यं पूर्वदिग्वर्त्ति नभः आकाशं पुराणसीधुवत् मधुरा मनोज्ञा छाया कान्तिर्यस्य तथाभूतं वर्त्तते । शार्दूलविक्रीड़ितं वृत्तम् ।

नेपथ्ये । अज्ज कप्पूरचण्ड ! एसा मिठ्ठा (ग) पभादनिद्दा ता सुविस्सं दाव (१)।

कर्पूरचण्डः। अहो ! उत्साहशक्तिमेवतोऽमन्त्रशीलो (घ) महीपतिरपरप्रबन्धदर्शी कविरपाठकश्चि वन्दी न चिरं नन्दति।

नेपथ्ये। ता एत्थ संत्थरत्थिदो (ङ) णिमीलिदणयणो जेव्व सुप्पभादं पठिस्सं (२)।

कर्पूरचण्डः। एतदपि भवतो भूरि (च)।

नेपथ्ये। सव्वं (छ) पच्चक्खीकिदसरस्सईपरिमलो वम्हा मुहुत्तो वट्टदि तधा अ (३)।

---

(१) आर्य कर्पूरचण्ड ! एषा मिष्टा प्रभातनिद्रा तत् स्वप्स्यामि तावत्।

(२) तदत्र संस्तरस्थितो निमीलितनयन एव सुप्रभातं पठिष्यामि।

(३) सत्यं प्रत्यक्षीकृतसरस्वतीपरिमलो ब्राह्मो मुहूर्त्तो वर्त्तते तथा च।

---

(ग) मिष्टा मनोज्ञा सुखकरीति यावत्।

(घ) अमन्त्रेति। मन्त्रयतीति मन्त्रं शीलं स्वभावो यस्य स न भवतीति अमन्त्रशीलः। अपरप्रबन्धं द्रष्टायानिति अपरप्रबन्धदर्शी। अपाठेति। पाठे रुचिर्यस्य स न भवतीति अपाठरुचि, अध्ययनानासक्तः वन्दी स्तुतिपाठकः स्तुतिपाठकानां सततमध्ययनं प्रयोजनं नो चेत् स्तुतिभङ्गः स्यादिति भावः।

(ङ) संस्तरस्थितः शय्यास्थितः। सुप्रभातं प्रभातपठनीयमीश्वरस्तोत्रादिकमित्यर्थः।

(च) भूरि प्रचुरम्।

(छ) प्रत्यक्षीकृतेति। प्रत्यक्षीकृतः दृष्टः सरस्वत्याः परिमलः

जा गब्भे वि घरस्स दीवअसिहा सा वि च्छविच्छुड्डिआ
जं दण्डाहिं वि खण्डिदं कुवलयं संमीलिदं तं वि अ ।
जं गोठ्ठीचरिदं वि तं वि सहसा भासाए सव्वङ्गिदं
ता मस्से ण चिरा भविस्सदि रई पुव्वादिसोमण्डणम् ॥२ (ज)

कर्पूरचण्ड. । तावदुपश्लोकयामो (झ) रामभद्रं परप-
रितोषोपपाद्यफलं हि वैतालिकव्रतम् । किञ्चिदुच्चैः ।

मार्तण्डैककुलप्रकाण्डतिलकस्त्रैलोक्यरत्नामणि-
र्विश्वामित्रमहामुनेर्निरुपधिः शिष्यो रघुग्रामणीः ।
रामस्ताडिततातडकः किमपरं प्रत्यक्षनारायणः
कौशल्यानयनोत्सवो विजयतां भूकश्यपस्यात्मजः ॥३॥ (ञ)

---

या गर्भेऽपि गृहस्य दीपकशिखा साऽपि छविमुक्ता
यद् दण्डादपि खण्डितं कुवलयं सम्मीलितं तदपि च ।
यद् गोष्ठीचरितमपि तदपि सहसा भाषया सर्वाङ्गीणं
तन्मन्ये न चिराद् भविष्यति रविः पूर्वदिशो मण्डनम् ॥

---

सौरभं यस्मिन् तथाविधः ब्राह्मः ब्रह्मदैवतः मुहूर्त्तः दण्डद्वयात्मकः कालः
अरुणोदयात् प्रागवर्त्ती दण्डद्वयात्मकः कालः ब्राह्मो मुहूर्त्त इत्यर्थः ।

(ज) गृहस्य गर्भे अभ्यन्तरेऽपि या दीपकानां शिखा, सापि छवि
मुक्ता कान्तिवर्जिता निष्प्रभेत्यर्थः । यत् कुवलयं नीलोत्पलं दण्डादपि
प्रागितिशेषः खण्डितं विदलितं तदपि सम्मीलितं दिवसे उत्पलानां
सङ्कोचस्य कविसमयसिद्धत्वादिति भावः । गोष्ठीचरितमपि यत् तदपि
भाषया सर्वाङ्गीणं सर्वाङ्गपूर्णम् ।

(झ) उपश्लोकयामः श्लोकेन स्तुमः । परपरितोषेण उपपाद्यं
सम्पाद्यं फलं जीविकादिरूपं यत्र तादृशं वैतालिकानां व्रतं नियमः ।

(ञ) मार्त्तण्डेति । मार्त्तण्डस्य सूर्यस्य यत् एकं मुख्यम् एके

नेपथ्ये ।

कन्दप्पुद्दामदप्पप्पसमणगुरुणो बम्हणो कालदण्डे
पाणिं देन्तस्स गङ्गातरलिदससिणो पव्वदीवल्लभस्स ।
चावं चण्डाहिसिञ्जारवभरिअणहं कड्ढणाकण्डमज्झं
जं भग्गं तस्स सद्दो णिसुणि तिहुयणे वित्थरन्तो न माइ(ट)॥ ४

(४) कन्दर्पोद्दामदर्पप्रशमनगुरोर्ब्रह्मणः कालदण्डे
पाणिं दातुर्गङ्गातरलितशशिनः पार्वतीवल्लभस्य ।
चापं चण्डाहिशिञ्जारवभरितनभः कर्षणाकाण्डमध्यं
यद् भग्नं तस्य शब्दो निश्रूयते त्रिभुवने विस्तरन् न माति ॥

मुख्यान्यथेयमा इत्यमरः । कुलं तस्य प्रकाण्डं श्रेष्ठम् तिलकः ललाट-भूषणभूतः त्रैलोक्यस्य रक्षायां मणिः यथा मणिधारणे शरीरस्य व्याध्यादिभ्यो रक्षा स्यात् तथा रामरूपस्य मणेः त्रैलोक्यरूपस्य शरीरस्य रक्षाकारित्वमिति भावः । विश्वामित्रमहामुनेः शिष्यः निरु-पधिः अकपटः सरलान्तःकरण इत्यर्थः रघुग्रामणीः रघूणां रघुवंश्या-नां ग्रामणीः अध्यक्षः ताडिता निहता ताडका येन तादृशः किम-परम् अधिकं किं वक्तव्यमित्यर्थः प्रत्यक्षनारायणः साक्षात् विष्णुः कौशल्याया नयनोत्सवः नेत्रानन्दकारी भूकश्यपस्य दशरथस्य आत्मजः पुत्रः रामः विजयताम् सर्वोत्कर्षेण वर्त्तताम् । शार्दूलविक्रीडितं वृत्तम् ।

(ट) कन्दर्पस्य कामस्य यः उद्दामः उत्कटः दर्पः अहङ्कारः तस्य प्रशमने गुरुः आचार्यः तस्य कामस्य दमयितुरित्यर्थः ब्रह्मणः पद्मयोनेः कालदण्डे यमयष्टिरूपे दण्डे पाणिं दातुः ब्रह्मशिरश्छे-दकस्य इत्यर्थः गङ्गया शिरस्थितया इति भावः तरलितः कम्पितः शशी भासित इति भावः यस्य तादृशस्य पार्वतीवल्लभस्य हरस्य चण्डः प्रचण्डः अहिः वासुकिरेव शिञ्जा मौर्वी तस्या रवेण टङ्कारेण भरि-

कर्पूरखण्डः ।

यो जम्भं जितवान् स येन विजितो देवः सुरग्रामणी
र्ज्याबद्धं विदधे निशाचरपतिं तं कार्त्तवीर्य्यार्जुनः ।
तद्दोःखण्डदवानलो भृगुपतिर्निर्जित्य तस्य च त्वया
मालेयं जयसम्पदो विरचिता त्वस्मादनर्घे सरी ॥ ५ ॥(ठ)

नेपथ्ये ।

हेलासिञ्जिदसिञ्जिणीझणझणारावेण वीणाइदं
कोदण्डं तुह पाणिपीडणणदं जुम्भे णिअं ता खनम् ।
ते सव्वे खरदूसणप्पभुदिणो जीवेहिं मुक्का पुरो
पच्छा भल्लपवेल्लिएहिं सहसा देहेहिं भूमिं गदा(ड)॥ ६ ।

---

(१) हेलाशिञ्जितशिञ्जिनी झणझणारवेण वीणायितं

---

तम् आक्रान्तं नभः आकाशं यस्य तथाभूतं चापं धनुः कर्षणेन आक-र्षणेन आक्रद्धं मध्यं रोदसोरन्तरालं यस्मिन् तत् यथा तथा यत् भग्नं तस्य शब्दः मिश्रूयते अद्यापीति शेषः । यः त्रिभुवने विस्तरन् प्रतिध्व-निना विस्तारं गच्छन् न माति न पर्य्याप्नोति ।

(ठ) य इति । य सुराणां ग्रामणीः अधिपतिरिन्द्रः जम्भम् असुरं जितवान् स देवः तेन निशाचरपतिना रावणेन विजितः, तं निशाचरपतिं कार्त्तवीर्य्यार्जुनः ज्यया मौर्व्या बद्धं विदधे कृतवान् । भृगुपतिः परशुरामः तस्य कार्त्तवीर्य्यस्य दोःखण्डानां भुजदण्डानां सहस्रस्येति शेषः । दवानलः दावाग्निः । परशुरामः तस्य सहस्रं बाहून् चिच्छेदेत्यर्थः । हे राम ! त्वया तस्य अजेयमिति भावः भार्गवं निर्जित्य त्वस्मात् विक्रमादिति भावः अनघे सरी अघ्यं सरजिता सर्वोपरि वर्त्तिनीत्यर्थः जयसम्पदो विजयलक्ष्मीरूपा इयं माला विर-चिता सर्वविजयी भवानिति भावः । शार्दूलविक्रीडितं वृत्तम् ।

(ड) तुह तव तनुत्वं पाणिपीड़नेन पाणिनाकर्षणेनेत्यर्थः न

कर्पूरवर्षः ।

जात्यन्धत्वमधिष्ठितं सपदि तैर्दत्तं जलं तैर्दृशो
दृष्टिं सृष्टवतो विधेर्भगवतः क्लेशश्च तैर्भावितः ।
येषां ताडयितुं स्थिते त्वधिजवान्मारीचमायामृगं
द्राग्दैवादनुपेयुषां दिविषदां जाते वृथा चक्षुषी ॥७॥ (ढ)

अपि च ।

नाद्याप्यस्ति तदीययोर्नयनयोः सङ्कोचदुःस्थं वपु-
स्तेषां गण्डतटे स्फुटत्पुलकता नाद्यापि विश्राम्यति ।

कोदण्डं तव पाणिपीडनजनं युद्धं निजं तत्क्षणम् ।
ते सर्वे खरदूषणप्रभृतयो जीवैर्विमुक्ताः पुरः
पश्चात् भक्तप्रपेक्षितैः सहसा देहैर्भूमिं गताः ॥

निजं कोदण्डं कार्मुकं ज्येनया शिञ्जितायाः शिञ्जारवं कारितायाः शिञ्जिन्या मौर्व्या झणझणारवेण धाणाविरं धाणयेनाचरितम् । पुरः अग्रतः ते सर्वे खरदूषणप्रभृतयः जीवैः विमुक्ताः प्राणैः परित्यक्ताः तव शरप्रहारेणेति शेषः । पश्चात् भक्तेन अन्तर्विशेषेण प्रपेक्षितैः चिह्नैः देहैः भूमिं गताः ।

(ढ) जात्यन्धत्वमिति । अधिजवात् अधिकं जवमाश्रित्य यवार्थे पञ्चमी । मारीचमायामृगं ताडयितुं निहन्तुं स्थिते प्रवृत्ते रामे त्वयीति शेषः । येषां दिविषदां द्राक् झटिति दैवात् अनुपेयुषाम् अनुपस्थितानां मारीचवधदर्शनार्थमिति भावः चक्षुषी वृथा विफले जाते, तैः दिविषद्भिः सपदि जात्यन्धत्वं जन्मान्धता अधिष्ठितम् आश्रितं तैः दृशो चक्षुषे जलं दत्तं तैः दृष्टिं सृष्टवतो भगवतः विधेः क्लेशश्च भावितः चिन्तितः दृष्टिनिर्माणे विधातुर्भूयान् क्लेशः, अतः अस्माकं

ते नाद्यापि वहन्ति दर्पणतया रिक्तं च चेतो निजं
दृष्टं देव! कबन्धदैत्यनिधनं यैस्त्वत्कृतं कौतुकात्॥८॥(ण)

नेपथ्ये।

पुञ्जीभूदहरट्टहासजइणा रूपेण कट्टं वरं
खीणं वालिजसं व दुन्दुभिमहाकङ्कालसेसं जहा
पव्भन्ता चलणेन विञ्झगिरिणो हिल्लायिदं तं तुए
अम्हे एव्व दुवे परं ण हु गदा वेरी वि वन्दित्तणम् (त)॥९॥

(त) पुञ्जीभूतहराट्टहासजयिना रूपेण कष्टं वरं
क्षीणं वालियशश्च दुन्दुभिमहाकङ्कालशेषं यथा।
प्रभ्रमता चरणेन विन्ध्यगिरेर्हिल्लायितं तत् त्वया
आवामेव द्वौ परं न खलु गतौ वैरिणावपि वन्दित्वम्॥

इच्छा अलमिति निर्वेदितमित्यर्थः। तव मायामृगवधव्यापारः कङ्क… इति रामस्तुतिर्बोद्धव्या। शार्दूलविक्रीडितं वृत्तम्।

(ण) नेति। हे देव! यैः त्वया कृतं विहितं कबन्धस्य दैत्यस्य निधनं कौतुकात् दृष्टम् अद्यापि तदीययोः तेषां समग्रविभोर्नयनयोः सङ्कोचेन दुःस्थं वपुः शरीरं न अस्ति? अपि तु अस्त्येवेत्यर्थः दृष्टमर्मपि तेषां दृक्सङ्कोचस्य नेष्टत्वादिति भावः। अद्यापि तेषां तद्दर्शिन इत्यर्थः गण्डतटे कपोलतले स्फुटत्पुलकता रोमाञ्चविकासः विश्राम्यति। अद्यापि ते तद्दर्शिन इत्यर्थः निजं चेतः दर्पणतया वा आश्चर्यत्वेन रिक्तं रहितं न वहन्ति च। शार्दूलविक्रीडितं वृत्तम्।

(त) पुञ्जीभूतः राशीभूतः हरस्य यः अट्टहासः तज्जयिना रूपेण शरीरेण कष्टम् आहतं मूर्त्तिमान् हराट्टहास इवेत्यर्थः वरं श्रेष्ठं वा यथः वालिनः कपिराजस्य यशः क्षीणं लुप्तं यथा यतः त्वया तस्य तद्यशसि आविर्भावे प्रत्यभुमवक्लृप्तमिति भावः। दुन्दुभेः दैत्यस्य वा…

अपि च ।

लीलामुक्कक्कबाणव्वणविवरगुहामज्झमुच्छन्तवाआ
जाआ जे सत्त ताला तिहुअणजइणो चावचारेण तुज्झ ।
णिच्चं गाअन्ति हेलाभरिदणहअलब्भन्तरं ताररावा
सत्तेहिं तेण तेहिं तुह जसपसरं सत्तलोअट्ठिदव्व(व) ॥१०॥

कर्रवमडः ।

(१०) अपि च

लीलामुक्तैकबाणव्रणविवरगुहामध्यमूर्च्छद्वाता
जातास्ते सप्ततालास्त्रिभुवनजयिनश्चापचारेण तव ।
नित्यं गायन्ति हेलाभरितनभस्तलाभ्यन्तरं ताररावाः
सप्तभिस्तैस्तैस्तव यशः प्रसरं सप्तलोकस्थितमिव ॥

निहतस्य इति भावः । यः महान् कङ्कालः अस्थिचयः तस्य शेषं जीर्णा वशिष्टं प्रक्षिपता सता विन्ध्यगिरेः हेलायितम् अवहारं तत्कङ्कालस्य विन्ध्यगिरितुल्यत्वादिति भावः । परं केवलम् आशामिव द्वौ वैरिणा- विव गतः इव वन्दितं न खलु गतौ प्राप्तौ स्वभाववन्दित्वात्तयोरिति भावः ।

(१०) लीलेति । त्रिभुवनजयिनस्तव चापचारेण धनुर्व्यापारेण ते प्रसिद्धाः सप्त तालाः तालतरवः लीलया मुक्तस्य निक्षिप्तस्य एकबाणस्य व्रणेन प्रहारेण यत् व्रणं तस्य विवरमेव गुहा तस्य मध्ये मूर्च्छन्तः प्रविशन्तः वाताः येषां तथाभूता जाताः । तेन वायुप्रवेशेन जनिता इति शेषः ताराः महान्तः रावाः स्वनाः तैः सप्तभिः तालैः हेलया अनायासेनैव भरितं नभस्तलाभ्यन्तरं येन तादृशं सप्तलोकस्थितमिव तव यशःप्रसरं नित्यं गायन्ति ।

पौलस्त्यस्यावमन्ता त्रिदशपतिसुतश्चक्रवर्त्ती कपीनां
कर्त्ता सन्ध्यासमाधेर्जलनिधिषु चतुर्दिङ्निकुञ्जाश्रितेषु ।
किष्किन्ध्यां राजधानीं भुजपरिघबलात्रायमाणस्त्वयाऽसौ
वाली हैमाब्जमाली गुणनिधिरिषुणा निर्मितो दक्षिणेर्मा॥(ट)

नेपथ्ये ।

जे केलासे कलिन्दे मलअमहिहरे मन्दरे मेरुसेले-
सह्ये विंझे महेन्दे तह अ हिमवहे पव्वदे वाणरेन्दा ।
सव्वे सुग्गीवपादप्पणदिपणइणो ते वि जं स प्पसादो
सेवात्तुट्ठस्स मज्झं तुह जसजलधेर्भूलदावेल्लिदाणम्(ध)॥१२।

(१२) ये कैलासे कलिन्दे मलयमहीधरे मन्दरे मेरुशैले
सह्ये विन्ध्ये महेन्द्रे तथा च हिमवद्दे पर्वते वानरेन्द्राः ।
सर्वे सुग्रीवपादप्रणतिप्रणयिनस्तेऽपि सत् स प्रसादः
सेवातुष्टस्य मह्यं तव यशोजलधेर्भूलतावेल्लितानाम् ॥

(ट) पौलस्त्यस्येति । त्वया भुजपरिघबलात् बाहुबलमाश्रित्येत्यर्थः
पौलस्त्यस्य रावणस्य अवमन्ता विजेता त्रिदशपतिसुतः इन्द्रपुत्रः
कपीनां वानराणां चक्रवर्त्ती चतुर्दिङ्निकुञ्जाश्रितेषु जलनिधिषु समुद्रेषु
सन्ध्यासमाधेः कर्त्ता सन्ध्योपासनकारी किष्किन्ध्यां राजधानीं त्राय
माणः रक्षिता हैमाब्जमाली स्वर्णकमलमालाधारी गुणनिधिः अतीव
गुणाकरः वाली इषुणा शरेण दक्षिणेर्मा दक्षिणे दक्षिणाङ्गे इर्म
व्रणं यस्य तादृशः विद्धदक्षिणाङ्ग इत्यर्थः निर्मितः कृतः निहत इत्यर्थः
वाल्मीकिरामायणम् ।

(ध) ये इति । ये वानरेन्द्राः कैलासे कलिन्दे मलयमहीध्रे
मन्दरे मेरुशैले सह्ये विन्ध्ये महेन्द्रे तथा हिमवद्दे पर्वते हिमालये

अपूं रचस्थः ।

भीमं यज्जलधिं जवेन हनुमानुत्तीर्य लङ्कां गतो
यच्चाशोकमहावनं दलितवानक्षं च यत् क्षुण्णवान् ।
सीतोपायनमौलिरत्नसहितः प्राप्तश्च यत् त्वामसौ
तत्राप्येष भवत्प्रभावमहिमा निर्यन्त्रणः कारणम् ॥१३॥(न)

नेपथ्ये ।

किं अण्णेहिं विराधप्पहुदिविदरणाडंबरुग्घट्टणेहिं
एदं दे वण्णमामो जलणिहिसविहावासिदे जं तुमम्मि ।
वहन्ते रक्खसीणं तरलकरदलप्फारतुट्टन्तहारा
हारावक्कन्तकण्ठाणवणअणजलुप्पीलिणो विप्पलावा ॥१४॥(प)

(१४) किमन्यैर्विराधप्रभृतिविदरणाडम्बरोद्घाटने-

व स्थिता इति शेषः । ते सर्वेऽपि यत् सुग्रीवस्य पादप्रणतो प्रणयिनः सुग्रीववशवर्त्तिन इत्यर्थः जाता इति शेषः सः सेवानुदृष्ट वर्गोजलधेः कीर्त्तिनिधेः तव सत्त्वं तत्त्वतः भ्रूलतायां वेल्लितानां भ्रूभङ्गानामित्यर्थः प्रसादः अनुग्रहः । तवैव भ्रूभङ्ग्या सर्वे वानराः सुग्रीवमनुवर्त्तन्ते इति भावः ।

(न) भीममिति । असौ हनुमान् भीमं भयानकं जलधिम् उल्लङ्घ्य जवेन वेगेन यत् लङ्कां गतः, यत् अशोकं महावनं दलितवान् बभञ्ज, यत् अक्षं रावणसुतं क्षुण्णवान् निर्जघान, यत् सीताया उपायनेन मौलिरत्नेन चूडामणिना सहितः सन् त्वां प्राप्तः तत्रकार्यसमुपस्थितः तत्रापि एष निर्यन्त्रणः निर्बाधः अप्रतिहत इत्यर्थः भवतः प्रभावमहिमा प्रभुशक्तिः कारणम् । तवैव प्रभुशक्त्या हनुमान् तत्तत् कार्यं निर्वोढवानिति वाक्यार्थः । शार्दूलविक्रीडितं वृत्तम् ।

(प) किमिति । एतत् अन्यैः अपरैः विराधप्रभृतीनां विदरणस्य

कर्पूरचण्डः।

नानानिर्व्याजवीर्य्यस्तुतिशतसदृशं कुम्भकर्णानुजोय-
द्राग्देवेनाभिषिक्तो रजनिचरमहाराज्यलाभाय तेन।
लङ्केन्द्रस्यापि जातान्यतिनिभृतसृतश्वासबन्धावधूत-
श्मश्रुश्रेणीनि चिन्तामुकुलितनयनस्रञ्जि सर्वाननानि॥ १५

एतत्ते वर्णयामो जलनिधिसविधावासिते यत् त्वयि।
वर्त्तन्ते राक्षसीनां तरलकरतलस्फारतुट्यद्धारा
हाहारावाक्रान्तकण्ठा नवनयनजलोत्पीडिनो विप्रलापाः॥

य आडम्बरः समुद्योगः तस्य उद्घाटनैः कीर्त्तनैः ते नव किं याम. ? त्वयि जलनिधेः सविधे समीपे आवासिते कृतावस्थाने राक्षसीनां तरलानां चपलानां करतलानां स्फारेण वक्षसि ता त्रुट्यन्तः हाराः येषु तथाविधाः हा रावैः हाहा इति शोकध्वनि आक्रान्तः कण्ठो येषु तथाभूताः. नवं नूतनम् अपूर्वमित्यर्थः न जलानाम् उत्पीडनं येषु तादृशाः. विप्रलापाः. विशेषेण प्रलापाः. इति शेषः।

(क) नानेति। देवेन रामेण कुम्भकर्णानुजः विभीषणः रज चराणां राक्षसानां महाराज्यस्य लाभाय नाना अशेषं निर्व्याजं नि पटं यत् वीर्य्यं रामस्येति भावः। तस्य स्तुतिशतस्य प्रशंसानानि सदृशम् अनुरूपं यथा तथा द्राक् झटिति यत् अभिषिक्तः, तच्छ्रवणेनेत्यर्थः लङ्केन्द्रस्यापि सर्वाणि आननानि अतिनिभृतं अलक्षितमित्यर्थः यथा तथा सृतेन निर्गतेन श्वासबन्धेन निश्वास न्धेन अवधूताः कम्पिताः श्मश्रूणां श्रेणयः येषां तादृशानि चिन्तया मुकुलिता नयनान्येव स्रजः येषां तथाभूतानि जात न्यग्रावणम्।

प्रविश्य। पटीक्षेपेण प्रतीहारः। रेरे अलीकवैतालिक! कोऽयं कलकलः।

कर्पूरखण्डः। आर्य! रामदेवस्य शौर्य्यगुणभोगावली गीयते।

प्रतीहारः। ननु रामदेवेन निषिद्धमात्मोपवर्णनमादशरथस्वर्गारोहणश्रुतेरादशकण्ठनिधनम् (ब)।

कर्पूरखण्डः। (भ) विभीषणवैतालिको वैदेशिकोऽस्मि। तदेकवारं मर्षय एष त्यक्तो भोगावलीपाठः। सप्रश्रयम्। कथं पुनरधिगतपितृमरणशोकशङ्कुस्तत्रभवान् रामदेव एवंविधे समुद्योगकर्मणि प्रवर्त्तते

प्रतीहारः। विहस्य। अयि! अनभिज्ञोऽसि सच्चरितानाम्।

वहन्ति शोकशङ्कुं च कुर्वन्ति च यथोचितम्।
कोऽप्येष महतां हन्त गाम्भीर्यानुगुणो गुणः॥१६॥ (म)

बन्दी। आर्य! कोपेनान्तरितोऽसि (य)। कथय किं पुनः कुरुते रामभद्रः।

---

(ब) आत्मोपवर्णनम् आत्मनः उपवर्णनम् उपश्लोकनं स्तुतिरित्यर्थः। आ दशरथेति यावत् पितृस्वर्गारोहणं तावदारभ्य दशकण्ठनिधनं यावत् आत्मस्तुतिं निषिद्धवानिति वाक्यार्थः।

(भ) विभीषणवैतालिकः विभीषणो नाम स्तुतिपाठकः वैदेशिकः भिन्नदेशीयः। भोगावलीपाठः स्तुतिमालाकीर्त्तनम्।

(म) वहन्तीति शोकशङ्कुं वहन्ति च यथोचितं कर्त्तव्यं कुर्वन्ति च महान्त इति शेषः हन्त हर्षे, महताम् एषः कोऽपि अनिर्वचनीयः गाम्भीर्यानुगुणः गाम्भीर्यनिबन्धनः गुणः प्रभाव इत्यर्थः।

(य) अन्तरितः वियोजितः, इदानीं कोपशून्योऽसीत्यर्थः।

प्रतीहारः। पुलिनोपरि (र) रचितकुशप्रस्तरोपविष्ट
उपोषितश्च भगवन्तं भागीरथीवल्लभमुपास्ते। तत्र च।

सुग्रीवे प्रणयोल्लसाः प्रमधरे बद्धाभ्यसूयाश्चिरं
साश्चर्य्याः पवनात्मजे धृतरुषः पौलस्त्यवत्यां दिशि।
सोत्साहाश्च शरासने जलनिधौ क्षुब्धाश्च कृत्स्नां निशां
रामस्याथ नियन्तुमेव न गता नानारसा दृष्टयः॥ (ल)

मन्त्री। आर्य्य! एवमपि समुद्रो न किञ्चित्प्रतिपद्यते।(व

प्रतीहार। जडराशिरसौ।

मन्त्री। तथाविधे उदन्वति किमाह रामदेवः?।

प्रतीहारः। इदं कथ्यते।

रामे तटान्तवसतौ कुशतल्पशायि-
न्येवं तु नाम भवतो भगवन्नवाज्ञा।

---

(र) पुलिनोपरि सागरसैकतोपरि रचिते कुशप्रस्तरे कुशाव उपविष्टः। भागीरथीवल्लभं समुद्रम्।

(ल) सुग्रीवे इति। अथ इदानीं रामस्य दृष्टयः सुग्रीवे कपिराजे प्रणयोल्लसाः सप्रणया इत्यर्थः प्रमधरे लक्ष्मणे चिरं बद्धा अभ्यसूया यासां तादृश्यः प्रमधरस्य विरहोद्दीपकत्वात् तत्र रोष इत्यर्थः पवनात्मजे हनुमति साश्चर्य्याः साद्भुताः, पौलस्त्यवत्यां दिशि यस्यां रावणस्तिष्ठति तस्यामित्यर्थः धृतरुषः सक्रोधाः शरासने धनुषि सोत्साहाः उत्साहिन्यः जलनिधौ क्षुब्धाः कथं उचितमुत्तरं दास्यतीति सक्षोभाः कृत्स्नां समग्रां निशां नियन्तुं नियमेन न गताः किंकर्त्तव्यबुद्धिविहीना इत्यर्थः अतएव नानारसाः विभिन्नभावाः जाता इति भावः।

* कृत्वा तदेहि सगरं च भगीरथं च
 दृष्टाऽद्य वा मम भजुच निशीमुखांच ॥ १८ ॥ (अ)

नन्दी। तर्हि लङ्घितो गोष्पदवत् समुद्रः।

प्रतीहारः। समन्तादवलोक्य। भोभोः(ब)सकलप्लवङ्गमयूथपतयः! समस्तगोलाङ्गूलसेना पतयः! निःशेषाच्छभल्लचमूपरिवृढ़ाश्च! किमिदमवीरजनोचितमाचरितं यद्राघवपरिहृतवेलावनालीनिवासकेलिभिः पराङ्मुखं पदात् पदमपक्रम्यते।

कर्परवलः। विलोक्य। कथमगणितनिजकुलक्रमाचारास्सद्वचनमप्यवधीरयन्तो (स) मकराकरं दुस्तरमवलोक्य यथागतं प्रस्थिता एव।

प्रतीहार। भवतु संस्थापयामि।

पीतोऽयं कलशोद्भवेन चुलुकं कृत्वैकमम्भोनिधि-
र्नो वेलामपि लङ्घते नियमितग्रासादयं वाडवात।

(अ) रामे इति। हे भगवन् सागर! तटान्ते पर्वतविशेषे तादृशे कुशतल्पशायिनि कृपाकरोपविष्टे रामे भवतः एवम् अनास्था अनादरः न भवतु। तत् तस्मात् सगरं भगीरथञ्च मत्पूर्वपुरुषं स्मृत्वा अद्य मम बहुच निशीमुखांच दृष्टा आगच्छ मम समीपमिति शेषः।

(ब) सकलेति। सकलाः नीचम् लाङ्गूलं येषां तादृशा वानराः तेषां सेना पतयः। निःशेषेति। निःशेषाणां समग्राणाम् अच्छभल्लानां चमूनां ताषां परिवृढ़ाः स्वामिनः। परिहृताः परित्यक्ताः वेलावनाल्यां सागरतटवर्त्तिन्यां वनपङ्क्त्यां निवासकेलयः क्रीड़ानिवासाः यैः तथाविधैः।

(स) अवधीरयन्तः अवजानन्तः।

कल्पान्तेषु वहत्ययञ्च विपुलं श्वभ्रावशेषं वपु-
स्तत्पूर्वाकलितेऽप्यमुत्र भवतां कोऽयं विषादोदयः ? ॥ (ङ)

किञ्च ।

अप्येकैकं पिबथ चुलुकं यद्यपां सैन्धवीनां
यद्येकैकं क्षिपथ जलधौ गण्डशैलोपलं वा ।
तेन श्वभ्रं भवति सकलोऽप्यम्बुराशिः स्थलं वा
तत् किं मिथ्या भजत विधुरं व्यस्ततन्द्राः कपीन्द्राः ! ॥ (च)

बन्दी । हंहो सुग्रीवप्रतीहार ! भवद्वचनमाकर्णयन्त

---

(ङ) पीतोऽयमिति । अयम् अम्भोनिधिः कलसोद्भवेन अगस्त्ये मुनिना एकं चुलुकं गण्डूषं कृत्वा पीतः । अयं नियमितः निर्द्धारित ग्रासो भक्ष्यं यस्य तादृशात् वाडवात् वेलां तटमपि न लङ्घते अतिक्रामति वाडवानलेन अभ्यन्तरवर्त्तिना तावतो जलौघस्य पीतत्व समुद्रस्य वेला अतिक्रमितुं न शक्यते इति भावः । अयं कल्पान्त प्रलयकालेषु विपुलं महत् वपुः शरीरं श्वभ्रावशेषं गर्त्तमात्रमयं वह च तदानीं जलशून्यत्वादिति भावः । तत् तस्मात् पूर्वैः पूर्वपुरु आकलिते ख्यातेऽपि अमुत्र अस्मिन् जलनिधौ भवतां कोऽयं विषाद उदयः । विषादो न कर्त्तव्य एवेति भावः । शार्दूलविक्रीडितं वृत्तम्

(च) अपीति । यदि एकैकोऽपि यूयं सैन्धवीनाम् अपां चुल गण्डूषम् एकमेकमिति शेषः पिबथ, यदि वा जलधौ एकैकं गण्ड शैलस्य उपलं प्रस्तरं क्षिपथ, तदा तेन एकैकगण्डूषपानेन वा पाषा निक्षेपेण सकलोऽपि समग्रोऽपि अम्बुराशिः श्वभ्रं विवरं वा स्थ भवति, तत् तस्मात् हे कपीन्द्राः ! व्यस्ततन्द्राः आलस्यपराः वि ... ... ... भजत । मन्दाक्रान्तावृत्तम् ।

सर्वेऽप्येते यूथपतयो जलनिधिवेलावनालीषु विहितोत्साहं व्यवस्थिताः।

प्रतीहारः। समन्तादवलोक्य।

नीलेन सैन्यपतिना भुजताड़नान्ते
मुक्तस्तथा किलकिलाध्वनिरेष रौद्रः।
अष्टापि वाञ्छति विरिञ्चिरसौ श्रवांसि
शङ्के यथा करयुगेन मुधा पिधातुम्॥ २१॥ (क)

धूम्रो विजृम्भणविदारितसृक्कदृष्ट-
दंष्ट्राङ्कुरक्रकचसम्पुटवक्त्रयन्त्रम्।
लाङ्गूलवेष्टितमयं मलयं महाद्रि-
मुत्पाद्य वाञ्छति निधौ पयसां निधातुम्॥ २२॥(ख)

यावत्त्रिविक्रमतनुं न हरिर्जहाति
तावत प्रदक्षिणपरिभ्रमणस्य कर्त्ता।

---

(क) नीलेनेति। नीलेन सैन्यपतिना भुजताडनान्ते करप्रहारान्ते एषः रौद्रः भीषणः किलकिलाध्वनिः तथा मुक्तः, यथा असौ विरिञ्चिः ब्रह्मा करयुगेन करयोः युगं चतुष्टयं तेन भुजचतुष्टयेनेत्यर्थः युगं युग्मे कृतादिषु इत्यभिधानात् अत्र युगशब्देन सत्यादियुगानां बोधनात् युगशब्दस्य चतुःसंख्याबोधकत्वमवगन्तव्यम्। अष्टापि श्रवांसि कर्णान् चतुर्मुखोवर्त्तीनीत्यर्थः मुधा पिधातुं रोद्धुं वाञ्छति इति शङ्के सम्भावयामि। वसन्ततिलकं वृत्तम्।

(ख) धूम्र इति। अयं धूम्रः नाम कपीन्द्रः विजृम्भणेन विदारिते ये सृक्कणी ताभ्यां दृष्टं दंष्ट्राङ्कुरक्रकचसम्पुटं वक्त्रयन्त्रं यस्मिन् तत् यथा तथा लाङ्गूलेन वेष्टितं महाद्रिं महाशैलं मलयम् उत्पाद्य पयसां निधौ निधातुं वाञ्छति। वसन्ततिलकं वृत्तम्।

यावन्न संक्रमविधिक्रममभ्युपाया-
त्कुम्भाधिपः किमपि कुप्यति वार्द्धकाय ॥ २३ ॥ (ग)

अभ्यङ्गदः कनकदारितपाकपाण्डु-
कर्पूरगर्भरजसां पटलेन सद्यः।
उच्चूर्णनं निजयशःपरिपाण्डुरेव
प्रस्वेदवारिशमनं कुरुते कुमारः ॥ २४ ॥ (घ)

आमोदभाजि वनमालिनि केसराख्ये
ताराप्रतिच्छवितरन्तःप्रविजृम्भमाणे।
लावण्यसम्भृतरसाम्बविशेषपङ्क्तौ
दृष्टं न केन कुमुदे कुमुदस्य रूपम् ॥ २५ ॥ (ङ)

---

(ग) यावदिति। बलिं वामनरूपधरो विष्णुः यावत् त्रिविक्रम-मनु विश्वव्यापकमूर्त्तिं न अङ्गीकरोति न परिगृह्णाति तावत् महर्षिप्र-[illegible] तस्य करे प्रदक्षिणीकरणस्य कर्त्ता वटा परिक्षिपन् कोऽपि, [illegible] विक्रमते च तावत् आत्मानं तं प्रदक्षिणीकरोतीति भावः। कुम्भाधिप [illegible] तावत् [illegible] [illegible] संक्रमणे [illegible] विधे [illegible] [illegible] [illegible] [illegible] वार्द्धकाय किमपि कुप्यति वार्द्धके [illegible] [illegible] न वेद् [illegible] [illegible] इत्याशीर्ति [illegible]। वसन्ततिलकं वृत्तम्।

(घ) अभ्यङ्गेति। कुमारोऽकूरोऽपि सद्यः [illegible] निजयश इव परिपाण्डुरं धवलं तेन कनकदारितानां पाकपाण्डुना परिपाक-[illegible] कर्पूराणां गर्भरजसाम् [illegible] पटलेन समूहेन प्रस्वेदवारिणः [illegible] [illegible] [illegible] कुरुते। [illegible] कर्पूरपरागेण [illegible] भावः। वसन्ततिलकं वृत्तम्।

(ङ) आमोदेति। आमोदभाजि [illegible] [illegible] [illegible]-

सैन्यः समुद्गलितनाद्यमखिलमङ्गु-
र्हृष्टो मनाक् कुतुकी द्विविदेन दृष्ट्वा ।
आदाय दन्तिमकरद्वितयं कराभ्यां
युद्धाय योजयति साम्प्रतमाद्रिगण्डम् ॥ २६ ॥ (ख)

यत्रैव वानरबलानि हसन् हनूमान्
मद्रोमवल्लिषु दृढं कृतावलम्बम् ।
येनैव सागरमहं लघु लङ्घयामि
स्थामापरैव समरं सह योजयामि ॥ २७ ॥ (ग)

किमि करणमाजि जयस्मार्थिनि च केसरादौ केसरनाम्ना वानर-पतिना सार्धं वर्तिते किष्किन्धभाजि च तारापते सुग्रीवस्य स्फुर-यत उन्नादादिमर्यं वन्दिकाघात प्रतिजृम्भमाणे कच्छ्राने विकसति च लाङ्गूलेन मस्तक नाम सुग्रीव तेन विधृतपूर्वी कपि मनोहरं कुरुते तदासौ वानरपतौ केन अनेन कुसरस्य उत्पतस्य रूप न दृष्टम् ? अपि तु सर्वैरेव दृष्टमित्यर्थः । अत्र संयामहार श्रिये रहंरवैवार्यभिधाने संध इष्यते इति लक्षणात् । वसन्ततिलक वृत्तम् ।

(ख) सैन्य इति । अयम् अभिद्रुतु अभिनीकुमार सैन्य तदाख्यः वानरसेनानी, द्विविदेन तदाख्येन योद्धेण सुहृदया मवलोकितया दृष्ट्वा मनाक् हृष्टः सन् कराभ्यां दन्तिमकरद्वितयं दन्तिमकर-मकर इत्यर्थः आदाय गृहीत्वा युद्धाय साम्प्रतम् वनमदजलेन आर्द्र गण्डं योजयति संयुनक्ति । वसन्ततिलकं वृत्तम् ।

(ग) यत्रैवेति । हनुमान् हसन् यत्र मम रोमवल्लिषु रोमावलीषु दृढम् अवलम्बम् आश्रयं कृतवत् कृतवन्ति येन । तेनापरेण वानर बलानि लङ्घयामि, स्थामापरैव राक्षसैः सह समरं योजयामि । इति वानरबलानि यत्रैव वसन्तीति वसन्ततिलकं वृत्तम् ।

तारास्तनत्रुटितचन्दनपङ्कलेप-
माबद्धकाञ्चनसरोजसहस्रमालम् ।
वक्षः प्लवङ्गपतिना विपुलं विलोक्य
सम्भावितचुलुकपेयपयाः पयोधिः ॥२८॥ (ञ)

कपिः (स्वगतम्) । एवमेवैतत् । (सचमत्कारं पुरोऽवलोक्य ।) पश्य (झ) अवलीयमानजलमानुषमिथुनमत्यर्थकदर्थ्यमान-

(ञ) तारेति । प्लवङ्गपतिना सुग्रीवेण तारायाः पत्न्याः स्तनाभ्यां त्रुटितं आलिङ्गनेन स्खलितः चन्दनपङ्कलेपः यस्मिन् तादृशम् आबद्धा परिहिता काञ्चनसरोजसहस्राणां माला यस्मिन् तथाभूतं विपुलं वक्षः विलोक्य पयोधिः समुद्रः चुलुकेन गण्डूषेण पेयं पयः सलिलं यस्य तथाविधः सम्भावितः गणितः । सागरतरणं लघु मेने इति भावः । वसन्ततिलकं वृत्तम् ।

(झ) अवलीति । अवलीयमानं विलीयमानं जलमानुषमिथुनं यस्मिन् तादृशम् अत्यर्थम् अतिशयेन कदर्थ्यमानं पीड्यमानं नक्रनीडं यस्मिन् तथाभूतं पुनरुक्तायमानं पुनरुक्तवदाभासमानं वाडवदहनस्य वाडवाग्नेः उत्करः विस्तारः यस्मिन् तत् । अम्बरोन्मुखैः उत्तुङ्गाभिरूर्मिभिः तरङ्गैः ताड्यमानं मार्त्तण्डमण्डलं सूर्यमण्डलं यस्य तथाभूतम् उच्चण्डेन तीक्ष्णेन तापेन सूर्यकिरणसन्तापेन विवशात् विदलितात् शुक्तिसम्पुटात् प्रकटं यथा तथा मुक्ता निर्गताः मौक्तिकानां प्रकरो यस्मिन् तथोक्तम् उत्प्लवन उद्गच्छन् बलवता ... बलवता दर्पेण कच्छपानां ... तथोक्तम् । कोठकानि पर्वतानां बहुदंष्ट्राणां मत्स्यविशेषाणां शृङ्गाणि यस्मिन् तादृशम् । ... उच्चैः तथा ... मकरा यस्मिन् तथाभूतम् । ... इति भावः । ... यस्मिन् तादृशम् । ...

ग्रहिणीयूथमितस्ततः पुनरुह्यमानवाडवदहनडम्बरम्- म्बरीषु खुतरङ्गतायमानमार्तण्डमण्डलमुपजाततापविवश- मुक्ताशुक्तिसम्पुटप्रकटमुक्तमौक्तिकप्रकरमुच्छलदनच्छकच्छप- मत्स्यं लोठमानपाठीनपृष्ठममन्दाक्रन्दितमकरमपसृतनक्र- चक्रमुड्डीयमानसपक्षगिरिलोकयसपक्षयं तटावटप्रविष्टनष्टप- न्नगं क्रन्दत्करिविमुच्यमानमदप्रवाहावगाहमभ्रमस्तमनिवि- ष्टमहामुनिविधीयमानपावकप्रणामं विबुधसाध्यसिद्धविद्या- धरजनविमुक्तोपरिगमनं नभसि समाकुलावलोकितं तीर- तरुकुलायनिलीनैः शकुनिभिरपसृत्य दृष्टं कपिकुटुम्बकैर्नि- र्गत्य निरीक्षितं गर्भवासदुर्ललिताभिरसुरसुन्दरीभिरुत्थाय निभालितं मधनोद्धतशोपाभिरप्सरोभिः स्मृतचिरपरित्यागं मृगलाञ्छनैरावतपारिजातकौस्तुभप्रभृतिभिरुदन्वन्तं तत्क्ष- मयमेवंविधः ।

पक्षवन्त गिरयो भ्रमन्तो लघुया यस्मिन् तथोक्तं तटावटेषु तटेषु अवटेषु च प्रविष्टा नष्टाश्च विनष्टाः पन्नगाः भुजङ्गा यस्य तथाविधम् । क्रन्दद्भि- श्चीत्कुर्वद्भिः करिभिः जलकरिभिः विमुच्यमानः परित्यज्यमानः मद- प्रवाहस्य मदजलस्रोतसः अवगाहः यस्मिन् तथोक्तम् । अम्भसा [illegible] निविष्टैः समाधि- निष्ठैः महामुनिभिः विधीयमानः क्रियमाणः पावकस्य वह्नेः प्रणामः यस्मिन् तथाभूतम् । विबुधैः देवैः साध्यैः देवयोनिविशेषैः सिद्धैः देव- योनिभेदैः विद्याधरजनैश्च विमुक्तं परित्यक्तम् उपरिगमनं यस्य तथो- क्तम् । नभसि आकाशे [illegible] उत्कण्ठीय तथा तीरतरुषु ये कुलाया नीडाः तत्र निलीनैः स्थितैः शकुनिभिः पक्षिभिः अवलोकितं दृष्टं

किञ्च ।

अ। गूढस्फारस्फुलिङ्गोऽरुणमणिषु घनं लब्धधूमप्रबन्धो
नीलाश्मस्तम्भयष्टीषु स्फुटपिहितरुचिर्विद्रुमेषु द्रुमेषु ।
भग्नमत्यं [illegible] गिरिपतिदलिते मण्डले मौक्तिकानां
दृग्भिर्नालोक्यतेऽस्मिन् [illegible] प्रज्वलद्वह्निराशौ॥ २८॥

[illegible] बालरवले [illegible] उल्लस्फार [illegible] गर्भवासिन [illegible]- [illegible] दुर्लक्षिताभि [illegible] [illegible]स्फुरीभिः निर्मल [illegible]- [illegible] । किरीटित इव [illegible] [illegible] उद्भूताया [illegible] [illegible] [illegible] गर्भस्थिताभिरिति [illegible] । [illegible] [illegible] [illegible] [illegible]लोकितम् । [illegible] [illegible] [illegible] कौस्तुभस्य [illegible] येषां ते [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ।

अथ गूढेति । [illegible] [illegible] प्रज्वलद्वह्निराशौ [illegible] [illegible] [illegible] [illegible] मौक्तिका [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] नीलाश्म [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] विद्रुम [illegible] द्रुमेषु [illegible] पिहिता [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] भावः । तथा गिरिप- [illegible] दलिते [illegible] [illegible] मौक्तिकानां [illegible] [illegible] [illegible] [illegible] [illegible] मौक्तिकचूर्णानि [illegible] [illegible] [illegible] [illegible] [illegible] भावः । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] ।

समोक्षार. । सवितर्कम् ।

(८) वैयग्र्यात्किंस्विदस्य: प्रलयसमयमिवाग्नी निर्गतश्चर्वर्चि: ?
किंस्विद्भिन्नार्णवाणांस्युपरि परिणत: सर्वतोऽप्यौर्वबह्नि: ? ।
किंस्वित्कालाग्निरुद्र: स्नगयति जगतीमेष पातालमूलाद् ?
यां यातं धाम्नि वारां रघुपतिविशिखा:प्रज्वलन्त:पतन्ति ॥ २ ॥
तदेतदुपस्थितमहासंरम्भं सुग्रीवविभीषणसहित रामदेव-
मनुवर्त्तावहे । इति परिक्रम्य निष्क्रान्तौ । विष्कम्भक ।

तत प्रविशतो रामलक्ष्मणौ सुग्रीवविभीषणौ हनुमांश्च ।

राम । सत्वरमुत्थाय यथाकाशं शिरसा प्रणम्य ।

खातृखात: सगरैश्च मर्त्त्यसरितं मन्दाकिनीं कुर्वता
पूर्णो यश्च भगीरथेन तदयं न: कीर्त्तन सागर: ।
अध्यस्मिन् प्रतिकूलवर्त्तिनि मया कीर्णा: शरश्रेणयो
हं हहा: ! प्रणतोऽस्मि मुञ्चत क्षम रामस्य कान्या गति: ॥ ३ ॥

(८) वैयग्र्यादिति । वैयग्र्यात् ग्रीवात [illegible] [illegible] दारिद्र्यं. [illegible] [illegible] पार्श्व: निर्गता: [illegible] [illegible] प्रलयसमयभविष्यो [illegible]- [illegible] निर्गत: किं स्वित् ? और्वे वाडवो वह्नि: अर्णवाणांमि सागर- [illegible] भित्त्वा सर्वत: [illegible] उपरि परिणत [illegible] कि- स्वित् ? एष कालाग्निरुद्र: [illegible] [illegible] पातालमूलात् [illegible] जगतीं [illegible] इति किंस्वित् ? या धामं रघुपते: रामस्य विशिखा: शरा: वारां धाम्नि पयोनिधौ प्रज्वलन्त: [illegible] पतन्ति । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] प्रतिभोत्थिता [illegible] [illegible] [illegible] इति [illegible] [illegible] । [illegible] [illegible] ।

(३) खातेति । मन्दाकिनीं सुरनदीं मर्त्त्यसरितं कुर्वता सगरैश्च

[illegible] । सखे सुग्रीव। अतिशशाङ्कशेखरमिदं चेष्टितं रामदेवस्य यदनेन।

विश्वाणां जलपानपीडितबलैर्यस्मिन् युगान्तानलै-
र्यस्याभाति कुकूलमुर्मुरसुहृत् क्रोडे शिखी वाडवः।
तस्याप्यस्य कृशानुसङ्गमकृतज्योतिःशिखण्डे शरै-
र्दग्धखण्डदवाग्निदग्धमकरविधिर्देवस्य वारांनिधिः ॥३२॥ (ड)

सुग्रीवः । सखे विभीषण अदृष्टपूर्वमश्रुतचरं (ढ) च रामभद्रचरितं कं न विस्मापयति । यज्जलान्यपि ज्वलन्ति

[illegible]

(ड) विश्वाणामिति । [illegible] युगान्तानलैः [illegible] पीडितबलैः [illegible] । यस्य [illegible] क्रोडे [illegible] कुकूलमुर्मुर इव [illegible] रामदेवस्य [illegible] शिखण्डे [illegible] वारांनिधिः [illegible] ।

(ढ) अश्रुतचरम् अश्रुतपूर्वं चरट् भूतपूर्वे इति चरट्प्रत्ययः।

ततश्च ।

अक्षोभ्याग्नेयशस्त्राविघटितवपुर्यष्टितुष्टं भुजङ्ग-
दष्टे तद्दामदाहप्लुतसलिलमहागर्भमभ्रै र्व्यलायि ।
सर्वत्रावर्त्तमुद्रां विदधति जलधौ सायकैः पावकीयै-
रुत्पातोद्गार्दमा च त्रिजगदभिभवत्रिःसृतो विस्त्रगन्धः ॥ ३३ (ग)

हनूमान । सार्यं पुरोऽवलोक्य प्रणम्य च ।

मेघ इव भ्रुकुटिरचना मुञ्चन् त्वम्ललाटं
[illegible]तिग्यक्रस्तवक्रितगिरवधापत्य च मागा ।
वाच । मध्यादयमुदयते प्रवगोगीतकीर्त्तिः
सार्द्रं दारैर्मदपरिवृत साञ्जलिर्यत्समुद्र ॥ ३४ ॥ ता

सर्व सकौतुकमवलोकयन्ति ।

[illegible] अक्षोभ्येति । पावकीयै आग्नेयैः सायकैः [illegible] [illegible]
[illegible] [illegible] अनिर्वृत्यं विदधति सति समन्तात् [illegible]
[illegible] भुजङ्गं प्रसारभिरतै अक्षोभ्य [illegible] पराक्रमाभिरुक्तेन
[illegible] रक्षो[illegible]दायानुष्ठान [illegible] [illegible] व्यापारिता [illegible]
[illegible] [illegible] यथा तथा [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] यथा तथा
[illegible] [illegible] । तथा [illegible] दारमा [illegible] [illegible]
[illegible] [illegible] । त्रिजगत् अभिभवन् व्याकुलयन् विस्त्रगन्धः [illegible]
[illegible] [illegible] [illegible] । [illegible] ।

[illegible] मेघ इव । [illegible] [illegible] भ्रुकुटिरचना तव ललाटं
[illegible] मुञ्चन् [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

रामः। तर्हि संहृतं भो चैत्रभानवमिदमस्त्रम्।

लक्ष्मणः। आर्य! एष (द) सन्धानसंहाररहस्यवेदी।

ततः प्रविशति [illegible] गङ्गावतनेन।

गङ्गा। सखि (भ) माविति! न स्वैरं सञ्चरणविधिप

[illegible]मगणसमस्तरङ्गिणीनाथः। पश्य।

न स्नुप्तानि मुरारिशङ्करवरैर्यानि समाकर्षणे

मन्थानाद्रिविघट्टनैरपि चिरं भग्नानि येषां त्वचः।

गात्रं यत्र च वासुकेर्विषशिखाज्योतिर्भिरप्याक्षि[illegible]

[illegible]न्याङ्गानि रघूद्वहस्य विशिखैर्विशीर्णानि दग्धानि च। ३५। (न)

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

सर्वे । यथोचितं परिक्रामन्ति ।

समुद्रः । सखेदम् । देवि (प) हैमवति ! प्रिये कालिन्दि ! कथमपराधी रामभद्रं द्रक्ष्यामि ।

गङ्गा । रत्नाकर ! स एव रामभद्रोऽपराधी येन सगरभगीरथयशोराशी त्वयि अपह्नुतम ।

यमुना । भाईरहीणाह ! किंणाम अवराहित्तणं जहिं (फ) तक्खणमणुवत्तणम् (१) ।

सर्वे । तर्हि बालनारायणं रामदेवमुपसर्पामः । न हि (ब) राकामृगाङ्कमण्डलमन्तरेण चन्द्रमणिरामन्दजलस्यन्दः ।

इति सर्वे परिक्रामन्ति ।

यमुना । उपसृत्य । दसरहणन्दण रामचन्द ! (भ) सअरभईरहसरिसगोरवो दे समुद्दो समुद्दो एम(२) ।

(१) भागीरथीनाथ ! किं नामापराधित्वं यदि तत्क्षणमनुवर्तनम् ।
(२) दशरथनन्दन रामचन्द्र ! सगरभगीरथसदृशगौरवस्ते समुद्रः समुद्र एव ।

[illegible]

प हैमवति ! [illegible] कालिन्दि ! यमुने ! ।
फ [illegible] ।
ब [illegible] ।
भ [illegible]

समुद्रः । साभ्यर्थनम् । (म)

इन्दुर्लक्ष्मीरमृतमदिरे कौस्तुभः पारिजातः
स्वर्मातङ्गः सुरयुवतयो देव ! धन्वन्तरिश्च ।
मन्थाम्भोधेः स्मरसि तदिदं पूर्वमेव त्वयात्तं
सम्प्रत्यर्थिः शृणु जलधनस्त्वां प्रपन्नः प्रयाधि ॥ २६ (य)

रामः । सगौरवम् । भगवन् रत्नाकर ! नमस्ते नन्वहं प्रयास्यो भगवतः सागरस्य तदेकवारमविनयो यथोवा क्षम्यतां रामस्य ।

विभीषणः । किमुच्यते । ननु निसर्गनिरर्गलः स पक्षपातो भवति भागीरथीनाथस्य ।

पीयूषाकर एष नित्यममुना धन्वन्तरिः साक्षी
गङ्गावल्लभमस्य पश्चि[illegible]मय शोभासुधादीधितिः ।

सागरः तव सगरे भगीरथे च यादृशं गौरवं कर्त्तव्यम् [illegible] तदैव कर्त्तव्यं पूर्वपुरुषसम्बन्धित्वादिति भावः ।

(म) साभ्यर्थनं सनत्कार प्रार्थनाविशेषः ।

(य) इन्दुरिति । हे देव ! त्वया पूर्वमेव इन्दुः, लक्ष्मीः, अमृतं मदिरा, कौस्तुभः पारिजातः स्वर्मातङ्गः ऐरावतः सुरयुवतयः अप्सरसः धन्वन्तरिश्च तत् परिदृष्टम् इदं सर्वं मन्थाम्भोधेः [illegible] [illegible] [illegible] [illegible] [illegible] सम्प्रति शृणु जलधिरेव धनं यस्य तथाभूतः जलधनस्त्वां प्रपन्नः सन् प्रयाचे [illegible] [illegible] किं करवाणीति चेत् । मन्दाक्रान्ताछन्दः ।

(र) निसर्गनिरर्गलः स्वाभाविक [illegible] पक्षपातः [illegible] भागीरथीनाथस्य समुद्रस्य ।

इत्यस्त्वेव मतां मनःसु लिखिता सिन्धोः प्रशंसावलि-
र्जामाता भवतैव किंपुनरसौ लक्ष्मीगुरुः श्लाघ्यते ॥ (न)

रामलक्ष्मणौ । मन्त्रज्ञमामाते ।

विभीषण । देव । का पुनरसौ वर्णनावर्णिका (व) यथा
रत्नाकरचरितमावेदयते । पश्य ।

(श) धत्ते यत्किलकिर्मिरितैकगुरुतामेणीदृशां वारुणी
वैधुर्य्ये विदधाति दर्प्पतिरुपां यश्चन्द्रिकां द्र नभः ।
यस्याग्रप्रभजा च सम्मग्रसुरस्त्रिल्यं वयः सम्पदां
यल्लक्ष्मीरधिदैवतं च जलधेस्ताश्चित्रमाचेष्टितम् ॥ २८ ॥

(न) [illegible] इति । [illegible] जलनिधि [illegible] [illegible] [illegible] अस्ति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] मनःसु लिखिता [illegible] [illegible] । [illegible] [illegible] लक्ष्मीगुरु [illegible] [illegible] किं पुन [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ।

(व) वर्णनेति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ।

(श) धत्ते इति । वारुणी [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ।

सुग्रीव: । ईदृश एव महिमा भगवत: सागरस्य । यत: ।

या ओघानामधिदैवतं गिरिसुता तस्योदर: सानुमान्
मैनाको रत्नाकर: सुतनय: शैलेश्वरो येन स: ।
पक्षच्छेदसमुद्यतेन्द्रकुलिशत्रासाद्विलीय स्थित:
सोऽप्येतस्य करालकुक्षिकुहरे पातालजम्बालिनि ॥३८॥ (च)

अपि च ।

वहति भुवनश्रेणीं शेष: फणाफलकस्थितां
कमठपतिना मध्ये पृष्ठं सदा स च धार्य्यते ।

धन्यं महिमाधाने 'क्षय नामा विश्वमान् पञ्चदशमीति भाव । अन्ति-कस्था चाई अथ आकाशं यत् इन्यन्तो कथा दैभुवं क्रोधवान्नि 'दर्शाति कल्लोदये मानिन्था मानवानिव मामभक्षादिति भाव. पीयूषभुजाम् अमृताशिनां देवानां यत् नित्यं कनत समकमहृत् कामनिमं वय: यौवन लक्ष्मी: सम्पदा च अधिदैवत यस लक्ष्मी-रूपेण सम्पद इति भाव तत् सर्व अमधे. विश्वम् अद्भुतम् आर्वेदित कार्यं शार्दूलविक्रीडितं वृत्तम् ।

(च) येति । ओघानामधिदैवतम् अधिष्ठात्री देवता या गिरि-सुता पार्वती गङ्गाया इव ओघा भवान्या [illegible] देवी-[illegible] शिव. [illegible] इति मता: गौरव सानुमान् पर्वत: मैनाक, येन मैनाकेन च प्रथित: रत्नाकर: [illegible] शैलेश्वर पर्वतराज: सुतनय: सुपुत्रो [illegible] येन, सोऽपि मैनाक. पक्षच्छेदाय [illegible] इन्द्रस्य यत् कुलिशं वज्रं तस्मात् त्रासात् विलीय [illegible] एतस्य पातालजम्बालिनि [illegible] वसति कराले भीषणे कुक्षिकुहरे उदरगह्वरे स्थित: । [illegible] । शार्दूलविक्रीडितं वृत्तम् ।

तमपि कुरुते क्रीडाधीनं पयोधिरनादरात्

अहह ! महतां निःसीमानश्चरित्रविभूतयः ॥ ४० ॥ (स)

समुद्रः । सप्रश्रयाञ्जलम् ।

मुक्ताशिल्पमनल्पं विविधप्रकाण्डै-

र्महाद्भुताम्बरसमर्पणकेलिकाले ।

देव ! श्रुतं न कथमित्यपि यत्किलाहं

लक्ष्मीसखः क नु युगान्तभयः प्रयामि ॥ ४१ ॥ (क)

रामः । अहवि वहा । मा पुनरविनयाहृतेन मां लज्ज-
यतु नदीनाथः ।

समुद्रः । गङ्गावतने प्रति ।

(स) महतामिति । येन भगवता कृपायमानेन स्थिता भुवनत्रयी अगस्त्ये वसति स च येन कमठपतिना कमठराजेन मध्ये पृष्ठे पृष्ठस्य मध्ये सदा च धार्यते । पयोधि समुद्र न कमठपतिमपि अनादरात् अवहेलया क्रीडाधीनं क्रीडनकं कुरुते, अहह आश्चर्यं, महतां चरित्र विभूतय. चरित्रसम्पदः निःसीमान निरवधिका । हरिणीवृत्तम् ।

(क) मुक्ताशिल्पेति । देव ! उपायनम् अनल्पं मुक्ताशिल्पैः वर्णिताः विविधप्रकाण्डैः विविधेषु श्रेष्ठेषु मध्ये प्रकाण्डा श्रेष्ठा. तैः अति-महाद्भुतैः अम्बरैः वस्त्रैः सह हारप्रभारस्य हारसम्भारस्य समर्पणस्य केलिः तस्य काले युगान्तभयः युगान्ते प्रलये भीतिः इति सभोक्तः लक्ष्मीसखः लक्ष्म्याः सहोदरः क नु कुत्र वा प्रयामि गमनं करिष्यामि इत्यपि न किल मया श्रुतम् ? । वसन्ततिलकं वृत्तम् ।

(ख) अविनयेति । अविनयस्य अतिदानस्य आहृतेन उपहा-रेण ।

कमण्डलोर्ब्रह्मकरायभूषणा-
दियं प्रसूता भवमौलिभूषणम् ।
इयं च देव ! त्वमणिस्तरङ्गिणी
त्वदन्वयस्य प्रथमा सुवासिनी ॥ ४२ ॥ (क)

राम । देवि पवित्रितापतिकुले ! मन्दाकिनि ! मानसमांस-मञ्जनानन्दिनि वन्दे । एष रामोऽभिवादयते ।

सर्वे । रविकुलालङ्करण राम ! चिरञ्जीव । समरम आर वह ।

अगस्त्यः । राम भद्र ! नियुज्यतामयं जनः ।

रामः । ननु भवन्नियोज्या वयं भगवन् किं पुनः प्रकृतं कर्मणि सहायमिच्छति रामः ।

अगस्त्यः । विजयं श्रोतुमिच्छामि

सर्वे । कृतं वाग्विस्तरेण ।

इक्ष्वाकुवंशमहार्णवस्य पोतपात्रमिव स्थिरम् ।

(क) कमण्डलोरिति [illegible] ब्रह्मणः करस्य [illegible] महाराज् कमण्डलोः [illegible] मौलिभूषणं [illegible] इयं गङ्गा प्रसूता [illegible] इयञ्च त्वदन्वयस्य [illegible] प्रथमा [illegible] सुवासिनी [illegible]

[illegible]

[illegible]

द्रुतमारभ्यतां सेतुरखर्वैः पर्वतोत्तमैः ॥ ४२ ॥ (ख)

सर्वे । विस्मयन्ते ।

समुद्रः । यथाऽऽवेदितं (ङ) त्रिस्रोतसा मणिमयकङ्कणाला-वलमध्यमध्यासीनं बाडवदहनसुकरेणानन्तनागाङ्कपर्यङ्कशायिन भगवन्तं दृष्टवैव योऽयं द्रुतेन्द्रनीलश्यामलः सलिलस्कन्धः स प्रदेशो निर्विबन्धः सेतुबन्धस्येति ।

रामः । विहस्य । भगवन् ! किल ग्रावाणः (च) कथं प्लवन्ते ? ।

समुद्रः । (छ) महामुनिवितीर्णवरस्य विस्मयमसमतीरगतवनदावानलस्य नलस्य करतलस्पर्शप्रभावेण ।

---

(ख) द्रुतेति । इह खलु अर्णवस्य महतस्तु मध्ये तु सेतुः [illegible] पोतपात्रमिव समुद्रयानमिव अखर्वं महान्तं सेतुं पर्वतोत्तमैः पर्वतश्रेष्ठैः द्रुतं शीघ्रम् आरभ्यताम् ।

(ङ) त्रिस्रोतसा गङ्गया, मणिमय [illegible] मध्यम् । बाडवदहनसुकरेण बाडवाग्निकरेण [illegible] अनन्तेति । अनन्तो नाम यो नागः [illegible] पर्यङ्कः [illegible] भगवन्तं [illegible] इन्द्रनीलं [illegible] श्यामलः सलिलस्कन्धः [illegible] । निर्विबन्धः निष्प्रत्यूहः [illegible]

(च) ग्रावाणः प्रस्तराः ।

(छ) महामुनीति । महामुनिना केनचित् वितीर्णः दत्तः वरो यस्य तथाभूतस्य । [illegible] दावानलस्य [illegible] ।

सर्वे । महदाश्चर्य्यम् ।

नेपथ्ये । महान् कलकलः ।

समाकर्णितकेन हनुमान् । तदिदमस्य भगवतो मकराल-यस्य वचनमुपश्रुत्य हृष्यतां कपिबलानामेष (ज) हर्षाट्ट-हासमांसलः कलकलः ।

हनु । रामभद्र ! किमपि वाञ्छन्तु (झ) वानरवीराः सकलकपिकुलानुग्राही पुनरयं मार्गो न सर्वे हनूम-न्तमन्तरेण मलयतटीविटङ्कमधिरुह्य पश्यतु सेतुबन्धप्रदेशं रामः ।

राम । यथाह धन्वन्तरिः प्रसविता (ञ) । समचयम । अपार भगवन्नकूपार ! रामदर्शिनयमन्त्रणान्यङ्गानि तत्साध-यन् निजं पातालनिलयं परमनुगृहीतोऽस्मि ।

हनु । यथाह सप्तमो वैकुण्ठावतारः (ट) । अथ गम्यते इत्युदधिनाथाभ्यां सह निष्क्रान्ताः । सर्वे समारोहणं नाटयन्तः परिक्रामन्ति च ।

नेपथ्ये ।

भो नागनाथ ! हरिकच्छप ! डिम्बमत्स्य !
स्वस्त्यस्तु वः शमितकुलतापसर्पम् ।

(ज) हर्षस्य अट्टहास इव मांसलः विशालः महानिर्घोषः ।

(झ) किमपि वाञ्छन्तु अभिलषन्तु ।

(ञ) प्रसविता जनयिता । रत्नोऽपि रामस्य दुर्विनयेन कलिता-न्यङ्गानि सम्यगभिहितानि । साधयन् गच्छन् ।

(ट) वैकुण्ठेति । वैकुण्ठस्य नारायणस्य अवतारः राम इत्यर्थः सप्तम अवतारः तथा श्रीमद्भागवतकृतावतारगणनायां सप्तमो रामावतार इत्यर्थः

अश्रावयं ननु रघूद्वहकीर्त्तिकेतुः
सेतुः प्रसर्पति दशाननधूमकेतुः ॥ ४४ ॥ (ठ)

अपि च ।

यादांसि ! हे वरुण सङ्गतगोत्रतन्त्रं
वासेन चन्दनगिरेरुत दक्षिणेन ।
तां वेष्टितस्तरधराधरसेतुसूति-
राकम्पमेव न विरंस्यति वो वियोगः ॥ ४५ ॥ (ड)

सुग्रीवः । हनूमन् ! आदिश्यन्तां सेनापतयः पर्वतानयनाय ।

हनूमान् । यदादिशति स्वामी । (इति निष्क्रान्तः ।)

(ठ) भो इति भो नागराज वासुके ! [illegible] ! कुमारवार ! दिग्गजराज ! मनुष्यावतार ! [illegible] इत [illegible] अपवर्ग [illegible] । ननु भो [illegible] रघूद्वहस्य रामस्य कीर्त्तिकेतुः [illegible] दशाननस्य रावणस्य [illegible] उत्पातविशेषस्वरूप एष सेतुः [illegible] । [illegible] इत्यन्वयः ।

(ड) यादांसीति । हे यादांसि ! [illegible] ! चन्दनगिरेः [illegible] [illegible] [illegible] इति भावः । [illegible] न विरंस्यति [illegible] इत्यन्वयः ।

दृप्यद्विक्रमसंक्रमाः कपिभटाः ! शृण्वन्तु सुग्रीवआ-
माज्ञां मौलिनिवेशिताञ्जलिपुटाः सेतोरिह व्यूहने ।
दोर्दण्डद्वयताडनश्लथधराबन्धोद्धृतान् भूधरान्
आनेतुं सकलाः प्रयात ककुभः किं नाम वो दुष्करम् ॥४६॥

सुग्रीवः ।

आनयन्तु कपयो महागिरीन्
अङ्गदस्तु सपदि प्रतीच्छतु ।
त्वं नलः प्रबलबाहुविक्रमः
सेतुबन्धविधये नियोजय ॥ ४७ ॥

[illegible]

दृप्यदिति । दृप्यन्तो बाहुद्वारा विक्रमसंक्रमाः पराक्रमप्रकारा येषां तादृशाः कपिभटाः वानरवीराः मौलिषु शिरःसु निवेशिताः अञ्जलिपुटा यैः तथाभूताः सन्तः इह सेतोः व्यूहने विन्यासविधाने सुग्रीवस्याम् आज्ञां शृण्वन्तु । हे सकलाः ! दोर्दण्डद्वयस्य बाहुयुगलस्य ताडनेन श्लथा शिथिला ये धराबन्धाः भूतलसम्बन्धाः तेभ्यः उद्धृतान् उत्पाटितान् भूधरान् पर्वतान् आनेतुं ककुभः दिशः प्रयात गच्छत, वः युष्माकं किं नाम दुष्करम् ? अवश्यं किमपि दुष्करं नास्तीति भावः । शार्दूलविक्रीडितं वृत्तम् ।

आनयन्त्विति । कपयः महागिरीन् आनयन्तु, अङ्गदः सपदि प्रतीच्छतु, आनीतान् गिरीनिति शेषः । त्वं नलः प्रबलो बाहुविक्रमो यस्य तथाविधः सन् सेतुबन्धविधये सेतोर्बन्धने नियोजय, समुद्रतटेऽपि पातय इत्यर्थं तानिति शेषः । रथोद्धता वृत्तम् ।

हनूमान् । निरूप्य । आपद्विनीतः (क) किमपि वर्त्तते वारिराशिः । यत्सेतुबन्धविहितये निजप्रतीहारघोषमुखेन भिक्षति जलचरमहासत्त्वानि ।

सुग्रीवः । सखे हनूमन् । गच्छ आहूय वानरद्वयं (ख) यन्निवेदयति सेतुबन्धविधिं रामदेवाय ।

हनूमान् । निष्क्रम्य वानराभ्यां सह [illegible] कपिपतिं [illegible] निवेदयन् ।

कपिद्वयं । देव । नीलनलौ (ग) [illegible] निवेशितपर्वतशिखराणां [illegible] विश्वोन्नतो [illegible] सेतुबन्धविधिमाम [illegible] विश [illegible] (१)

(१) देव । [illegible] निवेशितपर्वतपा [illegible] वानराणां [illegible] सेतुबन्धवि-धिमामनन्तौ [illegible] ।

(क) आपद्विनीत [illegible] । सेतुबन्धविहितये सेतुबन्धा [illegible] प्रतीह-[illegible] घोषस्य [illegible] ।

(ख) यत् वानरद्वयं [illegible] ।

(ग) [illegible] । [illegible] [illegible] यथा [illegible] । [illegible] पांचाला प्राग्भारा [illegible] इति यावत् [illegible] । [illegible] । [illegible] विरचयन्तौ [illegible] ।

रामः । अहो ! पराक्रमातिशयः शाखामृगाणाम्
महिमा महार्णवस्य यदेतेऽपि (ध) वसुन्धराधरा उद्
यथानेनाप्येवंविधे भूयसि भारे दत्तः स्वहस्तः ।

दधिमुखः । एष सेतुकन्दलैककन्दो भवत्पराक्रममही
रुहाकुसुमं सीताविरहविच्छेदसमारम्भस्वस्त्ययनं
करनाञ्छनप्रथमावतारो निवेशितः शिलोच्चय
ननेन ।

कपिः । (न) शिलाविटङ्कावटङ्कघटङ्करा शिर
हाम्मटघ्वहा घघट्टितपञ्चवसधातुद्रवा खुषपङ्क्ति
अक्रविकुला शिठठाविटदुठठमिणन्दविन्दा गम्भ
दपनक्रमपुङ्गवाण घकर्व अणरएण शिक्खदबुब्बुडा ब
ःनम्भनुलमतारिदा सचरन्ति सेउसीमन्तम्मि
चरा । (८)

---

(न) शिलाविटङ्कावटङ्कघटङ्करा निर्धौतदुग्धोलघटघो ...
...धातुद्रवा ... विन्दुकनकपिङ्गला शिलाविघटितदुग्ध
... प्रक्षेपचरवेण निर्दलबुद्बुदा मध
... दिताः सञ्चरन्ति सेतुसीमन्ते धराधराः ।

(ध) वसुन्धराधरा पर्वताः । स्वहस्तः दत्त. भारग्रहण
मिति भाव ।

(न) शिलेत्यादि । शिलाघटिताः ... तेषु ... । निर्धौताः क्षालिताः दुग्धोज्ज्वलाः
... ; ... घटिताः प्रक्षालिता ...
... ... ... परिचितं ... कपिषु

दधिमुखः । एवमेवैतत् । यथा निवेदितं कपित्थेन ।

और्वस्यात्ययनं विधाय शिखिनः कृत्वा च धारां निधे-
र्मर्यादास्खलनं नलप्रविहिताः प्रामाणस्तलं रंहसा ।
उन्मज्जन्ति महावराहमलिनात् पातालजम्बालतो
वेगोद्गारितिमिङ्गिलैकवसतेर्द्राक् सर्वतः पर्वताः ॥४८॥(प)

विभीषणः ।

उत्क्षिप्तः कपिभिर्गिरिर्नभसि यः सम्भाव्यते विस्तरा-
देकोऽप्येष करोति सेतुघटनं नीरन्ध्रमब्धाविति ।
सोऽपि व्यक्तमयोगनिद्रकपिलव्यापारपूताम्बु
प्राप्तोऽप्सु सहस्रभागभरणेऽप्यस्य क्व नाम क्रमः ॥४९॥(फ)

[illegible] विस्तारितानि [illegible] पर्वतानि विमलीकृतानीति यावत् पर्वतोद्धरणादिति भाव । [illegible] मृगेन्द्राणां सिंहानां [illegible] [illegible] । प्रक्षेपणवशेन निक्षेपवशेन [illegible] जातानि [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] सेतुबन्धनं [illegible] [illegible] ।

(प) और्वस्येति । नलेन प्रविहिताः स्थापिताः पर्वताः और्वस्य [illegible] [illegible] [illegible] विधाय [illegible] [illegible] [illegible] [illegible] धारा [illegible] [illegible] मर्यादास्खलनं [illegible] कृत्वा च रंहसा वेगेन तलं प्राप्ताः सन्तः वेगेन [illegible] [illegible] [illegible] [illegible] [illegible] महावराहेण [illegible] मलिनात् [illegible] पातालजम्बालतः [illegible] द्राक् [illegible] सर्वतः [illegible] [illegible] । [illegible] [illegible] ।

(फ) उत्क्षिप्त इति । कपिभिरुत्क्षिप्तः [illegible] [illegible] एकोऽपि

कमिय । (ब) गुरुगुहाकुहरपइट्टदुट्ठमअरा तरुक्खन्धवि
सम्पसंखिरिलक्कुका विसमसिलाअलुज्झिदफुडिदसुत्ति
संपुटमुत्तमोत्तिअकरम्बिदरिमअवा तलप्परूढसेवालजडि
लवन्धा जलनिविट्टपक्कपालिमन्दसंचरणा चिरवीसम्भप
सविअकमलणाहनक्ककुलतिमिङ्गिलकट्ठकन्दरट्ठन्ता उपरि
णिवडन्तमहिहरपब्भारकल्लोडणभएण किंकिं ण कुणन्ति
सिन्धुसम्भमसवमा (२)।

गुरुगुहाकुहरप्रविष्टदुष्टमकरास्तटवृक्षस्कन्धविसर्पत्कुलीरकुला वि
षमशिलातलोज्झितस्फुटितशुक्तिसम्पुटमुक्तमौक्तिककरम्बिततलधाराः
तलप्ररूढशैवालजटिलबन्धा जलनिविष्टपक्वपालिमन्दसञ्चरणाश्चिरविस्रम्भ
...कमलनाभनक्रकुलतिमिङ्गिलकष्टकन्दरच्छन्ना उपरिनिपतन्महीध
रप्राग्भारोत्क्षोडनभयेन किं किं न कुर्वन्ति सिन्धोः सम्भ्रमसङ्घाः ।

...गिरि पर्वत विस्तारात् ...वयवरैष्यात् ...
निरवकाशं यथा तथा सेतुघटनं करोति इति गर्भित आकाशे ...
...कोऽपि ...प्रकटिता योजनिका येन तादृशस्य कपिम
...व्यापारं च ...पुनः ...
...तेषु ...पतितेषु ...
...नाम ? नैव ...। शार्दूलविक्रीडितं वृत्तम्।

ब) गुर्विति। गुरुषु ...गुहाकुहरेषु गुहाभ्यन्तरेषु प्रविष्ट
दुष्टा मकराः येषां तादृशाः, तटवृक्षस्कन्धेषु ... विसर्पन्ति
...तादृशाः, विषमेषु ... शिलातलेषु उज्झि
तानि ...स्फुटितानि शुक्तिसम्पुटेभ्यः ...

हर्षितः । सखे ! साधु निवेदितं राम देवाय ।

रावणं प्रति ।

यस्मिन्नयं किलिकिलामुखरो विमर्दे-
स्तव ध्रुवं धृतमहीधरपातशङ्काः ।
दम्भोलिपातभयतः स्वयमुत्पतन्तः
सपक्षाधो निभृतमद्रिमहाग्रकुल्याः ॥ ५० ॥ (भ)

हनुमान् ।

यं य गिरिं क्षिपति वानरवर्ग एष
वारां निधौ निपतता ननु तेन तेन ।

यानि मौक्तिकानि [illegible] [illegible] मध्यभागा [illegible] यथा तथा- [illegible] [illegible] [illegible] [illegible] मौक्तिकानि [illegible] गृहाणु [illegible] यथा [illegible] । [illegible] पर्वताना [illegible] निपततां [illegible] [illegible] मौक्ता ।

[illegible] । यस्मिन् प्रदेशे अयं किलिकिलामुखरः विमर्दः [illegible] तव ध्रुवं [illegible] पर्वताः [illegible] पातात् [illegible] पातात् [illegible] भयं तस्मात् [illegible] यथा तथा [illegible] पर्वताः [illegible] । [illegible] इत्यम् ।

द्राक् मन्दराहतसुधाकणलाभसद्यः
संप्राप्यते मथनधीर्जलमानुषाणाम् ॥ ५१ ॥ (म)

लक्ष्मणः । सापर्वम् । आर्य ! (य) कथापरम्परोपश्रुतानि प्रत्यक्षय समुद्भवादीनि ।

क्षिप्तो गिरिः कच्छपपृष्ठपीठात्
संघट्टवेगोच्छलितोऽनुपाती ।
ग्रासीकृतोऽयं तिमिना किमन्यत्
सचापि लीलेन तिमिङ्गिलेन ॥ ५२ ॥ (र)

(म) [illegible] वर्णयति । [illegible] यत्र गिरिं वारा [illegible] क्षिपति, ननु [illegible] निपतता तेन तेन गिरिणा द्राक् झटिति मन्दरस्य आहतायाः [illegible] सुधायाः कणलेन प्राप्तेन अमरतया [illegible] जलमानुषाणां मथनधीः [illegible] संप्राप्यते अन्वयं । [illegible] स्थिता जलमानुषा मन्दराघातत्रुटितायाः सुधायाः [illegible] अमरत्वं प्राप्ता [illegible] यदा [illegible] पर्वतः सागरे पात्यते तदा तदा ननु पुनः [illegible] भावः । वसन्ततिलका वृत्तम् ।

(य) वर्णयति । कथानाम् [illegible] परम्परया उपश्रुतानि [illegible] न तु [illegible] भावः ।

(र) क्षिप्त इति । क्षिप्तः [illegible] गिरिः [illegible] कच्छपस्य कूर्मराजस्य पृष्ठमेव पीठं तस्मात् [illegible] प्रतिघातवेगेन उच्छलितः [illegible] गिरिः [illegible] तिमिना [illegible] ग्रासीकृतः, अन्यत् किं [illegible] तिमिः [illegible] तिमिङ्गिलेन [illegible] ग्रासीकृत इति भावः । उपजातिवृत्तम् ।

रामः । वत्स लक्ष्मण ! श्रूयतामिदमुच्यते ।

अस्ति मत्स्यस्तिमिर्नाम तथा चास्ति तिमिङ्गिलः ।
तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवः ॥५३॥ (ल)

अपिच ।

क्षिप्तो गिरिर्जलधिबन्धविधौ नलेन
यात्येकतः शकलशाववविवर्त्तनाभिः ।
पश्यन्त्यतः कमठडिम्भनिमज्जनेन
सेतुः कथंभविदिति सपदि मध्यमब्धेः ॥ ५४ ॥ (व)

हनूमान् ।

नद्यावाणः प्लवन्ते यदपि च जलधिर्बध्यते लोष्टलोमां
बिभ्राणा यत्कपीन्द्रैः करतलतुलनादाक्षिपन्तेमहीध्राः ।
यद्वद्दिग्व्योद्ग्राहिकमठशकुलयोः पवपोतप्रपोते-
र्मांगांसहेव ! सिन्धौ रजनिचरपतेर्नाशहेतुः स सेतुः॥५५॥(श)

(ल) अस्तीति । तिमिर्नाम मत्स्यः अस्ति विद्यते तथा तिमिं गिलतीति तथोक्तः मत्स्यश्च अस्ति, तिमिङ्गिलं गिलतीति तथोक्तः अपि मत्स्यः अस्ति, राघवो नाम मनुष्यः तस्य तिमिङ्गिलगिलस्य गिलः भक्षकोऽपि अस्ति ।

(व) क्षिप्त इति । नलेन जलधिबन्धविधौ समुद्रबन्धनव्यापारे क्षिप्तः गिरिः एकतः एकस्यां दिशि शकलशावःशाला विवर्त्तनाभिः चाल-नाभिः याति । अन्यतः अन्यस्यां दिशि अपि कमठडिम्भानां कच्छप-शिशूनां निमज्जनेन प्रतिघातेन याताति शेषः । इति हेतोः सेतुः अब्धेः मध्ये कथं भवतीति सपदि चर्चति ।

(श) नद्यादीति । हे देव ! ग्रावाणः प्रस्तराः अपि प्लवन्ते, यदपि

सुग्रीवः । इदमपरमुपस्थितं सेतुबन्धे विघ्नान्तरम् ।

तावत् क्व नाम गिरयः स्थितसेतुबन्धा
रुन्धन्ति पाथसि समुत्थितपाञ्चजन्ये ।
यावत्तदुच्छलितदिव्यनदीसहस्रै-
रापूर्य दुस्तरतरः क्रियते समुद्रः ॥ ५६ ॥ (ष)

विभीषणः । इदं चाद्भुततरम् ।

यावद्विपातरयक[illegible]पर्णो
व्याप्य [illegible] ककुभां मुखेभ्यः ।
तावत् [illegible] [illegible]मपां निधाना-
दाकृष्य [illegible]मुत्पतितः प्लवङ्गः ॥ ५७ ॥ (स)

[illegible] वानरप्रवरै [illegible] विन्ध्याद्या [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] विन्ध्यो [illegible] सेतुः [illegible] [illegible] [illegible] । [illegible] ।

(ष) [illegible] । [illegible] पाञ्चजन्ये [illegible] [illegible] स्थित सेतुबन्धः [illegible] गिरयः [illegible] क्व नाम [illegible] [illegible] । यावत् [illegible] [illegible] [illegible] [illegible] आपूर्य [illegible] दुस्तरतरः [illegible] क्रियते । [illegible] [illegible] [illegible] [illegible] ।

(स) [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

[illegible]श्च ।

और्वः शिखी वसति यत्र हरिश्च यत्र
यत्रासुराः शिखरिणश्च पतत्रभाजः ।
आमूलतोऽम्बुधिरयं प्रकटीकरोति
तत्तत्प्लवाकपिविमुक्तमहीध्रमग्नैः ॥ ५८ ॥ (ङ)

सुग्रीवः ।

ये गोत्रे सुरवारणस्य करिणो यः कौस्तुभो ये कुले
कान्ता रत्नचयः श्रियश्च निभृता ये केचन भ्रातयः ।
ये चन्द्रस्य च बान्धवाः किमपरं तानप्ययं दर्शये-
द्यद्यत्र प्लवगताऽमरगिरिर्वेगादिहाऽऽक्षिप्यते ॥ ५९ ॥ (च)

चित्त तावत् येन मुक्तं निक्षिप्तं [illegible]म् आलम्ब्यापि यथास्थानं स्थाप- यित्वापि सर्वां निधानात् समुद्रात् [illegible] वानर उत्पतितः । वानरस्य शिखरिणामारोपणेन सूचितम् । वसन्ततिलकं वृत्तम् ।

(ङ) और्व इति । यत्र और्वः शिखी वाडवाग्निः, यत्र च हरि- नारायणः वसति, यत्र असुराः दैत्यदानवाः पतत्रभाजः पक्षवन्तः शिखरिणः पर्वताश्च वसन्तीति शेषः । सोऽयम् अम्बुधिः [illegible] कपिभिर्विमुक्ता निक्षिप्ता महीध्राः पर्वताः, [illegible] तत् सर्वं [illegible] आमूलतः [illegible] इति यावत् प्रकटीकरोति आविष्क- रोति । वसन्ततिलकं वृत्तम् ।

(च) येति । यदि प्लवगता [illegible] इह समुद्रे वेगात् आक्षिप्यते निक्षिप्यते तदा सुरवारणस्य ऐरावतस्य गोत्रे वंशे ये करिणः हस्तिनः [illegible] कौस्तुभो ये कौस्तुभमणि- [illegible] कुले वंशे यः [illegible] रत्नचयः [illegible] 'प्रकटीकरोति'

रामः। सखे सुग्रीव! मा मैवं वयस्व यतो देवकोटीनां वासः स खल्वसौ।

कपिलः। एते (क) मन्दारारविन्दविलासवासाः कुङ्कु-

---

इत्यत्र ये केवलं श्रियः सम्भ्रमाः निश्चिता अविहिता इत्यर्थः प्रास्त-
[illegible]र्थाः सन्तीति शेषः, ये च चन्द्रस्य [illegible]ः सन्तीति शेषः किम्
अपरं यत्किञ्चिदिति भाव अयं वसन्तः तान् अपि ऐरावतजातीयगज-
गण्डान्यपि दर्शयेत् प्रकटयेत्।

(क) मन्दारेति। मन्दारकाणां देवानां इन्द्रस्य मघवतः विलास-
वासाः क्रीडाभवनानि कुङ्कुमपङ्केन चर्चितस्य विलेपितस्य [illegible]-
[illegible] मण्डपाङ्कस्य [illegible] कान्तिरिव कान्तिर्येषां तथाभूताः [illegible] इति
अपर योज्यम्। अर्द्धेति। अर्द्धनारीश्वरस्य अर्द्धगौरीश्वरमूर्त्तेः बिं-
बौ मिथुनौ विन्यासौ [illegible]योः चरणयोः प्रतिबिम्बेन
[illegible] यत् विलासलास्यं तेन रम्याः इति। नीहारेति
नीहारनिवहानां निविडेन निपतनेन [illegible] [illegible] [illegible]
[illegible] तथाविधा। गिरिचक्रवर्त्तिनः पर्वतराजस्य। सुरेति
सुरैः अनुभूतः यः सुधारसः तस्य उत्कर्षेण [illegible]मेति
भाव [illegible] तरुणा सुधायाः सतेजस इति यावत् तरवः यस्मिन्
तादृशस्य। कौस्तुभेति। कौस्तुभस्य [illegible] चन्द्रस्य मदिरायाः
[illegible] पारिजातस्य [illegible] या समुत्पत्तिः समुद्भवः तस्याः [illegible]-
[illegible] साक्षात् [illegible]। कुबेरेति। कुबेरेण [illegible] यत् [illegible] तेन
[illegible] विन्यासो [illegible] येन तादृशस्य कौर्त्तिमात्रस्य [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible]ताः [illegible] [illegible] [illegible] तथोक्ताः।
निर्जरेति। निर्जराः अमरभूताः [illegible] पूर्वस्य [illegible]
[illegible]: [illegible]: तैः तथाभूताः। [illegible]ति [illegible] सर्व-
[illegible] [illegible]: [illegible] [illegible] [illegible] [illegible] करः तैः तादृशाः। [illegible]
[illegible] [illegible] [illegible]: [illegible]: [illegible]।

अणहन्मसविसङ्घसतवीणक्कपासव्वविवो मेहमहोदरस्स एदे मडवारीसरविससमसंणिवेससरसपडिबिम्बमुद्धिअसि- खावलद्धा चीडारविसरविसविदविवडविसपह्ढरत्तणा गोरीगुरुणो गिरिणाहवइस्स एदे सुराङ्गदसधारणोक्करिस- णिवतरतलणो कोत्थुहमिणङ्गमइरासुरदुमणिरिसमुप्प- त्तिसक्खिणो मन्दरगिरिन्दस्स एदे कुबेरमित्तत्तणकिमपि- मासविलित्तिवासविवाधमरवर्णिमणुणा णित्यसिणजरठ- मिहत्तमहलच्छाया केलासमेलस्स एदे कंचणकमलसह- णोठ्ठिणमाणमा गअवरिणाणाहिणुगम्भिणो गअणमा-

अनूषहिति अनूषतः बाणभावे मेघवे तनु दापनं तेन विद्रुमाः नव- वीनां बन्धवमूलाः मयाङ्कुरवयाः येषां तथाविधाः । व वाको द्रव तनु तनूकार्य तद् यथा तथा प्रयाति नवस्य मद्यः प्रकाशितकोणैः वैरवोनां वैरवदेशयोधिता कपोलस्थे । कामां तथावथां वालिवंशस्य प्राहवक । अनुगर्भरवीभरस्य वनुभावनत्व । मार्गं वर्तीति मार्ग- वनवनवनस्य पूर्व निवक्तं वः मार्गः पन्था. तत्र एवमक्रम् बाहितीय- वाणां दरावीति तथाविधम् । नर्मदेति नर्मदाया नद्याः स्रोतोभिः जित्वे वारिणी निवसे निवासिनमा भट्ट् वां वल्कलं मोहनं येषु तथाविधाः । निविडेति निविडैर्निबिडैः वर्णैः नभोदराणां नदीनां वाः प्रवाः, तासां प्रवरेण निवासेन निर्मितं निर्मितम् वाकवनु- वोदवनवरवणवनवं ममवनुविंशं येषु तथाविधाः । वनवानवनैः वीव- जिवा वोषावद्रावाः वनवशेन वनगाढनेन परिचितः वीथीनां द्रुमावदेशानां निवासः [illegible] तथोक्ताः । भुवनेति भुवनभवेषु वना- वनीति तथोक्तस्य । वायूनां प्रमदेशानां वङ्गालाः वहवाः । तनवन् द्रुमैः वनितवरैः ।

द्रपदस्य एते शृङ्गमण्डलबालभावस्वामलमिन्दुमणिवलीमण्डल-
कण्ठपा तत्कालप्रपञ्चाक्षिप्रकेरलीकपोलत्वाप्तकान्तयो मन्द-
स्वभविलोदरस्य एते मत्तकमकमसमसमग्रकदायिनो वन-
टावर्तमोत्तसिर्तासहरसिहच्छिमच्छवा विंध्यधराधरस्य
एते विविधवनमधन्वरमविप्रभाप्यसरवितरहमाज्जल को-
मण्डदण्डमण्डला मगञ्चिमृगिसीमन्तिनीमञ्जनपवित्तिम
तिर्यग्विस्तारा रोहणाचलस्य एव्वमणस्य वि भुवनगर्भ-
संभवस्य गिरिणो सानुसंघाधा पदक्रमपुरुर्वेरिं समोर-
रिण्ये वेदवन्धं विरचयन्ति (४)।

---

४ एते [illegible] कुङ्कुमपङ्कपर्वितक्षतलतरवो-
[illegible] वेदवर्णाभरस्य। एतेऽर्क [illegible]-
[illegible] गौरीगुरोर्गिरिवराजिनः। एते [illegible]-
[illegible] कौस्तुभ[illegible] मन्द-
[illegible]। एते कुबेर[illegible]
निर्जित[illegible] कैलासशैलस्य। एते [illegible]-
[illegible] मलयाद्रेः। एते [illegible]-
[illegible]
[illegible]। एते [illegible]
[illegible] विन्ध्यधराधरस्य। एते विविध-
[illegible]
[illegible] रोहणाचलस्य। [illegible]
[illegible] गिरेः सानुसंघाताः [illegible]
वेदरूपं [illegible]।

विभीषणः । सकौतुकं विलोक्य ।

पाथोमयन्ति महोदधिविवर्त्तमध्ये
पारे परे कपिवरैरवलोक्य लङ्काम् ।
अत्युन्नतत्रिशिखिशिखरसमुन्नतं च
ख्यातं च सौधशिखरेषु निशाचरीभिः ॥ १० ॥ (क)

नेपथ्ये महान् कलकलः । सर्वे समाकर्णितकेन ।

रामः । किं पुनरयं (ख) प्रलयकालोत्तालवैकुण्ठकाल-
कण्ठकोलाहलकालः कलकलः ।

विभीषणः । पुरतोऽवलोक्य । देव ! (ग) सेतुबन्धपथिकप्रस्थितकपि-
कोटिसंघट्टरोदसीमाविसर्पद्दलस्य विस्फुरत्तवाहिनीतर-
ङ्गतुरङ्गमसंघस्य प्रोत्सरन्तकुञ्जमदुन्मत्तमत्तमतङ्गजस्य पत-
रन्तजलधिजलपतत्तरङ्गस्य दोलन्तगगनकेलिकानकध-
मधमायमानस्य विचलमानजिह्वायमानक्षितिमन्तवयवा-

---

(क) पाथोमेति । महोदधिविवर्त्तमध्ये पाथोमयन्ति जलमयानि भ-
मिरे इति परे पारे कपिवरैः वानरसैन्यैः लङ्कामवलोक्य अतिशयेन
उन्नतम् अत्युन्नतम् त्रिशिखिशिखरैः शिखिन् तद् यथा तथा ख्यातम् तच
निशाचरीभिः राक्षसीभिः सौधशिखरेषु हर्म्यशिरःसु ख्यातम् ।
वसन्ततिलकं वृत्तम् ।

(ख) प्रलयेति । प्रलयकाले कल्पान्ते महान् प्रचुर उत्कर्षः
विततः पुष्कला यस्य सः विक्रमः तादृशः उत्कर्षः स एवेति
वैकुण्ठः तादृशः च भवतीति वाचकः नीलकण्ठ तस्य कोला-
हलवत् काल: संहारकारकः कलकलः कलरवः ।

(ग) सेतुबन्धेति । सेतुबन्धस्य पथिकप्रस्थितकपि पाताल । कोटि-
दिति कोटिरिव निःसरन्ति रोदसीपथं स्वस्थानमपि देवः
सैन्याः महान्तः पादचारिणोऽपि यत्र सादरेण विस्तीर्णाः पाहिनी-

णामवस्स पडन्तसेणाविलासिणीकडक्खलक्खस्स समुज्जन्त-
रणलच्छिकङ्कणचक्कचक्कवालस्स उज्जम्भमाणजयसिरि-
वेणिदण्डचण्डासिणो उवट्ठिदस्स चउरङ्गस्स वि पढमक्खण-
प्पहारिदस्स रक्खसलोअस्स सुग्गीवसासणसमासादिदवि-
चित्तहुङ्कारेहिं णिसग्गसंगअ गिरिसिहरतरुप्पहरणपा-
णिजुअलेहिं वाणरेहिं पडिकवलिज्जन्तस्स रक्खसाणीअस्स
गम कलकलो (१) ।

(१) समवन्धप्रतिबन्धनिर्भिन्न कीर्यदलरोहणमाणिक्यपदातिकस्य
विभीषिताश्लीनरकृतारुम्भसमुद्योद्यमानजकुम्भदुर्गमहामतङ्गजस्य प्रम-
रजर्पमानभट्टभवरस्य दोलायमानगगनकेलिकाननध्वजपताकाडम्बरस्य

...तुरङ्गमसङ्घा यत्र तथाभूतस्य उद्यमानास्ताद्यमाना अङ्कुशदुर्गा
इव महान्त मतङ्गजा हस्तिनः यस्मिन् तादृशस्य । प्रसरन्तः अर्थि
भ्रमत इतस्ततो रथ्या भटा यस्मिन् तथाविधस्य । दोलायमानः गगने
अन्तरीक्षे केलिकानने क्रीडोपवने इव ध्वजपताकानां डम्बरः समूहः
यत्र तादृशस्य । कथ्यमानेति कथ्यमानानि जृम्भायमाणानि शतान्तःपट-
मौन साधारणानि धनूंषि यत्र तादृशस्य । पतदिति पतत् सेनाना
विलासिनीनामिव कटाक्षलक्ष्म यस्मिन् तथाभूतस्य । समुद्यत् विराजत्
रणलक्ष्म्याः कङ्कणमिव चक्रचक्रवालं चक्रसमूहः यत्र तादृशस्य ।
उज्जृम्भमाणा उद्यमाना श्रियः वेणिदण्डाः केशपाशा इव
चण्डा तीक्ष्णाः असयः यत्र तादृशस्य । चतुरङ्गस्य हस्त्यश्वरथपदाति-
बलस्य । सुग्रीवेति सुग्रीवस्य शासनेन समासादिताः विचित्रा हुङ्काराः
येषां तादृशैः हुङ्कारं कुर्वद्भिरित्यर्थः निसर्गेण प्रकृत्या सङ्गतानि मिलि-
तानि गिरिशिखराणि तरवश्च प्रहरणानि अस्त्राणि येषु तादृशानि
पाणियुगलानि येषां तैः पर्वततरुहस्तैरित्यर्थः ।

लक्ष्मणः । साधु लङ्केश्वर ! साधु (घ) षाड्गुण्योचितमुपक्रान्तं पुनर्निरुपमाननिजसाहसोचितम् ।

सुग्रीवविभीषणौ । तदग्रतः किञ्चिदुपसृत्योपविशतु देवः ।

रामः । तथा करोति ।

कपित्थः । (ङ) परिमिलिअवलीमुहपडिकवलिज्जन्ते णिसाअरसेसे सुग्गीवदूम दिअन्तराइं समकालपधाविएहिं पवङ्गमेहिं पडिक्खट्टसिलुच्चआणं दससहस्सेहिं पूरिआ सा सेउबन्धो । उत्तीण्णं अ सपुत्त वाणराणीअं दिसा लङ्कापुरीपमसाहपडहो वज्जिआइं (च) पुरन्दरजआणोदाइं समन्तुराइं पढिआ रावणरणभोआवली वन्दिविन्देहि । गीदाइ

इध्यमानजृम्भायमाणप्रतान्तयदमवाणासनस्य पतत्तूणीविलासिनीकटाक्षस्य समुद्धूतगनत्स्मोकद्भूतचक्रवालस्य उद्दयच्छमानजयश्रीविदण्डखण्डासिरूपस्थितस्य चतुरङ्गस्यापि प्रथमसमणप्रधावितस्य राक्षसलोकस्य सुग्रीवनामसमनामादितयविधिसङ्घानिरगंसंगतगिरिशिखरतरुप्रहरणपाणियुगलैर्यानैः प्रतिक्रियमाणस्य राक्षसानीकस्य कलकलः ।

(घ) षाड्गुण्यस्य सन्ध्यादिगुणषट्कस्य उचितं विहितम् । निरुपमानेति निरुपमानम् अतुल्यं यत् निजसाहसं तस्य उचितम् ।

(ङ) परिमिलितेति । परिमिलितैः सर्वतः सम्मिलितैः वलीमुखैः कपिभिः प्रतिकवलीयमाने ग्रस्यमाने । उत्तीर्णं समुद्रात् इति शेषः । लङ्कापटहः संग्रामयात्रावाद्यविशेषः ।

(च) पुरन्दरस्य इन्द्रस्य जयेन आनीतानि सुरलोकादिति शेषः । पादिताानि राक्षसानीकैरिति शेषः । रावणेति रावणस्य रणे भोगा

केलासुद्धरणपमुहं चरिदुब्भवं चारणेहिं वाणरपडिपक्ख-भावेण अ सुणिज्जन्ति पअट्टहासाइं रक्खसीणं वअणाइं ता-कुणह जहजह कामव्वम् (२)

लक्ष्मणः । भद्र ! विश्रब्धो भव नाद्याप्यायुधग्रहणकालो (३) निर्द्वयाननानि निर्मेघनादानि च निःसृतानि बलानि ।

रथिन्य । (क) सुभटसमाकृष्टकोदण्डदण्डं निहतवान-राच्छभल्लमम्‌ रभसनिक्षिप्तनिरन्तरभिन्दिपालमालं वेग-प्रवर्तितचक्रचक्रं खण्डितविपक्षशक्ति शक्तिनिर्दारितपर-

(२) परिमिलितचर्मोत्सुकप्रतिकचर्मीयमाने निशाचरकैर्मूर्च्छी-हत दिगन्तराणि समकालप्रधावितै प्लवङ्गमैः प्रतिक्षिप्तशिलोद्धयाना हतमङ्गलं गरिता सा सेतुखण्डी । उत्तीर्णं च संवर्तं वानरानीकम् । दृष्टो महापुर्या लङ्काप्रपटः । वादितानि पुरन्दरजयाभीतानि समर-तूर्याणि । पठिता रावणरणभोगावली वन्दिवृन्दै । गीतश्च कैलासो-द्धरणप्रमुखचरितोद्भवचारणैः । वानरप्रतिपक्षभावेन च श्रूयन्ते प्रकट-हासानि राक्षसीनां वचनानि तत् कुरुत यथायथा कर्तव्यम् ।

(२) प्रथमायची । कैलासेति कैलासस्य उद्धरणं प्रमुखं यस्य तादृश । चरितेति चरितानाम् उद्भवः समूहः । वानराणां प्रतिपक्षभावेन प्रतिकूलत्वेन । पअट्ट. प्रकटाः हासाः येषु तादृशानि ।

(३) निर्द्वयेति नास्ति द्वयाननो येषु तानि । निर्मेघेति नास्ति मेघनादो येषु तानि । निःसृतानि निर्गतानि ।

(क) सुभटेति । सुभटैः सुवीरैः समाकृष्टाः कोदण्डदण्डा धनुर्दण्डा यस्य तादृशम् । निहतेति निहताः वानराणाम् अच्छभल्लानाम्

परशुकं कुवलयवनभ्रमनिपातितसितप्रकुन्तकुन्तं परहृदयप्रकम्पनं द्वेधाकृतकरीन्द्रकरालकरवालं समरप्रचारचतुराङ्गचतुरङ्गं निर्मर्य्यादप्रसृतमातङ्गमातङ्गं योधजयैकस्यन्दनस्यन्दनं समासादितविपत्तिनिर्भरं प्रवृत्तमेव व्रणितसकलानीकमनीकम् । विभाव्य । अये ! परस्परं संवलनादतितुमुलं वर्त्तते । विहस्य करौ निष्कम्प्य ।

अमी कबन्धाः प्लवगा रणाङ्गणे
शिरस्सु कण्ठात्पतितेषु वल्गताम् ।

मत्ता धीरा यस्मिन् तादृशम् । रभसेति रभसेन वेगेन निक्षिप्ता निरन्तरा अविच्छिन्ना भिन्दिपालानां माला श्रेणयः यस्मिन् तथाविधम् । वेगेति वेगेन प्रवर्त्तितानि चालितानि चक्रचक्राणि चक्रास्त्रसमूहा यत्र तथा भूतम् । खण्डितेति खण्डिता नाशिता विपक्षाणां शक्तिर्येन तथोक्तम् । शक्तीति शक्तिभिरस्त्रविशेषैः निर्दारिता परस्य शत्रोः परशवः यत्र तादृशम् । कुवलयानां नीलोत्पलानां वनभ्रमेण निपातिताः सितप्रकुन्ताः श्वेतपक्षिण इव कुन्ताः अस्त्रभेदाः यस्मिन् तथोक्तम् । परेति परेषाम् अन्येषां वा शत्रूणां हृदयप्रकम्पनम् । द्वेधेति द्विधाकृता खण्डिता करीन्द्रा यैः तादृशाः करालाः करवालाः यस्मिन् तथाभूतम् । समरेति समरप्रचारे युद्धव्यापारे चतुराणि निपुणानि अङ्गानि यस्य तादृशं चतुरङ्गं हस्त्यश्वरथपदातं यस्मिन् तथोक्तम् । निर्मर्य्यादेति निर्मर्य्यादम् उच्छृङ्खलं यथा तथा प्रसृताः चलिताः मातङ्गा इव अन्त्यजा इव मातङ्गा हस्तिनः यत्र तादृशम् । योधेति योधानां धीराणां जये एकं केवलं स्यन्दने वर्त्तन्ते इति तथोक्ताः स्यन्दनाः रथाः यत्र तादृशम् । समासादितेति समासादिताः प्राप्ताः विपत्तिनिर्भराः अत्यापदः येन तथोक्तम् । व्रणितेति व्रणितानि क्षतानि सकलानि अनीकानि वीरा यत्र तादृशम् । अनीकं सैन्यम् । संवलनात् समाक्रमणात् ।

मिथो विरोधाज् जनहासदायिनीं
सृजन्ति सृष्टिं कपिराक्षसात्मिकाम् ॥ ६१ ॥ (ज)

अन्यतोऽवलोक्य ।

निशाचरोऽयं गमितः कबन्धतां
करीन्द्रवक्त्रे पतितेऽधिकन्धरम् ।
प्रवृत्तनृत्यक्रमभीमदर्शनैः
करोति हेरम्बवपुर्विडम्बनाम् ॥ ६२ ॥ (झ)

अपरतोऽवलोक्य ।

अच्छभल्लकपयः स्वकबन्धै-
र्व्यत्ययादधिनिविष्टशिरस्कैः ।
मायया रचितचित्रशरीरा
राक्षसा इव विभान्ति मुहूर्त्तम् ॥ ६३ ॥ (ञ)

---

(ज) अमी इति । अमी प्लवगाः वानराः रणाङ्गणे कण्ठात् पतितेषु रक्षसां शिरःसु सत्सु कबन्धैः तदीयैः शिरोविरहितैः देहैः सह मिथः परस्परं विरोधात् जनानां हासदायिनीं हास्यकरीं कपिराक्षसात्मिकां वानरराक्षसमयीं सृष्टिं सृजन्ति कुर्वन्ति । वंशस्थविलं वृत्तम् ।

(झ) निशाचर इति । अयं निशाचरः राक्षसः कबन्धतां गमितः प्रापितः कर्त्तितशिराः सन् इत्यर्थः करीन्द्रस्य गजराजस्य वक्त्रे मुखे शरनिकृत्ते इति शेषः अधिकन्धरं ग्रीवायां पतिते सति प्रवृत्तानां नृत्यक्रमाणां भीमदर्शनैः हेरम्बस्य गजाननस्य वपुः शरीरं तस्य विडम्बनाम् अनुकरणं करोति गजानन इव भीमं नृत्यतीति भावः । वंशस्थविलं वृत्तम् ।

(ञ) अच्छेति । अच्छभल्लकपयः [illegible] व्यत्ययात् वैपरी-

अन्यतोऽवलोक्य ।

गतं परप्रणतिपरायणं शिर-
स्समित्सुहृत्करयुगलं च तिष्ठति ।
इतीव ह्री विकसितसम्मदोत्सवं
प्रवर्त्तते किमपि कबन्धताण्डवम् ॥ ६४ ॥ (ट)

कपिञ्जलः । देव ! पेक्खदु (ठ) अणवरअविप्पइण्णघुसिणचुण्ण विअ अन्तरं विरअअन्तं भुवणगब्भप्पसरिदं रअसमुद्दमठ

अधिनिविष्टानि स्वग्रीवासु पतितानि शिरांसि राक्षसानामिति भावः येषां तादृशैः स्वकबन्धैः स्वकीयैः छिन्नमुण्डदेहैः उपलक्षिताः अतएव मायया रचितं चित्रं शरीरं यैः तथाभूता राक्षसा इव मुहूर्त्तं क्षणं विभान्ति विराजन्ते । इन्द्रवज्रावृत्तम् ।

(ट) गतमिति । शिरः परस्य शत्रोः प्रणतिरेव परम् अयनम् आश्रयं गतं प्राप्तं छिन्नं सत् पतितमिति भावः । समित् सुहृत् संग्राम-मित्रं करयुगलं बाहुद्वयं च किन्तु तिष्ठति इतीव इत्येवं कारणादिव ह्रीशब्दश्चमत्कारव्यञ्जकोऽव्ययः । विकसितः उल्लसितः सम्मदेन हर्षेण उत्सवः यत्र तादृशं किमपि अनिर्वचनीयं कबन्धानां ताण्डवं नृत्यं प्रवर्त्तते ।

(ठ) अनवरतेति । अनवरतं विप्रकीर्णानि विक्षिप्तानि घुसृ-णानां कुङ्कुमानां चूर्णानि यस्मिन् तादृशं वियदन्तरं गगनावकाशं विरचयन्तं कुर्वन्तं रक्ताक्तरजः सम्पातेनेति भावः । भुवनेति भुवन-गर्भेषु पृथिव्यभ्यन्तरेषु प्रसृतं विस्तृतम् अष्टमम् अष्टानां पूरणं लव-णेक्षुसुरासर्पिर्दधिदुग्धजलान्तका इति समुद्राणां सप्तसंख्याया एव कीर्त्तनादिह अष्टमत्वेनोत्प्रेक्षितमिति बोध्यम् । रक्तस्य समुद्रं सागरं विस्तारयन्तं तन्वन्तम् ।

ठमं विम्र विस्तारमन्तं (ड) त्रिदिवदर्शनदिसप्पथागं विम्र धरणिमण्डलं दंसमन्तं विहिअवसन्धराफंसभअं रवितुर-

(ड) त्रिदिवेति । त्रिदिवस्य स्वर्गस्य दर्शनार्थं दत्तं पर्याणं पृष्ठास्तरणविशेष इव यस्य तादृशं धरणिमण्डलं भूतलं रवितुरङ्गमाणां सूर्याश्वानाम् आकाशचारिणामिति भावः विहितं जनितं वसुन्धरायाः स्पर्शात् भयं दर्शिन् तद् यथा तथा दर्शयन्तं रवितुरङ्गमा पर्याणितं भूतलं स्वर्गदर्शनार्थमागच्छत् संस्पर्शभयं यथा पश्यन्ति तथा कुर्वाणमित्यर्थः । उच्छलितेति उच्छलितेन उद्गतेन धूलिवलयेन रजःपटलेन लघिमीकृतः लघूकृतः भूमिभारो यस्य तस्य भावः तथात्वं तेन भुजङ्गानां पतेः शेषस्य अनन्तस्य कृतः महान् अनुग्रहो येन तथाविधम् । वीरेति वीरजनानां सुधासक्तानामिति भावः निर्वेशित अभिलषित इति यावत् यो वेशविशेषः परिच्छदभेदः, स पांशुलः रजोमलिनः यासां तासां भावः तथात्वेन हेतुना विद्याधरीभिः वीरजनवरणार्थं खेचरीभिरिति भावः असूयितः दूषितः विस्तारो यस्य तादृशम् । प्रदोषेति प्रदोषे रजन्यां विकसितानि कालमकुमलानमया उन्मीलितानि यानि नयनकमलानि तेषां भरणस्य रजसा प्रवेशस्य निवारणाय दत्ताभ्यां नियुक्ताभ्यां पाणिभ्यां पिहितानि आच्छादितानि वदनानि यासां तासां भावः तथात्वेन अप्सरोभिः सुरनारीभिः जुगुप्सितं घृणितम् । घण्टेति घण्टानां कण्ठबद्धानामिति भावः टङ्कारेण ध्वनिविशेषेण श्रूयमाणा न तु दृश्यमाना रजश्छन्नत्वादिति भावः एवमन्यत्र करीन्द्राः गजाः यस्मिन् तथोक्तम् । कनकेति कनककिङ्किणीनां स्वर्णक्षुद्रघण्टिकानां झणत्कारेण ज्ञायमानाः स्यन्दना रथा यस्मिन् तथाभूतम् । हेषेति हेषारवेण सूच्यमानाः प्रतीयमानास्तुरङ्गा यस्मिन् तादृशम् । कृष्टेति कृष्टेन आकृष्टेन गुणेन मौर्व्या विविधम् अतिमात्रं नमन्तीभ्याम् अटनिभ्यां धनुषः अग्रभागाभ्यां युक्तेन

ङ्गाणं उच्छलियधूलिवलयतलिणीकिअभूमिभारत्तणेण कि-
अमहाणुग्गहं भुअङ्गवइणो सेसस्स वीरजणणिवेसिअवेसवि-
सेसपंसुलत्तणेण असूइअवित्थारं विज्जाहरीहिं पओसवि-
असिद्दणअणकन्दोट्टभरणणिवारणदिसपाणिपिहिदवअणा-
त्तणेण जुउच्छिअं अच्छराहिं घण्टाटङ्कारसुणिज्जन्तकरिन्द-
कणअकिङ्किणीझणंक्कारजाणिज्जन्तसन्दणं हेसारवसूइज्ज-
न्ततुरङ्गं कठ्ठिअगुणणिविडणमन्ताटणिमुक्ककडक्कारकलि-
ज्जन्तधाणुक्कं अङ्गपरिफंसपडिजाणिज्जन्तरिक्खरक्खमवा-
णरं चउरङ्गबलचडुलचरणक्खोहसमुत्तम्भिअरेणुविरइअणी-
रन्धान्धआरं समरङ्गणं वट्टइ (२)।

---

(२) देव! प्रसृतामनवरतविप्रकीर्णसुवर्णचूर्णं वियदन्तरं विरचयन्तं भुवनगर्भप्रसूतं रजःसमुद्गमदमिव विस्तारयन्तं त्रिदिवदर्शनदत्तपर्याप्त-मिव धरणिमण्डलं दर्शयन्तं विहितसुरासुरासुरभयं रवितुरङ्गाणा उच्छलितधूलिवलयतलिनीकृतभूमिभारत्वेन कृतमहानुग्रहं भुजङ्गपतेः शेषस्य वीरजननिवेशितवेशविशेषपांशुलत्वेनासूयितविस्तारं विद्याध-

---

कडत्कारेण ध्वनिविशेषेण कल्यमाना मोह्यमाना धानुष्का धनुर्धरा यस्मिन् तथोक्तम्। अङ्गेति। अङ्गानां शरीराणां परिस्पर्शेन प्रत्यभिज्ञा-यमानाः अनुभूयमानाः ऋक्षा राक्षसा वानराश्च यस्मिन् तथाविधम्। चतुरङ्गेति चतुरङ्गानां हस्त्यश्वरथपादातरूपाणां बलानां सैन्याना चरणक्षोभेण पदनिर्दलनेन उत्तम्भिताः उत्क्षिप्ता ये रेणवः रजांसि तैः विरचितं कृतं नीरन्ध्रं निविडम् अन्धकारं यस्मिन् तथाभूतम्।

इत्यितः । देव ! यथाऽऽवेदितं कपित्थेन अस्ति हि निर्भरो (ढ) भूपरागप्रसरः । तथा हि ।

हेलाचण्डचलच्चमूपरिकरक्षुण्णक्षमाजन्मभिः
पक्वैलाफलगर्भचूर्णरुचिभिः कीर्णेऽम्बरे रेणुभिः ।
एतस्मिन् समराङ्गणे गुणनिधिर्विश्वप्रदीपोऽप्ययं
तूर्णोत्तानितकांस्यतालकरणिर्जातो दिनानां पतिः॥ ६५ ॥ (ण)

---

ताभिः प्रदोषविकसितनयनकमलभरणनिवारणदत्तपाणिपिहितवदनत्वं न जुगुप्सितमप्सरोभिः घण्टाटङ्कारश्रूयमाणकरीन्द्रं कनककिङ्किणीझणत्कारज्ञायमानस्यन्दनं हेषारवलक्ष्यमाणतुरङ्गं कष्टगुणनिबिडनमदटनिमुक्तटत्कारकल्प्यमानधानुष्कं अङ्गपरिस्पर्शप्रत्यभिज्ञायमानराक्षसवानरं चतुरङ्गबलचटुलचरणक्षोभसमुत्तम्भितरेणुविरचितनीरन्ध्रान्धकारं समराङ्गणं वर्त्तते ।

---

(ढ) निर्भरः आत्यन्तिकः । भूपरागेति भुवः पृथिव्या पुष्पभूताया इति भावः परागाणां रजसां प्रसरः विस्तारः ।

(ण) हेलेति । एतस्मिन् समराङ्गणे अयं गुणानां निधिरालयः विश्वप्रदीपोऽपि दिनानां पतिः सूर्यः हेलया अयत्नया चण्डम् उच्छृङ्खलं यथा तथा चलन्तीनां चमूनां सेनानां परिकरैः सङ्घातैः क्षुण्णा दलिता या क्षमा पृथ्वी तस्यां जन्म येषां तथाभूतैः पक्वानाम् एलाफलानां गर्भेषु यानि चूर्णानि तेषां रुचिः कान्तिरिव रुचिर्येषां तथाविधैः रेणुभिः रजोभिः अम्बरे आकाशे कीर्णे आच्छादिते सति तूर्णं झटिति उत्तानितं विलसित यत् कांस्यतालं तस्य करणिः अनुरूप जातः । शार्दूलविक्रीडितं वृत्तम् ।

अपिच।

युद्धोत्थे रजसामुदञ्चति चये द्वाभ्यां दवीयोऽन्तरान्
पाणिभ्यां युगपन्न लोचनपुटानष्टौ पिधातुं क्षमः।
एकैकं दलमुन्नमय्य गमयन् वासाम्बुजं कोषतां
धाताप्यावरणाकुलः स्थित इव स्वाध्यायवन्ध्याननः॥६६॥(त)

कपिलः। विहस्य। (थ) णिरन्तरपसरन्तसरलक्खपुङ्खवि-
किरणेण विश्रडधश्रवडाश्रावेल्लिरपल्लश्रपिल्लणेण दंसणागश्र-
सुरसुन्दरीचक्कविमुक्कगरिल्लमल्लवेल्लणेण पढमं तणुइकदे

---

(त) युद्धोत्थे इति। युद्धात् उत्तिष्ठतीति तथोक्ते रजसां रेणूनां चये उदञ्चति उद्गच्छति सति स्वाध्यायेषु वेदपाठेषु वन्ध्यानि निष्फलानि आननानि यस्य तादृशः वेदपाठविरतः रजसामुदये अनध्यायस्य शास्त्रीयत्वात्। धाता ब्रह्मापि दवीयः दूरतरम् अतिदीर्घम् अन्तरम् अवधिर्येषां तादृशान् अष्टौ लोचनपुटान् द्वाभ्यां पाणिभ्यां युगपत् समकालं पिधातुम् आवरीतुं न क्षमः असमर्थः सन् वासासनम् आसनकमलम् कोषताम् आच्छादकत्वं गमयन् प्रापयन् भुजदलमुन्नमय्य उत्तोल्य आवरणेन देहाच्छादनेन आकुल इव। स्थितः अत्रोत्प्रेक्षालङ्कारः। भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना इति लक्षणात्। शार्दूलविक्रीडितं वृत्तम्। लोकविशेषः।

(थ) निरन्तरेति। निरन्तरम् अविरतं प्रसरन्तः तान्थे ये प्रह-लक्षाणां पुङ्खेन क्रमेण यत् विकिरणं विक्षेपणं ये वीराः आजिषु तानां ध्वजानां पताकाः पल्लवपल्लवा इव तैः सन्तः अनिर्णियाणां दर्शनागतैः सुरसुन्दरीणां चक्रैः समूहैः विमुक्ताः तत्र जाताः देवत्वं लब्धानां माल्यानां मोक्षणेन निक्षेपणेन च वृद्धिः चलद्भिः चार-चक्रवालं मण्डलं निष्ठुरेण प्रहारेण हतानां मरीमूय देवत्वं प्राप्य देहानां कम्बरारम्भेभ्यः निःसरन्तीनां रुधिमूर्छे शिरसि पुष्टा

दर्शकः । देव ! यथाऽऽवेदितं कपित्येन अति हि निर्भरो (ढ) भूपरागप्रसरः । तथाहि ।

हेला।चण्डचलच्चमूपरिकरच्चुस्तसमाजन्मभिः
पक्वैलाफलगर्भचूर्णरुचिभिः कीर्णेऽम्बरे रेणुभिः ।
एतस्मिन् समराङ्गणे गुणनिधिर्विश्वप्रदीपोऽप्ययं
तूर्णोत्तानितकांस्यतालकरणिर्जातो दिनानां पतिः॥ ६५॥(ण)

---

र्शिभि: प्रदीपविकसितनयनकमलभरणनिवारणदत्तपाणिपिहितवदनत्वेन जुगुप्सितमप्सरोभिः घण्टाटङ्कारश्रूयमाणकरीन्द्रं कनककिङ्किणीझणत्कारज्ञायमानस्यन्दनं हेषारवलक्ष्यमानतुरङ्गं कष्टगुणनिविड़नमटटनिरुक्ककटत्कारकल्प्यमानधानुष्कं अङ्गपरिस्पर्शप्रत्यभिज्ञायमानशूराक्षमवानरं चतुरङ्गबलचटुलचरणक्षोभसमुत्क्षिप्तरेणुविरचितनीरन्ध्रान्धकारं समराङ्गणं वर्त्तते ।

---

(ढ) निर्भरः आत्यन्तिकः । भूपरागेति भुवः पृथिव्या पुष्पभूतायाः इति भावः परागाणां रजसां प्रसरः विस्तारः ।

(ण) हेलेति । एतस्मिन् समराङ्गणे अयं गुणानां निधिरालयः विश्वप्रदीपोऽपि दिनानां पतिः सूर्यः हेलया अयत्नया चण्डम् उच्छृङ्खलं यथा तथा चलन्तीनां चमूनां सेनानां परिकरैः सङ्घातैः क्षुण्णा दलिता या क्ष्मा पृथ्वी तस्यां जन्म येषां तथाभूतैः पक्वानाम् एलाफलानां गर्भेषु यानि चूर्णानि तेषां रुचिः कान्तिरिव रुचिर्येषां तथाविधैः रेणुभिः रजोभिः अम्बरे आकाशे कीर्णे आच्छादिते सति तूर्णं झटिति उत्तानितं विवृतं यत् कांस्यतालं तस्य करणिः अनुरूपः जातः । शार्दूलविक्रीडितं वृत्तम् ।

अपिच।

युद्धोत्थे रजसामुदञ्चति चये द्वाभ्यां दवीयोऽन्तरान्
पाणिभ्यां युगपन्न लोचनपुटानष्टौ पिधातुं क्षमः।
एकैकं दलमुन्नमय्य गमयन् वासाम्बुजं कोशतां
धाताप्यावरणाकुलः स्थित इव स्वाध्यायवन्ध्याननः॥ ६६॥(त)

कपित्थः। विहस्य। (थ) णिरन्तरपसरन्तसरलकवपुङ्खवि-
किरणेण विअडधअवडाआवेल्लिरपल्लअपिल्लणेण दंसणागअ-
सुरसुन्दरीचक्कविमुक्कगरिल्लमल्लपेल्लणेण पढमं तणुईकदं

---

(त) युद्धोत्थे इति। युद्धात् उत्तिष्ठतीति तथोक्ते रजसां रेणूनां चये उदञ्चति उद्गच्छति सति स्वाध्यायेषु वेदपाठेषु वन्ध्यानि निष्फलानि आननानि यस्य तादृशः वेदपाठविरत रजसामुदये अनध्यायस्य शास्त्रीयत्वात्। धाता ब्रह्मापि दवीय दूरतरम् अतिदीर्घम् अन्तरम् अवधिर्येषां तादृशान् अष्टौ लोचनपुटान् द्वाभ्यां पाणिभ्यां युगपतः समकालं पिधातुम् आवरीतुं न क्षमः असमर्थः सन् वासाम्बुजं नाभिकमलम् कोशताम् आच्छादकत्वं गमयन् प्रापयन् एकैकं मुकुल-दलमुन्नमय्य उत्तोल्य आवरणेन देहाच्छादनेन आकुल इव स्थितः। स्थितः अत्रोत्प्रेक्षालङ्कारः। भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मनेति लक्षणात्। शार्दूलविक्रीडितं वृत्तम्। भीगधिशेषः।

(थ) निरन्तरेति। निरन्तरम् अविरतं प्रसरन्तः तान्येव प्रहरणानां पुङ्खेन क्रमेण यत् विकिरणं विक्षेपणं ये वीराः आजिषु तानां ध्वजानां पताकाः चञ्चलपल्लवा इव तैः सन्तः अनिमिषाणां दर्शनागतैः सुरसुन्दरीणां चक्रैः समूहैः विमुक्तानां जाताः देवत्वं प्राप्तानां माल्यानां मोचनेन निक्षेपणेन च शूरैः चलद्भिः वासुर-चक्रवालं मण्डलं निष्ठुरेण प्रहारेण हतानां मरीभूय देवत्वं प्राप्य देहानां कन्धरारन्ध्रेभ्यः निःसरन्तीनां रुधिरनदीनां शिरसि मुक्ता

रणरेणुचक्कवालं णिठ्ठुरप्पहारकियकबन्धकन्धरारम्भणोस-
रन्तरुहिरधाराधोरणीहिं करिकरखेलावल्लिअसीअरासार-
प्पसरेण अ णिल्लूणमेव मूलदो धूलिमण्डलम् (ड) ।

इति पठति । अन्यान्तरेण तु रणाङ्गणे पुनः संसक्तमेव (ढ)
यशोधनमायोधनं शूराणाम् । विभाव्य । अये ! महाप्रभावः
समराङ्गणप्राणपरित्यागो वीरवर्गस्य यदप्सरसोऽपि स्वयं-
वरेणोपतिष्ठन्ते । यदुत ।

चण्डासिच्छेदलीलायितहृतशिरसो दिव्यतां सन्दधाना (ण)
न्यञ्चद्भिः कण्ठकाण्डैः समरवसुदृशः पूर्वसंस्कारशङ्का ।
द्रागदृष्ट्वा नाथमार्यं सपदि विदधतः फालदानं विमाना-
द्वीराः स्वःसुन्दरीभिः किमिदमिति धृता बन्धुरैर्बाहुबन्धैः॥ ६७

---

(ड) निरन्तरप्रसरत्क्षुरलसत्पुङ्खविकिरणेन विकटध्वजपताकाचञ्चल-
समर ॰रणेन दर्शनागतसुरसुन्दरीचक्रविमुक्तश्रेष्ठमाल्यमोक्षणेन प्रथमं
कृतं रणरेणुचक्रवालं निष्ठुरप्रहारकृतकबन्धकन्धरारम्भनिःसर-
(ढ) ॰धोरणीभिः करिकरलेखाप्रेरितशीकरासारप्रसरेण च
इति भाव॰मूलतो धूलिमण्डलम् ।

(ण) हेलेति ।

॰दिव्यप्रदीपोऽपि दिनान्तिनां करलेखाः गुल्फादण्डराजयः ताभिः
कुलं यथा तथा चलन्तीभ्यां प्रसरेण विस्तरेण च निर्मूलं निःशेषेण
दलिता या क्षमा पृथ्वी
॰लानां गर्भेषु यानि चूर्ण । यशोधनं कीर्तिकरमित्यर्थः आयोधनं
॰विधैः रेणुभिः रजोभिर्नां महान् प्रभावः यस्मात् तादृशः युद्ध
॰तृणां झटिति उत्तानिवाप्तेरिति भावः ।
॰जातः । शार्दूलविक्रीडितेन निशितेन असिना यश्छेदः प्रहारः स

सुग्रीवः । यथैव निर्वेदिनमति हि नामाश्चर्यवितरणैक-
मुष्टियोगः (न) समरसंरम्भो वर्त्तते । तथाहि ।
वीराश्चण्डासिदण्डप्रहरणसुहृदः सम्मुखं सम्पतन्तो
ये जाताः पात्रमाजिष्वनिमिषसुमनोदाम दानोत्सवस्य ।
पश्य प्रेङ्खत्सुरप्रप्रकृतिभिरमरीभूय तैरेव भूयः
शेषाणां मूर्ध्नि मुक्ताः सुरकुसुममहावृष्टयः पुष्टभृङ्गाः ६८ (प)

---

एव लीला विलासविशेषः तद्वदाचरितं यथा तथा हृतानि शिरांसि येषां ते अतएव दिव्यतां देवत्वं सन्दधानाः प्राप्ताः वीराः पूर्वसंस्कारस्य समरतालप्रतिभायाः शङ्कया प्रभावेण वशेनेत्यर्थः न्यञ्चद्भिः निम्नवर्त्तिभिः नमद्भिरित्यर्थः कराठकाण्डैः गलदेशैः समरवशादथः युद्धलक्षणनयनाः द्राक् झटिति आद्यं प्रथमं नाथं स्वामिनं दृष्ट्वा सपदि तत्क्षणं विमानात् देवयानात् देवत्वे प्राप्तादिति भावः फालदानं विदधतः कुर्वन्तः लम्फनेन रणभूमौ पतनोत्सुका इत्यर्थः स्वःसुन्दरीभिः सुरनारीभिः किमिदम् इति बन्धुरैः व्यस्तत्वात् उन्नतानतैः भाङ्गबन्धैः भुजबन्धनैः आलिङ्गनैरित्यर्थः धृताः अवलम्बिताः । स्रग्धरावृत्तम् ।

(न) आश्चर्येति । आश्चर्याणां चमत्काराणां वितरणं प्रदाने प्रदर्शने इत्यर्थः एकः मुख्यः मुष्टियोगः औषधविनियोगविशेषः ।

(प) वीरा इति । चण्डाः तीक्ष्णा ये असिदण्डाः तान्येव प्रहरणानि अस्त्राणि सुहृदः सहायाः येषां तथाभूता ये वीराः आजिषु रणेषु सम्मुखम् अग्रतः सम्पतन्तः युध्यमाना इत्यर्थः सन्तः अनिमिषाणां देवानां सुमनोदाम्नां पुष्पमाल्यानां दानोत्सवस्य पात्रं जाताः देवत्वं प्राप्ता इत्यर्थः । पश्य अवलोकय तैरेव वीरैः प्रेङ्खद्भिः चलद्भिः सुरप्रैः अस्त्रविशेषैः याः प्रकृतयः प्रहाराः ताभिः अमरीभूय देवत्वं प्राप्य भूयः पुनः शेषाणां संग्रामवर्त्तिनां भटानां मूर्ध्नि शिरसि मुक्ता

विभीषणः । देव ! इतोऽपि दृश्यतां द्रष्टव्यम् ।

वीरैर्वैमानिकत्वं समरमरणतो लम्भितैः सङ्गराग्रं
दृष्ट्वा स्वस्वामिबाधाप्रहरणविरहात्सर्वतः सूत्रितोऽयम् ।
दारैः पाशप्रकाशैः सपदि वलयकैरङ्कवत्सम्पतद्भिः
स्वर्णापीडैः स्वमुक्तद्रुघणकरणकैर्नूतनो युद्धमार्गः ॥६८॥(क)

कपिः । (ख) णिव्विड़पडन्तकरिकरङ्कसंकुलं फारफेक्का-
रफुल्लगल्लसिवासेविआसवं रुहिरपाणपीडणुड्डामरडाइ-

---

रुद्धा भ्रमरा यासां ताः सुरकुसुमानां देवतरुपुष्पाणां महावृष्टयः मुक्ताः विक्षिप्ताः । स्रग्धरावृत्तम् ।

(क) वीरैरिति । समरेषु मरणतः प्राणत्यागेन वैमानिकत्वं देवत्वं लम्भितैः प्रापितैः वीरैः सङ्गराग्रं दृष्ट्वा स्वस्वामिनी स्वकर्तृका या बाधा परपीड़नमित्यर्थः तस्याः प्रहरणविरहात् अस्त्राभावात् सर्वतः समन्तात् पाशप्रकाशैः पाशास्त्रतुल्यैः सपदि सत्वरम् सम्पतद्भिः सपदागच्छद्भिरित्यर्थः वलयकैः अङ्कैः स्वर्णापीड़ैः स्वर्णनिर्मितशिरोभूषणैः तथा स्वमुक्तद्रुघणकरणकैः स्वमुक्तभूमिचम्पकपुष्पकरणकैः दारैः स्त्रीभिः सुरनारीभिरित्यर्थः सह अयं नूतनः युद्धमार्गः संग्रामव्यापारः विहाररूप इति भावः सूत्रितः विरचितः । स्रग्धरावृत्तम् ।

(ख) निविड़ेति । निविड़ं नीरन्ध्रं यथा तथा पतद्भिः करिणां करङ्कैरस्थिभिः सङ्कुलं व्याप्तम् । स्फारेति स्फारैः उग्रैः फेत्कारैः "फेउ फेउ इति" रवविशेषैः फुल्लाःगल्ला यासां ताभिः शिवाभिः शृगालैः सेविताः पीता आसवाः सुरारूपाणि शोणितानि इत्यर्थः यस्य तथाभूतम् । रुधिरेति रुधिराणां पाने यत्पीड़नं परस्परं बाधनं तेन उड्डामराभिः प्रचण्डाभिः डाकिनीभिर्मुक्तेन डात्कारेण डामरं भयावहम् । रक्तेति रक्तेन शोणितपानेन मत्तानां वेतालविलासिनीनां भूताङ्गनानां

णीमुक्तडाक्कारडामरं रत्तमत्तवेआलविलासिणीकेलिकलि-अकिलिकिलाकोलाहलसंकुलं समरसंभारसंभाविअपवलवलीमुहवलक्कन्तं रक्खससेसं लङ्काभिमुहं पअट्टइ (५)।

हनूमान्। विहस्य देव! विजितमस्माभिर्यत् प्रमुख (भ) एव विमुखं राक्षसबलम्।

रामः। प्रवृत्ते रणकर्मणि सेनयोः(म)सारणापसरणानि गणशो भवन्ति कस्तत्र जयः पराजयो वा।

हनूमान्। देव! नैवं यत् किल प्रमुखविमुखं बलं द्वादशवर्षाणि न सम्मुखी भवतीति प्रायोवादः।

रामः। विहस्य। भद्र हनूमन्! किमनेन विमुखेन सम्मुखेन वा यदिह न (य) धूर्जटिधराधरोद्धारेऽप्यकुण्ठो

---

(५) निबिडपतत्करिकरङ्कसङ्कुलं स्फारफेत्कारफुल्लगल्लशिवासेवितासवं रुधिरपानपीडनोड्डामरडाकिनीमुक्तडात्कारडामरं रक्तमत्तवेतालविलासिनीकेलिकलितकिलिकिलाकोलाहलसङ्कुलं समरसम्भारसम्भावितप्रबलवलीमुखबलाक्रान्तं राक्षससैन्यं लङ्काभिमुखं प्रवर्त्तते।

---

केलिकलितेन क्रीडार्जितेन किलिकिलाकोलाहलेन सङ्कुलं व्याप्तम्। समरेति समरसम्भारेण युद्धव्यापारेण सम्भावितैः सम्मानितैः प्रबलैः बलीमुखबलैः वानरसैन्यैः आक्रान्तम् अभिभूतम्।

(भ) प्रमुख एव प्रारम्भे एव।

(म) सारणापसरणानि साम्मुख्यवैमुख्यानि। गणशः क्रमशः। प्रमुखविमुखं प्रमुखे प्रारम्भे विमुखम्। प्रायोवादः प्रायशः प्रसिद्धिः।

(य) धूर्जटीति। धूर्जटेः धराधरस्य कैलासस्य उद्धारे उत्तोल-

दशकण्ठो नापि विनिर्जितमघवा मेघनादः। पुरोऽवलोक्य।
कथं लङ्काप्रतोलीमतिक्रम्य राक्षसबलं वर्त्तते। ऊर्द्धमवलोक्य
सकौतुकम्।

(२) कोऽयं दिव्ये विमाने

हनूमान्।

रजनिचरपतिः

लक्ष्मणः।

साधु पौलस्त्य! साधु

द्राक् चण्डं चन्द्रहासं कलय सविधगे नास्त्यरातौ तितिक्षा।

---

टने। विनिर्जितः मघवा इन्द्रः येन तादृशः। इह न स्यादिति शेषः।
लङ्केति लङ्कायाः प्रतोलीं मार्गमतिक्रम्य भयात् अपथेनापि इति भावः
वर्त्तते गच्छति।

(२) कोऽयमिति। दिव्ये विमाने पुष्पके इत्यर्थः अयं कः?
रजनिचराणां राक्षसानां पतिः। हे पौलस्त्य! रावण! साधु साधु
प्रशंसामि त्वामिति भावः। द्राक् झटिति चण्डं प्रचण्डं चन्द्रहासं
स्वकीयमसिं कलय गृहाण, सविधगे सम्मुखवर्त्तिनि अरातौ शत्रौ
तितिक्षा क्षमा नास्ति नैव कर्त्तव्या इति भावः। सीतापि अत्रैव
पुष्पके एव, स एष रावणः तस्याः सीतायाः चटुषु प्रियोक्तिषु मधुर-
वचनेषु कृता रतिः अनुरागः येन तथाभूतः सन् आस्ते इति शेषः,
भोः! मे कार्मुकं धनुः देहीति शेषः। शान्तं निवर्त्ततां देव! इति
भावः सरन्तः गच्छन्तः बाणाः शराः जनकजां रावणं वा न खलु
नैव विदन्ति जानन्ति रावणं प्रति निक्षिप्ताः शराः यदि सीतां हन्यु-
रिति भावः। रामहनूमल्लक्ष्मणसुग्रीवाणाम् उक्तिप्रत्युक्तिपूर्णोऽयं
श्लोक इति बोध्यम्। सग्धराछन्दः।

राम:।

सीताप्यतैव तस्याश्चटुषु क्षतरतिः सैष भोः! कार्मुकं मे

सुग्रीवः।

शान्तं बाणाः सरन्तो न खलु जनकजां रावणं वा विदन्ति॥

नेपथ्ये।

भोः पश्य राम! मम पार्श्वगतां च सीतां
तच्च प्रदर्शय निजं जितवालि वीर्यम्।
अस्याः स एव ननु मूर्धनि चन्द्रहासो
रम्भाप्रकाण्डदलनोद्यममातनोति॥ ७१॥ (ल)

रामः। विहस्य। हंहो रावण! (व) संवृणु जनितजन-हासं चन्द्रहासं कः शक्तिमानपि मृगाङ्कमूर्त्तिं शिलापट्टके पिनष्टि।

लक्ष्मणः। सविषादम्।

यावत् करोति न धनुः सशरं समार्य्यो
यावन्न सूचयति विक्रमणं हनूमान्।

---

(ल) भो इति। भो राम! मम पार्श्वगतां सीतां पश्य च जितः वालिः येन तादृशं तत् निजं वीर्यं बलं प्रदर्शय च। ननु निश्चितं स एव चन्द्रहासः अस्याः सीतायाः मूर्द्धनि रम्भायाः कदल्याः प्रकाण्डस्य स्कन्धदेशस्य दलने खण्डने यः उद्यमः उद्योगः तम् आतनोति विस्तारयति कदलीकाण्डमिव अस्याः मुण्डं छिनत्तीति भावः। वसन्ततिलकं वृत्तम्।

(व) संवृणु सङ्गोपय। मृगाङ्कमूर्त्तिं चन्द्रबिम्बं पिनष्टि इत्यति।

आर्य्याशिरो दशमुखेन विलूय तावत्
छिन्नं च कल्पितमदर्शनमम्बरे च ॥ ७२ ॥(ग)

रामः । ससम्भ्रमम् । कथमिदं दशकण्ठेन विलूय छिन्नं सीताशिरः शर्करायां (घ) भुवि पतति तत् सत्वरमुपसृत्य स्तनतटपरिपीड़नपरिचितस्पर्शं प्रसारितकरयुगजनिताऽञ्जली प्रतीच्छामि । तथा कृत्वाऽवलोक्य च । हा वैदेहि ! शिरःशेषा वर्त्तसे । सकरुणं विभाव्य ।

तरुणभुजगलीला सैव वेणी तदेव
श्रवणयुगमनङ्गान्दोलडोलाद्वयाभम् ।
स्मरकुवलयबाणावीक्षणे ते च तस्या-
स्तदयमलकलक्ष्मा वक्त्रचन्द्रः स एव ॥ ७३ ॥(ङ)

---

(ग) यावदिति । मम आर्य्यः रामः यावत् धनुः सज्यं न करोति, हनूमान् यावत् विक्रमणं न स्तम्भयति न प्रकटयति तावत् दशमुखेन रावणेन आर्य्यायाः सीतायाः शिरः विलूय छित्त्वा छिन्नञ्च अम्बरे आकाशे अदर्शनं कल्पितम् यौगपद्यसूचकं च द्वयम् । सीतायाः शिरश्छेदनं रावणोऽन्तर्दधे इत्यर्थः । अत्र छेदनतिरोधानरूपयोः क्रिययोः यौगपद्यात् समुच्चयालङ्कारः तदुक्तं समुच्चयोऽयमेकस्मिन् सति कार्य्यसाधके । खले कपोतिका न्यायात् तत्करः स्यात् परोऽपि चेत् । गुणौ क्रिये वा युगपत् स्यातां यद्वा गुणक्रिये इति । वसन्ततिलकं वृत्तम् ।

(घ) शर्करायां कर्क्करायाम् । स्तनतटयोः परिपीडनेन मर्द्दनेन परिचितः अभ्यस्तः स्पर्शः येन तादृशे । प्रतीच्छामि गृह्णामि ।

(ङ) तरुणेति । तस्या इति सर्व्वत्र योज्यं तरुणस्य भुजगस्येव

हा प्रिये वैदेहि ।

इन्दोः सम्प्रति कान्तिरस्तु विमला दीर्घा मृगीणां दृशः
स्वादिष्ठा कलकण्ठिवाक्किसलयान्येकान्तरक्तानि च ।
यातायां त्वयि तस्य राक्षसपतेर्दुःसञ्चरं गोचरं
यद्वा तस्य गभीरमास्यकुहरं दुर्मेधसो वेधसः ॥ ७४ ॥(ख)

सविशेषकरुणम् ।

देव्याः शिरो ननु पुरो यदिदं विलूनं
दृष्टं छलाद्भगवतो यदसौ प्रनष्टः ।

---

सीता विलासो यस्या तादृशी देवी लोकनाथः आननेन शालिनी त्वया गण्डितं यत् तीक्ष्णाद्यं तस्यैव आभा यस्य तादृशं तदेव श्रवणयुगं कर्ण-युगलम् । नेत्रे च स्मरस्य कायस्य कुवलयदलाभौ नीलोत्पलमयौ इमौ शरासे धन्विनः ईदृशौ नेत्रे । मदनस्य असितलता चूर्णकुन्तलकलापः स एव वक्त्रचन्द्रं तु तस्याः । मालिनीवृत्तम् ।

(ख) इन्दोरिति । त्वयि तस्य राक्षसपतेः रावणस्य दुःस-ञ्चरं दुर्गमं गोचरं स्थानं यद्वा अथवा तस्य दुर्मेधसः दुर्बुद्धेः वेधसः विधातुः दैवस्येत्यर्थः गभीरम् आस्यकुहरं मुखगह्वरं यातायां प्राप्तायां त्वयि सम्प्रति इदानीम् इन्दोश्चन्द्रस्य कान्तिः विमला अस्तु तव समक्षे मलिना दृष्टेति भावः । मृगीणां दृशः नयनानि दीर्घाः सन्तु इति शेषः तव सान्निध्ये खर्वीकृता इति भावः । कलकण्ठिवाक् कोकि-लानां ध्वनिः स्वादिष्ठा स्वादुतरा अतिमधुरा इत्यर्थः भवतु इति शेषः । तव सम्मुखे कर्कशा इति भावः । किसलयानि नवपल्लवानि एकान्त-रक्तानि अतिलोहितानि च भवन्तु इति शेषः । तव सम्मुखे विरक्ता-नीति भावः । शार्दूलविक्रीडितं वृत्तम् ।

धिङ्निष्फलं हनुमतः प्लवनं तदब्धौ
धिङ्निष्फलः स च ममाचलसेतुबन्धः ॥ ७५ ॥(क)

सर्वे। विषादं नाटयन्ति।

लक्ष्मणः। सक्रोधम्। अरे रे समरकुण्ठ ! दशकण्ठ !

कृत्तात्मना जनकजानिधनेन्धनेन
यो दीपितः सपदि नो हृदि शोकवह्निः।
निर्वापयिष्यति पतिस्तमसौ रघूणां
त्वत्कामिनीजनविलोचनवारिपूरैः ॥ ७६ ॥(ख)

रामः। अवस्थोचितं स्मित्वा। सखे सुग्रीव !। वयस्य विभीषण ! रावणवधे (ग) विहितप्रतिज्ञाः कृता वयं वत्सेन।

---

(क) देव्या इति। यत् यदि इदं देव्याः सीतायाः शिरः मम पुरतः विलूनं छिन्नं दृष्टम्, यच्च असौ दशमुखः अलात् प्रनष्टः पलायितः, तदा तत् हनुमतः अब्धौ प्लवनं निष्फलं धिक् निन्दामीत्यर्थः धिक् निर्भर्त्सनानिन्दयोरित्यमरः। स च मम अचलैः सेतुबन्धः निष्फलः तञ्च धिक्। वसन्ततिलकं वृत्तम्।

(ख) कृत्तेति। कृत्तात्मना गुप्तशरीरेण त्वयेति शेषः जनकजायाः निधनं वधएव इन्धनं काष्ठं तेन नः अस्माकं हृदि सपदि सहसा यः शोकवह्निः शोकानलः दीपितः प्रज्वालितः, असौ रघूणाम्पतिः रामः तव कामिनीजनानां विलोचनवारिपूरैः अश्रुप्रवाहैः तं शोकवह्निं निर्वापयिष्यति अचिरात् त्वां हनिष्यतीति भावः। वसन्ततिलकं वृत्तम्।

(ग) विहितप्रतिज्ञाः प्रतिज्ञारूढाः। वत्सेन लक्ष्मणेन।

लक्ष्मणः । आश्चर्यमाश्चर्यम् । (घ) निर्लूनमप्यार्य्याशिरः समुल्लपति तत्सविधवर्त्तिनो भूत्वा शृणुमः । सर्वे समुपसर्पन्ति ।
लक्ष्मणः । कथं स्फुटाक्षरमिदमभिधत्ते ।

सूत्रधारचलद्दारुगात्रेयं यन्त्रजानकी ।
कण्ठस्थशारिकालापा कृता लङ्केशकेलये ॥ ७७ ॥ (ङ)
तच्छिरस्थैव निर्य्याता साचाऽहं राम ! शारिका ।
सच्चरित्ररसप्रीत्या त्वां बोधयितुमास्थिता ॥ ७८ ॥ (च)
तेन तेऽग्रेऽभिनीताऽस्याः शिरः खण्डननाटिका ।
मृता सीतेति येन त्वं गृहान् प्रति निवर्त्तसे ॥ ७९ ॥ (छ)

सर्वे । हर्षं नाटयन्ति ।

---

(घ) निर्लूनं निःशेषेण लूनं छिन्नम् आर्य्यायाः सीतायाः शिरः । सविधवर्त्तिनः समीपगताः ।

(ङ) सूत्रेति । सूत्रधारः शिल्पिविशेषः तेन तत्प्रयत्नेनेति भावः चलत् दारुमयं गात्रं यस्याः तथाभूता, कण्ठस्थया शारिकया आलपतीति तथोक्ता इयं यन्त्रजानकी लङ्केशस्य रावणस्य केलये विनोदनार्थं कृता निर्मिता ।

(च) तदिति । हे राम ! तस्मिन् शिरसि तिष्ठतीति तथोक्ता शारिका निर्याता निर्गता सती सच्चरित्रे शिष्टाचारे यो रसः अनुरागः तत्प्रीत्या तव सच्चरित्रगुणानुरागेणेति भावः त्वां बोधयितुम् आस्थिता उपस्थिता ।

(छ) तेनेति । तेन रावणेन ते तव अग्रे अस्याः यन्त्रजानक्याः शिरः खण्डननाटिका शिरश्छेदरूपं नाट्यम् अभिनीता प्रयुक्ता प्रदर्शिता इत्यर्थः येन अभिनयेन अभिनयदर्शनेनेत्यर्थः सीता मृतेति बुद्ध्वा त्वं हताशः सन् गृहान् प्रति निवर्त्तसे ।

रामः । स्वस्ति भवत्यै प्रियकारिण्यै तत्समीहित-सिद्धये(ज)साधय। विहस्य। अहो ! शौर्य्यं इव छलप्रपञ्चेऽपि चातुर्य्यं रावणस्य।

लक्ष्मणः। आर्य्य ! (झ) सुवेलाचलमेखलासु तावदावसन्तु कपियूथपतयः प्रातर्लङ्कादुर्गमभियोक्ष्यते।

रामः। यदि न प्रकृत्यमर्षणो रावणः सम्प्रत्येव प्रत्यभियुङ्क्ते।

नेपथ्ये। महान् कलकलः।

लक्ष्मणः। किं पुनरयं (ञ) भैरवाकारशङ्करकृतफेत्कारविकरालः कलकलः।

विभीषणः। पुरोऽवलोक्य।

कुप्यन्मृगाधिपमुखाय करीन्द्रवक्त्रं
कुप्यन्मृलापवदनाय च वाजितुण्डम्।
आसेधयन् सपदि रात्रिचराननेन
पर्य्येत्ययं दशभुजो ननु सिंहनादः॥ ८०॥(ट)

---

(ज) समीहितस्य वाञ्छितस्य सिद्धयै साधनाय साधय गच्छ।

(झ) सुवेलेति। सुवेलो नाम अचलः यत्र लङ्का प्रतिष्ठितेति भावः तस्य मेखलासु नितम्बेषु। अभियोक्ष्यते आक्रमिष्यति।

(ञ) भैरवेति। भैरवः अतिभीषणः आकारो यस्य तादृशेन शङ्करेण रुद्रेण वा शृगालेन कृतः यः फेत्कारः रवविशेषः तद्वत् विकरालः विशेषेण भयावहः।

(ट) कुप्यदिति। ननु भोः! अयं दशभुजः दशहस्तः सिंहनादः

रामः। कथय कोऽयं सिंहनादो नाम।

विभीषणः। देव! (ठ) मान्दोदरेयो मेघनादावरजश्च समरसीमानमवतरति तेनायमस्ति मांसलः कलकलः।

रामः। विहस्य। तदयमर्द्धं(ड)रावणस्य।

विभीषणः। अवयवसंख्यानेन (ढ)। पराक्रमेण पुनर्द्विगुणो यतः।

दोर्द्दण्डोद्भ्राममानाचलचलितभवस्तम्भनारम्भभज्ज-
द्भग्नप्राग्भारभारान्निजभुजविपिनं कुर्वतो न्यञ्चदुच्चैः।
लङ्कानाथस्य नन्दिप्रभृतिषु दलयत्स्वङ्गमङ्गं महास्त्रै-
रेकं वेगादनेकेष्वपि रचितरणं सिंहनादं स्मरामि॥८१॥(ण)

---

कथ्यते मृगाधिपमुखाय सिंहवदनाय करीन्द्रवक्त्रं गजराजमुखं कथ्यते लुलापवदनाय महिषमुखाय वाजितुण्डम् अश्वमुखम् आसेचयन् योजयन् रात्रिचराननेन राक्षसमुखेन सिंहनादः सिंहनादं कुर्वन्नित्यर्थः सपदि सहसा पर्य्येति आयाति पञ्चमुखो दशहस्तः सिंहनादोऽयमागच्छतीति वाक्यार्थः।

(ठ) मान्दोदरेयः मन्दोदर्य्या अपत्यं पुमान् मान्दोदरेयः मन्दोदरीगर्भसम्भूतः। मेघनादस्य इन्द्रजितः अवरः कनिष्ठः। मांसलः स्थूलः महानित्यर्थः।

(ड) अर्द्धं रावणस्येति रावणस्य विंशतिहस्तदशाननत्वात् अस्य तु दशहस्तपञ्चाननत्वादिति भावः।

(ढ) अवयवसङ्ख्यानेन अवयवानां हस्तानां मुखानाञ्च सङ्ख्यानेन गणनया अर्द्धमिति शेषः।

(ण) दोर्द्दण्डेति। दोर्भिरेव दण्डैर्विंशत्या इत्यर्थः उद्भ्राममानः

ततः प्रविशति यथानिर्दिष्टः सिंहनादः।

सिंहनादः। पुरोऽवलोक्य। कथमन्तरिततापसं(त)वानर-सेनापतिभिरभिमुखीभूतम्।

रामः। किं पुनरय पुरतोऽन्धकार इव।

कपिलः। देव! (थ) देवादेसमन्तरेणवि जम्बवन्तमुक्क-थक्कारवाइं हणुमन्तमन्तपरिसरिआइं विष्फुरिअभी-

---

उन्माद्यमानः यः अचलः कैलासः तत्र चलितस्य भवस्य शम्भोः यः स्तम्भनारम्भः स्तम्भं (?) णावस्थानमेव आरम्भः व्यापारः तेन मज्जतः निमग्नस्य सुदृढं स्थितस्य इत्यर्थः बुध्नस्य इरस्य अथवा मज्जता बुध्नाना इत्तमूलाना प्राग्भारभारात् प्रकृष्टभारवत्त्वात् न्यञ्चत् नमत् निजभुजविपिनं स्वं भुजारण्यम् उच्चैः उन्नतं कुर्वतः लङ्कानाथस्य रावणस्य अङ्कम् अङ्कं प्रत्यङ्कं नन्दिप्रभृतिषु गणेषु महास्त्रैः दलयत्सु खण्डयत्सु सत्सु अनेकेष्वपि तेषु नन्द्यादिषु वेगात् रचितरणं कृत-पराक्रमम् एकं सिंहनादं स्मरामि। कैलासमुद्धरन्तं रावणं नन्द्या-दयो बहवो गणा अस्त्रशस्त्रैर्विक्षतं कृतवन्तोऽपि एकेन अनेन सिंहना-देन सर्वे पराजिता इति स्मर्यते इति वाक्यार्थः। स्रग्धरावृत्तम्।

(त) अन्तरितः अन्तर्लीनः तापसो यत्र तत् यथा तथा। अभि-मुखीभूतं भावे क्तप्रत्ययः।

(थ) देवस्य प्रभोः आदेशम् आज्ञाम् अन्तरेणापि विनापि। जा-म्बुवदिति जाम्बुवता मुक्तः थुक्काररवः शब्दविशेषः येषु तानि। हनु-मदिति हनुमतः मन्त्रेण मन्त्रणया परामर्शेनेत्यर्थः प्रसृतानि चलि-तानि। विस्फुरितेति विस्फुरिता भीमा भीषणा भुजदण्डा येषां तानि। विस्तीर्य्यमाणेति विस्तीर्यमाणानि तारतराणि उच्चैस्तराणि गलगर्जितानि कण्ठध्वनयः येषां तथोक्तानि। छायेति छायया कान्त्या निर्जितानि परिपक्वानि पनसफलानि कण्टकीफलानि तथा पिङ्ग-

मभुअदण्डाइं विअरन्ततारतारगलगज्जिदाइं छाआ-णिज्जिअपरिपक्कपणसफलणाइं पिसङ्गिअगअणङ्गणाइं सुसेणाहिट्ठिअसेणाणिवेसाइं णीलप्पहाणीलिअदसदि-सन्तराइं वलीमुहकिलिकिलारअभरिअदरीमुहाइं णल-प्पहावाणलदुज्जआइं समुल्लसिअकुमुदकन्तिकुमुअकित्तिस-न्ताणाइं सिंहणादसम्मुहमोत्थरिआइं णीसेसाइं वि वाणरवलाइं (६)।

---

(६) देवादेशमन्तरेणापि जाम्बुवन्मुक्तबुक्काररवाणि हनुमत्क्रान्त-प्रसृतानि विस्फुरितभीमभुजदण्डानि विस्तीर्यमाणतारतारगलगर्जि-तानि छायानिर्जितपरिपक्वपनसफलानि पिशङ्गितगगनाङ्गनानि सुषेणा-धिष्ठितसेनानिवेशानि नीलप्रभानीलितदशदिगन्तराणि बलीमुखकि-लिकिलारवभरितदरीमुखानि नलप्रभावानलदुर्जयानि समुल्लसितकुमुद-कान्तिकुमुदकीर्त्तिसन्तानानि सिंहनादसम्मुखमवतीर्णानि निःशेषाण्येव वानरबलानि।

---

ङ्गितानि पिङ्गलीकृतानि गगनाङ्गनानि अन्तरीक्षाभोगाः यै तथो-क्तानि। सुषेणेति सुषेणेन सेनापतिना अधिष्ठितः रक्षितः सेनानि-वेशो येषां तानि। नीलेति नीलस्य सेनापतेः प्रभया नीलितानि नील-वर्णीकृतानि दशदिशाम् अन्तराणि अवकाशा येषु तानि। बलीति बलीमुखानां वानराणां किलिकिलारवैः भरितानि पूरितानि दरी-मुखानि गुहाविवराणि येषां तानि। नलेति नलस्य प्रभावानलेन प्रभावाग्निना दुर्जयानि जेतुमशक्यानि। समुल्लसितेति समुल्लसितस्य प्रस्फुटितस्य कुमुदस्येव कान्तिर्यस्य तथाभूतस्य कुमुदस्य सेनापतिविशे-षस्य कीर्त्तिसन्तानाः यशःप्रसरा येषु तानि।

दधिवक्त्रः। अथ युगपत् क्षुभितानि (ट) दशार्धसंख्यान्यपि सिंहनादमुखानि। ततश्च

धूत्कारध्वनितं मृगेन्द्रवदनादुल्यानननाद् बृंहितं
बंहिष्ठं च लुलायतुण्डकुहरक्रोडाज्जरद्द्राक्कृतम्।
जातं वार्वणवक्त्रकन्दरदरादेतस्य हेषारुतं
संख्ये कस्य भयोदयाय न वचो निर्यच्च रक्षोमुखात्॥८२(ध)

कपित्थः। तदो देव! (न) णिविडभुअदण्डपीडणाविसद-टङ्कारं कदुअ कोदण्डं तह वरिसिदं पउत्तो वाणविट्ठिं वाणरविन्दे जह ण सुरसुन्दरीविमुक्को कुसुमुक्केरो सुभटेसु णिवडइ। ण समरङ्गणगअं रेणुचक्कमक्कमइ दिअन्तरा-

(ट) दशार्द्धसङ्ख्यानि पञ्च इत्यर्थः।

(ध) धूत्कारेति। सङ्ख्ये युद्धे एतस्य रावणस्य मृगेन्द्रवदनात् सिंहमुखात् धूत्कारध्वनितं नादविशेष इत्यर्थः, दन्त्याननात् गजाननात् बृंहितं बृंहणाध्वनिः, लुलायतुण्डकुहरक्रोडात् महिषाननाभ्यन्तरदेशात् बंहिष्ठं बहुलं जरत् निःसरत् द्राक्कृतं ध्वनिविशेषः, आर्वणवक्त्रकन्दर-दरात् अश्वमुखगह्वरात् हेषारुतं हेषाध्वनिः, रक्षोमुखात् राक्षसमुखात् निर्यत् निर्गच्छत् वचश्च कस्य जनस्य भयोदयाय न जातम् अपि तु सर्वस्यैव भयाय इत्यर्थः। शार्दूलविक्रीडितं वृत्तम्।

(न) निविडेति। निविडैः दृढैः भुजदण्डैः पीडनेन अविशदः कठिन इत्यर्थः टङ्कारः यस्य तादृशं कोदण्डं धनुः। सुरसुन्दरीति सुरसुन्दरीभिर्विद्याधरीभिः विमुक्तः विक्षिप्तः कुसुमानां पुष्पाणाम् उत्करः निचयः सुभटेषु सुयोद्धृषु। रेणुचक्रं रजःपटलम्। दिनेति दिनकराः दिवसप्रवर्त्तकाः ये किरणाः तेषां आपारे प्रसारे प्रकट-सङ्गतः। गगनमाणिक्यस्य सूर्यस्य।

लाइं। ण दिणअरकिरणवावारपअट्टोवि गअणमाणिक्क-स्स पसरइ रहो (७)।

सिंहनादः। पुरोऽवलोक्य साट्टहासम्।

रेरे कृत्स्नाः प्लवगपशवः! किं भवद्भिर्भवद्भिः
संग्रामाग्रे मम रणरसो लम्भितः सर्वभावम्?।
यस्मिन् कस्मिन्न खलु समरे रोचको सिंहनाद-
स्तस्मै रामं कथयत स हि श्रूयते वीरसिंहः॥८३॥(प)

कपित्थः। बाणवरिसपीडिअं वि वाणरबलं पज्जाउलं जंबुद्दीवाहिमुहं वट्टइ (८)।

---

(७) ततो देव! निविड़भुजदण्डपीड़नाधिपतटङ्कारं कृत्वा कोदण्डं तथा वर्षितुं प्रवृत्तो बाणवृष्टिं वानरवृन्दे यथा न सुरसुन्दरीविमुक्तः कुसुमोत्कर सुभटेषु निपतति। न समराङ्गणगतं रेणुचक्रमाक्रामति दिगन्तराणि। न दिनकरकिरणव्यापारप्रकटोऽपि गगनमाणिक्यस्य प्रसरति रथः।

(८) बाणवर्षपीड़ितमपि वानरबलं पर्य्याकुलं जम्बुद्वीपाभिमुखं वर्त्तते।

---

(प) रे रे इति। रे रे कृत्स्नाः सर्वे प्लवगपशवः! वानरपशवः! भवद्भिः युष्माभिः संग्रामाग्रे भवद्भिः संग्रामशिरःस्थायिभिः सद्भिः मम रणरसः रणेषु आस्वादः सर्वभावं सर्वप्रकारं लम्भितः प्रापितं किम्? नैवेत्यर्थः। भवद्भिः सह संग्रामे न मम सर्वथा तृप्तिरस्तीति भावः। सिंहनादः अहमित्यर्थः यस्मिन् कस्मिन् समरे युद्धे न खलु नैव रोचको अभिलाषीत्यर्थः तत् तस्मात् मे मह्यं रामं कथयत ब्रूत हि यतः सः

सिंहनादः । भूयो विलोक्य । किमेताभिर्विजिताभिरपि वानरकोटकोटिभिः । हस्तावुद्दिश्य ।

हे पाणयो ! बिभृत पञ्च महाधनूंषि
पञ्चापि येन युगपत्प्रतियोधयामि ।
सुग्रीवमक्षदमनं च सहाङ्गदेन
रामं च रामजयिनं सह लक्ष्मणेन ॥ ८४ ॥(फ)

भूयः पुरो विलोक्य साट्टहासम् । कथं तेऽपि महावीरवानरसेनापतयोऽपि नश्यन्ति (ब) । किञ्चिदुच्चैः ।

सुग्रीवाङ्गदमैन्दनीलकुमुदप्रह्लादताराद्यः ! (भ)
किं मुग्धाः स्थ निजान् गृहान् प्रति यथादृष्टेन याताध्वना ।
पातालार्पितशैलजालरचनारम्यक्रमोत्तम्भितो
नन्वास्ते विपुलः स वो जलनिधावद्यापि सेतुः स्थिरः ॥८५॥

---

वीरसिंहः वीरेषु सिंहः श्रेष्ठ इत्यर्थः श्रूयते । अहं रामेण सहैव युद्धार्थी, युष्माभिः क्षुद्रैर्नेति भावः । मन्दाक्रान्तावृत्तम् ।

(फ) हे पाणय इति । हे पाणयः ! भुजाः ! पञ्च ! यूयं पञ्चापि महाधनूंषि बिभृत धारयत, येन धारणेन अहं युगपत् समकालं सुग्रीवं अङ्गदेन सह अक्षदमनम् अक्षस्य मम भ्रातुः दमनं हन्तारं हनुमन्तमित्यर्थः । तथा लक्ष्मणेन सह रामजयिनं भार्गवजेतारं रामञ्च प्रतियोधयामि । वसन्ततिलकं वृत्तम् ।

(ब) नश्यन्ति पलायन्ते ।

(भ) सुग्रीवेति । हे सुग्रीवाङ्गदमैन्दनीलकुमुदप्रह्लादताराद्यः वानरसेनापतय इत्यर्थः यूयं किं कथं मुग्धाः इति कर्त्तव्यविमूढाः स्थ भवथ, यथादृष्टेन अध्वना पथा निजान् गृहान् प्रति यात गच्छत !

रामः। वत्स लक्ष्मण ! किमेतत्।

लक्ष्मणः। सगर्वमग्रतो भूत्वा। रे रे विकृताकार ! दुराचार ! नृमांसकवलनदक्ष ! राक्षसापसद ! (म) किमिदमतिप्रगल्भमाभाषसे नन्वदृष्टवीरप्रकाण्डचरितचापलमाऽसि।

सिंहनादः। अनाकर्णितकेन वानरताडनं नाटयित्वा। रे कृतघ्नाः प्लवगपशव इत्यादि पठति।

रामः। साधु सिंहनाद ! साधु न (य) कुपितस्त्वया वीरवर्गवरिष्ठो दशकण्ठः।

सिंहनादः।

राम ! राम ! मयि मुञ्च सायकान्
प्राक्प्रहारुचिरेष रावणिः।
येन ते चरममाशु दर्शये-
च्छस्त्रतन्त्रमयमेतदम्बरे॥ ८६॥ (र)

रामः। सधैर्यमवलोक्य विहस्य च।

---

ननु ! भो ! पातालेषु अर्पितानां स्थापितानां शैलजालानां पर्वतनिचयानां रचनायाः विन्यासस्य यः रम्यः मनोहरः क्रमः परिपाटी तेन उत्तम्भितः निर्मितः विपुलः महान् स्थिरः कठिनः वः युष्माकं जलनिधौ समुद्रे सेतुः अद्यापि आस्ते तिष्ठति। शार्दूलविक्रीडितं छन्दः।

(म) अति प्रगल्भम् अत्युद्धतम्। अदृष्टेति। न दृष्टः वीरप्रकाण्डानां महावीराणां चरितचापलम् प्रचण्डचरितमित्यर्थः येन तादृशः।

(य) कुपितः सक्रोधः वर्धितः।

(र) रामेति। हे राम राम ! मयि सायकान् शरान् मुञ्च निक्षिप, एषः रावणिः रावणतनयः सिंहनादः प्राक् पूर्वं प्रहारे प्रहारा-

धिग्धिङ् निशाचरपतिं शुकसारणौ धिग्
धिङ्मेघनादमथ धिग्दश राजपुत्रान् ।
यैस्त्वं विचित्रवपुषा चिरमीक्षणीयः
क्रूराशयैरुपहृतो रणदेवतायै ॥ ८७ ॥ (ल)

सिंहनादः । राघव ! अति हि नाम दृप्यसि किं पुनर्दर्पस्य कारणं किञ्चन ते चरितेषु व्रीडिताः स्मः ।

स्त्रीमात्रं ननु ताड़का भृगुभवो रामस्य विप्रः शुचि-
र्मारीचो मृग एष भीतिभवनं वाली पुनर्वानरः ।
भोः काकुत्स्थ ! विकत्थसे कथय किं वीरो जितः कस्त्वया
दोर्दर्पस्तु तथापि ते यदि ततः कोदण्डमारोपय ॥८८॥(व)

---

धिगमे इत्यर्थः रुचिः अभिलाषः यस्य तादृशः । येन प्रहारेण अयं सिंहनादः आशु शीघ्रम् अम्बरे आकाशे एतत् चरमं सर्वश्रेष्ठमित्यर्थः इन्द्रतन्त्रम् अस्त्रजालं ते तुभ्यं दर्शयेत् । त्वम् अग्रतः प्रहर ततोऽहं ते पराक्रमं दर्शयिष्यामीति भावः । इन्द्रवज्राछन्दः ।

(ल) धिगिति । निशाचरपतिं रावणं धिक् निन्दामीत्यर्थः । धिक् निर्भर्त्सननिन्दयोरित्यमरः यस्य पुत्रोऽपि निस्नेहतेति भावः । शुकसारणौ तन्मन्त्रिणौ धिक् वृथा मन्त्रणं तयोरिति भाव. । मेघनादम् इन्द्रजितं धिक् यस्य कनिष्ठे भ्रातरि प्रमाद इति भावः अथ अतःपरं दश राजपुत्रान् अन्यान् अन्यान् रावणसुतान् धिक् येषाम् ईदृशे कलाधीरे भ्रातरि निर्दयतेति भावः । यैः क्रूराशयैः निष्ठुरमतिभिः रावणादिभिः विचित्रवपुषा सुन्दरेण शरीरेण हेतुना चिरम् ईक्षणीयः दर्शनीयः दृष्टिपथात् बहिष्कर्तुमनर्ह इति भावः त्वं रणदेवतायै संग्रामाधिष्ठात्र्यै देव्यै उपहृतः उपहारत्वेन प्रदत्तः । अहं त्वां शीघ्रं रक्षिष्यामीति भावः । वसन्ततिलकं वृत्तम् ।

(व) स्त्रीमात्रमिति । भोः काकुत्स्थ ! ककुत्स्थकुलोद्भव राम !

लक्ष्मणः। विहस्य।

स्त्री ताड़कास्तु तद्‌घाते गुर्वाज्ञा गुरुकारणम्।
मारीचोऽप्यस्तु स मृगः चात्रं हि मृगयारसम्॥८८॥ (ग)

परशुरामब्राह्मणदमने शृणु सूक्तं वैतालिकस्य।

योजम्भं जितवान् इत्यादि पठति। बालिविजये पुन-रुपालभ्यसे (घ)।

रामः।

वालौ वलीमुख इति ब्रुवता त्वयैव
लङ्कापतेर्मलिनितो यशसां प्ररोहः।

---

ताड़का स्त्रीमात्रं ननु सामान्या नारी खलु, भृगुभवः रामस्तु शुचिः पवित्रः तपोनिष्ठ इति भावः। विप्रः ब्राह्मणः। एष मारीचः मृगः बालौ पुनः भीतिभवनं भयनिकेतनं भीरुस्वभाव इत्यर्थ. वानरः कपिः, एषां जये कस्तव पौरुषप्रसर इति भावः। तथापि किं कथं विकत्थसे दृप्यसि, कथय वद, त्वया को वीरः जित.? न कोऽपीत्यर्थः, तथापि ते तव यदि तु दोर्दर्पः बाहुबलाहङ्कारः, ततस्तर्हि कोदण्डं कार्मुकम् आरोपय मौर्व्यां सङ्गमय युध्यस्वेति भावः। शार्दूलविक्रीड़ितं वृत्तम्।

(ग) स्त्रीति। ताड़का स्त्री अस्तु भवतु तस्या घाते बधे गुरोर्विश्वा-मित्रस्य आज्ञा गुरु महत्कारणं हेतुः गुरोराज्ञया आर्य्येण ताडका-निहतेति कस्तत्र दोष इति भावः। स मारीचः मृगः अस्तु भवतु तद्वधे नास्ति दोष इति भावः हि यतः चात्रं चत्रियधर्मः मृग-यायां रसः अनुरागः यत्र तादृशम्। चत्रिया मृगयया विहरन्तीति नात्र दोषोऽस्तीति भावः।

(घ) वैतालिकस्य स्तुतिपाठकस्य सूक्तं शोभनं वचनम्। उपाल-भ्यसे तिरस्क्रियसे।

न्यूनाज्जयो यदिह लक्ष्म स चापि तेन
दोर्मूलपञ्जरशुको विहितः पिता ते ॥ ९० ॥ (स)

सिंहनादः । सक्रोधम् । रे रे कुक्षत्रिय ! तातमधिक्षिपसि तदेष शितमुखैः (ह) शिलीमुखैरवकीर्य्यसे ।

रामः । सानुहास्य । रे रे राक्षसपोत ! त्वमपि प्रत्यवकीर्य्यसे किन्तु (क्ष) लङ्कापुरीगोपुरपरिसरवसुन्धरासु शरविक्षेपाद्दिदृक्षुपौरजना उद्विजिता भवन्ति तत् किञ्चिदुपसृत्य समरसंरम्भमारभामहे ।

इति निष्क्रान्ताः सर्वे ॥

॥ असमपराक्रमो नाम सप्तमोऽङ्कः ॥

(स) वालीति । वली वलीमुखः वानर इति ब्रुवता वदता त्वयैव लङ्कापतेः रावणस्य यशसा कीर्त्तीनां प्ररोहः अङ्कुरः मलिनितः कलङ्कितः यस्मात् इह संसारे न्यूनात् लघोर्जनात् जयः पराभवः लक्ष्म कलङ्कः कलङ्करूपेण लोकैर्गण्यते इति भावः । यतः तेन वालिना स च ते तव पिता रावणः दोर्मूलं बाहुमूलमेव पञ्जरं तस्य शुकः पक्षिविशेषः विहितः कृतः, पुरा सागरकूले सन्ध्योपासनकाले जिगीषया समयागतं तव पितरं वीक्ष्य कक्षे गृहीत्वा चतुर्षु समुद्रेषु सन्ध्यामुपासाञ्चक्रे इति भावः । वसन्ततिलकं वृत्तम् ।

(ह) शितमुखैः तीक्ष्णाग्रैः शिलीमुखैः शरैः अवकीर्य्यसे आच्छाद्यसे । मयेति शेषः ।

(क्ष) लङ्केति । लङ्कापुर्य्यां यत् गोपुरं द्वारं पुरद्वारन्तु गोपुरमित्यमरः । तस्य परिसर वसुन्धरासु विस्तारभूमिषु । अपसृत्य स्थानान्तरं गत्वेत्यर्थः ।

## ॥ अष्टमोऽङ्कः ॥

—•○✻○•—

अतःपरं वीरविलासो भविष्यति ।

ततः प्रविशतो राक्षसौ ।

एकः । सखे दुर्मुख ! किमपि महान् (क) सत्त्वभ्रंशो रावणस्य यत्कुमारसिंहनादवधमप्याकर्ण्य न शोकः कृतो नाप्यमर्षः केवलमेकं तुलाद्यूतं प्रवर्त्तितं तत्र च लङ्काधिपत्यं सीतापहारिता न पुनरर्पिता ।

दुर्मुखः । अज्ज सुमुह ! सामिणीए (ख)तिजडाए समादिट्टं जह गच्छदं अङ्गदणरत्तयाणं एक्कतुलं पेक्खह जेण तुह्ममुहादो सुणिअ सीदादेवीए णिवेदइस्सं ता दुवे वि अह्मे गदत्ति एत्तिअमहं जाणामि ण उण कारणं ता कहीअदु जहा पडिवत्तम् (१)

(१) आर्य सुमुख ! स्वामिन्या त्रिजटया समादिष्टं यथा ग

(क) सत्त्वभ्रंशः प्राणिक्षयः । अमर्षः विद्वेषः तुलाद्यूतं तुलाक्रीड़नम् । अयं भावः एकतस्तुलादण्डकोटौ लङ्काधिपत्यम् अपरतः अपहृता सीता, तत्रापि यदि लङ्काधिपत्यमपि नश्येत् तदपि सीतां न समर्पयामीति प्रतिज्ञातमिति ।

(ख) त्रिजटया कयाचित् वृद्धराक्षस्या । अङ्गदः वालिसुतः नरा-

सुमुखः । परं लङ्केश्वरेण शुकसारणौ प्रहितौ दाशरथिमभिधातुमभिहितं च ताभ्याम् ।

वक्त्राम्भोजार्चनाभिः फलमभिलषितं हेलया यस्य लिप्सोः(ग)
सोत्कण्ठं कण्ठकाण्डेष्वहमहमिकया खड्गधाराग्रगेषु ।
स्तौति त्यक्तप्रणामप्रकुपितगिरिजाकृष्टवामार्धपाणि-
स्तोषोद्दस्तान्यहस्ता झटिति न घटिता शाम्भवी तालुलीला॥

---

कृतम् अङ्गदनराल्लकयोरेकतुलां प्रेक्षेतां येन युष्मन्मुखात् श्रुत्वा सीतादेव्यै निवेदयिष्यामि तद् द्वावपावां च गताविव्येतावदहं जानामि न पुनः कारणं तत् कथ्यतां यथा प्रतिपन्नम् ।

---

नलः रावणसुतः तयोः एकाम् अद्वितीयां तुलां सादृश्यं प्रेक्षेतां पश्येताम् । प्रतिपन्नं बुद्धम् ।

(ग) वक्त्रेति । हेलया अवलीलया वक्त्राण्येव मुखान्येव दर्शलार्थः अम्भोजानि पद्मानि तैः अर्च्चनाभिः पूजाभिः अभिलषितं फलं त्रैलोक्याधिपत्यमिति भावः । लिप्सोः लब्धुमिच्छोर्यस्य रावणस्य कण्ठकाण्डेषु सोत्कण्ठं सौत्सुक्यं यथा तथा अहमहमिकया अहमग्रतः खड्गधारायां पतामि अहमग्रत इत्येवं रूपया खड्गधाराया अग्रगेषु अग्रवर्त्तिषु क्रमशः छिन्नेषु इत्यर्थः स्तौ इति इयं गौरी स्तौ तत् कथं प्रणम्यते इति त्यक्तेन प्रणामेन प्रणतिपरित्यागेनेत्यर्थः रावणः कदापि देवीं स्तौति न प्रणनामेति भावः । प्रकुपितया गिरिजया पार्वत्या आकृष्टः वरप्रदानात् निवर्त्तित इत्यर्थः वामार्द्धस्य पाणिः अर्द्धाङ्गहारित्वात् देव्या इति भावः । यस्यां तादृशी, तोषेण रावणं प्रति सन्तोषेण उद्दस्तः वरदानार्थमुत्क्षिप्तः अन्यहस्तः दक्षिणार्द्ध पाणिः

स निशाचरचक्रवर्त्ती त्वामाह यदुत किमखिलवानर-राक्षसक्षयकरेण संग्रामेण तदेकं तुलाद्यूतं प्रवर्त्तयावः तत्र च।

त्वत्काङ्कारविजये तव राम! लङ्का
सीता च ते पुनरियं भवतोऽस्तु दाराः।
मत्काङ्कारविजये तु ममाधिपत्यं
तस्यां च ते पुरि कलत्रजने च तत्र॥ २॥ (घ)

दुर्मुखः। तदोतदा? (२)।

सुमुखः। ततश्च (ङ) हासलवलाञ्छिताधरमुद्रेण राम-

---

(२) ततस्ततः।

---

यस्यां तथाभूता शाम्भवी शम्भुसम्बन्धिनीताललीला करतलवाद्यविलासः झटिति तत्क्षणात् न घटिता न कर्त्तुं शक्नोति यावत्। स निशाचरचक्रवर्त्तीत्यनेनसमान्वयः। स्रग्धरावृत्तम्।

(घ) त्वदिति। हे राम! तव अयं त्वत्कः इदमर्थे कन्प्रत्ययः। अङ्ग एव अङ्गकारः शरीरमात्रं कारतकारौ स्वरूपे इत्यौणादिकः कारप्रत्ययः। त्वत्केन त्वदीयेन अङ्गकारेण शरीरमात्रेण विजये सति यदि त्वमेकाकी एव मां जेतुं शक्नोषि तदेत्यर्थः ते तव लङ्का अस्तु सीता च भवतः दाराः अस्तु। मत्केन अङ्गकारेण शरीरमात्रेण विजयेतु यदि अहमेव एकाकी त्वां जेतुं शक्नोमि तदेत्यर्थः तस्यां ते तव पुरि अयोध्यायां तत्र तव कलत्रजने सीतायामित्यर्थः मम आधिपत्यम् अस्तु इति शेषः। वसन्ततिलकं वृत्तम्।

(ङ) हासेति। हासलवेन ईषद्धास्येन लाञ्छिता शोभिता अधरमुद्रा यस्य तेन। इङ्गितस्य अज्ञायः प्रथमा प्रयोग: रावण इत्यर्थः।

भद्रेणाभिहितं यदाह द्रुहिणप्रणप्ता। किं पुनरावयोरङ्ककारत्वमुचितं ययोरन्तरङ्गोऽभियोगः।

दुर्मुखः। तदोतदो ? (३)।

सुमुखः। ततश्च (च) निरुपमानरामपराक्रमशङ्किताभ्यामुक्तं शुकसारणाभ्यां यदुत महानायकयोर्नायं क्रम इति कुम्भकर्णाग्रजस्त्वामिदमाह।

दुर्मुखः। तदोतदो ? (४)।

सुमुखः। ततश्च सौमित्रिसुग्रीवबिभीषणजाम्बवदाञ्जनेयप्रभृतिभिर्निषिद्धेनापि (छ) तथेत्यभ्युपगम्याङ्ककारीकृतः कुमारोऽङ्गदो रघूद्वहेन निजपुत्त्रो नरान्तकस्तु लङ्केश्वरेण।

(३) ततस्ततः ?।

(४) ततस्ततः ?।

अङ्ककारत्वं केवलशरीरमात्रसाधनत्वम्। अन्तरङ्गः सहायप्रचुर इत्यर्थः अभियोगः युद्धार्थमाक्रमणव्यापारः।

(च) निरुपमानेति। निरुपमानेन अतुल्येन रामपराक्रमेण शङ्किताभ्याम्। यदुत यत्र महानायकयोः महासहायसम्पन्नयोर्नायकयोः। क्रमः नियमः। कुम्भकर्णाग्रजः रावणः। महासहायस्य नायकस्य स्वयमग्रतः न प्रवर्त्तितव्यं तस्मात् प्रथमतः सहायेनैव साध्यते इति भावः।

(छ) निषिद्धेनापि निवारितेनापि। अभ्युपगम्य स्वीकृत्य। अङ्ककारीकृतः स्वशरीरीकृतः प्रतिनिधीकृत इत्यर्थः। अयं भावः यदि मम अङ्गदो जेष्यति तदा मम लङ्का सीता च अस्तु इति रामाभिप्रायः, यदि नरान्तको जेष्यति तदा मम अयोध्या सीता च अस्तु इति रावणाभिप्राय इति।

दुर्मुखः । भोः किं पुण (ज) णिअभुअदण्डमण्डलीपरक्कमे अणासंसा देवस्स जेण णरन्तअबाहुसु समारोविअं लङ्कारज्जम् (५) ।

सुमुखः । (झ) असमञ्जसकारितायां किमुच्यते स्वामी ? ।

किञ्च ।

मृत्युं यदैव गमितो युधि सिंहनादः
शक्तिर्यदैव च वृथा भरताग्रजेऽभूत् ।
सीतार्पणं नृपसुताय तदैव युक्तं
मोहस्तु तत्र रजनीचरकालरात्रिः ॥ ३ ॥ (ञ)

दुर्मुखः । जुवराअमेहणादस्स उण का वत्ता ? (६)

---

(५) भोः किं पुनर्निजभुजदण्डमण्डलीपराक्रमे नाशंसा देवस्य येन नरान्तकबाहुषु समारोपितं लङ्काराज्यम् ।

(६) युवराजमेघनादस्य पुनः का वार्त्ता ? ।

---

(ज) निजेति । निजाभिः भुजदण्डमण्डलीभिः पराक्रमे देवस्य रावणस्य न आशंसा न जयप्रत्याशा इत्यर्थः ।

(झ) असमञ्जसेति । असमञ्जसकारितायाम् अयुक्तानुष्ठानकारित्वे सति यदि स्वामी स्वयम् अयुक्तम् अनुतिष्ठति तदेत्यर्थः स्वामी किम् उच्यते कथ्यते ? अनुजीविभिरिति शेषः । अनुजीविभिः स्वामी न वारणीय इति भावः ।

(ञ) मृत्युमिति । यदैव सिंहनादः युधि मृत्युं गमितः प्रापितः निहत इत्यर्थः रामेणेति शेषः । यदैव शक्तिः रावणप्रेरितास्त्रविशेषः भरताग्रजे रामे वृथा अभूत् । तदैव नृपसुताय राजपुत्राय रामाय सीतार्पणं युक्तम् उचितम् आसीदिति शेषः । तत्र तस्मिन् विषये

उत्तर: ।

यद्बद्धो नागपाशैः प्रचुरतमतमःश्यामले रात्रिमध्ये
यद्युद्धं यन्नभस्तः शरपतनविधिर्मायया छन्नमूर्त्तेः ।
यद्भक्तिर्मन्त्रजिह्वे प्रसरति च रथं नित्यजैत्रं प्रयाणे
तन्मन्ये मेघनादोऽप्यनुभवति भयं राघवात् समन्तः ॥४॥ (ट)

अपिच ।

लङ्का दुर्गं जलधिपरिखादुर्गमं राक्षसेन्द्र-
स्तस्याः स्वामी सुरजनवधूचामरैर्वीज्यमानः ।
रामः शाखामृगपरिगतो मानुषस्तद्विपक्ष-
स्तत्रैतस्मिन् जयविधिरिति व्रीडया नः कलङ्कः ॥ ५ ॥ (ठ)

---

सीतार्पणे इत्यर्थः मोहस्तु अविवेकस्तु सीताया अनर्पणमिति भावः । रजनीचराणां राक्षसानां कालरात्रिः संहारनिशा, सीताया अनर्पणेन अचिरात् राक्षसकुलक्षयो भविष्यतीति भावः ।

(ट) यदिति । यत् यस्मात् प्रचुरतमैः अतिगाढैः तमोभिः अन्धकारैः श्यामले रात्रिमध्ये न तु दिवसे इति भावः । नागपाशैः बद्धः राघव इति शेषः । यत् यस्मात् नभस्तः आकाशात् न तु भूतलादिति भावः युद्धं, यत् यस्मात् मायया छलेन छन्ना तिरोहिता शरप्रहार-भयादिति भावः मूर्त्तिर्यस्य तथाभूतस्य शरपतनमेव विधिः व्यापारः, यत् यस्मात् प्रयाणे युद्धयात्रायां रथं नित्यजैत्रं सततजयसाधनं यथा भवति इति हेतोः मन्त्रजिह्वे अग्नौ भक्तिः प्रसरति च प्रत्यहं जैत्ररथप्राप्तये अग्नौ होमं करोतीति भावः । तत् तस्मात् मेघनादोऽपि राघवात् रामात् अन्तर्गूढं केनाप्यलक्षितमिति भावः भयं अनुभवति इति मन्ये सम्भावयामि । स्रग्धरावृत्तम् ।

(ठ) लङ्केति । लङ्का दुर्गं लङ्काख्यम् अपरङ्गमं स्थानं यदपि

दुर्मुखः। जं णिम्मलमदिचक्खुणो पेक्खन्ति तं दिट्टं घ-ज्जसुमुहेण (७)।

सुमुखः। अलममुना राक्षसविरुद्धकथानुबन्धेन यथा-दिष्टमेव कुर्वः। उभौ परिक्रामतः।

दुर्मुखः। एसा सामिणी तिअडा अह्मे पडिवालअन्ती चिठ्ठइ ता एहि उवसप्पह्म। (८) तथा कुरुतः।

ततः प्रविशति त्रिजटा।

त्रिजटा। वीक्ष्यमालोक्य। हंहो दुम्मुह! सुमुह! तुरिअं उवसप्पह णिवेदेह जुज्झवुत्तन्तं। (९) उभौ प्रण-म्योपविशतः।

सुमुखः। स्वामिनि त्रिजटे! लङ्कापुरीं पूर्वेण (छ)

(७) यन्निर्मलमतिचक्षुषः पश्यन्ति तद् दृष्टमार्य्य सुमुखेन।

(८) एषा स्वामिनी त्रिजटा आवां प्रतिपालयन्ती तिष्ठति तदे-ह्युपसर्पावः।

(९) हंहो दुर्मुख! सुमुख! त्वरितमुपसर्पतं निवेदयतं युद्धवृत्तान्तम्।

जलधिरेव परिखा तयापि दुर्गमम् अतिदुर्गमित्यर्थः जलधेरलङ्घ्यत्वा-दिति भावः। तस्याः लङ्कायाः स्वामी सुरजनानां वधूभिः अङ्गनाभि-र्वन्दीभूताभिरिति भावः। चामरैः वीज्यमानः राक्षसानाम् इन्द्रः अधि-पतिः रावणः। शाखामृगैः वानरैः परिगतः युक्तः मानुषो रामः तस्य रावणस्य विपक्षः शत्रुः। तत्र एतस्मिन् रामे जयविधिः विजय-लाभः भवतीति शेषः, इति व्रीडया लज्जया नः अस्माकं रजनीचराणां कलङ्कः अकीर्त्तिः। मन्दाक्रान्तावृत्तम्।

(छ) लङ्कापुरीं पूर्वेण लङ्कापुर्याः पूर्वस्यां दिशि इत्यर्थः सुवेला-चलं पश्चिमेन सुवेलस्य पश्चिमायां दिशि इत्यर्थः उभयोर्मध्ये इत्यि

सुवेलाचलं च पश्चिमेन उभयतो मञ्चः परिमितप्राकारपरिष्कृतः स्तोकसमुन्नतः समुन्नतसमस्तजनप्रेक्षणीयो रत्नाक्षवाटे कारितो राक्षसराजेन तत्र च प्राच्यमञ्चाधिरूढे ससौमित्रिसुग्रीवबिभीषणे रामे नीलाधिष्ठिते च वानरबले, प्रतीच्यमञ्चाधिरूढे च सशुकसारणे दशकण्ठे प्रहस्ताधिष्ठिते च राक्षसबले गगनाङ्गनगतासु च वीरजनचरितकुतूहलिनीषु सुरसुन्दरीषु ताडितमल्लभटीतूर्य्यौ माङ्गल्यकलशानुगतौ निशितकृपाणपाणी प्रविष्टावङ्ककारौ ।

ततश्च ।

रत्नत्रिकङ्कणविभूषितदोःप्रकाण्डं
श्रीखण्डपाण्डुरितदेहभरं च रूपम् ।
युद्धाङ्गनेऽङ्गदनरान्तकयोर्निरीक्ष्य
दध्नुर्निमेषविमुखं सुतमप्सरोभिः ॥ ६ ॥ (ढ)

---

भावः । मञ्चः पर्य्यङ्कः । परिमितेति परिमितेन प्राकारेण वेष्टनविशेषेण परिष्कृतः परिच्छिन्नः । स्तोकम् अल्पं समुन्नतः । समुन्नतैः आयतदेहैरित्यर्थः न तु खर्वाकृतिभिरिति भावः प्रेक्षणीयः दर्शनीयः [illegible]वाटे रत्ननिर्मिते अक्षवाटे व्यायामभूमौ । वीरेति वीरजनानां [illegible]तेषु संग्रामव्यापारेषु कुतूहलिनीषु दर्शनार्थं कौतुकवतीषु । ताडितेति ताड़ितं वादितं मल्लभटीनां योद्धृवीराणां तूर्य्यं वाद्यभेदः ययोस्तथाविधौ । निशितेति निशितः शाणितः कृपाणः असिः पाण्यौ ययोस्तादृशौ अङ्ककारौ अङ्गदनरान्तकौ ।

(ढ) रत्नेति । युद्धाङ्गने संग्रामभूमौ रत्नैः रत्ननिर्मितैः त्रिभिः कङ्कणैः कराभरणविशेषैः विभूषितौ अलङ्कृतौ दोःप्रकाण्डौ प्रशस्ते

त्रिजटा । तदोतदो ? (१०) ।

दुर्मुखः । तदो अ समुत्तीरिअ मञ्चादो णीलपहत्थेहिं सेणावईहिं किट्टएसु अन्तरदण्डेसु बिरइआलीढपाआ दोवि संमुहं संठिआ अङ्कआए पउत्ता अ रणमण्डले मण्डलीए भमिउं (ण) (११) ।

त्रिजटा । तदोतदो (१२) ।

दुर्मुखः । तदो अ ताणं विविहं वग्गन्ताणं (त) उपरि

---

(१०) ततस्ततः ? ।

(११) ततश्च समुत्तीर्य्य मञ्चात् नीलप्रहस्ताभ्यां सेनापतिभ्यां कृष्टयोरन्तरदण्डयोर्विरचितालीढपादौ द्वावपि सम्मुखं संस्थितावङ्ककारौ प्रवृत्तौ च रणमण्डले मण्डल्या भ्रमितुम् ।

(१२) ततस्ततः ? ।

---

भुजौ यस्मिन् तथाभूतं श्रीखण्डेन चन्दनविलेपनेन पाण्डुरितः भवलितः देहभरः यस्मिन् तादृशश्च अङ्गदनराान्तकयोः रूपं चक्षुषोर्निमेषेण विमुखं यथा तथा निरीक्ष्य अप्सरोभिः सुरसुन्दरीभिः स्तुतं प्रशंसितम् । वसन्ततिलकं वृत्तम् ।

(ण) कृष्टयोः आकृष्टयोः अन्तरदण्डयोः मध्यस्थितदण्डयोः सतोरित्यर्थः । विरचितौ आलीढ़पादौ अयस्थानविशेषेण निविष्टौ पादौ याभ्यां तादृशौ आलीढ़लक्षणमुक्तं यथा । स्थानानि धन्विनां पञ्च तत्र वैशाखमस्त्रियाम् । त्रिवितस्त्यन्तरौ पादौ मण्डलं तोरणाकृति । अन्वर्थं स्यात् समपदम् आलीढन्तु ततोऽन्यतः । दक्षिणे वाममाकुञ्च्य प्रत्यालीढं विपर्य्यय इति ।

(त) वल्गतोः विचरतोः । प्रेषयतोः कुर्वतोः । प्रेषितं स्वस्मिन्

ताडणे णमन्ताणं तलताडणे उप्पअताणं अणवरअप्पहारप-
रम्परं पेसअंताणं पेसिअं पडिच्छन्ताणं दिठ्ठिं वञ्चअन्ताणं
अरक्खिअमग्गं रक्खिन्ताणं अस्सदो दंसिअ अस्सदो पहर-
न्ताणं संभरिआसेसधीरत्तणेण वंसविसेसं छुरिआजुअलं
उज्झिअ अण्णुण्णमाहरन्ताणं पयट्टं तं जुज्झं (१३)।

विजटा। तदो तदो ? (१४)।

सुमुखः।

चारी सुचित्रपदता स्थिरता च दृष्टेः
क्रान्तिर्भुवः प्रहृतियोजनवञ्चनेन।
सर्वाङ्गकाररणकर्मणि मान्त्रिकेय-
मुक्तोर्थ्यं तत्र समये कथितेव ताभ्याम् ॥ ७ ॥ (थ)

---

(१३) ततश्च तयोर्विविधं वल्गतोरुपरि ताडने नमतोस्तलताडने उत्प-
ततोरनवरतप्रहारपरम्परां प्रेषयतोः प्रेषितं प्रतीच्छतोर्दृष्टिं वञ्चयतो-
ररक्षितमङ्गं रक्षतोरन्यतो दर्शयित्वाऽन्यतः प्रहरतोः सम्भृताशेषधीरत्वेन
वंशविशेषं छुरिकायुगलमुद्‌ज्झित्यान्योन्यमाहरतोः प्रवृत्तम् तद् युद्धम्।

(१४) ततस्ततः ?।

---

प्रयुक्तं प्रहारमिति शेषः प्रतीच्छतोः गृह्णतोः। सम्भृतेति, सम्भृतं
सम्यक् गृहीतम् अशेषं सम्पूर्णं धीरत्वं याभ्यां तथोक्तौ तयोर्भावः तत्त्वं
तेन नितरामचञ्चलत्वेनेत्यर्थः। आहरतोः प्रहरतोः।

(थ) चारीति। चारी, विचरणविशेषः, सुचित्रपदता पदविक्षेप-
चातुर्यं दृष्टेः स्थिरता, प्रहृतेः प्रहारस्य योजनम् आपतनं तस्य वञ्च-
नेन यथा प्रहारो न गात्रेषु पतेत् तथा कृतेनेति भावः। भुवः रण-

अपिच।

यथा यथा प्रहरति वालिनन्दन-
स्तथातथा हरिहरिभिः स्थितं मुदा।
यथायथा प्रहरति रावणात्मज-
स्तथातथा किलिकिलितं च राक्षसैः॥ ८॥ (द)

त्रिजटा। तदोतदो ? (१५)।

दुर्मुखः। तदो अ ताणं णिब्भरं पअट्टे (ध) समरसंघट्टे चरणेण चरणमप्फलिअ दरणमन्तस्स णरन्तअस्स रोमञ्च-णिविडरअणङ्गदेणाङ्गदेण कन्धराकण्डबुडबन्धे खित्ता

(१५) ततस्ततः।

स्थलात् क्रान्तिः उत्पतनावपतनानुष्ठानमित्यर्थः। सर्वेषाम् अङ्ककाराणां रणकर्मणि युद्धव्यापारे इयम् उक्तप्रकारा मात्रिका नियमः ताभ्यां वीराभ्याम् अङ्गदनरान्तकाभ्यां तत्र समये उत्कीर्य्य अङ्कयित्वा कथितेव प्रकाश्य दर्शितेव। सर्वथा अङ्ककारकार्य्यं ताभ्यां कृतमिति भावः। वसन्ततिलकं वृत्तम्।

(द) यथेति। वालिनन्दनः अङ्गदः यथा यथा प्रहरति नरान्तक-मिति शेषः तथा तथा हरिहरिभिः हरेः रामस्य हरिभिः वानरैः मुदा हर्षेण स्थितम्। रावणस्य आत्मजः नरान्तकः यथा यथा प्रह-रति अङ्गदमिति शेषः तथा तथा राक्षसैः किलिकिलितम् आनन्देन शब्दितमित्यर्थः। रुचिराहत्तं जभौ जसौ गिति रुचिरा चतुर्ग्रहैरिति लक्षणात्।

(ध) समरसङ्घट्टे युद्धव्यापारे। दरनमतः ईषद् अवनतः।

छुरिआ। उट्ठिदो अ खेडासंखोहो वाणरबले। जायाइं अ मउलन्तकमलमण्डलच्छायाइं रावणवअणाइं। वञ्चिअणिसाअरलोअलोअणं परोप्परदिण्णहत्थआलं च पहसिआउ अच्छराउ। खरसमीरणमूलिअफुल्लपालिभद्ददुमो विअ पहारविवसो समं णिसाअरीणअणिन्दीवरणीरन्धणीरधाराहिं धरणिं गओ रावणङ्कआरो (१६)।

त्रिजटा। हा वच्छ! कहिं सि देहि मे पडिवअणं भद्द!

---

(१६) ततश्च तयोर्निर्भरं प्रवृत्ते समरसङ्कटे चरणेन चरणमास्फाल्य दत्तनमतो नरान्तकस्य रोमाञ्चनिर्विडरत्नाङ्गदेन कन्धराकाण्डबुध्नबन्धे क्षिप्ता छुरिका। उत्थितश्च क्ष्वेडासङ्क्षोभो वानरबले। जातानि च मुकुलायमानकमलमण्डलच्छायानि रावणवदनानि। वञ्चितनिशाचरलोकलोचनं परस्परदत्तहस्ततालं च प्रहसिता अप्सरसः। खरसमीरणोन्मूलितफुल्लपारिभद्रद्रुम इव प्रहारविवशः समं निशाचरीनयनेन्दीवरनीरन्ध्रनीरधाराभिर्धरणीं गतो रावणाङ्ककारः।

---

रोमाञ्चेन निविडं रत्नाङ्गदं यस्य तादृशेन अङ्गदेनेति शेषः। कन्धरा ग्रीवा काण्डः दण्डस्कन्धः तस्य बुध्नबन्धे मूलरूपे बन्धने। क्ष्वेडा हर्षनिनादः तया सङ्क्षोभः सम्यक् प्रागल्भ्यम्। मुकुलेति मुकुलायमानानि सङ्कुचन्ति यानि कमलमण्डलानि तेषामिव छाया कान्तिर्येषां तथाभूतानि। खरेति खरेण प्रचण्डेन समीरणेन वायुना उन्मूलितः उत्पाटितः यः पारिभद्रद्रुमः वृक्षविशेषः स इव। प्रहारेण विवशः अचेतनः। निशाचरीति निशाचरीणां नयनान्येव इन्दीवराणि नीलोत्पलानि तेषां नीरन्ध्राभिः अविच्छिन्नाभिः नीरधाराभिः अश्रुभिः। रावणस्य अङ्ककारः प्रतिनिधिः नरान्तक इत्यर्थः।

कहेसु कीदिसी उण णरन्तअवहे देवाणं मुहच्छाआ आसि (१७)।

सुमुखः। यादृशी प्रतिपक्षपराभवे सति भवति स्वामिनि त्रिजटे! कथं कथ्यते देवतापक्षपातः क्षत्रियकुमारे विजेतरि तत्र यद्वा को नाम धर्मविजयिनि जने न स्निह्यति यतः।

हर्षादेकं नयनमुशना नेत्रयुग्मानि देवा-
स्त्रीण्यक्षीणि त्रिपुरविजयी पद्मसद्मा ऽष्टदृष्टीः।
चक्षुःषट्कं द्विगुणगुणितं शाङ्करिर्दिक्सहस्र
नोत्त्विल्लासं स च सुरपतिर्दृष्टवान् वालिपुत्रम् ॥८॥ (न)

त्रिजटा। तदो अज्जदसकण्ठेण किं पडिवसं? (१८)।

सुमुखः। इदमभिहितम्।

मा भङ्गसङ्गमवयच्छ नरान्तकस्य
जातः पराङ्मुखगतिर्न पुरा सुरेशः।

---

(१७) हा वत्स! क्वासि देहि मे प्रतिवचनं भद्र! कथय कीदृशी पुनर्नरान्तकवधे देवानां मुखच्छाया आसीत्।

(१८) तत आर्यदशकण्ठेन किं प्रतिपन्नम्?।

---

(न) हर्षादिति। हर्षात् आनन्दादिति सर्वत्र योज्यम्। उशनाः शुक्राचार्यः एकं नयनं काणत्वादिति भावः देवाः नेत्रयुग्मानि, त्रिपुरविजयी शम्भुः त्रीणि अक्षीणि, त्र्यम्बकत्वादिति भावः। पद्मसद्मा पद्मयोनिः अष्टदृष्टीः नयनानि, चतुर्मुखत्वात्, शाङ्करिः शङ्करात्मजः द्विगुणितं चक्षुषां षट्कं द्वादश नयनानि तथा सुरपतिः इन्द्रः इक्-

तस्मात्मतं भवतु तत् पुनराजिकर्म
साधारणं यदिह वानरराक्षसानाम् ॥ १० ॥ (प)

त्रिजटा । कहं अज्जेण दिण्णो जलञ्जली लङ्कादेवीए(फ) सदोतदो ? (१८) ॥

सरमा । ततश्च (ब) सविभीषणहस्ततालं हसति राम-देवे कुम्भकर्णप्रबोधनाय निकुम्भिलानिर्गतस्य च मेघनादस्य समाह्वानाय शुकसारणौ प्रेष्य लङ्कामेव प्रविष्टो देवः ।

त्रिजटा । ता गच्छह वुत्तन्तरं (भ) उपलहिडं अहं वि

---

(१८) आर्य्येण दत्तो जलाञ्जलिर्लङ्कादेव्यै । ततस्ततः ? ।

---

बहलं बहलं वर्त्तुमि सहस्रलोचनत्वादिति भावः । उन्नामं नीत्वा विकास्य इत्यर्थः बलिपुत्रम् अङ्गदं दृष्टवान् । मन्दाक्रान्तावृत्तम् ।

(प) सेति । हे सेनापते प्रहस्त ! इत्यध्याहार्य्यं नरान्तकस्य भङ्गेन निधनेन सङ्गं संग्रामासक्तिं मा अवयच्छ न लघूकुरु, पुरा पूर्वं सुरेशः इन्द्रः पराङ्मुखा गतिर्यस्य तादृशः न जातः, पराजितोऽपि देवपतिः कदाचित् न पराङ्मुख आसीत् अतः अस्माकमपि नरान्तकवधे न पराङ्मुखतोचितेति भावः । तत् तस्मात् साम्प्रतम् इह वानरराक्षसानां यत् साधारणम् आजिकर्म युद्धव्यापारः तत् पुनः अस्तु भवतु ।

(फ) लङ्कादेव्यैः जलाञ्जलिः दत्तः स्वयं कृतप्रतिज्ञाया अहङ्कार जयपराजयरूपाया भङ्गादिति भावः ।

(ब) सविभीषणहस्ततालं विभीषणस्य हस्ततालेन करतालेन सहितम् ।

(भ) उपालब्धुं ज्ञातुम् ।

सीतादेवीए पिअणिवेदिआ भविस्सम् (२०)। इति निष्क्रान्ताः। मिश्रविष्कम्भः।

ततः प्रविशति सुप्तोत्थितो रावणः। पार्श्वयोर्द्वौ परिचारकराक्षसौ प्रतीहारी च।

प्रतीहारी। स्वगतम्। अहो! (म) अवत्थादिरेओ दसकण्ठदेवस्स जेण इमस्सिं एव्व केलिविमाणाहिट्ठाणे रअणट्टालए पओसावहिपच्चूसं जाव रअणीरणं पेक्खिअ वासरसमरसंरम्भदंसणासुवत्तणेण ठिदोवि इसिणिद्दामुद्दिअणअणन्दीवरवणो किंवि किंवि चिन्तअन्तो चिट्ठइ (२१)।

रावणः। भद्रे वेत्रवति! यो यत्र परमभिज्ञः स तेन

---

(२०) तद् गच्छतं वृत्तान्तरमुपलब्धुम्। अहमपि सीतादेव्यै प्रियनिवेदिका भविष्यामि।

(२१) अहो! अवस्थातिरेको दशकण्ठदेवस्य येनास्मिन्नेव केलिविमानाधिष्ठाने रत्नाट्टालके प्रदोषावधिप्रत्यूषं यावत् रजनीरणं प्रेक्ष्य वासरसमरसंरम्भदर्शनोत्सुकत्वेन स्थितोऽपीषन्निद्रामुद्रितनयनेन्दीवरवनः किमपि किमपि चिन्तयन् तिष्ठति।

---

(म) अवस्थातिरेकः दशापरिणामः। केलीति केलिविमानं क्रीडापुष्पकमेव अधिष्ठानं तस्मिन् रत्नाट्टालके रत्ननिर्मिते हर्म्ये प्रदोषावधि प्रदोषकालमारभ्य प्रत्यूषं प्रभातं यावत्। ईषदिति ईषत् अल्पं निद्रया मुद्रितानि सङ्कुचितानि नयनानि इन्दीवरवनानि नीलोत्पलनिकरा इव यस्य तादृशः सन्। यत्र विषये परम् अत्यर्थम् अभिज्ञः विचक्षणः, स तेन अभिज्ञानेन सुतराम् अतिमात्रम् आवर्ज्यते आकृष्टः

सुतरामावर्ज्य तैं यद्विभावरीसमरसम्मर्दव्यतिकरेण वयमपि विस्मायिताः । विशेषस्तुतिनाटितकेन ।

प्रेयान् मे दन्तिदन्तप्रवसदसुरयं वल्लभो मे विपक्षं (य)
कुन्तप्रोतोऽपि योऽयं सरति मम रुचिस्ताण्डवी यत्कबन्धः ।
अवाप्सत्प्रेमबद्धभ्रुकुटिमुखमिदं यस्य लूनेऽपि कण्ठे
ऽऽनःस्त्रीणां न कमा जाविति वरवरणे तोषिताः के न वाग्भिः ॥ ११ ॥

ऊर्ध्वमवलोक्य । किमयमतिसत्वरः सुरजनसमाजः ।
अङ्ग कतिपययातुधानवधात्तापसं प्रति(र)सम्प्रति प्रीयते ।

सक्रोधम् ।

हर्षोत्कर्षः किमयममराः क्षुद्ररक्षोवधाद्-
स्तन्मे दोष्णां विजितजगतां विक्रमं विस्मृताः स्थ ।

---

क्रियते । विभावर्यां यः समरसम्मर्दः युद्धव्यापारः तद्व्यतिकरेण तत्-सम्बन्धेन । विस्मायिताः विस्मयं गमिताः ।

(य) प्रेयानिति । अयं दन्तिदन्तेन हस्तिदन्तप्रहारेणेत्यर्थः प्रवसन्तः गच्छन्तः असवः प्राणा यस्य तथोक्तः वीर इति शेषः मे प्रेयान् अतिप्रियः, यः कुन्तेन अस्त्रविशेषेण प्रोतः विद्धोऽपि विपक्षं शत्रुं सरति आक्रामति अयं मे मम वल्लभः प्रियः, यस्य कबन्धः छिन्नशिराः कायः ताण्डवी नृत्यपरः सन् रणे विचरतीति शेषः । तस्मिन् मम रुचिः प्रीतिः अस्तीति शेषः । यस्य कण्ठे लूने छिन्नेऽपि इदं मुखं बद्धा भ्रुकुटिर्यस्मिन् तथाविधम् अत ... प्रेम ... अस्तीति शेषः । नक्तं रात्रौ आजौ युद्धे इति, ... स्त्रीणां सुरनारीणां वरवरणे के वीराः न तोषिताः ... तोषिता इत्यर्थः मयेति शेषः । स्रग्धरा छन्दः ।

(र) तापसं रामं प्रति ।

रावणः । आकर्ण्य विहस्य च । अये ! किमयमलीकः (घ) संरम्भो मनुष्यबुद्धिदुर्गं दुर्गं कथयन्ति । ततश्च ।

सति सर्वामरोद्दण्डे मम दोर्दण्डमण्डले ।
मन्ये प्राकारविभवो लङ्काऽलङ्कारकारणम् ॥ १३ ॥ (ङ)

राक्षसान् प्रति साक्षेपम् । रे रे करङ्क ! रे रे कङ्कालक ! विबोधयतं (च) कुम्भकर्णं ज्येष्ठक्षत्रियतापससंरम्भाय ।

उभौ पदान्तरे भवतः ।

---

मानि तोरणानि । अगाधीकुरुत कुम्भराक्षसपानकरङ्कसंकादितां परिखाम् । समीकुरुत विघटितकाञ्चनशिलालीः प्रतोलीः । पुनर्नवीकुरुत मन्दोन्नतं कपाटकिद्वारम् । सज्जयत भग्नं प्राकारखण्डीमार्गम् । एतत् किं न पश्यथ । दोलितं अट्टालिकं विघटितं वरशिलकाप्रखण्डं जर्जरितं यन्त्रसन्नाहं निकुञ्चिताः काञ्चनिकाः तावत् परिकुरुत च पर्णीशानि सज्जयत मज्जावसातैलानि आनयतावर्त्तितपरिक्षेपणीयाः सर्जरससिक्थजतुजातीः निकटयत प्रवेशप्रज्वलनीयानि क्षौमपट्टकार्पासपट्टकम्बलतरुवल्कलानि विरचयत कीलिकाकर्षणपातनीयं गोपुरद्वारं वहत विविधप्रहरणसन्नाहशतसहस्राणि ।

---

(घ) अलीक इति । मनुष्यस्य बुद्धिरूपं दुर्गं दुर्गं कथयन्ति इति यत् अयं निष्फलः संरम्भः आवेगः । मनुष्यबुद्धिरतिदुर्गमा इति यत् बुधाः कथयन्ति तत् वृथा इत्यर्थः ।

(ङ) सतीति । सर्वेषाम् अमराणां देवानामुद्दण्डे भीषणे मम दोर्दण्डमण्डले बाहुदण्डनिवहे सति प्राकारविभवः प्राचीरवेष्टनं लङ्कायाः अलङ्कारकारणं शोभासाधनम् इति मन्ये ।

(च) विबोधयतं जागरयतम् ।

करदूषकः । अनानिकम् । सखे कङ्कालक ! देवः कुम्भकर्णं प्रबोधयति न पुनरात्मानं किं च प्रयत्नप्रबोधितोऽप्यसौ रामेण दीर्घं शाययितव्य (ख) एव ।

कङ्कालकः । काप्यन्या विभीषणं वर्जयित्वा सर्वस्य एषा गइ । (२४)

करदूषकः । तथैव ।

धिक् शौण्डीर्य्यमदोद्धतं भुजवनं धिक् चन्द्रहासं च ते
धिग्वक्त्राणि निकृत्तकण्ठवलयप्रोतेन्दुमौलीनि च ।
निद्रालावतिघस्मरे प्रतिदिनं स्वापान्महामेदुरे
प्रत्याशा चिरविस्मृतायुधविधौ यत् कुम्भकर्णे स्थिता ॥ १४ ॥ (क)

रावणः । सुमुखदुर्मुखौ (ख) निकुम्भिलानिर्यायिणः कुमार-मेघनादस्य कनिष्ठतापसेन सह समरसंरम्भं निवेदयतम् ।

---

(२४) का अन्या विभीषणं वर्जयित्वा सर्वस्य एषा गतिः ।

---

(ख) दीर्घं शाययितव्यः दीर्घनिद्रां प्रापयितव्यः ।

(क) धिगिति । ते तव शौण्डीर्य्यमदेन शौर्य्यदर्पेण उद्धतं भुजानां वनं समूहं धिक्, चन्द्रहासञ्च धिक्, निकृत्तैः छिन्नैः कण्ठवलयैः गलमण्डलैः प्रोतः इन्दुमौलिः शङ्करः येषां तानि वक्त्राणि मुखानि च धिक् निन्दामि । यत् यस्मात् निद्रालौ अतिघस्मरे अतिभोजिनि प्रतिदिनं स्वापात् महामेदुरे अतिस्थूले चिरेण विस्मृत-आयुधविधिः युद्धव्यापारः येन तादृशे कुम्भकर्णे प्रत्याशा जयाशा त्वया इत्यर्थः स्थिता यस्य तवेति शेषः । शार्दूलविक्रीडितं वृत्तम् ।

(ख) निकुम्भिलेति । निकुम्भिला नाम लङ्कायाः प्रदेशविशेषः यत्र रावणिरिन्द्रजित् अग्निमुपास्ते । तस्याः निर्यायिणः निर्गतस्य ।

उभौ प्रणम्य पटान्तरे भवतः ।

सुमुखः । जनान्तिकम् । सखे दुर्मुख ! (ग) किमपि शौर्य्यातिरेको रामानुजस्य यदमुना निकुम्भिलां प्रति प्रस्थितस्य कुमारमेघनादस्य सन्दिष्टं यदुत ।

यावन्नैव निकुम्भिलायजनतः सिद्धे हविर्लेह्मिनि
प्राप्तस्यन्दनचापकाण्डकवचं त्वं मन्यसे दुर्ज्जयम् ।
वैदेहीविरहव्यथाविधुरितेऽप्यार्य्ये विधाय क्रुधो
वन्ध्यास्तावदयं स शक्रविजयिन् ! त्वां लक्ष्मणो जेष्यति ॥१५॥(घ)

दुर्मुखः । तह एव्व किं भणीअदु (ङ) विराहविद्धंसणस्स कणिट्ठभादा लक्खणो क्खु एसो मिअङ्कमण्डलेण समं जादस्स तदोण परिहीअन्ति गुणा पेऊसस्स(२५) ।

(२५) तथैव किं भण्यतां विराधविध्वंसनस्य कनिष्ठभ्राता लक्ष्मणः

(ग) किमपीति । किमपि अनिर्वचनीय इत्यर्थः शौर्य्यातिरेकः वीर्य्योत्कर्षः । रामानुजस्य लक्ष्मणस्य । सन्दिष्टं वाचिकं प्रेषितम् ।

(घ) यावदिति । हे शक्रविजयिन् जितेन्द्र ! निकुम्भिलायां यजनतः यज्ञानुष्ठानात् हविर्लेह्मिनि हवींषि लेढीति तथोक्ते अग्नौ इत्यर्थः सिद्धे प्रसन्ने सति त्वं प्राप्तं स्यन्दनं रथं चापं धनुः, काण्डान् शरान् कवचं वर्म च यावत् दुर्जयं मन्यसे, तावत् वैदेह्याः सीताया विरहेण या व्यथा मनस्तापः तया विधुरिते व्याकुलितेऽपि आर्य्ये रामे क्रुधः कोपान् वन्ध्या विफला इत्यर्थः विधाय कृत्वा रामस्य त्वयि कोपं शमयित्वा इति यावत् अयं स लक्ष्मणः त्वां जेष्यति । शार्दूलविक्रीडितं वृत्तम् ।

(ङ) विराधविध्वंसनस्य रामस्य । मृगाङ्कमण्डलेन चन्द्रेण समं

सुग्रीवः । सवीरगोष्ठीषु (च) पुनरिदमभिहितम् ।

मर्त्तव्यस्मितमाननं विरचितं येनामरीणां रणा-
न्नित्यं भोगवती कृता निपतितद्वारार्गला येन च ।
धिग्धिग्भीमनिकुम्भिलागुरुगुहागर्त्तैकसाध्ये स्थितं
तत्सम्प्रत्यभिचारकर्मणि महावीरस्य शौर्य्यव्रतम्॥१६॥ (क)

करङ्कः । पुरोऽवलोक्य ।

सोऽयं पुरः शयनसद्मनि कुम्भकर्णः
संसेवितस्त्रिदशयामिककामिनीभिः ।

---

...न्ते । मृगाङ्कमण्डलेन समं जातस्य ततो न परिक्षीयन्ते गुणा दीयुष्य ।

---

...पि ... तस्य गुणा न परिक्षीयन्ते मृगाङ्कात् हीना न भवन्तीत्यर्थः, रामतुल्यपराक्रमो लक्ष्मण इति भावः ।

(च) सवीरगोष्ठीषु वीरजनपूर्णासु सभासु इत्यर्थः ।

(क) मर्त्तव्यमिति । येन रणात् सङ्ग्रामव्यापारात् अमरीणां देवाङ्गनानाम् आननम् मुखं मर्त्तव्यं मारणीयं स्मितं विनाशहसितं यस्मिन् तत् हास्यवर्जितमित्यर्थः विरचितं कृतं स्वभर्तॄणां देवानां पराजयादिति भावः । येन च भोगवती पातालपुरी नित्यं सततं निपतितम् अर्पितम् द्वारे अर्गलं यस्याः तादृशी कृता तद्वासिनाम् इन्द्रजितो भयादिति भावः । तस्य महावीरस्य भीमं भयङ्करं निकुम्भिलायाः गुरोर्महत्याः गुहायाः यत् गर्त्तम् तत्र एकसाध्ये तत्रैव निष्पाद्ये नान्यत्रेति भावः अभिचारकर्मणि आथर्वणिके शत्रुहननादिकर्मणि स्थितम् शौर्य्यव्रतं वीरत्वं धिक् धिक् निन्दामि निन्दामि धिक् निर्भर्त्सने निन्दयोरित्यमरः । शार्दूलविक्रीडितं वृत्तम् ।

श्वासोत्तरं स्वपिति जर्जरकङ्कणौघै-

स्त्रत्पाणिभिस्तडिति ताडितपादभागः ॥ १७ ॥ (ज)

कङ्कालकः । मुठ्ठु क्खु परिचिअं भणासि णिबिड़णिद्दाण-
न्दठ्ठिओ कुमारो कुम्भअण्णो (२६) ।

रावणः । यत् सत्यं भगवतः कमलसम्भवाद्गरीयसापि
तपसा निद्रानन्दमेव व्रतमान् मे वत्सः कुम्भकर्णः ।

सुमुखः । कर्णे ।

यात्यैरावणवारणे रणभुवो भग्ने तरौ डिण्डिमो

यः कष्टस्य कृतस्य सङ्गरविधावाघोषणादुन्दुभिः ।

यस्तस्यैष रवो रयेण विदधद्दिक्पालशून्या दिशः

कामं क्रामति रोदसी स्वयमयं तन्मेघनादःपुरः ॥ १८॥ (झ)

---

(२६) सुष्ठु खलु परिचितं भणसि निबिड़निद्रानन्दस्थितः कुमारः
कुम्भकर्णः ।

---

(ज) स इति । सः अयं कुम्भकर्णः पुरः अग्रतः शयनसद्मनि
शय्यागृहे त्रिदशानां देवानां यामिकाय प्रहरिणाय याः कामिन्यः
ताभिः संसेवित तथा जर्जराः जीर्णाः कुम्भकर्णस्य कठिनपदसेवना-
दिति भावः कङ्कणानां करालङ्करणविशेषाणां ओघाः समूहाः येषु
तादृशैः तासां सुरकामिनीनां पाणिभिः तड् इति ताड़ितः प्रहृतः
पादभागः चरणदेशः यस्य तथाभूतः सन् श्वासोत्तरं निश्वासभूयिष्ठं
यथा तथा स्वपिति निद्राति । वसन्ततिलकं वृत्तम् ।

(झ) यात्यैति । ऐरावणवारणे ऐरावतहस्तिनि तरौ वृक्षरूपे
रणभुवः संग्रामस्थलात् भग्ने पराजिते याति अपगच्छति सति

पुनराकर्ण्य ।

यद्भैरवाकृतिकरालकपालपाणि-
फेट्कारडामरतरो निनदानुबन्धः ।
तन्नूनमत्र हनुमान् समराय पत्रं
सौमित्रिणा विरचितोऽयमखर्वगर्वः ॥ १८ ॥ (ञ)

दुर्मुखः । हंहो देव ! कहं तुए सन्देहदोलअमधिरोविदाइं मत्तण्डपुलत्थाण कुलाइं (२१) ।

---

(२१) हंहो देव ! कथं त्वया सन्देहदोलकमधिरोपितानि मार्त्तण्डपुलस्त्ययोः कुलानि ।

---

इन्द्रपराजयार्हेति भावः. यः डिण्डिमः वाद्यविशेषः क्रुद्धः वादितः समरविधौ युद्धव्यापारे अथ आघोषणा दुन्दुभिः ततश्च तस्य डिण्डिमस्य आघोषणा दुन्दुभेश्च एष रवः वरेण वेगेन दिशः दिक्पालशून्याः विदधत् कुर्वन् कामं सम्यक् रोदसी द्यावाभूम्योरन्तरालमित्यर्थः क्रामति व्याप्नोतीत्यर्थः तत् तस्मात् अग्र पुरः अयत स्वयं मेघनादः इन्द्रजित् वर्त्तते इति शेषः । शार्दूलविक्रीडितं वृत्तम् ।

(ञ) यदिति । यत् यस्मात् भैरवाकृति भीषणमूर्त्तिः यः करालः भयङ्करः कपालपाणिः रुद्रः तस्य फेट्कारः शब्दविशेषः तद्वत् डामरतरः भयतरः निनदस्य सिंहनादस्येति यावत् अनुबन्धः सातत्यम् अनवरतसिंहनाद इत्यर्थः वर्त्तते, तत् तस्मात् अत्र सौमित्रिणा सुमित्रानन्दनेन लक्ष्मणेन समराय युद्धाय अखर्वगर्वः अतिगर्वित अयं हनूमान् नूनं निश्चितं पत्रं वाहनं विरचितः हनुमत स्कन्धमारुह्य लक्ष्मणः रणायायमतीतीति भावः । वसन्ततिलकं वृत्तम् ।

रावणः।

वामानि पश्यत समेत्य मुखानि ! पश्च

रामं सहास्मदनुजेन रणे चरन्तम्।

रामानुजं च सह शक्रजिता हसन्ति

हे दक्षिणानि ! दशकण्ठनियोग एषः ॥ २० ॥ (ट)

कञ्चुकिः। ता कीरउ (ठ) विबोहविडम्बणाडम्बरो कुमारकुम्भकसस्स (२८)।

करङ्कः। कथं पुनर्विबोधयितव्यः।

कञ्चुकिः। समन्तादवलोक्य। अअं (ड) अठ्ठारहकुलविभेअविहिण्णो सेवासमागओ भुअङ्गमवग्गो ता इमस्सिं क्कवि गरिठ्ठवरिठ्ठे समादिस (२९)।

---

(२८) तत् क्रियतां विबोधविडम्बनाडम्बरः कुमारकुम्भकर्णस्य।

(२९) अयमष्टादशकुलविभेदविभिन्नः सेवासमागतो भुजङ्गमवर्गः। तदस्मिन् कानपि गरिष्ठवरिष्ठान् समादिश।

---

(ट) वामानीति। हे वामानि पश्चमुखानि ! यूयं समेत्य मिलित्वा हसन्ति सन्ति अस्मदनुजेन कुम्भकर्णेन सह रणे चरन्तं रामं, तथा हे दक्षिणानि पश्चमुखानि ! यूयं शक्रजिता इन्द्रजिता सह चरन्तं रामानुजञ्च पश्यत अवलोकयत एषः दशकण्ठस्य रावणस्य नियोगः आदेशः। वसन्ततिलकं वृत्तम्।

(ठ) विबोधेति। विबोधः जागरणमेव विडम्बना विसंवादः अशुभव्यापार इति भावः आडम्बरः उद्योगः।

(ड) अष्टादशेति। अष्टादशभिः कुलानां वंशानां विभेदैः विशेषैः विभिन्नः विभेदं गतः। गरिष्ठवरिष्ठान् गुरुतरान् वरिष्ठान् श्रेष्ठांश्च।

कङ्कः। साधु सखे! साधु (ढ) महाभोगभोगयष्टिभिः संवेष्ट्य विबोधयितारः स्मेति। किञ्चिदुच्चैः।

वक्षस्तक्षक! नाह्यतां फणशतैस्त्वं वासुके! नासिका-
रन्ध्रे कन्धि निषेवतां श्रवणयोः कर्कोटकिः कोटरे।
कालः कालियपन्नगश्च कुरुतां कण्ठे कठोराञ्चनं
लङ्केन्द्रानुज एष येन विहरेद्विद्राणनिद्रारसः॥ २१॥ (ण)

रावणः। विहस्य। किमेभिर्मृणालकोमलकायकाण्डैः प्रचण्डैरपि फणावद्भिर्वक्षस्य क्रियते।

कङ्कालकः। (त)अमहाभागजनमनोरथा इव वन्ध्यीभूता फणीन्द्राः (३०)।

---

(३०) अमहाभागमनोरथा इव वन्ध्यीभूताः फणीन्द्राः।

---

(ढ) महेति। महान् आभोगः विस्तारः यासाम् आभोगः परिपूर्णतेत्यमरः तादृशीभिः भोगयष्टिभिः देहलताभिः भोगः सुखे-स्त्र्यादिभृतावहेश्च फणकाययोरित्यमरः। विबोधयितारः जागरयितारः।

(ण) वक्ष इति। हे तक्षक! नागविशेष! वक्षः नाह्यतां त्वयेति शेषः, हे वासुके! नागराज! त्वं फणशतैः नासिकारन्ध्रे कांश्च आवृणु, कर्कोटकिः नागविशेषः श्रवणयोः कर्णयोः कोटरे विवरे निषेवताम् आश्रय। कालः कृष्णवर्णः कालियपन्नगः कण्ठे कठोरम् आञ्चनं विस्तारं कुरुतां कण्ठदेशं दृढं वेष्टतामित्यर्थः एष लङ्केन्द्रस्य अनुजः कुम्भकर्णः येन प्रकारेण विद्राणः विगतः निद्राया रसः अनुरागः यस्य तादृशः सन् विहरेत् निद्रां त्यजेदित्यर्थः। शार्दूलविक्रीडितं वृत्तम्।

(त) अमहेति। अमहाभागानां दुर्भाग्यानामित्यर्थः मनोरथाः अभिलाषा इव वन्ध्यीभूताः निष्फलाः अकृतकार्या इति भावः।

रावणः । निरूप्य । वत्सस्य कठोरे वपुषि पतितोत्पतिता अतिगरीयांसो गिरयः कन्दुकायन्ते । (फ)

कङ्कालकः । (ब) अविद्धे विअ मोत्तिए तन्तुणा अकिअकज्जेण कुमारे बाहिरदो लुठ्ठिअं महिहरचक्केण (२३) ।

दक्षिणतो नेपथ्ये ।

मायां मुञ्च गृहाण कौतुकरसं वीरप्रशस्ये रणे
स्वर्नारीजन एष नूतनपतिप्राप्त्या ऽस्तु बद्धोत्सवः ।
मद्बाणाः खरदूषणत्रिशिरसां सैन्योपमर्दादमी
रक्षःशोणितपानलम्पटमुखास्त्वत्तोऽपि वाञ्छन्त्यसृक् (२४) (भ)

(२३) अविद्ध इव मौक्तिके तन्तुना अकृतकार्य्येण कुमारे बहिर्लुठितं महीधरचक्रेण ।

मे॰ । येन तत्र कुम्भकर्णं नास्ति निद्रामुद्रा स्वापावधिः यस्य तथाभूतः सन् समरे संग्रामे प्रसरति विचरति । एतेन पर्वतैरपि ... अस्य अभिन्नत्वम् । अक्षतत्वम् ।

(फ) कन्दुकायन्ते गेन्दुकवत् भवन्तीति यावत् ।

(ब) अविद्धे अच्छिद्रिते मौक्तिके तन्तुना सूत्रेण यथा अकृतकार्य्येण तथा अकृतकार्य्येण इव महीधराणां पर्वतानां चक्रेण समूहेन बहिः पर्य्यन्ते लुठितं वेष्टितं न तु चैतन्यमापादितमिति भावः ।

(भ) मायामिति । माया कपटयुद्धनिमित्तं मुञ्च त्यज वीराणां प्रशस्ये प्रशंसनीये रणे अमायिके संग्रामे इत्यर्थः, कौतुकरसं प्रेम गृहाण, एष स्वर्नारीजनः सुराङ्गनावर्गः नूतनपतिप्राप्त्या संग्रामहतानां नव पति प्राप्त्येत्यर्थः बद्धोत्सवः कृतामोदः अस्तु भवतु । अमी

रावणः। अये! कुमारमेघनादोचितवचनदुर्मुखो लक्ष्मणः। तदेनं वत्स एव शिक्षयिता।

(नेपथ्ये)। सुमित्रापुत्र! स्वयमस्त्रकथामारभसे कः पुनस्तव शस्त्रग्रहणेऽधिकारः।

धीमान् पुमानयमिति स्तुवता जनेन
व्यामीकृता ननु सनिर्वृति यत्र दाराः।
तस्य छलादपि परापहृतेषु तेषु
कुक्षत्रियप्रहरणानि विडम्बनाय ॥ २५ ॥ (म)

हनुमान्। (नेपथ्याभिमुखमवलोकितकेन)। किमाह लक्ष्मणः? रे रे ब्रह्मराक्षस! वीरजनमर्यादानभिज्ञोऽसि यद्-

मद्भ्राता मदीयाः शराः खरदूषणत्रिशिरसां राक्षसानां मैत्र्योपमर्दात् शौनिकविमायात् रक्तसा शोणितपाने लम्पटं लुब्धं मुखम् अग्रभागः येषां तथाभूता अतएव त्वत्तोऽपि मेघनादादपीत्यर्थः अद्यक शोणितं पास्यन्ति आकाङ्क्षन्ति। शार्दूलविक्रीडितं वृत्तम्।

(म) धीमानिति। अयं धीमान् बुद्धिमान् पुरुषः लक्ष्मण इति भावः अस्मिन् न काचित् विपदाशङ्केति भावः इति स्तुवता प्रशंसता जनेन रामेणेति भावः यत्र त्वयीति भावः दाराः पत्नी सनिर्वृति निरुद्वेगमिति यावत् व्यामीकृता अर्पिता ननु खलु, हे कुक्षत्रिय! छलादपि परैः अपहृतेषु दारेषु तेषु व्यामीकृतेष्विति भावः ततस्तु तस्य धीमतस्तव प्रहरणानि अस्त्रधारणानि इत्यर्थः विडम्बनाय लज्जायै निष्फलत्वाय वा। ईदृशोऽत्र कापुरुषस्त्वं व्यामीकृतं परद्रव्यं रक्षितुं न पारयसि, साम्प्रतं तदुद्धरणार्थम् अस्त्रं दधत् न लज्जसे इति भावः। वसन्ततिलकं वृत्तम्।

प्रतीकारे (य) कर्मणि प्रहरणानि विडम्बनाय विपरीते पुनर्मण्डनाय।

राघवः। अहो! धृष्टता (र) मानुषस्य यत्कुमारमेघनादेन सह वीरव्रतचर्य्यायामुक्तिप्रत्युक्तिभिर्भाषिता।

कञ्चुकः। अग्रतोऽवलोक्य। एते (ल) गुरुगलन्दानवारि-प्रक्षालितगण्डमण्डला गलगुहाकुहरनिरर्गलनिर्गलत्-गुलुगुलारवा दिक्करिणो ता इमे समादिश (२४)।

करङ्कः।

वप्रक्रियाक्रमकरालकरप्रहार-
पादावमर्दरभसोन्निखनादि कर्म।

(२४) एते गुरुगलद्दानवारिप्रक्षालितगण्डमण्डला गलगुहाकुहर-निरर्गलनिर्गलद्गुलुगुलारवा दिक्करिणस्तदिमान् समादिश।

(य) अप्रतीकारे प्रतिकर्त्तुमशक्ये कर्मणि। विपरीते प्रतिकार्य्ये मण्डनाय भूषणाय।

(र) धृष्टता प्रागल्भ्यम् औद्धत्यमित्यर्थः। भाषिता वाग्मित्वम्।

(ल) गुर्विति। गुरुभिः महद्भिः गलद्भिः दानवारिभिः मदजलैः प्रक्षालितानि गण्डमण्डलानि कपोलदेशा येषां तथोक्ताः तथा गला एव गुहाः गह्वराणि तासां कुहरेभ्य अन्तरालेभ्यः निरर्गलम् अविरतं निर्गलन्तः निःसरन्तः गुलुगुलारवाः ध्वनिविशेषा येषां तथाविधा दिक्-करिणः आशागजाः, तस्मात् इमान् समादिश आज्ञापय कुम्भकर्णस्य निद्राभञ्जने इति शेषः।

दिग्दन्तिनः । किमपि यद्गुणितं भवद्भि-
स्तत्कुम्भकर्णपरिबोधविधावुपाध्वम् ॥ २६ ॥ (ख)

रावण । युक्तमेवैतत् । उक्रमानि(ग)दुर्गाणि दिक्करिणः ।

कञ्चु । देव ! दृश्यतां दृष्टव्यम् ।

निस्तन्द्रैर्दिग्द्विपेन्द्रैर्युगपदधिगतैर्बोधनायाधिवक्षः (घ)
आरब्धे द्वन्द्वयुद्धे प्रचुरमदचयोच्चण्डगण्डैस्ततुर्धा ।
निद्रामुद्रां न मुञ्चत्यपि च घुरघुराघोषगर्भाकघोणा-
घुत्कारैर्घोरतारैः स्वपिति पिहितदृग्निर्भरं कुम्भकर्णः ॥२७

---

(ख) वार्त्तेति । हे दिग्दन्तिनः ! भवद्भिः युष्माभिः यत्क्रिया मदोत्खातकेलि तस्याः क्रमेण नियमेन च करालः प्रचण्डः कर-प्रहार शुण्डाघात पादैरवमर्द दन्तन रभसेन वगेन उल्लिखनं कण्डू-यनं आदि यस्य तथोक्तं यत् किमपि कर्म गणितं संख्यातं कर्त्तुं मक्त-मिति भावः कुम्भकर्णस्य परिबोधविधौ जागरणानुष्ठाने तत् सर्वमिति शेषः उपाध्वम् अवलम्बध्वं कुरुतेत्यर्थः । वसन्ततिलकं वृत्तम् ।

(ग) दुर्गाणि अभेद्य निकेतनानि ।

(घ) निस्तन्द्रैरिति । निस्तन्द्रैः अनलसैः युगपत् समकालं बोध-नाय अधिवक्षः वक्षसि विभक्त्यर्थे अव्ययीभावः । अधिगतैः इत्यादैः प्रचुरेण महता दानवारिणा चयेन समूहेन उच्चण्डाः भीषणाः गण्डाः कपोला येषां तथाभूतैः दिग्द्विपेन्द्रैः आशागजैः अष्टाभिरिति शेषः चतुर्धा द्वाभ्यां द्वाभ्यां मिलित्वेति भावः द्वन्द्वयुद्धे आरब्धेऽपि कुम्भकर्णः निद्रामुद्रां निद्रावेशं न मुञ्चति न त्यजति, पिहितदृक् मुद्रितनेत्र-सन् घोरतारैः भीषणोच्चैः घुरघुराघोषं गर्भे यस्यास्तथाभूताया उरो-भ्रष्टाया घोणाया नासिकाया घुत्कारैः रवविशेषैः निर्भरं गाढं यथा तथा स्वपिति निद्राति । स्रग्धरा वृत्तम् ।

कङ्कालकः । विहस्य । तं कदं कुमारकुम्भकसे दिक्करिचक्क-(स) वालेण जं जम्मबहिरे पञ्चमतरङ्गुग्गारेहिं कीरइ (३५)।

दक्षिणतो नेपथ्ये । रेरे दुर्मुख मुखर लक्ष्मण ! ।

तं रामं कथयन्ति विक्रमधनं तन्मे मनाक्प्रीतये (ह)
तस्मिन् सङ्गरकेलिकर्म यदयं वीरप्रियो रावणिः ।
भ्रातृत्वेन तु तस्य लक्ष्मण ! कथं धैर्य्याद्धुरं चेष्टसे
दायादांश्च रिकथवत् क्वचन भो ! शौर्य्यक्रिया क्रामति२८

(३५) ततस्तत् कुमारकुम्भकर्णे दिक्करिचक्रवालेन यज्जन्मबधिरे पञ्चमतरङ्गोद्गारैः क्रियते ।

(स) दिक्करिचक्रवालेन दिग्गजवृन्देन । जन्मबधिरे आजन्मश्रोत्रेन्द्रियवर्जिते पञ्चमतरङ्गोद्गारैः पञ्चमाख्यस्वरविशिष्टस्य तरङ्गाणां प्रवाहाणाम् उद्गारैः उच्चारणैः उच्चतरस्वरसङ्गीतैरिति भावः बधिरा अत्युच्चतरमपि सङ्गीतं यथा नाकर्णयन्ति तथा कुम्भकर्णोऽपि दिग्गजप्रहारानपि नानुभवतीति तात्पर्य्यम् ।

(ह) तमिति । तं रामं विक्रमधनं कथयन्ति जना इति शेषः । तत् तस्मात् मे मम तस्मिन् रामे सङ्गरकेलिकर्म संग्रामक्रीडनरूपव्यापारः मनाक् ईषत् प्रीतये आनन्दाय भवति । रामेण सह युध्यमानो हृष्यामीति भावः । यत् यस्मात् अयं रावणिः रावणतनयः मेघनादः वीरः प्रियः यस्य तथाभूतः । हे लक्ष्मण ! त्वन्तु तस्य भ्रातृत्वेन कथं धैर्य्याद्धुरस्य अधैर्य्यं यथा तथा चेष्टसे व्यवहरसि । भो ! शौर्य्यक्रिया वीरकर्म रिक्थवत् सम्पत्तिधनवत् क्वचन कुत्रापि दायादान् उत्तराधिकारिणो ज्ञातीन् न च क्रामति नैव प्राप्नोति । यथा भ्रातृधनं भ्राता अधिकरोति तथा भ्रातुः शौर्य्यं नेति भावः । शार्दूलविक्रीडितं वृत्तम् ।

पुनस्तत्रैव ।

लङ्केश्वरेण यदि शङ्करपादमूले
नत्वा शिरांसि भुवनाधिपतित्वमाप्तम् ।
तन्मेघनाद ! यदि किं तव सूर्य्यभक्तो
भास्वन्मणिर्ज्वलति किं स्फटिकोपलस्य ॥ २९ ॥ (घ)

पुनस्तत्रैव । रे रे (क) विरोचनकुलपांसन ! केरलीसुत ! लक्ष्मण ! रणप्रवणं रावणयुवराजं इन्द्रजितमपि मां न जानासि तदेव स्थाप्यसे ।

पुनस्तत्रैव । रे रे पुलस्त्यकुलकलङ्क ! (ख) सहोढासुत ! रामचन्द्रानुचरं लक्ष्मणमपि मां न जानासि तदेव स्थाप्यसे ।

(घ) लङ्केश्वरेणेति । हे मेघनाद ! लङ्केश्वरेण रावणेन शङ्करस्य पादमूले शिरांसि नत्वा छित्वा बलित्वेन प्रदाय इत्यर्थः. यदि भुवनानाम् अधिपतित्वम् आधिपत्यम् आप्तं लब्धं तत् तर्हि तव किं ? न किमपीत्यर्थः । यदि सूर्य्यभक्तः सूर्य्यस्य भास्वन्मणिः सूर्य्यकान्तमणिः ज्वलति सूर्य्यकरस्पर्शेनेति भावः तदा स्फटिकोपलस्य स्फटिकमयपाषाणस्य किम् ? न किमपीत्यर्थः । तव पिता ईश्वराराधनेन आधिपत्यं प्राप्त तव कर्तृत्वं नास्ति इति भावः । वसन्ततिलकं वृत्तम् ।

(क) विरोचनकुलपांसन ! सूर्य्यकुलाधम ! केरलीसुत ! केरलाधिपतेः कन्या सुमित्रा तस्याः सुत तत्सम्बुद्धौ ।

(ख) सहोढासुत सहोढाया अपरेणाहृतगर्भायाः पश्चात् रावणेन परिणीताया मन्दोदर्या इत्यर्थः सुतः तनयः तत्सम्बुद्धौ गर्भे ? सहोढज इति स्मरणात् ।

सुमुखः। देव लङ्काधिपते! तदित्थमन्योन्यमाक्षिपद्भ्यां(ग) पुलस्त्यककुत्स्थकुलकुमाराभ्याम्।

उन्नालनीलनलिनानि नभोह्रदस्य
दूताः समित्परिगमाय चमूकटाक्षाः।
आभ्यां परस्परमपि प्रहिताः कृतान्त-
केलीशकुन्तय इमे विशिखाः सहस्रम् ॥३०॥(घ)

वामनः। कङ्कालक! करङ्ककं प्रति। ता अस्से केवि समादिस (३६)।

करङ्ककः। भवतु रावणावरजविबोधनाय भगवन्तं सपरिवारं (ङ) भर्गमभ्यर्थये। सप्रश्रयम्।

हेरम्बः कण्ठगर्जं रचयतु मुरजानाहतो हन्तु नन्दी
चण्डो चण्डाट्टहासं किरतु डमरुकं ताडयत्विन्दुमौलिः।

---

(३६) तदन्यान् कानपि समादिश।

(ग) आक्षिपद्भ्यां निर्भर्त्सयद्भ्याम्।

(घ) उन्नालेति। आभ्यां लक्ष्मणमेघनादाभ्यां नभोह्रदस्य आकाशसरसः उन्नालानि मृणालेभ्य उद्गतानि नीलनलिनानि नीलकमलानि, समित्परिगमाय सङ्ग्रामव्यापारस्थापनाय दूताः चमूनां सेनानां कटाक्षाः कृतान्तस्य यमस्य केलिशकुन्तयः क्रीडापक्षिणः इमे सहस्रं विशिखाः शराः परस्परम् अपि अन्योन्यं प्रति प्रहिताः प्रेरिताः। वसन्ततिलकं वृत्तम्।

(ङ) भर्गं हरं। सप्रश्रयं सविनयम्।

येनाकाण्डप्रबोधप्रभवगुरुतरक्रोधदीप्तारुणाक्षः
संग्रामग्रामलुण्ठोद्भटभुजपरिघो जायते कुम्भकर्णः ॥ ३१ ॥(च)

रावणः । साधु भोः ! साधु सुषुप्तस्यापि(छ)महानिनदः प्रतिबोधहेतुः किं पुनर्विबोधोपचारा वत्से सावित्रे महसीव सर्वतेजांसि प्रलीयन्ते ।

कङ्कालकः । स्वगतम् । विबोहीअदि (ज)कुमारो जइ सलिले सिलाहिं उत्तरीअदि अलाबूहिं वा णिमज्जीअदि (३७)

---

(३७) विबोध्यते कुमारो यदि सलिले शिलाभिरुत्तीर्यतेऽलाबूभिर्वा निमज्ज्यते ।

(च) हेरम्ब इति । हेरम्बः गणेशः, कण्ठस्य गर्जं गर्जनध्वनिं रचयतु करोतु, नन्दी द्वाःस्थः आडम्बरान् पटहानित्यर्थः मुरजान् वाद्यभेदान् हन्तु ताडयतु । चण्डी पार्वती चण्डम् उग्रम् अट्टहासं हास्यविशेषं किरतु विस्तारयतु, इन्दुमौलिः शङ्करः डमरुकं ताडयतु वादयतु । येन संग्रामग्रामाणां रणक्षेत्राणां लुण्ठे लुण्ठने उद्भटः उत्कटः भुज एव परिघः यस्य तादृशः कुम्भकर्णः अकाण्डे असमये यः प्रबोधः जागरणं तेन प्रभवतीति तथोक्तेन गुरुणा महता क्रोधेन दीप्ते अरुणे रक्ते अक्षिणी यस्य तथाविधः जायते भवति । स्रग्धरावृत्तम् ।

(छ) सुषुप्तस्य अतिनिद्रितस्येत्यर्थः । प्रतिबोधहेतुः जागरकारणं सुषुप्तोऽपि महता निनदेन जागृयादिति भावः । विबोधस्य जागरणस्य उपचाराः पर्वतप्रहाराद्युपायाः किं पुनः, न किमपि आवश्यकमिति भावः । वत्से कुम्भकर्णे । सावित्रे सौरे । महसि तेजसि । प्रलीयन्ते अन्तर्भवन्तीत्यर्थः । कुम्भकर्णे सर्वे जागरोपाया विफला इति भावः ।

(ज) कुमारः कुम्भकर्णः । सलिले जले शिलाभिः प्रस्तरैः उत्ती-

दक्षिणतो दुर्मुखः । देव लङ्कापरमेस्सर ! कुमारमेहणाअं लक्खणं अ अणुवदन्ताणं रक्खसवाणरबलाणं भीषणभीषणं (झ) वट्टइ (३८) ।

सुमुखः । देव ! सुभीषणमेव वर्त्तते । पश्य ।

युद्धोर्वीष्वर्द्धमग्नैः कुवलयसरसां सूत्रिता पत्रिभिः श्री-
र्नाराचैः पाशबन्धागतभुजगभयं लम्भिता वानरेन्द्राः ।
भल्लैस्तिर्यक्पतद्भिः शिखिनिचिमचयिनो दर्शिताः सादिमार्गाः
प्रासाद्य द्राक् क्षुरप्रैर्वियति नखतुला वीरवक्त्राब्जलावैः ॥ २२ ॥ (ञ)

(३८) देव लङ्कापरमेश्वर ! कुमारमेघनादं लक्ष्मणं चानुवर्तमानानां राक्षसवानरबलानां भीषणभीषणं वर्तते ।

र्यन्ते उन्मथ्यन्ते अत्यावृत्ति तदाख्य नखुदव्यभेदे । नैव कदाचित् विबोधयितुं शक्यते इति भावः ।

(झ) भीषणभीषणम् अतिभीषणमित्यर्थः युद्धमिति शेषः ।

(ञ) युद्धेति । युद्धोर्वीषु संग्रामभूमिषु अर्द्धमग्नैः अर्द्धप्रोतैः पत्रिभिः शरैः कुवलयसरसां नीलोत्पलयुत सरोवराणामित्यर्थः श्रीः शोभा सूत्रिता विरचिता । नाराचैः अस्त्रविशेषैः वानरेन्द्राः कपिसेनापतयः पाशबन्धाय आगतेभ्यः भुजगेभ्यः यत् भयं तत् लम्भिताः प्रापिताः । नागपाशैरिव नाराचैः वानरा बद्धा इति भावः । तिर्यक् वक्रं यथा तथा पतद्भिः भल्लैः अस्त्रविशेषैः सादिनाम् अश्वारोहिणां सैनिकानां मार्गाः पन्थानः शिखिनिचिमचयिनः दर्शिताः । वीराणां वक्त्राणि मुखानि अब्जानि पद्मानीव लुनन्तीति तादृशैः क्षुरप्रैः अस्त्रभेदैः वियति आकाशे द्राक् झटिति नक्षत्राणां तुल्याः सादृश्यानि प्राप्य । स्रग्धरा वृत्तम् ।

दुर्मुखः । देव ! पेक्ख ।

कोअण्डचक्ककरवालकिवाणधेसु

सत्तणक्कमणिवेसिदसङ्करेसु ।

वीरेसु पेक्ख णिवडन्ति ममं पहारा

वेएण दिव्वतरुणीणवफुल्लमाला (३९) ॥ ३२ ॥ (ट)

वामनः । कङ्कालकः । सविषादं । कहं पुण एअं भविस्सदि (४०)।

करटकः ।

हं कामिन्यः ! कनककलशोपपीवराभ्यां स्तनाभ्यां

गाढाश्लिष्टं रचयत लसद्दोर्लताः कुम्भकर्णम् ।

(३९) देव ! पश्य ।

कोदण्डचक्रकरवालकृपाणधेषु

सत्त्वक्रमनिवेशितसङ्करेषु ।

वीरेषु पश्य निपतन्ति समं प्रहारा

वेगेन दिव्यतरुणीनवफुल्लमालाः ॥

(४०) कथं पुनरेतद् भविष्यति ।

(ट) कोदण्डेति । कोदण्डानि धनूंषि चक्राणि तदाकारास्त्रविशेषाः करवालाः कृपाणाः असयश्च तान् दधतीति तथोक्तेषु सत्त्वं धीरत्वं तस्य क्रमेण परिपाट्या निवेशितः विरचितः सङ्करः संग्रामः यैः तादृशेषु वीरेषु प्रहाराः दिव्यानां तरुणीनां नवाः फुल्लमालाः विकसितपुष्पमालाः वेगेन सम युगपत् निपतन्ति पश्य अवलोकय । वीराः प्रहाराहता एव देवत्वमाप्य सुरनारीभिर्वरमाल्येन व्रियन्ते इति भावः ।

कामक्रीडानिविडरचितः सेवितः स्वर्वधूभि-
र्जायेतायं त्रिभुवनजयी येन निद्रादरिद्रः ॥ ३४ ॥(ठ)

रावणः। विलोक्य सहर्षम्। कथं विबुद्धो मे वत्सः।

करङ्कः। विबुद्धः कुम्भकर्णो यातश्च (ड)तापसाभ्यर्णम्।

दुर्मुखः।

एक्केहिं चण्डखग्गावडणविहडिदुट्टङ्गसीसावमुक्के (ढ)
हुङ्कारे रोसहेलावलिअभडचमूलोअणिच्छिज्जभण्णेहिं।
अण्णेहिं दिव्वणारीणिविडभुअलआबद्धकण्ठेहिं देहेहिं
देहेहिं पेक्ख जाआ समरमरणिणो तक्खणं वीरलक्खा। ३५(४१)

(४१) एकैश्चण्डखड्गापतनविघटितोद्दृप्तशीर्षावमुक्ते
हुङ्कारे रोषहेलाश्लथितभटचमूलोकनिर्भर्त्सितैः।
अन्यैर्दिव्याङ्गनानिविडभुजलताबद्धकण्ठैर्हृद्यै
देहैः पश्य जाता समरमरणिनस्तत् क्षणं वीरलक्षाः ॥

---

(ठ) हे कामिन्य इति। हे कामिन्यः सुरस्त्रियः यूयं चलन्त्यः विलसन्त्यः दोर्लता भुजलता बाहुयष्टय इत्यर्थः यासां तथाभूताः सत्यः कनककलशीपीवराभ्यां काञ्चनकुम्भस्तनाभ्यां स्तनाभ्यां कुम्भकर्णं गाढं निविडं यथा तथा आश्लिष्टम् आलिङ्गितं रचयत कुरुत, येन अयं त्रिभुवनविजयी कुम्भकर्णः स्वर्वधूभिः सुरसुन्दरीभिः युष्माभिः कामक्रीडाभिः सुरतलीलाभिः निविडं दृढं रचितः आक्रान्तः सेवितश्च निद्रया दरिद्रः रहितः जायेत सुरनारीणां युष्माकं स्पर्शात् सञ्जातावेगः अयं सत्वरं निद्रां त्यक्ष्यतीति भावः। मन्दाक्रान्तावृत्तम्।

(ड) तापसस्य रामस्य अभ्यर्णं समीपम्।

(ढ) एकैरिति। पश्य अवलोकय तत्क्षणं समरमरणिनः संप्रा-

करङ्कः । वामतो नेपथ्याभिमुखमवलोक्य । विबुद्धः कुम्भकर्णः परिजनादुपलब्धवृत्तान्तः किमाह ।

सूतं नान्यं जगति जननी तादृशं पुत्ररत्नं (ग)
रामो यादृग्लवणजलधौ सेतुसीमन्तकारः ।
गङ्के शङ्कां वहति च ततो राक्षसेन्द्रोऽप्यकाण्डे
निद्राभङ्गः कथमितरथा कारितः किङ्करैर्मे ॥ २६ ॥

विचिन्त्य । तदश्रुतमिवैतत् (त) प्र[illegible]प्रणेन रावणेन वच-नमार्त्तो मा कदाचन विभीषण[illegible]यात ॥ प्रकाशम् । किमाह [illegible]म: ।

मनता[illegible]चीरकथा धनङ्गय तोजस्य [illegible] आपतनेन विघटितं कपिडाम उद्दृम् अरिहद यत् भीष[illegible]तात् असमुक्तो निःसृते रोपात् उच्चरिते इति भाव कुङ्कारे सति रोपेण क्रोधेन हेलया अव-ध्या स वलितैः प्रहृत्ते भटवमूलोके योधसैनिकजनैः निर्भर्त्सितैः निःक्षतं यत्रैः टङ्कैरिति शेष. टिप्याना नारीणा निविड्राभिः भुजगुरूमाभि बहु आलिङ्गित कण्ठो यथा तादृशो. अन्यैः अतएव हृष्टैर्दृढैकपलाविला जाता ।

(ग) सूतं इति । लवणजलधौ सेतुसीमन्तकारः सेतुनिर्म्माता इत्यर्थः राम यादृक् जगति जननी कापीति शेषः तादृशं राममद्-यम् अन्य पुत्ररत्न न सूते न प्रसोतुमर्हतीत्यर्थः । शङ्के मन्ये, राक्षसेन्द्रोऽपि त्रिभुवननिर्भयोऽपीति भाव. तत. तस्मात् रामात् शङ्का भयं वहति च, इतरथा नो चेत् किङ्करैः दासैः मे मम अकाण्डे असमये निद्राभङ्ग कथ कारित । मन्दाक्रान्तावृत्तम् ।

(त) प्रकृतिरोषणेन स्वभावकोपनेन । विभीषणवृत्तान्त । कथं भाव. विभीषणो यथा रावण रामाय सीता प्रत्यर्पयितुमुपदिशन् रावणेन निराकृत. तथा श्रुतं कदाचन न भवतु इति ।

स्वप्राग्भागस्थगितगगने कुम्भकर्णे विनिर्या-
त्युच्चैर्नीतो दिनमणिरथस्त्वरयता चारुणेन ॥ ४० ॥ (प)

नेपथ्ये । कः कोऽत्र भोः ! विज्ञाप्यतां देवो दशकण्ठस्त्वदिदं तवानुजः प्रतिजानीते ।

सीताप्रियं च दलितेश्वरकार्मुकं च
वालिद्रुहं च रचिताम्बुधिबन्धनं च ।
रक्षोहणं च विजिगीषुविभीषणं च
रामं निहत्य चरणौ तव वन्दिताहे ॥ ४१ ॥ (फ)

पन्था। यस्य स हनूमान् सौमित्रिणा स्कन्धगतेनेति शेषः सह आकाशम् उत्पतित । वसन्ततिलकं वृत्तम् ।

(प) दिङ्मातङ्गैरिति । स्वस्य प्राग्भागेन देहपूर्वभागेनेत्यर्थः, स्थगितम् आवृतं गगनं येन तादृशे कुम्भकर्णे विनिर्याति गृहात् रणभूमिं गच्छति सति दिङ्मातङ्गैः दिग्गजैः कमठपतिना कच्छपराजेन भुजङ्गराजशायिना इति भावः भोगिभर्त्रा भुजङ्गराजेन च रुद्धा कम्पनसंदेहेनेति भावः अतएव दूरनम्रा अतिभारवती धरित्री मेदिनी कथमपि कृत्वा अतियत्नम् आस्थितेयं धृता अवलम्बिता, अरुणेन च त्वरयता बिभ्यता अतः दिनमणेः सूर्यस्य रथः उच्चैः नीतश्च इति सम्भावयामि । मन्दाक्रान्तावृत्तम् ।

(फ) सीताप्रियमिति । सीता प्रिया यस्य तम् अथवा सीतायाः प्रियः पतिः तञ्च दलितं भग्नम् ईश्वरस्य कार्मुकं धनुर्येन तथोक्तं हरधनुर्भञ्जकमित्यर्थः वालिद्रुहं वालिघातिनञ्च रचितं कृतम् अम्बुधेः सागरस्य बन्धनं येन तादृशञ्च रक्षोहणं राक्षसहन्तारञ्च विजिगीषुः ... विभीषणो यस्य तञ्च रामं निहत्य तव चरणौ पादौ वन्दिताहे अभिवादयिष्यामि । वसन्ततिलकं वृत्तम् ।

रावणः । साधु वत्स कुम्भकर्ण ! साधु कथमन्यथा (ब) समरसीमनि रावणस्त्वत्प्रवणः ।

दक्षिणतो नेपथ्ये । सुमुखः । देव ! दृश्यतां(भ) क्षत्रियतापस-व्यवसायः ।

पौलोमीकुचसिचयं हठेन हृत्वा
यः क्लृप्तो नृहरिसटाविचामराङ्कः ।
त्वत्सूनोः शिखिरथकेतने च तस्मिन्
सौमित्रेः सपदि पतन्ति बाणदण्डाः ॥ ४२ ॥(म)

पुनरवलोक्य । साधु भोः कुमार मेघनाद ! साधु साधु (य)संक्रान्तकार्मुकोपनिषदाचार्य्याद्दशकण्ठतोऽसि ।

— — —

(ब) समरसीमनि युद्धसीमायां त्वत्प्रवणः त्वदेकायत्तः त्वामेवाश्रित्य युद्धाय प्रयते इति भावः ।

(भ) क्षत्रियतापसव्यवसायः क्षत्रियतापसस्य लक्ष्मणस्य व्यवसायः व्यापारः ।

(म) पौलोमीति । नृहरेः नरसिंहस्य सटानां जटानाम् ओघाः समूहा एव चामराः तैः अङ्कः चिह्नं यस्य तथोक्तः नृसिंहदेवं पराजित्य तस्य उत्पाटितेन केशनिचयेन ध्वजयष्टेश्चामरानुष्ठानादिति भावः । यः पौलोम्याः शच्याः इन्द्राण्याः इत्यर्थः पुलोमजा शचीन्द्राणीत्यमरः कुचसिचयं स्तनाञ्चलं हठेन बलात् हृत्वा क्लृप्तः रचितः सपताकः कृत इत्यर्थः त्वत्सूनोः तव पुत्रस्य इन्द्रजितः तस्मिन् शिखिरथकेतने आग्नेयरथध्वजे च सौमित्रेः सुमित्रानन्दनस्य लक्ष्मणस्य बाणदण्डाः सपदि सद्यः पतन्ति । प्रहर्षिणीवृत्तं त्र्याशाभिर्मनजरगाः प्रहर्षिणीयमिति लक्षणात् ।

(य) संक्रान्तेति । संक्रान्ता प्राप्ता कार्मुकोपनिषद् धनुर्वेदः यं तथोक्तः ।

देव पुलस्त्यनन्दन ! ।

यत्मङ्गले स्नपितमञ्जनयाऽऽर्द्रनेत्रया
यन्मारुतस्य परिचुम्बति कौतुकेन ।
न्यस्तः शरः शिरसि तव हनूमतोऽस्य
पुत्रेण ते रभसलङ्घितसागरस्य ॥ ४३ ॥ (र)

रावण । तर्हि प्रतिकृतो (ल) लङ्कादाहपरिभवः कुमारा-
क्षवधपरिभवश्च वत्समेघनादेन ।

मन्दः ।

यानूर्मिलापतिरयं च तवात्मजश्च
बाणोत्करान् विकिरता रचितान्धकारान् ।
तेऽन्योन्यखण्डनवशाद्विफलीभवन्ति
रन्ध्रमत्रे बधिरयोरिव कण्ठनादाः ॥ ४४ ॥ (व)

(र) यन्मङ्गले इति । अञ्जनया तदाख्यया वानर्या आर्द्रे स्नेहेनेति शेषः । नेत्रे यस्याः तादृश्या यया यत् मङ्गले माङ्गलिके कर्मणि स्नपितं स्नानं कारितमित्यर्थः । मारुतः वायुः यत् कौतुकेन आनन्देन परिचुम्बति च तेन तव पुत्रेण रभसेन वेगेन लङ्घितः तीर्णः सागरो येन तादृशस्य अस्य हनूमतः तव तस्मिन् शिरसि शरः न्यस्तः क्षिप्तः । तव पुत्रः हनूमन्तं शीर्षे विव्याधेति भावः । वसन्ततिलकं वृत्तम् ।

(ल) प्रतिकृतः प्रतिनिर्यातितः ।

(व) यानिति । अयम् ऊर्मिलापतिः लक्ष्मणश्च तव आत्मजः मेघनादश्च रचितान्धकारान् यान् बाणोत्करान् शरसङ्घान् विकिरतः अन्योन्यं प्रति विक्षिपतः, ते रन्ध्रमत्र सुरतसमङ्गे बधिरयोः श्रोत्रेन्द्रियरहितयोर्दम्पत्योरिति शेषः. कण्ठनादाः कण्ठध्वनय इव अन्योन्यखण्डनवशात् विफलीभवन्ति व्यर्था भवन्तीत्यर्थः । वसन्ततिलकं वृत्तम् ।

वामनः कङ्कालकः। किं उण एस(श)विडम्बिअहेरम्बगल-गुञ्जारवो विणिज्जिदसङ्करकरप्फालिअडड्डमरडमरुअकोलाहलो कुण्ठिअवेउण्ठसूअरघोरघुक्कारप्पसरो णिउञ्चिअणरसिंहमुक्कपुक्कलवुक्करवइअरो असेससद्दसंमद्दो सुणीअइ (४४)।

कङ्कालकः। कर्णौ पिधाय। देव! यथाऽभिहितं कङ्कालकेन।

कुर्वन्नुत्कर्णतालान् दिशि दिशि करिणो धौर्जटीनां जटानां
बन्धाहिग्रन्थिमुद्रां सपदि शिथिलयन् खण्डितोपेन्द्रनिद्रः।
क्रुन्दानां नन्दिवाद्यं मरजमुखरतं भग्नविश्वप्रमोदो (ष)
रोदोरन्ध्रं निरुन्धन् प्रसरति किमिदं निष्ठुरज्यानिनादः॥४५

(४४) किं पुनरेष विडम्बितहेरम्बगलगुञ्जारवो विनिर्जितशङ्करकरास्फालितोड्डामरडमरुककोलाहलः कुण्ठितवैकुण्ठसूकरघोरघुत्कारप्रसरो निकुञ्चितनरसिंहमुक्तपुष्कलबुक्कारव्यतिकरोऽशेषशब्दसंमर्दः श्रूयते।

(श) विडम्बितेति। विडम्बितः अनुकृतः हेरम्बस्य गजाननस्य गलगुञ्जारवः कण्ठगर्जितं येन तथाभूतः। विनिर्जितेति विशेषेण पराभूतः शङ्करस्य करेण आस्फालितस्य ताडितस्य उड्डामरस्य महतः डमरुकस्य वाद्यविशेषस्य कोलाहलः रवविशेषः येन तथाविधः। कुण्ठितः तिरस्कृतः वैकुण्ठसूकरस्य आदिवराहस्य घोरः महान् घुत्कारप्रसरः येन तादृशः। निकुञ्चितः निःशेषेण कुञ्चितः कुण्ठितः अभिभूत इत्यर्थः नरसिंहेन मुक्तः पुष्कलः प्रचण्डः बुक्कारव्यतिकरः गर्जनविशेषः येन तथोक्तः। अशेषः कृत्स्नः शब्दानां सम्मर्दः परस्परसंघट्टव्यतिकरः।

(ष) कुर्वन्निति। दिशि दिशि करिणः दिग्गजानित्यर्थः उत्कर्ण-

रावणः। जाने वत्सस्य (ङ) साम्मुख्यं भजता ज्याबन्धबन्धुरितं धनुरास्फालितं ज्येष्ठतापसेन।

[illegible] नेपथ्ये। सुमुख। (च) गगनाङ्गनचारिणोरुभयोरपि सायकैर्विचित्रमाचेष्टितं तथाहि।

अमी पुरोऽभ्राणि विभिद्य पत्रिणः
प्रयान्ति धारासलिलैः सह क्षितिम्।
वहन्त्यथैतानि च पश्य विस्रुतः
पृषत्कवन्त्यैः स्थितयोरनुक्रियाम् ॥ ४६ ॥ (क)

नाकान् उद्गतकर्णानित्यर्थः कुर्वन्, सपदि सहसा धौर्जटीनां शाम्भवीनां जटानां बन्धे बन्धने य अहिभुजगराजस्य फणिन्यः तस्य मुद्रा दार्ढ्यं शिथिलयन् शिथिलां कुर्वन्, खण्डिता नाशिता उपेन्द्रस्य नारायणस्य निद्रा योगनिद्रा इत्यर्थः येन तथाभूतः मुरजस्य वाद्यभेदस्य मुखे गतं स्थितं नन्दिनो हरानुचरस्य वाद्यं कुन्दानः तिरस्कुर्वन् भग्नः नाशितः विश्वस्य जगतः प्रमोदः हर्षः येन तथाभूतः निष्ठुरः कर्कशः ज्यानिनादः मौर्वीनिस्वनः निरुद्धम् अन्योन्यसम्पृक्तं शब्देन इति शेषः इदं रोदोरन्ध्रं द्यावापृथिव्योरभ्यन्तरं किं प्रसरति स्पृशति आक्रामतीत्यर्थः। स्रग्धरा वृत्तम्।

(ङ) वत्सस्य कुम्भकर्णस्य साम्मुख्यं सम्मुखवर्त्तित्वं भजता प्राप्नुवता सम्मुखवर्त्तिना इत्यर्थः ज्येष्ठतापसेन रामेण ज्याबन्धेन मौर्वीसंयोगेन बन्धुरितम् आनतं धनुः आस्फालितं टङ्कारितम्।

(च) गगनाङ्गनचारिणोः आकाशमार्गवर्त्तिनोः उभयोर्लक्ष्मणेन्द्रजितोः सायकैः शरैः।

(क) अमी इति। अमी पत्रिणः शराः पुरः अग्रतः अभ्राणि मेघान् विभिद्य धारासलिलैः सलिलधाराभिः सह क्षितिं पृथिवीं प्रयान्ति। अथ अनन्तरम् अभ्रभेदपूर्वकसलिलपातानन्तरम् एतानि

अपि च। अत्रान्तरिक्षकुक्षौ (ख) निरन्तरे शरव्यतिकरे।
अन्तर्धाय परिक्रमन्ति सभयाः सिद्धाः प्रसिद्धा अमी
नात्यर्थं च सुधाभुजो वयमिति त्रस्यन्ति नाकौकसः।
दारानन्तरयद्भिरात्मवपुषा नष्टं च विद्याधरै-
रभ्यस्यन्ति च काण्डवारणकरीं विद्यां गणश्रेणयः ॥४७॥ (ग)

[illegible] कुद्धाननः। कहू (घ) परिअणसमप्पिअं पहरण-संदोहमवमण्णिअ पसरिओ कुम्भअण्णो (४५)।

(४) ततः परिजनसमर्पितं प्रहरणसन्दोहमवमत्य प्रसृतः कुम्भकर्णः।

अभ्यासे च [illegible] वर्णविन्यासैर्विध्वंस-[illegible] अन्तरिक्षम् अनुकरणं [illegible] पश्य [illegible] यथा [illegible] तथा [illegible] अपि [illegible] इति भावः। [illegible] वृत्तम्।

(ख) अन्तरिक्षकुक्षौ गगनाभ्यन्तरे निरन्तरे गाढे शरव्यतिकरे शरसम्पाते।

(ग) अन्तर्धायेति। अमी प्रसिद्धाः सुविख्याताः महानुभावा इत्यर्थः सिद्धाः देवयोनिविशेषाः सभयाः भयार्त्ताः सन्तः अन्तर्धाय तिरोभूय परिक्रमन्ति गच्छन्ति। नाकौकसः स्वर्गवासिनः देवाः वयं सुधाभुजः अमृतपायिनः अस्माकं मृत्युभयं नास्तीति भावः इति हेतोः अत्यर्थं न त्रस्यन्ति। विद्याधरैः देवयोनिविशेषैः आत्मवपुषा स्वदेहेन दारान् कान्ताः अन्तरयद्भिः आच्छादयद्भिः सद्भिः नष्टं पलायितञ्च। गणश्रेणयः अन्ये खेचरगणा इत्यर्थः काण्डवारणकरीं शर-निवारणीं विद्याम् अभ्यस्यन्ति च। शार्दूलविक्रीडितं वृत्तम्।

(घ) परिजनेन पार्श्वचरेण समर्पितं दत्तं प्रहरणसन्दोहम् अस्त्र-समुदायम् अवमत्य अगणयित्वा अस्वीकृत्येत्यर्थः प्रसृतः चलितः।

करङ्कः। किमाह कुम्भकर्णः। आस्तां धनुः इत्यादि पठति।

रावणः। साधु वत्स साधु सत्यं मदनुजोऽसि तदुद्धृतं रावणहृदयशल्यम्।

दुर्मुख। हाहा! किं एअं वट्टइ जदो सव्वदो सदसहस्सलक्खसंखा पज्जलन्ति हुयवहा जहं अ (ङ) अञ्जणगिरिकुडविअडो पसरइ धूमुप्पोडो मेरुसिहरदीहरसिहापहाविसट्टन्ति जालाओ सञ्झारविमण्डलपज्जलङ्गाविप्फुरन्ति फुलिङ्गा (४६)।

रावणः।

अनेन लङ्का यदकारि मत्पुरी
हनूमता गात्रगतेन भस्मसात्।
निजापराधप्रशमाय तद् ध्रुवं
निषेवितुं मामयमेति पावकः ॥ ४८ ॥ (च)

(४६) हा हा किमेतद् वर्त्तते। यत् सर्वे शतसहस्रलक्षसंख्या प्रज्वलन्ति हुतवहा यथा चाञ्जनगिरिकूटविकटः प्रसरति धूमोत्पीडो मेरुशिखरदीर्घोऽभ्यासङ्गा विसरन्ति ज्वाला सन्ध्यारविमण्डलप्रज्वलनाङ्गा विस्फुरन्ति स्फुलिङ्गा।

(ङ) अञ्जनेति। अञ्जनगिरेः कूटं शृङ्गं तद्वत् विकटः करालः। धूमोत्पीडः धूमराशिः।

(च) अनेनेति। अनेन हनूमता गात्रगतेन शरीरलग्नेन पावकेन मत्पुरी यत् भस्मसात् अकारि कृता, तत् निजापराधस्य निजदोषस्य मदनिष्टाचरणरूपस्य प्रशमाय अयं पावकः अग्निः ध्रुवं निश्चितं मां निषेवितुम् आराधयितुम् एति आगच्छति। उपेन्द्रवज्रावृत्तम्।

सुमुखः । देव ! पदातिलवस्तु (क) सुमुखोऽभिमन्यते लक्ष्मणं-दिधक्षया कुमारमेघनादेन प्रहितमाग्नेयमस्त्रं तत एष भुवनाभोगः । अङ्गुल्या निर्दिशन् ।

सद्यः सिञ्चति विष्टराम्बुजमयं देवः श्रुतीनां कवि-
स्ताराम्तःपुरवानुपैति गगनाच्चन्द्रो जलाद्रोहितः ।
गङ्गा च द्युमणेः सुता च सरितावन्योन्यमाश्लिष्यतः
किञ्चास्त्रानलडम्बरे करिमुखः क्षीराब्धिमाधावति ॥ ४९ ॥ (ख)

अपि च

दुग्धाब्धेः क्वथनाविलं तत इतो धत्ते पयः पिङ्गतां
शैलेन्द्रः प्रविलीनकाञ्चनतनुः पाषाणशेषः स्थितः ।
सान्द्राभिः करकाश्मवृष्टिभिरमी गर्भं त्यजन्त्यम्बुदाः
प्राप्नोति च समश्नुते रविरपि स्वाहापतेः पत्रिभिः ॥ ५० ॥ (ग)

(क) पदातिलवः पदातिषु लवः बिन्दुः सामान्यपदातिसैनिक इत्यर्थः । अभिमन्यते शङ्कते सम्भावयतीत्यर्थः लक्ष्मणस्य दिधक्षया दग्धुमिच्छया । भुवनाभोगः भुवनदाहः अस्तीति शेषः ।

(ख) सद्य इति । अस्त्रानलडम्बरे आग्नेयास्त्रसन्तापे सति अयं श्रुतीनां वेदानां कविः रचयिता देवः प्रजापतिः सद्यः सपदि विष्टरम् आसनम् अम्बुजं पद्मं सिञ्चति । ताराम्तःपुरवान् तारापतिरित्यर्थः । चन्द्रः जलाद्रोहितः जलसिक्ततालवृन्ताच्छादित इत्यर्थः गगनात् उपैति पलायते इत्यर्थः । गङ्गा च द्युमणेः सूर्यस्य सुता यमुना च सरितौ नद्यौ अन्योन्यं परस्परम् आश्लिष्यतः आलिङ्गतः । किञ्च करिमुखः गणपतिः क्षीराब्धिम् आधावति अभिगच्छति । शार्दूलविक्रीडितं वृत्तम् ।

(ग) दुग्धाब्धेरिति । स्वाहापतेः अग्नेः पत्रिभिः शरैः आग्ने-

रावणः । का पुनरमीभिर्गणना शलभायन्ते कुम्भकर्णे (ट) वानरबलानि ।

दक्षिणतो दुर्मुखः । किं उण एदं (ठ) दसदिसापसरिद-चउस्समुद्दं विअ जलअन्तानअन्तगिरिन्दसंदोहं विअ सलिलीभूदगअणवलअं विअ वारिसिद्धिमेत्तपअट्टपआवइवावारं विअ भुअणब्भन्तरं वट्टदि (४८) ।

सुमुखः । एवमेतत् ।

न्यस्यन् कान्तिं हुतवह इव स्वर्गपद्माकराणां

ज्वालाधौतान्यपि विरचयन्नम्भोजांशुकानि । (ड)

४८ किं पुनरेतद् दशदिशाप्रसृतचतुःसमुद्रमिव जलयन्त्रायमाणगिरीन्द्रसन्दोहमिव सलिलीभूतगगनवलयमिव वारिसिद्धिमात्रप्रवृत्तप्रजापतिव्यापारमिव भुवनाभ्यन्तरं वर्त्तते ।

(ट) शलभायन्ते शलभाः पतङ्गा इव आचरन्ति इत्यर्थः ।

(ठ) दशेति । दशदिशासु प्रसृताः प्रचलिताः चत्वारः समुद्रा यत्र तथाभूतमिव । जलेति जलयन्त्रायमाणाः जलयन्त्राणीव आचरन्तः गिरीन्द्राणां पर्वतानां सन्दोहाः समूहाः यत्र तथाविधमिव । सलिलेति । सलिलीभूतं गगनवलयम् आकाशमण्डलं यत्र तथाभूतमिव । वारीति वारिसिद्धिमात्रे जलसृष्टिमात्रे प्रवृत्तः उद्यतः प्रजापतेः ब्रह्मणः व्यापारः यत्र तादृशमिव भुवनाभ्यन्तरं जगद्विवरम् ।

(ड) न्यस्यन्निति । हुतवह इव अग्निरिव स्वर्गपद्माकराणां त्रिदिवसरसां कान्तिं न्यस्यन् क्षिपन् एकत्र निर्वापयन् अन्यत्र आदि-

रिक्ताभ्राणां भरणकरणं स्थान एव स्थितानां
किं नामायं प्लवयति पुरो रोदसी वारिपूरः ॥ ५१

रावणः । विचिन्त्य सेयमनभ्रवृष्टिः । विमृश्य । भवतु
ज्ञातम् ।

लक्षीकरोमि वरुणं न शरावलीनां
वार्यन्वतां व्रणशतैर्य इह बिभर्त्ति ।
मोक्तुर्महाकरुणयेत्युपकारिणो मे
सीतावियोगदवथुं स हि माष्टि वृष्ट्या ॥५२॥ (ढ)

सुमुख । अह पुनर्जानि (ण) चैत्रभानवमस्त्रमवजितु
वारुणवाणप्रवणो लक्ष्मण ।

अयम् अरुणया अग्निज्वालया जीतानि दीपितानि अग्निसौचानि अंशुकानि वसनानि विशदयन् परिष्कुर्वन् स्थाने एव स्थितानां न तु चलितानां रिक्ताभ्राणां निर्जलमेघानां भरणस्य पूरणस्य करणं साधनम् अयं वारिपूरः जलप्रवाहः पुरः अग्रतः किं रोदसी द्यावाभूम्योरन्तराले प्लवयति पूरयति नाम सम्भावनाम् इति सम्भावयामीति भावः ।

(ढ) लक्षीति । वरुणं जलाधिदेवं शरावलीनां न लक्षीकरोमि शरव्यूहैः न प्रहरामीति भावः यस्मात् अयं वरुणः व्रणशतैः पूर्वप्रहारजनैः वार्यन्वतां जलयन्वतां बिभर्त्ति धारयति मम जलयन्त्रभूतोऽस्ति इति भावः, साम्प्रत महाकरुणया महत्या अनुकम्पया मोक्तुः मम वाणलक्ष्यमकर्त्तुरित्यर्थः इति हेतोः अतएव उपकारिणः मे मम सीतावियोगेन यः दवथुः सन्तापस्तं स वरुणः वृष्ट्या वर्षणेन माष्टि हि अपनयति खलु । वसन्ततिलकं वृत्तम् ।

(ण) चैत्रभानवम् आग्नेयम् । अवजितुं निर्वापयितुं वारुणस्य प्रवणः वारुणास्त्रप्रयोक्ता इत्यर्थः ।

कङ्कालकः। अध तत्थ केवि कपञ्जो कुम्भअसस्स(त)चक्खिड-
मणहसिहरेहिं खण्डिदकण्णा वराहा विअ पाएसु पडन्ति
उपणिमन्तिणोव्व जङ्घासु लग्गन्ति पुरिसकडिलग्गपडव्व
ऊरूसु मज्जन्ति अस्सवारकरवालव्व णिअम्बविम्बे दोलन्ति
सुअणव्व मज्झत्था होन्ति विहुरकुडुम्बव्व पासेसु चिट्-
ठन्ति तरुणीअणव्व वच्छत्थले वित्थरन्ति वेणिदण्डव्व
पुट्ठिट्ठाणे घोलन्ति चिरमिलिअबन्धवव्व कण्ठे लग्गन्ति
कवोलगलिअजलबिन्दुव्व चिवुअग्गे ललन्ति चुम्बणरसि-
अव्व अहरं पीडअन्ति सुरहिपरिमलव्व जहिच्छं णासा

त। चक्खिडलेति। चक्खिडलैः तीक्ष्णैः नखशिखरैः नखाग्रैः। खण्डितकर्णा छिन्नकर्णाः। वराहा इव शूकरा इव पादयो पतन्ति लुठन्ति इत्यर्थः। उपनिमन्त्रिता इव अयत्ननिमन्त्रिता इवेत्यर्थः जङ्घासु लगन्ति न त्यजन्तीति भावः। पुरुषस्य कटिलग्नपटा इव कटिदेशस्थितवसनानीव ऊर्वोः मज्जन्ति तिष्ठन्ति ततो न लम्बन्ते इति भावः अश्ववाराणाम् अश्वारोहिणां करवाला इव तलवारा इव नितम्बबिम्बे कटिपश्चाद्भागे दोलन्ति लम्बन्ते। सुजना साधव इव मध्यस्था अपक्षपातिन शरीरमध्यभागस्थिताश्च भवन्ति। विधुरा व्यसनग्रस्ता इत्यर्थः कुटुम्बा परिजना इव पार्श्वयोः तिष्ठन्ति। तरुणीनां जना इव वक्षस्थले विस्तरन्ति विस्तारं गच्छन्ति। वेणीदण्डा इव केशपाशा इव पृष्ठस्थाने पृष्ठदेशे घूर्णन्ति लम्बन्ते। चिरमिलितबान्धवः बहुदिवसागतमित्राणीव कण्ठे लगन्ति आलिङ्गन्ति। कपोलगलितजलबिन्दव इव चुबुकाग्रे लग्नाग्रे लगन्ति पतन्ति। चुम्बनरसिका इव अधरदेशं पीडयन्ति दशन्ति। सुरभिपरिमला इव नासाविवरयोः यथेच्छं वहन्ति तिष्ठन्ति। कुभाषितं कुवचनमिव कर्णयोः प्रविशन्ति। खड्गा इव

विवरेसु सञ्चरन्ति सुहासिअव्व कसेसु पइसन्ति मिवि-
णअव्व अच्छीसु लम्बन्ति पट्ठाणतिलअव्व भाले विप्फु-
रन्ति णीचव्व समालम्बिदा सीसे समारुहन्ति भुअङ्गाव्व
केसगाहे अहिरमन्ति (४८)।

रावण। अथ प्लवङ्गयूथपतिषु किं करोति कुम्भकर्णः।

कङ्कालकः। तदो तेण ताणं मज्झे केवि (थ) हदा पाडिदा
कुप्परिदा कुप्परप्पहारेहि कीलिदा कीलेहि सक्करीकदा

(४८) अथ तत्र केऽपि कपयः कुम्भकर्णस्य वर्तिकाञ्जनशलाकावत् अविकृतकचा वराका इव पदे पदे पतन्ति चरणनिमज्जिता इव नद्धास्य लगन्ति पृथक्कटिलग्नपटा इव नितम्बयोर्भ्रमन्ति क्षुद्रघण्टिकावाला इव नितम्बबिम्बे दोलन्ति मुजना इव मध्यस्था भवन्ति त्रिभुवकुटस्था इव पार्श्वयोस्तिष्ठन्ति तरुणीस्तना इव वक्षस्थले विस्तरन्ति वेणीदण्डा इव पृष्ठस्थाने घूर्णन्ति चिरमिलितबन्धव इव कण्ठे लगन्ति कपोलगलित-अजलबिन्दव इव चिबुकाग्रे लसन्ति चुम्बनरसिका इवाधरं पीडयन्ति सुरभिपरिमला इव यथेच्छं नासाविवरयो सञ्चरन्ति सुभाषितमिव कर्णयोः प्रविशन्ति स्वप्ना इवाक्ष्णोर्लम्बन्ते प्रस्थानतिलका इव भाले विस्फुरन्ति नीचा इव समालम्बिताः शीर्षं समारोहन्ति भुजङ्गा इव केशपाशेऽभिरमन्ते।

निद्रा इव अक्ष्णोः चक्षुषोः लम्बन्ते तिष्ठन्ति। प्रस्थाने कुत्रचित् गमनकाले कृताः तिलका इव भाले ललाटे विस्फुरन्ति शोभन्ते। नीचाः अभद्रा इव समालम्बिताः दत्ताश्रया इत्यर्थः शीर्षे शिरसि समारोहन्ति अधितिष्ठन्ति। भुजङ्गा इव विटा इव केशपाशे कामिन्या इति शेषः।

(थ) केऽपि वानराः पद्भ्यां हताः आहताः, कूर्परप्रहारैः क-

वारमं पुड्प्पोडणेण अप्फालिदा तलापप्फालेहिं चप्पडिदा चवेडाहिं णिव्वाविदा मुठ्ठीहि वधिदा अचलणीहिं (५०)।

शकारः । एवमेवैतत ।

मुष्ट्या पिनष्टि सुदृढेन तलैस्तृणेढि
पद्भ्यां निशुम्भति करेण च हन्त हन्ति ।
तूर्णं च कर्णमतिकर्षति कूर्पराभ्या-
मस्तायितान्ययत एष तवानुजन्मा ॥ ५३ ॥ (ट)

श्रमणः । [illegible] । देव ! दिष्ट्या युगपत्-

(ड) । तवत्तेन तेन [illegible] पद्भ्यां अर्पितता: [illegible] कीलित [illegible] कुट्टोत्पीडनेरास्फालिता-स्तलास्फालैश्चपेटाभिस्ताडिता [illegible] मुष्टिभिर्व्यथिताश्च [illegible] ध्याम ।

[illegible] कूर्पिता [illegible] कीलिता [illegible] नाडिताः । चपेटाभिः चपेटाघातैः [illegible] निर्वा-पिता निहताः । [illegible] व्यथिताः [illegible] ।

(ट) मुष्ट्येति । एष तव अनुजन्मा अनुजः [illegible] अस्ता-यितानि अस्तवदाचरितानि [illegible] यस्य तथाभूतः तथा हि मुष्ट्या पिनष्टि दलति, सुदृढैः अतिकठिनैः [illegible] करतलैः, तृणेढि हिनस्ति पद्भ्यां निशुम्भति निःशेषेण हन्ति । करेण च हन्त [illegible] हन्ति [illegible]-यति, तूर्णं शीघ्रं कूर्पराभ्यां कर्णम् अतिकर्षति आकर्षति । वसन्ततिलकं वृत्तम् ।

स्वपरबलविनाशशङ्कितेन सौमित्रिणा संहृतं वारुणमस्त्रम् ।

तथाहि ।

ज्वालापल्लवितो भवत्यतितरां नाद्याप्ययं पावकः
संवृत्तो रणरेणुधूसरवपुः स्नात्वा रविर्भास्वरः ।
शान्तः स्थाणुविलोचने च विषमज्वालाकारनादो महान्
प्रक्षाल्याम्बरमुर्वरां च विरते दिव्यास्त्रजे वारिणि ॥५४॥ (५४)

वामनः । करहूः ।

नासारन्ध्रनिरोधतः श्रवणयोश्छिद्रद्वयाच्छादना-
न्नेत्रः सम्पुटघट्टनान्मुखनदाद्वारादिसङ्कोचनात् ।
दोर्भ्यां तद्द्वयपीडनाच्च कुरुते क्रुद्धस्तवायानुजो
दिग्नागेन्द्रपराक्रमानपि कपीन् हाहारवव्यास्तटम् ॥५५॥ (५५)

(५४) ज्वालेति । दिव्यास्त्रजे दिव्यास्त्रस्य वारुणस्य प्रभावात् जाते वारिणि जले अम्बरम् आकाशम् उर्वरां पृथ्वीं च प्रक्षाल्य अभिषिच्य । विरते निवृत्ते सति अयं पावकः अग्निः अद्यापि अतितराम् अत्यर्थं ज्वालाभिः शिखाभिः पल्लवितः विस्तारितः न भवति । रणरेणुभिः सङ्ग्रामरजोभिः धूसरं वपुः शरीरं यस्य तथाभूतः रविः स्नात्वा अम्बुधारिणीति भावः भास्वरः दीप्यमानः स्वाभिमतज्वलत्वादिति भावः । संवृत्तः सञ्जातः । स्थाणोर्हरस्य विलोचने नेत्रे महान् विषमः प्रबलः ज्वालाकारनादः सर्वविशेषः शान्तः निवृत्तः जलसंयोगेन उत्पादनशक्तेरिति भावः । शार्दूलविक्रीडितं वृत्तम् ।

(५५) नासेति । अत्र रणभूमौ क्रुद्धः तव अनुजः दिग्नागानां दिग्गजानामिव पराक्रमो येषां तान् अपि कपीन् वानरान् नासा-रन्ध्रयोः निरोधतः अवरोधात् जलपूर्णतया तत्र प्रविष्टानां निर्गम-नमनवरोधादिति भावः श्रवणयोः कर्णयोः छिद्रद्वयस्य आच्छादनात्

अपि च लङ्कापते पौलस्त्य !

धुतानां भवतो भ्रात्रा कपीनां तनुकम्पतः ।

रोमावलम्बनभ्रष्टा विनष्टाः पञ्च कोटयः ॥ ५६ ॥ प)

रिक्कमतो दसमुह सङ्गामम् । किं उण (फ)बहलतेल्लकज्जलविलित्तं विअ तरुणतमालच्छविच्छोलिअं विअ मसिणजलअजालमालिअं विअ सिदिकण्ठकण्ठप्पहापिहिअं विअ अवरुणणाराअणकन्तिसव्वस्सं विअ जममहि-

---

कराभ्यामास्फालनादित्यर्थः ततोऽपि निर्गमनाक्षमत्वादिति भावः । चक्षुषोः सम्पुटघट्टनात् निमीलनात् मुखस्य यत् महत् व्यादानं विस्तारः तस्य सङ्कोचनात् दोर्मूलयोः हृदयस्य पीडनाच्च हाहारवस्य हाहाकारस्य प्रोत्सवकीर्तनादस्य आस्यात् इति कपीन् पराजयते इति भावः । शार्दूलविक्रीडितं वृत्तम् ।

धुतानामिति । भवतो भ्राता तनुकम्पतः शरीरस्य कम्पनेन धुतानां चलितानां कपीनां वानराणां पञ्च कोटयः रोमाणि एव कुम्भकर्णस्येति शेषः । अवलम्बनानि आश्रयाः तेभ्यः भ्रष्टाः च्युताः पतनात् इत्यर्थः विनष्टा मृताः ।

(फ) बहलेति । बहलेन तैलेन मिश्रितं यत् कज्जलं तेन विलिप्तमिव विलिप्तमिव । तरुणेति । तरुणया नातिपक्वानां तमालानां कान्त्या प्रभया छुरितमिव व्याहृतमिव । मसृणेति मसृणं सजलं यत् जलदजालं मेघसमूहः तेन मालितमिव शोभितमिव । शितिकण्ठेति शितिकण्ठस्य हरस्य कण्ठप्रभाभिः नीलाभिरिति भावः पिहितमिव आच्छादितमिव । अवरुणेति अवरुणं प्राप्तं नारायणस्य कान्तिसर्वस्वं येन तादृशमिव । यमेति यमस्य यः महिषः तस्य विषाणाभ्यां शृङ्गाभ्यां क्षोभितमिव व्याप्तमिव । हेरम्बेति । हेरम्बस्य गणेशस्य दानकर्दमेन मदजलपङ्केन चर्चितमिव व्याप्तमिव ।

सविभागेहिं दिसेहिं विष्वे हेरम्बदाणकद्दमकरम्बिअं विअ भुवणङ्गणं वट्टदि (५९)।

रावणः। (स्व) ननु क्व पुनस्तमस्काण्डैकचण्डो मार्त्तण्डो वर्त्तते। [illegible] विमृश्य च।

कैलासमपनीय भुवनमद्य निर्वीर[illegible]

[illegible]धाय गवरीपिशमिर्निहतानिन्द्रजिद्रोषितः।

[illegible] म मा गुरु रघुभवानितीव क्वचि-

[illegible]द्दिवा दिनकरे गते त्रिजगदेतदन्धं स्थितम्॥५८॥

[illegible]। तदहो दिनकरः क्व न दृश्यते तस्मिन् मेघनादः।

[illegible] कि पुनर्वृत्तमन्ते [illegible] ततश्च [illegible] कालिन्दीजलमिव [illegible] तिमिरपटलम् [illegible] विस्तीर्णमिव [illegible] कीर्णमिव हेरम्बदानकर्दमकरम्बितमिव भुवनाङ्गणं वर्त्तते।

[illegible] ननु भोः क्व [illegible] तमसाम् अन्धकाराणाम् [illegible] एककाण्ड [illegible] सूर्य्यः वर्त्तते [illegible] अन्धकारनिकरा[illegible] इति भावः।

[illegible] कैलासमिति [illegible] इन्द्रजित् अद्य [illegible] भुवनम् [illegible] विधाय [illegible] रघुभुवा [illegible] गुरुम् [illegible] दिनकरे [illegible] गते वि[illegible] सति तत् त्रिजगत् त्रिभुवनम् अन्धं तिमिरमयं स्थितम्। पृथ्वीवृत्तम्।

(प्रविश्य) दृतिज्ञधरः सुमुख । देव ! पदातिलवस्तु सुमुखो मन्यते । रणाङ्गणचारिणो (म) वैरिणोऽन्धीकरणकारणतामिस्रमस्त्रमवतारितं युवराजेन्द्रजिता यतः ।

चक्रद्वन्द्वैर्विरहकलनाकातरैर्दीनदृष्टो
दत्तोत्सवः कुवलयदृशां साभिसारव्रतानाम् ।
दृग्दौर्बल्यं विदधदधिकं हस्तग्राह्योऽन्धकारो
राजावर्त्तद्युतिविरचितां क्ष्मां च खं चातनोति ॥५८॥ य

(प्रविश्य) करालकः । तथा अ (र) दृढदलितजाम्बवत्कलेवरं जर्जरितकान्तमवलोक्य पवङ्गवगा पलायिता मम दलितः

(म) रणाङ्गणेति । रणाङ्गणचारिणः संग्रामभूमिवर्त्तिनः ... शत्रोः लक्ष्मणस्येति शेषः अन्धीकरणकारणं तामिस्रम् अस्त्रं युवराजेन इन्द्रजिता अवतारितं ... कृतम् ।

(य) चक्रेति । विरहकलनया विच्छेदापत्त्या कातरैः चक्र... दाकालिङ्गिविच्छिन्नैः ... ...र्निरीक्षितमस्त्रया । चक्रद्वन्द्वैः चक्रवाकमिथुनैः दीनं सभीतं ... ... आलोकितः साभिसारव्रतानाम् अभिसरणशीलानां ... ...कामिनीनामित्यर्थः कान्ताभिसारि... ... साभिसारि... ...गमनात् । कुवलयदृशां नीलोत्पलाक्षीणां नारीणां दत्तम् ... ...कान्तसमीपगमनोत्सवः तेन तादृशः, अधिकम् अत्यर्थं दृशां चक्षुषां दौर्बल्यं दर्शनासामर्थ्यं विदधत् जनयन् हस्तग्राह्यः, ... दृष्टुं ... ... घन इत्यर्थः अन्धकारः राजावर्त्तस्य राजपट्टस्य विराटदेशीय हीरकमणेरित्यर्थः द्युत्या दीप्त्या विरचिताम् अलङ्कृताम् क्ष्मां पृथिवीं खम् आकाशञ्च आतनोति विस्तारयति । मन्दाक्रान्तावृत्तम् ।

(र) दृढेति । दृढं यथा तथा दलितमाम कलेवरं शरीरं यस्य तादृशम् अतएव जर्जरितम् अतिपीडितमिति यावत् कुम्भकर्णेनेति

पवणीलेण णीलेण रइसुग्गीवो किदा अ सरलीकिदभुअ-दण्डमण्डले सुवेलसेलमूलादो उप्पाडिअ णिज्झरजला-लपिच्छिला सिला (५२) ।

करङ्क । यथाभिहितं कङ्कालेन ।

अन्धीनितम्ब[illegible]लकस्य नरोत्तमानां
वक्षःस्थलस्य च [illegible]त्युपमानमुद्राम् ।
भ्रातुस्तवात्र हृदि [illegible]हसकीलितपि
प्रापिप्यते हरिनरेण [illegible]यमुर्वी ॥ ५८ ॥ (न)

(५२) तथा च दृढदह्यमानकलेव[illegible]रितमवलोक्य प्लवङ्गवर्गं प्रधावितः सम्यं दलितप्रकृत्ननीलेन नीलेन [illegible] सुग्रीव कृता च सरलीकृतभुजदण्डमण्डले सुवेलशैलमूलादुत्पाट्य [illegible] निर्झरजलालपिच्छिला शिला ।

(क) प्लवङ्गवर्गं वानरगणम् अवलोक्य दृष्ट्वा सुग्रीव[illegible]लितं मर्दितं दलितं प्रकृत्नं महत् नीलः नीलवर्णः तेन नीलेन सेनापतिना [illegible]म सर्व[illegible]सलेन अनेन उद्ग्रीव उग्रग्रीव सन् प्रधावित कुम्भकर्ण[illegible]कृतीति शेषः । सरलीकृते भुजदण्डमण्डले सुवेलशैलस्य मूलात् निर्झरस्य जलजालेन शैवालेन पिच्छिला शिला उत्पाट्य कृता धृता इत्यर्थः ।

(ख) अन्धीति । हरीणां वानराणां नरेण ईश्वरेण सुग्रीवेणे-त्यर्थः अन्धीनाम् अन्ध्रदेशभवानां नारीणां नितम्बफलकस्य नरोत्त-मानां महापुरुषाणां वक्षःस्थलस्य च उपमानमुद्राम् उपमीयते अने-नेति उपमानं तस्य मुद्रां भावं दधति उपमानभूते इत्यर्थः बाहुबलस्य वाहसा कारितस्य विक्रमस्य त्वयः कीलितस्य कीलितायनीये तव भ्रातुः वक्षःस्थले हृदि वक्षसि इयम् उर्वी महती शिला प्रक्षिप्यते । वसन्त-तिलकं वृत्तम् ।

रावणः । विहस्य । तदिदं मृणालकाण्डेन (व) गण्डशैल-ताडनम् ।

करङ्कः । कथं छिन्नैव । रावणमुद्दिश्य ।

सङ्ग्रामभीषणविभीषणपूर्वजस्य
मुष्ट्या हठप्रणिहितस्य तथा शिलेयम् ।
खण्डोऽयथा पतति मेदुरमुर्वरायां
दृष्टं तदम्बुजपरागकणप्रमाणम् ॥ ६० ॥ (ग)

रावणः । विहस्य । त एव दर्शन्ते येभ्यः कुप्यति कुमार-कुम्भकर्णः ।

दशिनगतो दुहिता । अप्सरसिच्य । किं उण एदे (घ) णाम णाणविम्भआरा पफुरन्ससमिकान्तमणिणो विसद्ददन्तकुव

---

(व) मृणालेन । मृणालस्य काण्डेन सङ्केन वा मृणालमेव काण्डं तेन । गण्डशैलस्य ताडनमस्य नदेन मृणालदण्डेन गण्डशैलताडनं यथा निष्फलं तथा कुम्भकर्णमुद्दिश्य मदाप्रहार इति

(ग) सङ्ग्रामेति । सङ्ग्रामे इव भीषणः भयङ्करः यः विभीषणस्य पूर्वजः कुम्भकर्णः इत्यर्थः तस्य मुष्ट्या हठप्रहारेण दृढम् अर्पितं तथा चूर्णिता, यथा उर्वरायाः सस्याद्यायाः पृथिव्याः मेदुरं निकटं स्निग्धमित्यर्थे अम्बुजाना पद्मानां परागकणप्रमाणं पद्म-रेणुमात्रमित्यर्थः दृष्टं सत् तदित्थं यत् तत् तस्याः शिलायाः खण्डः चूर्णं पतति । वसन्ततिलकं वृत्तम् ।

(घ) नाणेति । नानाविधं नीरन्ध्रं विविधम् अन्धकारं यैः त-थोक्ताः । स्फुरदिति स्फुरन्तः प्रदीप्ताः इव चन्द्रकान्ताः येषां तादृशाः । विसङ्कटदिति विकटत् विकासं गच्छत् कुमुदानां मीलोत्पलानां

समअवलआ संपफुडिदपुडइणीकुसुमा सरसाअमाणपाणगो-
ट्ठिणा णिद्दविज्जन्तमाणंसिणीमाणा णिसिज्जन्तवम्मह-
सिलीमुहा अमन्तमअमत्तकामिणीसत्था दिउणरोवाविं-
दविरहिणीणअणा तिउणहरिसाविदवल्लहसङ्गदङ्गणा च-
उग्गुणपच्छाविदपविहारिआपिअप्पसाअणप्पणामा पञ्चउण-
पअडाविदसुरअमोहिदमिहुणा अ समन्तदो मिअङ्का
वट्टन्ति ॥ ५३ ॥

---

१४ आश्चर्यं । [illegible] नाभिनन्दन्त्व [illegible] स्फुरच्छशि-
कान्त [illegible] सङ्कुचितकमलकुसुमाः सरस [illegible]
[illegible] निद्रापित [illegible] निषिच्यमानमन्मथशिलीमुखाः
अमन्द [illegible] द्विगुणरोदितविरहिणीनयनाः त्रिगुणह-
[illegible] चतुर्गुणपश्चात्तापितप्रविहारिकाप्रियप्रसादनप्रणामाः पञ्च-
[illegible] मोहित [illegible] समन्ततो मृगाङ्का वर्तन्ते ।

समयेत्यादि [illegible] । संफुल्लितानि सङ्कुचितानि निमीलि-
तानि कमलिनीनां [illegible] कुसुमानि कमलानीत्यर्थः यैः तथाविधाः ।
सरसेति सरसायमानाः [illegible] पानगोष्ठ्यः सुरापानसभा यस्य
[illegible] । निद्रापितेति । निद्रापिताः निःशेषेण तापिताः पीडिताः
मनस्विनीनां मानवतीनां मानः प्रणयकोपो यैः तथाभूताः । नि-
षिच्यमानेति निषिच्यमानानि [illegible] युष्माभिः प्रयोजनवशादेव काम-
कार्यं साधयाम इति निवार्यमाणानि मन्मथस्य कामस्य शिलीमुखानि
बाणा यैः तथोक्ताः । अमन्देति अमन्दः [illegible] भावन्तः मदनोन्मत्ताः
कामार्ताः कामिनीसार्थाः रमणीवर्गाः यैः तथाभूताः । द्विगुणेति
द्विगुणं यथा तथा रोदितानि विरहिण्यां नयनानि यैः तथाभूताः ।
त्रिगुणेति त्रिगुणं यथा तथा हर्षिताः आनन्दिताः वल्लभसङ्गता वनिर-

रावणः । सोल्लासमाकाशे । भोः सेवाविदग्ध (ग) सुधादीधिते ! आनासि लङ्केश्वरमाराधयितुम् ।

सदा दिगन्तस्थितसान्द्रचन्द्रिकाः
सुखाय नक्तञ्चरचक्रवर्त्तिनः ।
इति स्थितोऽयं बहुभिः स्वमूर्त्तिभि-
र्दिवाऽपि मां शीतरुचिर्निषेवितुम् ॥ ६१ ॥ (ङ)

सुमन । देव ! (च) चिन्तयामि तामिस्रमस्त्रं तिरयितुं चान्द्रमसमायुधमाहृतं सुमित्रापुत्रेण यतः ।

कन्दर्पस्य प्रथमसुहृदः शीतयन्तोऽम्बुराशीन्
शेफालीनां धुतसुमनसो लीढभासश्चकोरैः ।

क्लिष्य इति भावः अङ्गना कामिन्यः यैः तथोक्ताः । चतुर्गुणेति चतुर्गुणं यथा तथा प्रच्छादितः तिरोहितः परिहृत परिलङ्घ्य नियमप्रसादनार्थं प्रयासो यैः तथाविधाः । पञ्चगुणेति पञ्चगुणं यथा तथा प्रकटितेन विस्तृतेन सुरतेन मोटितानि निधुवनानि दम्पत्योः यैः तादृशाः । रजन्याः चन्द्रमसः प्रमत्तात् चतुर्दिक्षु वर्त्तन्ते उपगच्छन्ति ।

(ग) सेवाविदग्ध ! सेवायां परिचर्य्यायां विदग्ध विचक्षणः तत्-सम्बुद्धौ । सुधादीधिते ! चन्द्र ! ।

(ङ) सदेति । दिगन्तस्थिताः सान्द्राः घनाश्चन्द्रिकाः सदा सर्वस्मिन् काले दिवापीति भावः नक्तञ्चराणां राक्षसानां चक्रवर्त्तिनः अधिपतेः ममेति शेषः सुखाय भवतीति शेषः । इति हेतोः अयं शीतरश्मिः चन्द्रः दिवापि दिवसेऽपि बहुभिः स्वमूर्त्तिभिः स्वदेहैः मां निषेवितुम् आराधयितुं स्थितः उपस्थितः इत्यर्थः । वंशस्थविलं वृत्तम् ।

(च) चिन्तयामि कल्पयामि तिरयितुं ध्वंसयितुम् ।

निर्यान्त्येते विशिखमुखतः पश्य राकामृगाङ्काः
पङ्कश्यामं तिमिरशिविरं दूरमुत्सारयन्तः ॥ ६२ ॥ (क)

करङ्कः । देव ! शिलोद्दलनवैलक्ष्ये । (ख)

उद्वेल्लितोरगजनोज्झितचन्दनेन
कर्पूरपादपसरद्रसनिर्भरेण ।
खण्डेन देव ! मलयस्य वलीमुखेन्द्रो
हेलोद्धृतेन निजिघांसति कुम्भकर्णम् ॥ ६३ ॥ (ग)

रावणः । अहो ! मर्कटकीटस्याध्यवसायः । (घ)

(क) कन्दर्पस्येति । पश्य अवलोकय, कन्दर्पस्य कामस्य प्रथमं बान्धवाः सुहृदः, अम्बुराशीन् समुद्रान् जीवयन्तः मादयन्तः, शेफालीनां तरूणां धुतानि रञ्जितानि सुमनसः पुष्पाणि यैः तादृशाः चकोरैः पक्षिविशेषैः लीढभासः पीतकिरणाः, पङ्कवत् श्यामं नीलं तिमिरशिविरम् अन्धकारनिवहं दूरम् उत्सारयन्तः ताड़यन्त एते राकामृगाङ्काः पूर्णशशिनः विशिखमुखतः शराग्रात् निर्यान्ति निर्गच्छन्ति । मन्दाक्रान्तावृत्तम् ।

(ख) शिलोद्दलनेति । शिलाया उद्दलनेन चूर्णनेन यद् वैलक्ष्यं लज्जितत्वं कृतमानत्वादिति भावः तस्मिन् सति ।

(ग) उद्वेल्लितेति । हे देव ! वलीमुखानां वानराणाम् इन्द्रः सुग्रीवः उद्वेल्लितेन चलितेन उरगजनेन भुजङ्गवर्गेण उज्झिताः त्यक्ताः चन्दनाश्चन्दनतरवः यस्य तादृशेन कर्पूरपादपेभ्यः कर्पूरवृक्षेभ्य सरन्तु निर्गच्छन् रसानां निर्यासानां निर्भरः अतिशयः यस्य तथाभूतेन हेलया अवलीलया उद्धृतेन उत्पाटितेन मलयस्य पर्वतभेदस्य खण्डेन कुम्भकर्णं निजिघांसति निहन्तुमिच्छति । वसन्ततिलकं वृत्तम् ।

(घ) मर्कटकीटस्य वानराधमस्य इत्यर्थः अध्यवसायः दृढ़ोत्साहः ।

दक्षिणतो दुर्मुखः। रक्ख सेस्सर ! पेक्ख (ङ) णिअग्गह-णसंकासङ्कडन्तबिम्बचन्दरविणो बहुराहुदंसणचमक्कन्तका-मिणोदिस्सविसस्सच्छिविच्छोहभग्गपल्लत्थङ्गुलीकिसलअसमु-प्पोसिदा अप्पसस्सवअणरत्तीसूइदा चमक्किदचन्दं ते उर-वित्थरन्तविविहवहुबह्मघोसा भुवणुद्देसा दीसंति (५५)।

रावणः। सविमर्शम्। (च)

ममासुरस्य त्रिदशाः परं द्विषो
विबाधयिष्ये दशकन्धरेण तान्।
इहेति मां राहुरयं सबान्धवो
रणेऽद्य पूर्वोपचिकीर्षुरागतः ॥ ६४ ॥

---

(५५) राक्षसेश्वर ! प्रेक्षस्व निजग्रहणशङ्कासङ्कुचद्बिम्बचन्द्ररवयो बहुराहुदर्शनचमत्कृतकामिनीदत्तविसर्गाक्षिविक्षोभभग्नपर्यस्ताङ्गुलीकिसलयसमुत्पोषिता अप्रसन्नवदनरात्रिसूचिताश्चमत्कृतचन्द्रान्तःपुरविस्तारिविविधबहुब्रह्मघोषा भुवनोद्देशा दृश्यन्ते।

---

(ङ) निजेति। निजग्रहणात् स्वग्रासात् या शङ्का, तया सङ्कुचत् बिम्बं मण्डलं ययोः तादृशौ चन्द्ररवी येषु तथाभूताः। अप्रसन्नेति अप्रसन्नं मलिनं वदनं यस्याः तादृश्या रात्र्या रजन्याः सूचिताः प्रकटिताः। चमत्कृतेति चमत्कृतेभ्यः असम्भवदर्शनात् विस्मितेभ्यः चन्द्रस्य अन्तःपुरेभ्यः अन्तपुरवर्गेभ्यः विस्तरन्तः समुच्चरन्तः विघ्नविनाशार्थमिति भावः। विविधा बहुप्रकाराः बहवः ब्रह्मघोषा वेदध्वनयः येषु तथाविधाः।

(च) सविमर्शं विविच्येत्यर्थः।

ममेति। त्रिदशा देवाः असुरस्य मम परम् अत्यर्थं द्विषः शत्रवः तान् द्विषः देवान् दशकन्धरेण रावणेन विबाधयिष्ये बात-

भाकार्य । (ज) स्वर्भानो ! मा भैषीः शरणार्थिनामभय-कारणं रावणः ।

वचस्तः । शङ्के (झ) श्वैतांशवमायुधं बाधितुं राहवीय-मस्त्रमिदमुदीरितं देव ! युवराजेन यतः ।

रयचलितविमानैः स्वर्गिभिर्मुक्तमार्गा
ग्रहचरितविदां च व्यञ्जितातङ्कमुद्राः ।
ग्रहणशतसहस्रोल्लासनासूत्रधाराः
प्रतिशशि शितदंष्ट्रा राहवः सम्पतन्ति ॥ ६५ ॥

वामतः करङ्कः ।

अत्रान्तरे त्वदनुजेन धनुर्विधूय
सन्धानकर्मणि कृतस्य समीरबाणः ।

---

सिष्यामि इति हेतोः अयं सवान्धवः राहुः अद्य इह रणे उपचि-कीर्षुः उपकर्त्तुमिच्छन् सन् माम् आगतःप्राप्तः । वंशस्थविलं वृत्तम् ।

(ज) स्वर्भानो ! राहो !

(झ) श्वैतांशवं चान्द्रमायुधं लक्ष्मणप्रयुक्तमिति शेषः बाधितुं खण्डयितुम् । राहवीयं राहोरिदम् । उदीरितं प्रक्षिप्तम् ।

(ञ) रयेति । रयेण वेगेन चलितं विमानं विमानं येषां तादृशैः भयात् द्रुतचालितविमानैरित्यर्थः स्वर्गिभिः खेचरैः मुक्तः त्यक्तः मार्गः पन्थाः येषां तथोक्ताः ग्रहाणां ज्योतिषाम् अन्तरीक्षचराणामित्यर्थः चरितं चेष्टितं विदन्तीति तथोक्तानां ग्रहपर्यालोचितज्ञानामित्यर्थः व्यञ्जिताः प्रकटिता आतङ्कमुद्रा भयसङ्कोचाः यैः तथाभूता. बहूनां राहूणा-मदृष्टचरत्वादिति भावः ग्रहणशतसहस्राणां शतसहस्रग्रासानां या उल्लासना प्रस्तावना तस्याः सूत्रधाराः सूचयितारः तथा शिताः तीक्ष्णा दंष्ट्रा येषां तथाविधाः राहवः प्रतिशशि प्रतिचन्द्रं सम्पतन्ति । मालिनीवृत्तम् ।

साड्‌र्ं महीध्रशकलेन सुवेलमूला-
द्वारां निधौ निपतितः कपिचक्रवर्त्ती ॥ ६६ ॥ (ट)

रावणः । सहर्षक्रोधम् । तर्हि सलिलेन्धने(ठ)वह्नावाहुतीभूतः

करङ्कः ।

यावन्न पाणिमपि संवृणुते ऽनुजस्ते
यावन्न शाम्यति च धिक्करणं सुराणाम् ।
तावन्नियोद्धुमुदधेः प्रथमः कपीना-
मस्य स्थितस्तडिति ताडितदोः पुरस्तात् ॥ ६७ ॥ (ड)

(ट) अत्रेति । अत्रान्तरे अस्मिन्नवसरे त्वदनुजेन कुम्भकर्णेन भल्लः विधूय आस्फाल्य सन्धानकर्मणि समीरबाणः वायव्यास्त्रं क्षतश्च प्रयुक्तश्च, कपिचक्रवर्त्ती सुग्रीवः सुवेलस्य पर्वतस्य मूलात् तलात् महीध्रशकलेन पूर्वोक्तेन मलयखण्डेन साड्‌र्ं वारां निधौ समुद्रे निपतितश्च वायव्यास्त्रप्रभावादिति भावः । वसन्ततिलकं वृत्तम् ।

(ठ) सलिलेन्धने सलिलम् इन्धनं काष्ठं यस्य तादृशे सलिलदाहके इत्यर्थः वह्नौ वाड़वानले इत्यर्थः ।

(ड) यावदिति । यावत् ते तव अनुजः कुम्भकर्णः पाणिमपि भुजमपि वायव्यास्त्रसन्धाने नियोजितमिति भावः न संवृणुते न सङ्कोचयति, सुराणां देवानां धिक्करणं धिक् सुग्रीव ! त्वम् एतत् वायव्यास्त्रमपि सोढुं न शक्नोषीति निर्भर्त्सनं न शाम्यति न निवर्त्तते च, तावत् कपीनां प्रथमः प्रवरः सुग्रीवः उदधेः समुद्रात् तडिति झटिति अस्य कुम्भकर्णस्य पुरस्तात् ताड़ितदोः प्रहृतभुजः कुम्भकर्णस्य भुजं तेन मलयखण्डेन ताडयन्नित्यर्थः नियोद्धुं स्थितः उपस्थितः । वसन्ततिलकं वृत्तम् ।

रावणः । स्वगतम् । वेगवत्तया (ढ) वालिनमप्यतिशेते । विचिन्त्य प्रकाशम् । प्लुतिप्रधानैव वानरजातिः

दक्षिणतो दुर्मुखः । लङ्कापरमेस्सर ! पेक्ख पेक्ख (ण) कोत्थुहमणिणिवेसलञ्छिदवच्छत्थलवणमालापालम्बचुम्बणागद-दिव्वमहुअरमञ्जुगुञ्जारवविइण्णकण्णा गरुडप्पहापुञ्जपिञ्जरिदरोदसीगब्भवित्थारा णिज्जिददलिदिन्दीवरदामकन्तिणो आकण्णाकट्ठिअसारङ्गधारिणो सुरारिणो संचरन्ति (५६) ।

(५६) लङ्कापरमेश्वर ! प्रेक्षस्व प्रेक्षस्व कौस्तुभमणिनिवेशलाञ्छितवक्षः स्थलवनमालाप्रालम्बचुम्बनागतदिव्यमधुकरमञ्जुगुञ्जारवविकीर्णकर्णा गरुडप्रभापुञ्जपिञ्जरितरोदसीगर्भविस्तारा निर्जितदलितेन्दीवरदामकान्तय आकर्णाकृष्टशार्ङ्गधारिणो सुरारयः सञ्चरन्ति ।

---

(ढ) वेगवत्तया अतिवेगेन वालिनम् अपि अतिशेते अतिक्रामति अभिभवतीत्यर्थः ।

(ण) कौस्तुभेति । कौस्तुभमणेर्निवेशेन लाञ्छितं वक्षःस्थलं येषां तादृशाः । वनमालेति वनमाला एव प्रालम्बः ऋजुलम्बि माल्यं तस्य चुम्बनाय आगता ये दिव्या मधुकराः तेषां मञ्जुषु मनोज्ञेषु गुञ्जारवेषु गुणगुणध्वनिषु विकीर्णौ दत्तौ कर्णौ यैः तथोक्ताः । गरुडेति गरुडस्य स्ववाहनस्य प्रभापुञ्जेन पिञ्जरिता पिञ्जलीकृता रोदस्योः द्यावापृथिव्योः गर्भविस्ताराः अभ्यन्तरप्रदेशाः येषां तथाभूताः । निर्जितेति निःशेषेण जिताः तिरस्कृताः दलितेन्दीवरदाम्नां विकसितनीलोत्पलस्रजां कान्तयः प्रभाः यैः तथोक्ताः । आकर्णेति आकर्णं कर्णपर्य्यन्तम् आकृष्टं शार्ङ्गं शृङ्गविकारं धनुरित्यर्थः धारयन्तीति तथाभूताः सुरारयः विष्णवः ।

रावणः । सशङ्कम् । (त)

अयं हि सेवारचितार्द्र मानसो

न वक्षसो मे कमलां हरिष्यति ।

इति स्वशक्त्या कृतमूर्त्तिविस्तरैः

रञ्जोऽपि मां रञ्जयितुं समागतः ॥ ६८ ॥ (थ)

आकाशे हंहो नारायण ! न (द) प्रणतदारापहारी दशकण्ठः ।

सुमुखः । देव ! सम्भावयामि (ध) सैंहिकेयहेतिविहतये वैष्णवं प्रहरणमिदं विस्तारितं लक्ष्मणेन यतः ।

लक्ष्मीकण्ठग्रहणरसिकाः सम्भ्रमत्पाञ्चजन्य-

ध्वानश्रेणीभरितककुभो दोर्भिरस्यैश्चतुर्भिः ।

क्रामन्त्यन्तर्भुवनभवनं दिष्णवो जिष्णवोऽमी

श्यामाश्चक्रग्रहरणनमद्राहुसंहारकाराः ॥ ६९ ॥ (न)

---

(त) ससम्भ्रमं सभयम् ।

(थ) अयमिति । अयम् अङ्गो विष्णुरपि मे वक्षसः वक्षःस्थलात् कमलां लक्ष्मीं न हरिष्यति रावण इति शेषः इति हेतोः सेवायै चित्तं नियुक्तम् आर्द्रं भक्तिप्रवणं मानसं येन तथाभूतः सन् स्वशक्त्या निजप्रभावेण कृतैः मूर्त्तिविस्तरैः कायव्यूहैः मां रञ्जयितुम् आराधयितुं हि निश्चित समागतः उपस्थितः । वंशस्थविलं वृत्तम् ।

(द) प्रणतेति । प्रणतस्य दारान् अपहरतीति तथाभूतः ।

(ध) सैंहिकेयेति । सैंहिकेयाः केतेः राहवीयास्तस्य विहतये ध्वंसार्थम् । वैष्णवं विष्णोरिदं विष्णुदैवतं वा प्रहरणम् अस्त्रम् ।

(न) लक्ष्मीति । चतुर्भिः उच्चैः दीर्घैः दोर्भिः भुजैः लक्ष्म्याः कापलयाः कण्ठग्रहणे कण्ठालिङ्गने रसिकाः प्रणयिनः, सम्भ्रमन्तीभिः

वानतः कङ्कालकः । पुरो भूदेण (प) मग्गवत्तिणा वाणर॰ वीरेण तक्खणमज्जिज्जंतकुम्भअस्सवाणासणमक्खिविअ खित्तं धरणिपिठ्ठे रोसभरविभत्तमञ्जिठ्ठाए दिठ्ठीए दुठ्ठूण देवकणिठ्ठेण मुक्का चक्कावली पअदिदा पट्टिसा पेसिदा दंसिदमारणवेअट्टो भुसुण्डी खित्ता णीसङ्कं सङ्कमाला आक्खित्तं मोगारोग्गिम्मं उप्फेरिदपुलअफारपअक्कमेण कम्पाविटोकरग्गलग्गो खग्गो वाणरचक्कवट्टिणा वि परि- हरिआडहकडप्पेण णिउम्भम्भं अम्भम्भवसिअ अप्फोडिदो

निर्लक्ष्नीभिः पाञ्चजन्यस्य स्वहस्तस्थितशङ्खभेदस्य ध्वानश्रेणीभिः निनदैः भरिता पूरिताः ककुभः दिशः यैः तथाभूताः चक्रेण प्रह- रणेन अस्त्रेण सुदर्शनेनेत्यर्थः नमतां शत्रूणां संहारकाराः ध्वंसिन इत्यर्थः श्यामाः नीलकान्तयः जिष्णवः जयशीलाः अमी विष्णवः अन्त- र्भुवनभवन भुवनान्तरात्मरूपं गृहं क्रामन्ति व्याप्नुवन्ति । मन्दाक्रान्ता- वृत्तम् ।

(प) पुरोभूतेन अग्रवर्त्तिना मार्गवर्त्तिना रणमार्गसञ्चारिणा वानरवीरेण सुग्रीवेण तत्क्षणं सज्जमानम् आस्फाल्यमानं कुम्भकर्णस्य वाणाशनं शरासनं धनुरित्यर्थः आक्षिप्य आकृष्य कुम्भकर्णहस्तादा- च्छिद्य इत्यर्थः धरणीपृष्ठे भूतले क्षिप्तं दूरतः निक्षिप्तमित्यर्थः । रोषभरेण क्रोधातिशयेन मञ्जिष्ठया मञ्जिष्ठारागेणैव रञ्जितया रक्तया इति भावः दृष्ट्या चक्षुषा । देवस्य कनिष्ठेन कुम्भकर्णेन चक्रावली चक्रास्त्राणाम् आवली श्रेणी मुक्ता निक्षिप्ता, पट्टिशाः अस्त्रभेदाः प्रवर्त्तिताः प्रयुक्ताः, दर्शितमारणपेशला दर्शितानां वर्मितानां कव- चिनामपीत्यर्थः मारणे हनने पेशला समर्था भुशुण्डी अस्त्रविशेष- प्रेषिता निक्षिप्ता, शङ्कुमाला शङ्कूनाम् अस्त्रविशेषाणां माला श्रेणी निःशङ्कं यथा तथा क्षिप्ता, मुद्गरस्य उग्रीर्णं महणम् आक्षिप्तं परि-

भुंअडण्डोकिलिकिलिदं अ सद्दसंदोहभरिअभुअणन्तरं पधाविदाओ संदंसणकोदूहलफुल्लगल्लफलआओ सुरसुन्दरीओ समारूढो लङ्काउरीप्पाआरसिहरेसु णिसाअरजणो वसुधाणिवेसिदसिलासंघादेण वाणरलोएण पाससंठाविदविविहाउहेण रक्खसवग्गेण अ अङ्गीकिदमुदासीणत्तणं तदो दो वि समं वग्गिअअलीणा मल्लजुज्झेण तहिं अ गाढअरं हत्थग्गाहं मग्गन्ति सिरेण सिरणिवेसिणो हुडुक्कविक्कमेण परिक्कमन्ति कक्खाबन्धविणिहिदहत्था उच्छलन्ति भुअदण्ड संदंसेण कन्धरां धरन्ति जङ्घन्तरकत्तरीहिं

व्यक्रम्, उत्प्रेरितं जनितं पुलकं रोमाञ्चः येन तादृशेन स्फारेण उद्धतेन पदक्रमेण पादविक्षेपेण कराग्रे लग्नः स्थितः खड्गः कल्पितः। वानरचक्रवर्त्तिना कपिराजेन सुग्रीवेणापि परिहृतः निराकृतः आयुधानां कलापः कुम्भकर्णप्रेरितास्त्रसमूह इत्यर्थः येन तादृशेन सता नियुद्धं घोरं युद्धम् अध्यवस्य आस्थाय भुजदण्डः आस्फोटितः ताडितः। किलकिलेति किलकिलितं स्वजातीयरवेण गर्जितञ्च इत्यर्थः। शब्दसन्दोहेन तुमुलकोलाहलेन भरितं पूरितं भुवनान्तरम्। सन्दर्शनेति सन्दर्शनाय समरदर्शनाय यत् कौतूहलं तेन फुल्लं विकसितं गल्लफलकं कपोलदेशः यासां तथोक्ताः। वसुधेति वसुधायां भूमौ निवेशितः आसनत्वेन स्थापितः शिलासङ्घातः येन तादृशेन। पार्श्वेति पार्श्वेषु संस्थापितानि हस्तेभ्यः अवनाम्य रक्षितानि विविधानि आयुधानि अस्त्राणि येन तथाविधेन। अङ्गीकृतम् आश्रितम् उदासीनत्वं माध्यस्थ्यम्। द्वावपि कुम्भकर्णवानरेन्द्रौ इत्यर्थः। वल्गितेति वल्गितं लम्फनं तत्र लीनौ रतौ। गाढतरं दृढतरं हस्तग्राहं हस्ताहस्ति युद्धमित्यर्थः मार्गते कामयेते। शिरसा मस्तकेन शिरसि प्रति-

पीडन्ति कुक्कुडझुडप्पे हिं मिलन्ति हुक्करेहिं हुक्कन्ति [illegible]
डतिरिच्छपाअप्पक्खे वेण केवलं करिसन्ति केसेसु णाणाअ
णाइ हणन्ति ण णासावंसे पहरन्ति ण दलन्ति दन्तेहिं
ण खण्डन्ति णखेहिं एदाणं च पडणुप्पडणेसु उप्पडन्ति
सत्तसाअरा गलन्ति[illegible]सेला होन्ति कुलसेलादिक्करिका-
दरत्तण प्पमुक्कचिक्कारपूरिदा घुम्मदि वसुन्धरा पडिखो
हणाणन्तधरित्तीभारवक्किदखन्धरो कम्पदि महाकुम्मो ता
तुज्जदि देवस्स धणुग्गहो (५८) ।

(५८) पुरोभूतेन मार्गवर्त्तिना वानरव[illegible]तज्जायमानकु-
भकर्णबाणासनकाजिष्य क्षिप्तं धरणीपृष्ठे । रोषभरात् [illegible]ष्ठया दृष्ट्वा हृदा
देवकनिष्ठेन कृता चक्रावली प्रवर्तिताः पट्टिशाः प्रेषिता दंशितसार खणे-
णला भुशुण्डी क्षिप्ता निःशङ्कं शङ्कुमाला आक्षिप्तं मुद्गरोद्दीर्घम् उत्प्रे-
रितमुसलकस्फारपदक्रमेण कम्पितः करायलम्नः खड्गः । वानरचक्रवर्त्ति-

वीरस्येति शेषः । निवेशिनौ मल्लौ शीर्षाशिर्षि इत्यर्थः झुडुकविक्री
झुडाझुडि इति ख्यातैः विक्रमैः पराक्रमैः परिक्रामत. अन्योन्य
प्रति आक्रमत इत्यर्थः । कक्षेति । कक्षाबन्धे कटिबन्धे विनिक्षिप्तौ
नियोजितौ हस्तौ याभ्यां तथाभूतौ मल्लौ उच्छलतः उच्चैः वेगेन
प्रधावतः वा प्लावेते । भुजेति भुजदण्ड एव यन्त्रंशः यन्त्रविशेषः तेन
कन्धरां ग्रीवां धरतः आक्रमतः जङ्घान्तरकर्त्तरीभ्यां जङ्घे गुल्फा
दारभ्य जानुपर्यन्तभागौ एव कर्त्तर्यौ अस्त्रविशेषौ ताभ्यां पीडयत
प्रहरतः । कुक्कुटेति कुक्कुटौ यथा युध्यमानौ परस्परस्पर्श एव प
रस्परं मिलतः पततः तथा एतावपीति भावः । हुत्कारैः शब्दवि-
शेषैः हुतूकुरुतः तथाचरत इत्यर्थः । आस्फोटेन बाहोः परस्परं

रावणः । विहस्य । का पुनरेषा (फ) द्वन्द्वयुद्धमर्यादा ।

---

नाऽपि परिहृतायुधकलापेन नियुद्धमध्यवसायास्फोटितो भुजदण्डः किलकिलितशब्दसन्दोहभरितभुवनान्तरं प्रभाविताः सन्दर्शनकौतूहलदुल्लगल्लफलकाः [illegible]सुन्दर्यः समारूढो लङ्कापुरीप्राकारशिखरेषु [illegible]विद्याधरजनो वसुधाभिनिवेशितशिलासङ्घातेन वानरलोकेन पार्श्वसंस्थापितपरिघायुधेन राक्षसवर्गेण चाङ्गीकृतमुदासीनत्वम् । ततो द्वावपि [illegible] वल्गितकौलीनौ मल्लयुद्ध[illegible] च गाढतरं हस्तग्राहं मार्गते शिरसा शिरोभिवेशिनौ [illegible]क्रामतः । कक्षावक्षविनिहितहस्ताकुल्लक्षतः । भुज[illegible]न्तरां धरतः । अङ्गान्तरकर्त्तरीभ्यां पीडयतः । [illegible]ः । हुङ्कारैर्हुङ्कुरुतः । आस्फोटतिर्यक्पादप्रक्षेपेण न [illegible] कर्षतः केशेषु । न नयने प्रतः । न नासावंशं प्रहरतः । न दलतो दन्तैः । न खण्डयतो नखैः । एतयोश्च पतनोत्पतनेषूत्प्लवन्ति । गलद्गण्डशैलाः भवन्ति कुलशैलाः । दिक्करिकातरत्वप्रमुक्तचीत्कारपूरिता घूर्णति वसुन्धरा । प्रतिक्षोभणनम्रधरित्रीभारवक्रितकन्धरः कम्पते महाकूर्मः । तद्युज्यते देवस्य धनुर्ग्रहः ।

---

ताडनविशेषेण यः तिर्यक् पादप्रक्षेपः वक्रपदप्रहारः तेन । उत्प्लवन्ति उच्छलन्ति सप्त सागराः समुद्राः । गलदिति गलन्तः स्खलन्तः गण्डशैलाः शाखापर्वता येभ्यः तादृशाः । दिक्करीति दिक्करिणाम् ऐरावतानां कातरत्वेन मुक्तेन चीत्कारेण पूरिता व्याप्ता । प्रतीति प्रतिक्षोभणेन प्रतिभयेन नमन्त्या धरित्र्याः पृथिव्या भारेण वक्रिता कुण्ठिता कन्धरा ग्रीवा यस्य तथाभूतः । धनुर्ग्रहः शरासनग्रहणम् ।

(फ) द्वन्द्वयुद्धमर्यादा द्वन्द्वयुद्धस्य उभयमल्लीयसंग्रामस्य मर्यादा सीमा उभयोर्मल्लयोर्यादृशः समाचारः समुचितः नायं तादृश इति भावः ।

इति पठतो दुर्मुखः । एदे पअडिदणरठ्ठीविब्भमणुल्ला सुरदीकदकादम्बरीपाणविहिदुम्मादा जुवदीकदजरदीजणा उपणीदकुसुमबाणप्पअरा विरहिणीकण्ठवढ्ढिदपञ्चमतरङ्गा मिअङ्कवालमित्ता दूदीकददक्खिणसमीरणा सव्वदो संचरन्ति मदणा (५८) ।

रावणः । सहर्षम् ।

यावन्ति लोकहृदयानि जगत्त्रये ऽत्र
तावद्भिरेव रनुगतो मदनैर्मनोभूः ।

---

(५८) एते प्रकटितनर्त्तकीविभ्रमनूल्लाः सुरादीकृतकादम्बरीपानविहितोन्मादा युवतीकृतजरतीजना उपनीतकुसुमबाणप्रकरा विरहिणीकण्ठवर्द्धितपञ्चमतरङ्गा मृगाङ्कबालमित्रा दूतीकृतदक्षिणसमीरणाः सर्वतः सञ्चरन्ति मदनाः ।

---

(ख) प्रकटितेति । प्रकटितानि प्रकाशितानि नर्त्तकीनां विभ्रमनल्लानि विलासवर्त्तनानि यैः तादृशाः । सुरादीकृतेति सुरादीकृतानां मधुराणामित्यर्थः कादम्बरीणां सुराविशेषाणां पानेन विहितः कृतः उन्मादः यैः तथाभूताः । युवतीति अयुवतयः युवतयः कृताः जरतीजनाः वृद्धा नार्य्यः यैः तथाविधाः वृद्धा अपि कामोद्रेकेण युवतय इवाचरन्तीति भावः । उपनीतेति उपनीताः संस्थापिताः कुसुमान्येव बाणप्रकराः शरसमूहाः यैः तथोक्ताः । विरहिणीति विरहिणीनां कण्ठेषु वर्द्धिताः वृद्धिं नीताः पञ्चमतरङ्गाः पञ्चमरागस्य तरङ्गा वेगा यैः तथाविधाः विरहिण्यः दुःखातिशयमवलम्बमानाः पञ्चमस्वरेण कामार्त्ता विलपन्तीति भावः । मृगाङ्केति

शम्भोर्भिया भगवतः शरणाय मन्ये
मां रावणं समरचण्डभुजं प्रपन्नः ॥ ७० ॥ (भ)

आचार्य्य। हे मकरध्वज! मदनुग्रहेण (म) मत्परिग्रहेण च न त्वां देवदेवोऽपि बाधिष्यते

मन्मथः। जाने वैष्णवमस्त्रं स्तम्भयितुं (य) पौष्पकेतनमायुधमातन्यते मन्दोदरीनन्दनेन यतः।

चिह्नोत्सङ्गस्फुरितमकराः पुष्पधन्वान एते
द्राक् तन्वन्तो मधुसहचरं पञ्चमं रागराजम्।
लक्ष्मीलीलाललितचरितैरच्युतान् वञ्चयित्वा
श्वेतद्वीपं रतिरहितकृतो मन्मथाः प्रापयन्ति ॥७१॥ (र)

---

कृताङ्कस्य चन्द्रमसः बालमित्राः अभिनवबन्धवः। दूतीति अदूताः दूताः कृता दक्षिणसमीरणाः मलयपवनाः यैः तादृशाः मदनाः कामाः।

(भ) यावन्तीति। अत्र जगत्त्रये त्रिभुवने लोकानां जनानां हृदयानि मनांसि यावन्ति यत्संख्यकानि तावद्भवैः तत्संख्यकभूतैः मदनैः अनुगतः परिवृतः मनोभूः कामः भगवतः शम्भोः भिया हेतुना शरणाय आत्मत्राणाय समरेषु सङ्ग्रामेषु चण्डभुजं प्रबलबाहुवीर्य्यमित्यर्थः रावणं मां प्रपन्नः प्राप्तः इति अहं मन्ये। वसन्ततिलकं वृत्तम्।

(म) मदनुग्रहेण मम कृपया, मत्परिग्रहेण ममाश्रयेण। देवदेवः शिवः। बाधिष्यते पीड़यिष्यति।

(य) स्तम्भयितुं दमयितुम्। पौष्पकेतनं मादनम् आतन्यते प्रयुज्यते। मन्दोदरीनन्दनेन मेघनादेन।

(र) चिह्नेति। चिह्नेन लाञ्छनेन उत्सङ्गेषु मध्येषु स्फुरिताः

वामतः कङ्कालकः। (ल) सव्वङ्गसङ्कट्टणिविडणिवीडणापरव्वसगदो पअण्डभुअबलेण गअणङ्गणे अन्दोलिअ कुमारकुम्भस्सेण धरणिपिठ्ठे झडिति ताडिदो सुग्गीवो (५८)।

रावणः। सहर्षम्। तर्हि मत्तकरेणुकरगतस्य (व) कदलीकान्दस्य दशां लम्भितः।

करङ्कः।

कच्चापञ्जरदात्यूहं कपीनां चक्रवर्त्तिनम्।

---

(५८) सर्वाङ्गसङ्कटनिबिडनपीडनापरवशगतः प्रचण्डभुजबलेन गगनाङ्गणे आन्दोल्य कुमारकुम्भकर्णेन धरणीपृष्ठे झटिति ताडितः सुग्रीवः।

---

राजिताः मकराः येषां तथोक्ताः मकरध्वजशालिन इत्यर्थः पुष्पधन्वानः कुसुममयधनुर्धराः मधुसहचरं वसन्तसहितं पञ्चमं रागराजं स्त्रोद्दीपनहेतुभूतस्वरविशेषं तन्वन्तः विस्तारयन्तः रत्या सह रतिं कुर्वन्तीति तथोक्ता एते मन्मथाः कामाः लक्ष्म्याः कमलायाः लीलया विलासेन ललितानि मनोहराणि यानि चरितानि चेष्टितानि तैः अच्युतान् विष्णून् द्राक् झटिति वञ्चयित्वा प्रत्यार्य्य मोहयित्वेति यावत् श्वेतद्वीपं वैकुण्ठमित्यर्थः प्रापयन्ति गमयन्ति। वैष्णवमस्त्रं शान्तिप्रधानं कामास्त्रेण पराभूयते इति भावः। मन्दाक्रान्तावृत्तम्।

(ल) सर्वेषु अङ्गेषु सङ्कटायाः प्राप्तायाः निबिडायाः गाढायाः निपीडनायाः प्रहारस्येत्यर्थः परवशता अधीनता तं गतः प्राप्तः सर्वाङ्गेषु व्यतिप्रहारार्त इत्यर्थः आन्दोल्य दोलयित्वा झटिति सुग्रीवः ताडितः पातितः।

(व) मत्तेति। मत्तस्य करेणोः हस्तिनः करेणुरिभ्यां स्त्री नेभे इत्यमरः। करं शुण्डादण्डं गतः तस्य। कदलीकन्दस्य रम्भाकाण्डस्य। लम्भितः प्रापितः।

कृत्वा त्वदनुजो ऽभ्येति दिष्ट्या त्वं देव! वर्धसे ॥७२॥ (अ)

रावणः स्वगतम्।

यदर्पितं प्राज्यबलेन वालिना
विधाय दोर्मूलवशं दशाननम्।
तदुद्धृतं शल्यमनेन मानिना
विधाय कक्षाकुहरे हरीश्वरम् ॥ ७३ ॥ (ब)

कङ्कालकः। कुम्भअसकक्खन्तरगदं सुग्गीवमवलोइअ (स) रहसझणक्किअरसणाणूउरकेऊरं णच्चिदुं पउत्ताओ सअलविंदारअविन्दवन्दिसुन्दरीओ ता पेक्खदु देवो (६०)।

(६०) कुम्भकर्णकक्षान्तरगतं सुग्रीवमवलोक्य रभसझणत् कृतरश-नानूपुरकेयूरं नर्त्तितुं प्रवृत्ताः सकलवृन्दारकवृन्दवन्दिसुन्दर्यः। तत्प्रेक्षतां देवः।

(अ) कक्षेति। हे देव! त्वदनुजः तव कनिष्ठः कुम्भकर्णः क-पीनां चक्रवर्त्तिनं सम्राजं सुग्रीवं कक्षा एव पञ्जरं तत्र दात्यूहं पक्षि-विशेषं कृत्वा कक्षदेशे संस्थाप्येति यावत् अभ्येति आगच्छति, तस्मात् त्वं दिष्ट्या भाग्येन वर्द्धसे वृद्धिं गच्छसि जयलाभेनेति भावः। पथ्या-वक्त्रं वृत्तम्।

(ब) यदर्पितमिति। प्राज्यबलेन प्रभूतपराक्रमेण वालिना दशाननं मां दोर्मूलवशं कक्षान्तर्गतं विधाय यत् अर्पितं निहितं मम हृदीति शेषः अनेन मानिना वीरेण कुम्भकर्णेन हरीश्वरं वानरराजं कक्षाकुहरे विधाय कृत्वा तत् शल्यं मम हृदयस्थमिति भावः उद्धृतम् उत्पाटितम् अस्य वालिनः सकाशात् प्राप्तं निकारदुःखम् अपनीतमिति भावः। वंशस्थविलं वृत्तम्।

(स) रभसेति। रभसेन हर्षेण वेगेन वा रभसो वेगहर्षयोरित्यमरः।

रावणः। सहर्षम्।

किं शच्या परतो रतिर्धनपतेर्दूरे भवन्तु स्त्रिय-
श्चन्द्रान्तःपुरमेतदस्तु च पृथक्कौबेरिणीषूत्सवः।
साकं शक्रजितः कलत्रनिवहैः सार्धञ्च दारैर्मम
प्रीत्योल्लासितपाणिपल्लवयुगं मन्दोदरी नृत्यतु ॥ ७४ ॥ (ङ)

दक्षिणतो दुर्मुखः। किं त्वेते ते (च) प्रेङ्खोलितखड्गा बहलप्रकटाट्टहासाः प्रसभमुक्तडात्कारडामराः शाखान्तरहस्त-

---

क्वणत्कृतानि रशनाः काञ्च्यः नूपुराः केयूराणि च यस्मिन् तद् यथा तथा। सकलेति सकलाः सर्वाः वृन्दारकवृन्दानां देवगणानां या वध्वः अवरुद्धाः सुन्दर्यः कामिन्यः।

(ङ) किमिति। परतः शत्रुवनितया इत्यर्थः शच्या इन्द्राण्या रतिः क्रीडनं किम्? तुच्छमित्यर्थः। धनपतेः कुबेरस्य स्त्रियः कान्ताः दूरे भवन्तु तिष्ठन्तु एतत् चन्द्रस्य अन्तःपुरिकावर्गं इत्यर्थः पृथक् अस्तु च तिष्ठतु च नैतासु मम प्रीतिरस्तीति भावः यतः वैरिणीषु शत्रुभूतासु आसु उत्सवः प्रीतिः कः? नास्तीत्यर्थः। तर्हि किं क्रियतामित्याशङ्क्याह साकमिति मन्दोदरी मम प्रधानमहिषी शक्रजितः मेघनादस्य कलत्रनिवहैः कान्ताभिः साकं सह मम दारैः अन्यैरिति शेषः सार्द्धं च प्रीत्या आनन्देन युद्धजयजनितेनेति भावः। उल्लासितं पाणिपल्लवयुगं यस्मिन् तत् यथा तथा नृत्यतु नृत्यं करोतु। शार्दूलविक्रीडितं वृत्तम्।

(च) प्रेङ्खोलितेति। प्रेङ्खोलितानि दोलितानि खड्गाग्राणि यैः तादृशाः खड्गाग्रधारिण इत्यर्थः। बहलेति बहला बहवः प्रकटाः प्रचण्डाः अट्टहासा हास्यविशेषा येषां तथाविधाः। प्रसभेति प्रसभं सहसा मुक्तेन डात्कारेण रवविशेषेण डामराः प्रचण्डाः। नृत्यदिति

त्तालवेआला चमकंतसुरासुरपुरन्धिणो ललन्तचूडामणिच-न्दखण्डा खल खलन्तवेल्लिदामरकल्लोलिणीप्पवाहा तडत-डितिताडिदुड्डमरडमरुअरवरोद्दा खणखणितदाहिणमु-हकुहरगब्भनिबिडमिलिद जरठदाढा रोसफुक्कारफुल्लिद-फणाभारहाराहिहारिणो प्पअण्ड रूअधारिणो चण्डीसा संचरन्दि (६१) ।

---

(६१) किं पुनरेते ते प्रेङ्खोलितखट्वाङ्गा बहुलप्रकटाट्टहासाः प्रसभमुक्तडात्कारडामरा न्त्युद्भसोत्तालवेतालास्त्रस्तसुरपुरन्ध्र्यो ललच्चूडामणिचन्द्रखण्डाः खलखलायमानवेल्लितामरकल्लोलिनीप्रवाहा-स्तडतडितिताडितोड्डमरडमरुकरवरौद्राः खणखणितदक्षिणमुखकुह-रगर्भनिबिडमिलज्जरठदंष्ट्रा रोषफूत्कारफुल्लितफणाभारहाराहिधारिणः प्रचण्डरूपधारिणश्चण्डीशाः सञ्चरन्ति ।

---

न्त्युद्भन्तः रभसेन वेगेन उत्तालाः उत्कटाः वेताला भूतविशेषा येषां तथाविधाः । त्रस्तेति त्रस्ता भीताः सुराणां देवानां पुरन्ध्र्यः कान्ता येभ्यः तथाभूताः । ललदिति ललन्तः विराजन्तः चूडासु मणयः रत्नभूता इत्यर्थः चन्द्रखण्डाः अर्द्धचन्द्रा येषां तथारूपाः । खलेति खलखलायमानाः कलकलध्वनियुताः वेल्लितायाः शिरःसु घूर्णितायाः अमरकल्लोलिन्याः गङ्गायाः प्रवाहा येषां तद्रूपाः । तडेति तड्तड् इति अव्यक्तशब्देन ताड़ितानां वादितानाम् उड्डमराणां उद्धतां डमरुकाणां वाद्यभेदानां रवेण शब्देन रौद्राः प्रचण्डाः । खणेति खणखण् इति अव्यक्तध्वनिवत्यः दक्षिणेषु उदारेषु महत्सु इत्यर्थः मुखान्येव कुहराणि छिद्राणि तेषां गर्भेषु अभ्यन्तरेषु निविड़ं दृढ़ं यथा तथा मिलन्त्यः जरठाः परिणताः दंष्ट्रा दन्ताः येषां तथाभूताः । रोषेति रोषेण क्रोधेन यः फुत्कारः रवविशेषः तेन फुल्लितान् स्फीतान्

रावणः । वर्त्मम् ।

मह्यं तदा धृतमुदा शशिशेखरेण
दत्तो वरो न शिरसां सदृशश्छिदा यः ।
तत्साम्प्रतं स भगवान् कृतभूरिमूर्त्ति-
रभ्यागतः पुनरनुग्रहवाञ्छया माम् ॥ ७५ ॥ (क)

लक्ष्मणः । देव! सम्भावयामि कन्दर्पबाणविहतये (ख) खाण्डपरशवमस्त्रमातन्यते तृतीयेन दाशरथिना यतः ।

ऊर्ध्वाक्षिक्रोडकुण्डोल्लसितहुतवहज्योतिरुज्जृम्भणाभिः (ग)
कुर्वन्तो देहदाहं पुरमथनमनोन्माथिनां मन्मथानाम् ।
चूडाबद्धार्धचन्द्राश्चलसुरसरितो भूषिताः पन्नगेन्द्रैः
श्रीकण्ठाःश्यामकण्ठाःप्रणतसुरशताःसाट्टहासाश्चरन्ति॥ ७६ ॥

---

फणाभारान् हरन्ति वहन्तीति तादृशा ये अहयः भुजङ्गाः तान् धरन्तीति तथोक्ताः प्रचण्डरूपधारिणः भयानकरूपाः चण्डीशाः पशुपतयः ।

(क) मह्यमिति । तदा शशिशेखरेण हरेण धृतमुदा प्रीतेनेत्यर्थः मह्यं शिरसां छिदा छेदेन सदृशः यः वरः न दत्तः, स भगवान् कृतभूरिमूर्त्तिः गृहीतकायव्यूहः सन् साम्प्रतं पुनरनुग्रहवाञ्छया तं वरं दातुमिति शेषः मां प्राप्तः । वसन्ततिलकं वृत्तम् ।

(ख) कन्दर्पेति । कन्दर्पबाणस्य कामास्त्रस्य विहतये विध्वंसनाय खाण्डपरशवं पाशुपतम् । आतन्यते आविष्क्रियते तृतीयेन दाशरथिना लक्ष्मणेन ।

(ग) ऊर्ध्वेति । ऊर्ध्वे उपरि ललाटे इत्यर्थः यत् अक्षि नेत्रं तस्य क्रोड एव कुण्डम् अग्निस्थापनस्थानविशेषः तस्मिन् उल्लसितः प्रज्वलितः यः हुतवहः अग्निः तस्य ज्योतिषाम् उज्जृम्भणाभिः उत्-

रावणः । भगवन् भर्ग ! स्वल्पकण्ठवनच्छेदसाहसम-
नल्पःप्रसादः । (घ)

वामतो नेपथ्ये कलकलः ।

वेगोत्खातान्त्रतन्त्रीचयचलचरणः सम्बरहन्तयन्त्र (ङ)
प्रान्तग्रस्तोरुनासासरणिररुणदृक् क्षुभ्यतः कुम्भकर्णात् ।
लूनव्याकीर्णकर्णः खरनखशिखरैरेष शाखामृगेन्द्रः
कम्पल्लाङ्गूलयष्ट्या तडतडितिशिरस्ताडयन् खं प्रपन्नः॥ ७७॥

—— पत्यैः पुरमथनानां हराणां मनोन्माथिनां चित्तविकारिणां मन्मथानां कामानां देहदाहं कुर्वन्तः चूडासु बद्धा अर्द्धचन्द्रा येषां तथोक्ताः चलाः शिरसि भ्रमन्त्यः सुरसरितः गङ्गाः येषां तथाविधाः पन्नगेन्द्रैः भुजगेश्वरैः भूषिताः अलङ्कृताः श्यामकण्ठाः नीलकण्ठाः कालकूटपानादिति भावः । प्रणतं सुराणां देवानां शतं यान् तादृशाः साट्टहासाः अट्टहासवन्तः श्रीकण्ठाः शम्भवः चरन्ति । स्रग्धरावृत्तम् ।

(घ) भर्ग शिव । स्वल्पेति स्वल्पम् अत्यल्पं कण्ठवनानां छेदे साहसं मया कृतमिति शेषः, प्रसादः भवदनुग्रहः अनल्पः अतिमहान् । मया दश शिरांसि छित्त्वा यद् भवदाराधनं कृतं तदतिसामान्यम् अनुग्रहस्तु भवतोऽतिबहुलः यदर्थं कायव्यूहधारणमङ्गीकृतमिति भावः ।

(ङ) वेगेति । एष शाखामृगाणां वानराणाम् इन्द्रः सुग्रीवः वेगेन उत्खातः निःसारित इत्यर्थः कुम्भकर्णोदरादिति भावः अन्त्रतन्त्रीणां चयः राशिर्याभ्यां तादृशौ चलौ विक्षिप्यमाणौ चरणौ यस्य तथाभूतः पादप्रहारेण कुम्भकर्णस्य उदरात् अन्त्राणि बहिष्कृर्वन्नित्यर्थः सम्बरतां दण्डयन्त्राणां प्रान्तैः ग्रस्ता दंशनेनोत्पाटिता इत्यर्थः उर्वी महती नासा एव सरणिः रथ्या येन तादृशः दंष्ट्राभिः कुम्भकर्णस्य नासां छिन्दन्नित्यर्थः अरुणदृक् लोहितनेत्रः, खरैः अतितीक्ष्णैः नखशिखरैः नखाग्रैः क्षुभ्यतः क्षोभं प्राप्नुवतः कुम्भकर्णात् लूनौ छिन्नौ व्याकीर्णौ विक्षिप्तौ कर्णौ येन तथाभूतः कुम्भकर्णस्य कर्णावपि नखा-

रावणः। सविषादम्। अहो प्रमादः (च) छलप्रहारित्व वानराणां नावधारितं वत्सेन।

कङ्कालकः। एस सुग्गीवो कुमारकुम्भअणं (छ) विच्छि-समवकरिअ गअणं उप्पअन्तो गदो ज्जेव्व तावससआ-सम् (६२)।

करङ्कः। (ज) कपिचक्रवर्त्तिचापलकोपितश्च मध्यमपौ-लस्त्यः समरसमारम्भमेव शरणं मन्यमानो लङ्कापुरीगोपु-रादुपावृत्तः सम्मुखीभूतश्चास्य सकलवाहिनीपरिवृतः स्वयमेव तापसः।

(६२) एष सुग्रीव कुमारकुम्भकर्णं विच्छिन्नमवकृत्य गगनमुत्पतन् गत एव तापससकाशम्।

दैश्च सखण्डयन्नित्यर्थः तथा कम्पमानया लाङ्गूलयष्ट्या लाङ्गूलदण्डेन तडतड् इति शब्देन शिरः कुम्भकर्णस्येति शेषः ताड़यन् प्रहरन् सन् खम् आकाशं प्रपन्नः उत्पतितः। स्रग्धरावृत्तम्।

(च) छलप्रहारित्वं रन्ध्रप्रहारित्वम्। प्रमादः अनवधानता प्रमा-दोऽनवधानता इत्यमरः। वत्सेन कुम्भकर्णेन। सुग्रीवं निर्जित्य कक्ष-देशे गृहीत्वा हर्षात् अनवहितत्वात् ईदृशी दुरवस्था कृतेति भावः।

(छ) विच्छिन्नं क्षतविक्षतम् अपकृत्य विधाय। तापससकाशं राम-समीपम्।

(ज) कपीति। कपिचक्रवर्त्तिनः सुग्रीवस्य चापलेन अत्याचारेण कोपितः अतिक्रोधित इत्यर्थः मध्यमपौलस्त्यः कुम्भकर्णः समरसमारम्भं युद्धव्यापारमेव शरणं प्रतीकारमिति यावत् मन्यमानः विवेचयन् उपा-वृत्तः चलितः संग्रामभूमिमिति शेषः। तापसः रामः।

कञ्चुकः। (भ) पुरदो ऽवसरिअ चउद्दिसं परिवुदो वाणरसेणावदीहिं तस्स पुरदो जम्बवन्तमणिमन्तमहामुह-दुम्मुहप्पहुदिणो ठिदा रिक्खाहिवा। गअगवअगवक्खकड-क्खपुरस्सरा पच्छादो गोलाङ्गुलवलाधिवा दहिमुहदरीमु-हदुम्मुहप्पहाणा वामदो सरभकेसरिकिसोरप्पमुहा पद-क्खिणादो हुविअ वग्गिदुं पउत्ता (६२)।

रावणः। सोऽयं पिपीलिकापवङ्गन्यायः (ञ)।

कञ्चुकः। तदो अ (ट) मुग्गरप्पहारपरम्पराहिं मुच्छा-विअअतिरिक्कछभङ्गो णिरग्गलगिलिदगोलंगूलवग्गो चू-लिअवाणरवाहिणीसण्णिवेसो पउत्तो तावसाहिमुह समा-

(६२) पुरतोऽपसृत्य चतुर्दिशं परिवृतो वानरसेनापतिभिः। तस्य पुरतो जाम्बवन्मणिमन्महामुखदुर्मुखप्रभृतयः स्थिता ऋक्षाधिपाः। गयगवयगवाक्षकटाक्षपुरःसराः पश्चाद् गोलाङ्गूलबलाधिपाः। दधिमुखदरीमुखदुर्मुखप्रधाना वामतः। शरभकेसरिकिशोरप्रमुखाः प्रदक्षिणतो भूत्वा वल्गितुं प्रवृत्ताः।

(भ) पुरतः सम्मुखात् अपसृत्य वानरसेनापतिभिः चतुर्दिशं परि-वृतः वेष्टितः कुम्भकर्ण इति शेषः। ऋक्षाधिपाः भल्लूकपतयः। वल्गितुं लम्फितुं पराक्रमितुमिति यावत्।

(ञ) पिपीलिकेति। यथा पिपीलिका पतङ्गं प्रति धावन्ति तथा वानरा इमे कुम्भकर्णं प्रतीति भावः।

(ट) मुद्गरेति। मुद्गरप्रहारपरम्पराभिः अनवरतमुद्गरप्रहारै-रित्यर्थः मूर्च्छापिताः मोहं गमिताः अतिरिक्ताः श्रेष्ठाः ऋक्षभल्लाः भल्लूकाः येन तथाभूतः। निरर्गलेति निरर्गलं यथा तथा गिलिताः

सादितमुच्छाविच्छेदेहिं च तेहिं चउद्दिसं अक्कामिज्जन्तो णीरन्ध्ररोसन्धआरन्धदाए समं पासत्थिदेण णिअपरिअणेण विविहबलीमुहाणं कवलकेलिकम्मणि पउत्तो (६४)।

नेपथ्ये । देव दाशरथे ! त्वर्य्यतां वानरपरित्राणाय ।

दिङ्मातङ्गशिरस्तटीचिपिटिनं प्रेतप्रभोः सैरिभे
भूयो दर्शितशृङ्गभङ्गविपदं विभ्रन्महामुद्गरम् ।
योगाशोणितसारणीकवलनक्षीबोऽमरप्रेयसी-
हासः स्वांश्च परांश्च खादति रणे नक्तञ्चरेन्द्रानुजः॥७८॥ (ठ)

---

(६४) ततश्च मुद्गरप्रहारपरम्पराभिमूर्च्छायितातिकायाक्षभग्नो निरर्गलगिलितगोलाङ्गूलवर्गश्चूर्णितवानरवाहिनीसन्निवेशः प्रवृत्तस्तापसाभिमुखं समासादितमूर्च्छाविच्छेदैश्च तैश्चतुर्दिशमाक्रम्यमाणो नीरन्ध्ररोषान्धकाराम्बतया समं पार्श्वस्थितेन निजपरिजनेन विविधवलीमुखानां कवलकेलिकर्म्मणि प्रवृत्तः ।

---

भक्षिताः गोलाङ्गूलवर्गाः वानरसङ्घा येन तथाविधः । चूर्णितेति चूर्णितः विध्वंसितः वाहिनीनां सेनानां सन्निवेशः वासस्थानं येन तादृशः सन् कुम्भकर्ण इति शेषः तापसस्य रामस्य अभिमुखं प्रवृत्तः चलित । समासादितेति समासादितः प्राप्तः मूर्च्छाविच्छेदः मोहोपगमः यैः तथाविधैः लब्धचैतन्यैरित्यर्थः तैः भल्लूकवानरवर्गैः चतुर्दिशं समन्तात् आक्रम्यमाणः आसाद्यमानः नीरन्ध्रेण घनेन रोषान्धकारेण क्रोधतिमिरेण अम्बतया ज्ञानशून्यतयेत्यर्थः पार्श्वस्थितेन पार्श्ववर्त्तिना निजपरिजनेन राक्षसवर्गेणेति यावत् । समं सह विविधानां बलीमुखानां वानराणां कवलकेलिकर्मणि भक्षणरूपे क्रीडनव्यापारे प्रवृत्तः उद्यतः ।

(ठ) दिङ्मातङ्गेति । नक्तञ्चराणां राक्षसानामिन्द्रस्य रावणस्य

रावणः । अहो अद्भुतिः अव्यवसायस्य वत्सस्य ।

करङ्कः । देव ! (ड) दोर्बन्धबन्धुरितधनुर्दाशरथिरभ्यर्णो वर्त्तते कुम्भकर्णस्य कुम्भकर्णेनापि गुरुमुद्गरचूडामणिः पाणिरनणीयानुत्तम्भितस्तापसवधाय ।

रावणः । अभङ्गुरः सङ्गरः सदा मे वत्सस्य । (ढ)

करङ्कः । हाहा ! धिकष्टम् !

हस्तः स्थितो नभसि यत्र जिघांसयैष
मत्ताङ्गनातिलकदानविधानदक्षः ।
उद्दामरामशरखण्डनतः प्रकोष्ठात्
पृष्ठे भुवो निपतितः सह मुद्गरेण ॥ ७९ ॥ (ण)

---

नुजः कुम्भकर्णः दिङ्मातङ्गस्य ऐरावतस्य या शिरस्तटी कुम्भप्रदेश त्यर्थः तां चिपिटयति चिपिटकमिव करोतीति तथाभूतं तथा । तप्रभोः यमस्य सैरिभे महिषे दर्शिता सङ्कभङ्ग एव त्रिपद्य येन दृशं यममहिषशृङ्गविध्वंसिनमित्यर्थः महामुद्गरं बिभ्रत् दधानः णायाः शोणितान्येव सारणी नदी तस्याः, कवलनेन पानेन क्षीवः त तया अमरप्रेयसीः देवाङ्गनाः हासयतीति तथाभूतः सन् एषां निजान् गणांश्च परान् वानरगणांश्च खादति भक्षयति । शार्दूलविक्रीडितं वृत्तम् ।

(ड) दोर्बन्धेति । दोर्बन्धेन भुजबन्धनेन ज्याकर्षणेनेति भावः धुरितम् आनतं धनुर्येन तादृशः दाशरथिः रामः अभ्यर्णः समीपवर्ती । गुर्विति गुरुः महान् मुद्गरचूडामणिः यत्र तादृशः अनणीयान् तिविशालः पाणिः बाहुः तापसवधाय रामविनाशाय उत्तम्भितः तोलितः ।

(ढ) अभङ्गुर अविनश्वरः अव्याहत इति भावः सङ्गरः संग्रामः ।

(ण) हस्त इति । मत्तानां सीधपायिनीनाम् अङ्गनानां कामि-

महोदरः । देव ! पाणी (त) विव बाहुदण्डौ वि-खण्डितौ (६५) ।

रावणः । सास्रम् ।

मूर्च्छानमत्प्लवगपुङ्गवरक्तसिक्तः
स्वर्दन्तिदन्तवलयैः कृतकङ्कणश्रीः ।
आमूलतो मदनुजस्य भुजो भुजङ्ग-
भीमाकृतिर्झटिति हा ! नृवरेण लूनः ॥ ८० ॥ (थ)

---

(६५) देव ! पाणिरिव बाहुदण्डोऽप्यस्य खण्डितः ।

---

भीना तिलकदानविधाने ललाटेषु तिलकार्पणानुष्ठाने दक्षः निपुणः यत् जिघांसया रिपुहननेच्छया नभसि आकाशे स्थितः एष इन्द्र चट्टासेन उत्कटेन रामस्य शरेण यत् खण्डनं कर्त्तनं तेन तृतीयाया अलुमन्वयः । मुद्गरेण सह प्रकोष्ठात् मणिबन्धोपरिभागात् भुव-पृष्ठे भूतले निपतितः ।

(त) पाणी इवेति । यथास्य पाणिद्वयं खण्डितं तथा बाहू अपीत्यर्थः ।

(थ) मूर्च्छेति । हा इति खेदसूचकमव्ययं मूर्च्छया नमतां पततां प्लवगपुङ्गवानां वानरेन्द्राणां रक्तेन सिक्तः लिप्तः, स्वर्दन्तिनां दिग्गजानां दन्तवलयैः दशनमण्डलैः स्वयमुत्पाटितैरिति भावः कृता कङ्कणस्य हस्ताभरणविशेषस्य श्रीः शोभा यस्य तादृशः, भुजङ्गस्येव भीमा भीषणा आकृतिर्यस्य तथाविधः मदनुजस्य कुम्भकर्णस्य भुजः आमूलतः मूलादारभ्य झटिति सहसा नृवरेण मानवमात्रेण लूनः छिन्नः । वसन्ततिलकं वृत्तम् ।

इति मूर्च्छति।

करङ्कः। समाश्वसितु देवी वामपाणिप्रणीतमुद्गरः (द) किमपि दुर्मदो राममाक्रामति तवानुजः।

रावणः। किञ्चिदुत्थायावलोकयति।

नेपथ्ये।

एतद्विलूनमिषुणाऽर्द्धविधूपमेन
लङ्केश्वरानुजशिरो दशनार्दितोष्ठम्।
संस्कारसङ्कलितकोपकषायगण्डं
चण्डाञ्चितभ्रु पतति स्थिरदृष्टि रामे॥ ८१॥ (ध)

सर्वे क्षोभं नाटयन्ति।

पुनर्नेपथ्ये।

सद्यो राक्षसमल्लभल्ल! दलितग्रीवाप्रकाण्डं पत-
न्निद्रालोद्दुहिणप्रणप्तुरसदृग्दंष्ट्राकरालं शिरः।

(द) वामेति। वामेन पाणिना प्रणीतः गृहीतः मुद्गरो येन तथाविधः। दुर्मदः अतिप्रचण्डः।

(ध) एतदिति। अर्द्धविधूपमेन अर्द्धचन्द्रसदृशेन इषुणा शरेण विलूनं छिन्नं दशनैः दन्तैः अर्दितः पीड़ितः दष्ट इत्यर्थः ओष्ठः यस्य तथाभूतं संस्कारेण पूर्व्वज्ञानेन सङ्कलितः आहृतः यः कोपः क्रोधः तेन कषायौ रक्तौ गण्डौ यस्य तादृशं चण्डं कुटिलं यथा तथा अञ्चिता प्रसृता भ्रूः यत्र तथाविधं तथा रामे स्थिरा निश्चला दृष्टिर्यस्य तथाभूतं, लङ्केश्वरस्य यः अनुजः कुम्भकर्णस्तस्य शिरः पतति। वसन्ततिलकं वृत्तम्।

द्राक् शाखामृगचक्रचूर्णनभयादादाय तारापथात्
प्रक्षिप्तं च महार्णवे हनुमता दृष्टं च गत्वासुरैः॥ ८२॥ (न)

रावणः। हा वत्स! कां दशां दशकण्ठेन नीतोऽसि।

नेपथ्ये।

देवाः! सर्वे विमानान्यपनयत रविस्यन्दनो यातु दूरे
विश्वे शाखामृगेन्द्राः! परिहरत रणप्राङ्गणं राक्षसाश्च!।
वेगस्रस्ताञ्जनाद्रिप्रतिनिधिरवधिः सर्वविस्मापकानां
लङ्कातङ्कैकहेतुर्निपतति वियतः कौम्भकर्णः कबन्धः॥ ८३॥ (प)

रावणः। शोकनाटितकेन।

शेषः सोऽद्याऽपि शङ्कां त्यजति न भवता कण्ठसूत्रार्द्धकृष्टो
गौरीसिंहेन्द्रदन्तिद्वितयरणविधिं त्वत्प्रणीतं स्मरामि।

---

(न) सद्य इति। राक्षसमल्ल राक्षसवीर! रावणसम्बोधनमेतत्। सद्यः भल्लेन अस्त्रविशेषेण दलितः खण्डितः ग्रीवा एव प्रकाण्डो यस्य तादृशम् असकृत् पुनःपुनः दंष्ट्राभिः करालं भीषणं तारापथात् अन्तरीक्षात् पतत् निद्रालोः प्रियनिद्रस्य दुहिणप्रणप्तुः ब्रह्मप्रपौत्रस्य कुम्भकर्णस्य शिरः हनुमता शाखामृगाणां वानराणां चक्रस्य समूहस्य चूर्णनभयात् द्राक् झटिति आदाय महार्णवे प्रक्षिप्तञ्च, सुरैः देवैः दृष्टञ्च। शार्दूलविक्रीड़ितं वृत्तम्।

(प) देवा इति। हे देवाः! सर्वे यूयं विमानानि आकाशयानानि अपनयत अपसारयत। रवेः सूर्यस्य स्यन्दनः रथः दूरे यातु गच्छतु। हे शाखामृगेन्द्राः! राक्षसाश्च! विश्वे सर्वे यूयं रणप्राङ्गणं संग्रामस्थलं परिहरत त्यजत। वेगेन स्रस्तः पतितः यः अञ्जनाद्रिः तस्य प्रतिनिधिः सदृशः सर्वेषां विस्मापकानां विस्मयजनकवस्तूनाम्

तत्रास्ते त्वच्चरित्रं लिखितमिव पुरो मद्दृशां यत्सुमेरु-(फ)
र्वत्सेनोदस्यमानो रचितचटुशतं मोचितः स्वर्गिवर्गैः॥८४॥

इति रोदिति।

दक्षिणतः सुग्रबः। अयमपरः क्षते क्षारावसेकः। (ब)

आकर्णाकृष्टचापोन्मुखविशिखशिखाशेखरः शूलपाणि-
र्बिभ्राणो भैरवत्वं बहुलकहकहारावरौद्राट्टहासः।
ध्यातः सौमित्रिणाऽथ प्रसरदुरुतरोत्तालवेताल माल-(भ)
स्तद्वक्त्रादुग्रवह्निः समजनि शिखिभिर्भस्मसादिन्द्रजिच्च ॥८५॥

---

अवधिः सीमा कुम्भकर्णस्य अयं कौम्भकर्णः कबन्धः छिन्नशिराः कायः लङ्कायाः आतङ्कायाः एकोऽद्वितीयः हेतुः सन् विरतः आकाशात् निपतति।

(फ) शेष इति हे वत्स! भवता कण्ठस्थलस्य कण्ठस्थितस्य यज्ञसूत्रस्य अर्द्धेन कृष्टः सः शेषः अनन्तनागः अद्य इदानीमपि शङ्कां न त्यजति, त्वया प्रणीतं कृतं गौर्य्याः सिंहेन्द्रः दन्ती ऐरावतस्य तयोर्हितवेन हयेन सह रणविधिं युद्धव्यापारं स्मरामि। वत्सेन त्वया उदस्यमानः उत्क्षिप्यमाणः सुमेरुः स्वर्गिणां देवानां वर्गैः रचितम् उक्तं चटुशतं स्तोत्रवचनशतं यस्मिन् तत् यथा तथा मोचितः इति यत्, तच्च तव चरित्रं मम दृशां नेत्राणां पुरः अग्रतः लिखितमिव चित्रितमिव आस्ते तिष्ठति। शार्दूलविक्रीडितं वृत्तम्।

(ब) क्षते क्षतस्थाने क्षारस्य लवणस्य अवसेकः अर्पणमित्यर्थः।

(भ) आकर्णेति। अथ अनन्तरं सौमित्रिणा लक्ष्मणेन आकर्णं यथा तथा आकृष्टे चापे धनुषि उन्मुखम् ऊर्द्धमुखं यत् विशिखं शरः तस्य शिखाया अयं शेखरः शिरोभूषणं यस्य तादृशः शूलं पाणौ यस्य तथाविधः भैरवत्वं भयङ्कराकृतिं बिभ्राणः धारयन् बहुलः कहकहारावो यस्मिन् तादृशः रौद्रः प्रचण्डः अट्टहासो यस्य तथोक्तः तथा

रावणः मूर्च्छति सर्वे यथोचितमुपचरन्ति।

रावणः। मूर्च्छाविच्छेदनाटितकेन।

शेतां सम्प्रति वासवश्चिरभवन्निद्राजडैर्लोचनै-
र्जायन्तां विबुधोपयोग्यकुसुमाः सर्वेऽसि दिव्यद्रुमाः।
बन्धाः स्वर्गसदाञ्च सन्त्वनिगडाः प्राप्तोऽसि तं गोचरं
मद्वक्त्रैरपि वत्स! नाम दशभिर्वक्तुं न यः शक्यते॥८६॥ (म)

साक्रन्दं रुदित्वा। हंहो किङ्कराः! मन्दोदरीं द्रष्टुमिच्छामि। इति परिक्रम्य सर्वे निष्क्रान्ताः।

॥ इति वीरविलासो नामाष्टमोऽङ्कः॥

प्रसरन्ती उद्भवन्ती उरुतरा अतिमहती उत्ताला प्रचण्डा वेतालानां भूतानां माला श्रेणी यस्मात् तथाविधः शम्भुः ध्यातः चिन्तितः। तस्य चिन्तितोपस्थितस्येति भावः। शम्भोः वक्त्रात् मुखात् उद्भवद्भिः शिखिभिः अग्निभिः इन्द्रजित् भस्मसात् अजनि च भस्मीभूतश्च।

(म) शेतामिति। सम्प्रति इदानीं वासवः इन्द्रः चिरेण भवन्त्या निद्रया जडैः लोचनैः शेताम् निद्रां भजताम्। सर्वेऽपि दिव्यद्रुमाः देवतरवः विबुधैः देवैः उपभोग्यानि कुसुमानि येषां तादृशाः जायन्तां भवन्तु। स्वर्गसदां देवानां बन्धाः बन्धनानि अनिगडा निगडशून्याः सन्तु च। हे वत्स! मेघनाद! दशभिरपि मम वक्त्रैः यः वक्तुं न शक्यते नाम, तं गोचरं स्थानं यमालयमित्यर्थः प्राप्तोऽसि गतोऽसि। शार्दूलविक्रीडितं वृत्तम्।

# ॥ नवमोऽङ्कः ॥

अतः परं रावणवधो भविष्यति ।

ततः प्रविशति यमपुरुषः । (क) तत्रभवतो लुलापलक्ष्मणः सकलप्राणभृतां विहितविनाशस्य कीनाशस्य किमपि विश्वातिशायिनी प्रभविष्णुता । यतः ।

नित्यस्मिताम्बुरुहविष्टरसंनिविष्टः
स्वेच्छाविनिर्मितचतुर्दशलोक एकः ।
ब्रह्मेति यः किमपरं कविता श्रुतीनां
तस्यापि निःश्वसितसंहृतिरागः कृतान्तात् ॥ १ ॥ (ख)

---

(क) तत्रभवतः पूज्यस्य लुलापलक्ष्मणः लुलापो महिषः लक्ष्म चिह्नं वाहनत्वेनेति भावः यस्य तादृशस्य कीनाशस्य यमस्य कीनाशो यम इत्येवयोरिति शेषः ।

(ख) नित्येति । नित्यं सततं स्मितं विकसितं यत् अम्बुरुहं तदेव विष्टरम् आसनं तत्र सन्निविष्टः, स्वस्य इच्छया विनिर्मिताः चतुर्दश लोकाः भूर्भुवःस्वरादीनि जगन्ति येन तथाविधः एकः अद्वितीयः श्रुतीनां कविता रचयिता प्रणेतेत्यर्थः ब्रह्मा इति यः कीर्त्यते इति शेषः आः ! किमपरं वक्तव्यमिति शेषः । तस्य ब्रह्मणोऽपि कृतान्तात् यमात् निश्वसितस्य प्राणवायोः संहृतिः संहारः । ब्रह्मणोऽपि संहर्त्ता यम, का कथा अन्येषामिति भावः ।

परिक्रम्य पार्श्वे विलोक्य च। अहो ! नताम्बरचक्रवर्त्तिनो वीरकचूडामणेः (ग) किमपि निष्प्रतीपमाम्नातं यदेषोऽस्मि तेनापि भगवता भूर्भुवःस्वस्त्रयविहितनियमेन यमेन विजनेऽपि श्रवसि समादिष्टः। यथाज्ञापितोऽस्मि पुरुहूतेन यदुत विनतानन्दनः स्यन्दनरूपतामारोप्यास्माभिः परिकल्पितमातलिसूतसुनीतसारथिर्दाशरथेः समरसीम्नि जैत्रं पत्रं कृतः सम्प्रति तु तादृशस्य रामभद्रस्य तादृशेन रावणेन सह द्वन्द्वयुद्धमनुमन्यामहे दिदृक्षामहे च तदुद्धृत्य निजाक्षपटलपटलीभ्यो लङ्कालोकलेखमानय येन जानीमः।

कदा केषां च केभ्यश्च चयो लङ्कानिवासिनाम्।
रामात्तु दशकण्ठस्य किंविधो भविता वधः ॥ २ ॥ (घ)

---

(ग) वीरकेति वीरकाणां वीरपुरुषाणां चूडामणेः शिरोरत्नस्य वीरप्रधानस्येति भावः। किमपि अनिर्वचनीयं निष्प्रतीपम् अव्याहतम् आम्नातम् आदेशः शासनमित्यर्थः। तेनापि का कथान्येषामिति भावः भूर्भुव इति भूर्भुवःस्वस्त्रये त्रिलोक्यामित्यर्थः विहितः कृतः नियमो येन तादृशेन, विजनेऽपि न तु सर्वजनसमक्षं रावणस्य शासनभयादिति भावः। श्रवसि कर्णे। समादिष्टः आज्ञापितः। पुरुहूतेन इन्द्रेण। यत् उत भोः ! विनतानन्दनः गरुडः। स्यन्दनरूपतां रथाकृतिम्। परिकल्पितः विहितः मातलेः सुतः पुत्रः यः सुनीतः, स एव सारथिः यस्य तथाभूतः। जैत्रं जयसाधनं पत्रं वाहनम्। द्वन्द्वयुद्धम् उभयोर्मल्लयोः परस्परं यत् युद्धं तत्। निजाक्षः स्वाक्षः कृतपटलपटलीभ्यः व्यवहारपुस्तकनिचयेभ्यः उद्धृत्य निःसार्य्य लङ्कालोकानां लङ्कावासिनां लेखं गणनापत्रम् आनय येन जानीमः।

(घ) कदेति कदा कस्मिन् समये केषां लङ्कानिवासिनां केभ्यः

येन तत्रैव मयो (ङ) चारणोपदिश्यमानमहावीरप्रकाण्ड-प्रचाराः पुत्रदर्शनकुतूहलिना दिव्यरूपेण परमसुहृदा दशरथेन सह संग्रामसीमानमवतराम इति तद्भद्रमुख। महाक्षपटलिकं मद्वचनाच्चित्रगुप्तमादिश येन लङ्कालेख्यकमुद्धृत्य समर्पयति पुरन्दरश्रावणाय तद्यावच्चित्रगुप्तमेवोपसर्पामि। परिक्रामितकेन विचिन्त्य। अहो! दशाननः सर्वेषामुपरि पराक्रमेण। तथाहि।

यत्र दृष्टे हरेरक्ष्णां सहस्रं कुड्मलायते।
कृतान्तदण्डःसोऽप्यस्य कण्ठे किमपि कुण्ठितः॥२॥(च)

अपिच।

अवतरति विधाय ब्रह्मदण्डं प्रचण्डं
सकलजननभाजां कल्पितान्ते कृतान्ते।

वीरेभ्यः क्षयः विनाशः स्यात् इति शेषः, किन्त्विति त्वर्थः दशकण्ठस्य रावणस्य रामात् किंविधः कथं प्रकारो वधः भविता इति पूर्वेण जानीम इत्यनेनान्वयः।

(ङ) चारणेति। चारणैः वन्दिभिः उपदिश्यमानाः कीर्त्त्यमाना महावीरप्रकाण्डानां प्रचारा गतिविशेषा येभ्यः, तथाभूताः। संग्रामसीमानं रणक्षेत्रम्। महाक्षपटलिकं व्यवहारपुस्तकाध्यक्षम्। सर्वेषामुपरि वर्त्तते इति शेषः।

(च) यत्रेति। यत्र यस्मिन् दशानने दृष्टे सति हरेरिन्द्रस्य अक्ष्णां चक्षुषां सहस्रं कुड्मलायते मुकुलीभवति निमीलतीत्यर्थः भयादिति भावः। सः प्रसिद्धः कृतान्तस्य यमस्य दण्डोऽपि अस्य रावणस्य कण्ठे किमपि अवचनीयं यथा तथा कुण्ठितः सङ्कुचितः।

समरशिरसि यस्य प्राप भङ्गं धुताङ्गः
खुरदलितधरित्रीचित्रकायो लुलापः ॥ ४ ॥(छ)

कथमयं चित्रगुप्तः।

ततः प्रविशति चित्रगुप्तः। अङ्कभङ्गनाटितकेन।

दिवानिशं राक्षसमण्डलस्य
प्रचण्डरामानुचरैर्जितस्य।
निबध्नतो मे निधनप्रपञ्चं।
स्थितः करः खेदजडाङ्गुलीकः ॥ ५ ॥(ज)

पुरुहूतः। उपसृत्य कर्णे। एवमेवम्

चित्रगुप्तः। यदादिशति स्वामी। इदमर्प्यते। निबन्धोद्धरणनाटितकेन(झ)। न खलु कश्चिदिह प्रच्छन्नो वा मत्तो वा

(छ) अवतरतीति। सकलजननभाजां सर्वेषां प्राणिनां कल्पितः विहितः अन्तः नाशः येन तादृशे कृतान्ते यमे प्रचण्डं तीक्ष्णं ब्रह्मदण्डं विधाय स्वीकृत्य यस्य रावणस्य समरशिरसि रणाग्रे अवतरति सति लुलापः महिषः धुताङ्गः कम्पितकलेवरः तथा खुरैः दलितया धरित्र्या पृथिव्या तद्रजसंलग्नं चित्रं धूसरः कायः शरीरं यस्य तथाभूतः सन् भङ्गं प्राप पलायाञ्चक्रे इत्यर्थः स दशाननः सर्वेषामुपरीति पूर्वेणान्वयः। मालिनीवृत्तम्।

(ज) दिवानिशमिति। दिवानिशम् अहोरात्रं प्रचण्डैः महावीरैः रामानुचरैः वानरेन्द्रैरिति यावत् जितस्य निहतस्य राक्षसमण्डलस्य निशाचरसमूहस्य निधनप्रपञ्चं विनाशविस्तरं निबध्नतः लिखतः मे मम करः खेदेन परिश्रमेण जडा अवशाः अङ्गुल्यः यस्य तथाभूतः सन् स्थितः। उपेन्द्रवज्रावृत्तम्।

(झ) निबन्धोद्धरणनाटितकेन निबन्धेभ्यः व्यवहारपुस्तकेभ्यः उद्-

यो मत्तं निर्भेदयेत् साचात्करणाय तत् प्रतिवाचय।

पुरुषो वाचयति।

अतिक्रान्ते कृते काले प्राप्ते त्रेतादिवत्सरे।
कृष्णकार्त्तिकपचाद्यदिवसोदययोगिनि॥ ६॥(ञ)
रामैकरतसुग्रीवप्लवङ्गमबलैर्बलात्।
लङ्काऽलङ्कारतां बिभ्रत्युपरुद्धा महोदधेः॥ ७॥ (ट)
धूम्राचं क्रोधधूम्राचमकम्पनमकम्पनम्।
हतवानञ्जनीजन्मा भिन्नाञ्जनसमप्रभम्॥ ८॥ (ठ)
प्रहस्तो दीर्घहस्तेन नीलेनाशु निमीलितः।
द्वितीयेऽह्नि द्विधा चक्रे कुम्भकर्णं रघूद्वहः॥ ९॥(ड)

---

करणं बहिष्करणं तदेव नाटितकम् अभिनयस्तेन। प्रच्छन्नः गूढरूपेण स्थितः। मत्तः मद्यपानेन विकृतमतिरित्यर्थः। निर्भेदयेत् प्रकाशयेत्।

(ञ) अतिक्रान्ते इति। कृते सत्ये काले युगे इति यावत् अतिक्रान्ते गते सति, कृष्णकार्त्तिकपचस्य कार्त्तिककृष्णपचस्य इत्यर्थः आद्यदिवसे प्रथमदिने प्रतिपदीत्यर्थः यः उदयः तद्योगिनि त्रेताया द्वितीययुगस्य इत्यर्थः आदिवत्सरे प्रथमवर्षे।

(ट) रामे एकरतः अत्यासक्तः यः सुग्रीवः तस्य प्लवङ्गमबलैः वानरानीकैः अलङ्कारतां बिभ्रती धारयन्ती जगदलङ्कारभूतेत्यर्थः लङ्का आमहोदधेः महासमुद्रपर्य्यन्तम् उपरुद्धा अवरुद्धा।

(ठ) तत्र अञ्जनीजन्मा अञ्जनासुतः हनूमान् क्रोधेन धूम्रे अक्षिणी यस्य तादृशं धूम्राचं नाम राचसं तथा भिन्नाञ्जनेन मर्दितकज्जलेन समा प्रभा यस्य तद्रूपम् अतिकृष्णवर्णमित्यर्थः न कम्पते इति अकम्पनं नाम राचसञ्च हतवान्।

(ड) दीर्घहस्तेन महाभुजेन नीलेन वानरसेनापतिना प्रहस्तः

नरान्तकस्यान्तकोऽभूदङ्गदो रुचिराङ्गदः ।
नीतो देवान्तकश्चान्तं त्रिशिराश्च हनूमता ॥ १० ॥ (ढ)
ऋषभेण महापार्श्वः पार्श्वपीडनतो हतः ।
चक्रेऽतिकायं निष्कायं तृतीयेऽह्नि च लक्ष्मणः ११ (ण)
कुम्भकर्णोद्भवौ कुम्भनिकुम्भौ दम्भपण्डितौ ।
हरिराजहनूमद्भ्यां चक्राते यमसेवकौ ॥ १२ ॥ (त)
मकराक्षं सरोजाक्षः खरपुत्रं खरान्तकः ।
रामो गुणद्रुमारामो निजघान घनौजसम् ॥ १३ ॥ (थ)
मेघनादं महानादं सायकैर्हतनायकैः ।
लक्ष्मणः सिंहलक्ष्माणं बबाध प्रियबान्धवः ॥ १४ ॥ (द)

---

श्चाशु शीघ्रं निमीलितः निहतः । द्वितीयेऽह्नि दिवसे रघूद्वहः रामः कुम्भकर्णं द्विधा चक्रे चिच्छेद ।

(ढ) रुचिरौ अङ्गदौ यस्य तादृशः अङ्गदः नरान्तकस्य अन्तकः नाशकः अभूत् । हनुमता च देवान्तकः त्रिशिराश्च अन्तं नाशं नीतः प्रापितः ।

(ण) ऋषभेण वानरसेनान्या महापार्श्वः पार्श्वपीडनतः पार्श्वयोः पीडनात् प्रहारादित्यर्थः हतः नाशितः । लक्ष्मणः तृतीयेऽह्नि दिवसे अतिकायं निष्कायं चक्रे हतवानित्यर्थः ।

(त) हरिराज हनुमद्भ्यां सुग्रीवेण हनुमता च इत्यर्थः कुम्भकर्णोद्भवौ कुम्भकर्णसुतौ दम्भपण्डितौ अतिदाम्भिकौ कुम्भनिकुम्भौ यमसेवकौ चक्राते यमालयं प्रेषितौ इत्यर्थः ।

(थ) सरोजाक्षः पद्मलोचनः गुणद्रुमाणां गुणरूपाणां वृक्षाणाम् आरामः उपवनभूतः सर्वगुणाकर इत्यर्थः खरान्तकः खरराक्षससूदनः रामः घनौजसं महाबलं खरस्य पुत्रं मकराक्षं निजघान हतवान् ।

(द) प्रियाः बान्धवाः यस्य तथोक्तः लक्ष्मणः हताः नायकाः प्रधान-

महोदरो विरूपाक्षो विरूपाक्षो महोदरः।
चतुरेण चतुर्थेऽह्नि सुग्रीवेण रणे हतौ ॥ १५ ॥ (ध)
संग्रामे वीरसंग्रामे राजितः समराजितः।
चक्रे रणमहाचक्रं मार्गणैर्मर्ममार्गणैः ॥ १६ ॥ (न)
दशकण्ठो धृतोत्कण्ठो राघवादस्त्रलाघवात्।
पञ्चमेऽहनि पञ्चत्वं प्रयासेन प्रयास्यति ॥ १७ ॥ (प)

युगलकमुद्दिश्य। चित्रगुप्तः। तदपरिहीणकालं (फ) भगवन्तमुपतिष्ठ येन पुरन्दरादेशमनुतिष्ठति स्वामी।

इति निष्क्रान्तौ विष्कम्भकः।

ततः प्रविशतः पुरन्दरदशरथौ चारणमिथुनं च।

---

ोरा यैः तादृशैः सायकैः शरैः महानादं सिंहलक्षणं सिंहविक्रमनति भावः मेघनादं बबाध कृतवान्।

(ध) रणे चतुरेण रणपण्डितेन सुग्रीवेण चतुर्थेऽह्नि दिवसे हत् उदरं यस्य तादृशः महोदरः विरूपे विकटे अक्षिणी यस्य ादृशः विरूपाक्षश्च हतौ।

(न) समरेषु संग्रामेषु अजित राजितः वानरसेनापतिः वीराणां ग्रामः समूहो यत्र तादृशे संग्रामे मर्ममार्गणैः मर्मभेदिभिरित्यर्थः ार्गणैः शरैः रणमहाचक्रं महान्तं रणमित्यर्थः चक्रे कृतवान्।

(प) पञ्चमेऽहनि दिवसे दशकण्ठः रावणः अस्त्रलाघवात् अस्त्रेषु लघुहस्तात् राघवात् रामात् धृता उत्कण्ठा येन तादृशः सन् ्रयासेन युद्धव्यापारेण पञ्चत्वं प्रयास्यति प्राप्स्यति।

(फ) अपरिहीणेति। अपरिहीणः कालो यस्य तत् यथा तथा ाकालमित्यर्थः भगवन्तम् अन्तकम् उपतिष्ठ सेवस्व प्रभोरन्तिकमुपगच्छेत्यर्थः।

चारणः । आर्य्य मातले ! सकलदानवेश्वरपुराक्रमणं (ब) सौत्रामणं अतिदृक्कुतूहलोत्तानितलोकलोचनपक्ष्माणमैरावणलक्ष्माणं गगनाङ्गणसञ्चरणवेगतरलितमाणिक्यकिङ्किणीनिनदनिःस्यन्दनं स्यन्दनमितःकुरु । अयमसावतिसुरासुरसङ्गरनिवेशो रामरावणयोः समरसंरम्भोद्देशः ।

सर्वे रथवेगं नाटयन्ति ।

दशरथः । भगवन् (भ) गीर्वाणनाथ ! इतः प्रसादं विधाय निधीयन्तां दृष्टयः ।

अयमनुकृतवक्षाकुक्षतापिञ्छगुच्छो
रणभुवमवतीर्णः कार्मुकी रामभद्रः ।

(ब) सकलेति । सकलानां दानवेश्वराणां पुराणि नगराणि आक्रम्यन्ते अनेनेति तथोक्तं सुत्रामा गोत्रभिद् वज्री वासवो वृत्रहा वृषेत्यमरः । तस्य इदं सौत्रामणम् ऐन्द्रमित्यर्थः । अतिदृक्कुतूहलेन अत्युत्कृष्टदर्शनकौतुकेन उत्तानितानि उत्क्षेपितानि लोकलोचनानां पक्ष्माणि लोमानि येन तादृशम् । ऐरावणलक्ष्माणम् ऐरावतचिह्नम् । गगनाङ्गणेषु अन्तरीक्षप्रदेशेषु यत् सञ्चरणं तस्य वेगेन रयेण तरलितानि चलितानि माणिक्यानि स्वाङ्कन्यस्ता रत्नविशेषाः यस्य तादृशम् । किङ्किणीनां क्षुद्रघण्टिकानां निनदाः ध्वनयः निस्यन्दन्ते निःसरन्ति यस्मात् तथाभूतं स्यन्दनं रथम् इतः अस्मिन् प्रदेशे कुरु स्थापयेति यावत् । अतीति सुरासुराणां देवासुराणां सङ्गरनिवेशं संग्रामोद्देशमतिक्रान्त इति तथोक्तः देवासुरसंग्रामतोऽप्यतिशायीत्यर्थः समरसंरम्भस्य युद्धव्यापारस्य उद्देशः स्थानम् ।

(भ) गीर्वाणनाथ ! देवराज ! प्रसादम् अनुग्रहं विधाय कृत्वा ।

अयमपि दशकण्ठः कुण्ठिताम्भोदशोभः
परिकलयति बाणं भ्रान्तकोदण्डदण्डः ॥ १८ ॥ (म)

कर्णं दत्त्वा आकाशे। किमाह रभसोल्लासितहृदयामोदमुद्रो (य) रामभद्रः।

भो लङ्केश्वर! दीयतां जनकजा रामः स्वयं याचते
कोऽयं ते मतिविभ्रमः स्मर नयं नाद्यापि किञ्चिद्गतम्।
नैवं चेत् खरदूषणत्रिशिरसां कण्ठासृजा पङ्किलः
पत्री नैष सहिष्यते मम धनुर्ज्याबन्धबन्धूकृतः ॥ १९ ॥ (र)

---

(म) अयमिति। अनुकृतः वल्ल्या लतया सह फुल्लः विकसितः तापिञ्छगुच्छः तमालकुसुमस्तवकः येन तादृशः कार्मुकी धनुष्पाणिः अयं रामभद्रः। कुण्ठिता सङ्कोचिता तिरस्कृता इति यावत् अम्भोदस्य जलधरस्य शोभा येन तादृशः अयं दशकण्ठः रावणः भ्रान्तः आस्फालितः कोदण्डदण्डः धनुर्यष्टिर्येन तथाभूतः सन् बाणं परिकलयति गृह्णाति वा योजयति। मालिनी वृत्तम्।

(य) रभसेति। रभसेन वेगेन उल्लासिता विकासिता आमोदमुद्रा हर्षावेशः यस्य तादृशः।

(र) भो इति। भो लङ्केश्वर। जनकजा जानकी दीयतां प्रत्यर्पतां मह्यमिति शेषः रामः स्वयं साक्षात् याचते प्रार्थयते। ते तव अयं कः मतिविभ्रमः बुद्धिविपर्य्यासः? नयं नीतिं स्मर अद्यापि किञ्चित् मोहादिकं न गतं न नष्टम्?। चेत् यदि एवं न करोषीति शेषः तदा खरदूषणत्रिशिरसां जनस्थानवासिनां राक्षसानां कण्ठासृजा कण्ठशोणितेन पङ्किलः लिप्त इति यावत् धनुषः ज्यया मौर्व्या बन्धेन प्रत्यञ्चपाशेनेति भावः बन्धूकृतः मिलीकृतः एषः मम पत्री शरः न सहिष्यते त्वामिति शेषः। शार्दूलविक्रीडितं वृत्तम्।

पुरन्दरः। सखे(ल)भूकाश्यप! कतिहायनः पुनरयं वत्सो रामभद्रो येनेदृशान्यतिपरिणतप्रणेयानि च वचांसि वक्तुं शिक्षितः।

दशरथः। सविनयम्। देव! भवदनुग्रहस्यैष प्रभावः स खल्वयस्कान्तमणेरनुभावो (व) यदयो द्रवति। आकाशे कर्णं दत्त्वा। किमाह राक्षसराजः?।(श) रे रे राम दोर्दण्डचण्डिमाहृतराम! त्वत्पूर्वपुरुषस्यापि प्रहरणैर्नैव सोढमासीत् तथाहि। स मया।

भृङ्गः स्तम्बेरमेणेव मदलम्पटचेष्टितः।
अनरण्यो वरेण्यश्रीश्चपेटी चिपिटीकृतः॥२०॥(ष)

किञ्च रे अनरण्यकुलकुमार!

---

(ल) भूकाश्यप! पृथिवीन्द्र:! कतिहायनः कतिवर्षीयः। अतिपरिणतेन अतिवृद्धेन प्रणेयानि वाच्यानि।

(व) अयस्कान्तमणेः लोहरत्नविशेषस्य अनुभावः प्रभावः, अयः लोहधातुः द्रवति गलति।

(श) रे रे इति। अवज्ञासूचकमव्ययद्वयं दोर्दण्डचण्डिम्ना बाहुदण्डवीर्य्येण हृता रामा कान्ता यस्य तादृश राम! तव पूर्वपुरुषस्य अनरण्यस्यापि प्रहरणैः अस्त्रैः नैव सोढं सोढुं न शक्त आसीत् मद्विक्रमस्तव पूर्वपुरुषेणापि न सोढुं शक्तः आसीदित्यर्थः।

(ष) भृङ्ग इति। मदेषु दानवारिषु लम्पटं लालसं चेष्टितं यस्य तादृशः मदगन्धलुब्ध इत्यर्थः भृङ्गः भ्रमरः स्तम्बेरमेण गजेन्द्रेणेव वरेण्या श्रेष्ठा श्रीर्यस्य तादृशः महासम्पद्विशालीत्यर्थः अनरण्यः चपेटया चपेटाघातेन चिपिटीकृतः पिष्टित इत्यर्थः।

चक्रे चक्रं मुरारेर्मयि कुपितवधूकुण्डलक्षेपलीला-
मस्मिन्नंसे विभिन्नस्तडिति बिसलताकाण्डवत् कालदण्डः ।
वक्षस्यूर्जस्वि वज्रं गतमिह च तुलां स्त्रैणहारप्रहारै-
र्यत् सत्यं पत्रिणस्ते मम वपुषि घने मन्मथास्त्रीभवन्ति॥२१॥(स)

पुरन्दरः । विचिन्त्य । अहो ! महदन्तरं रामरावणयो-र्वचनचातुर्य्यं प्रति यद्वा मतिः(ह)परिणमन्ती पुरुषमुदात्त-यति न वयः ।

चारणः । कर्णं दत्त्वा आकाशे । किमाह रामभद्रः ? । तर्हि सह्यतामयमनङ्गबाणोपमानो बाणः (च) ।

---

(स) चक्रे इति मुरारेः नारायणस्य चक्रं सुदर्शनं मयि कुपितायाः वध्वाः कुण्डलक्षेपस्य कुण्डलस्य कर्णभूषणविशेषस्य यः क्षेपः प्रहारः स एव लीला विलासः स्वामिनं प्रतीति भावः । तां चक्रे कृतवत् । कुपितकामिनी कुण्डलप्रहार इव सुदर्शनप्रहारो मयि जात इति भावः । कालस्य यमस्य दण्डः अस्मिन् अंसे स्कन्धे बिसलताकाण्डवत् मृणालदण्ड इव तड़िति विभिन्नः खण्डितः चूर्णित इत्यर्थः । ऊर्ज्जस्वि अतितेजस्वलं वज्रं कुलिशम् इह वक्षसि स्त्रैणहारप्रहारैः स्त्रीणां हारप्रहारैः तुलां सादृश्यं गतं प्राप्तम् । ते तव पत्रिणः शराः घने निविड़े अतिकठिने इत्यर्थः मम वपुषि शरीरे मन्मथास्त्रीभवन्ति कामास्त्रभूतानि कुसुमानि भवन्ति इति यत् तत् सत्यम् । स्रग्धरावृत्तम् ।

(ह) परिणमन्ती परिपाकं गच्छन्ती । उदात्तयति महान्तं करोति ।

(च) अनङ्गेति । अनङ्गस्य कामस्य यः वाणः कौसुम इति भावः स उपमानं यस्य तथाविधः ।

चारणी। ससम्भ्रमं प्रणम्य। भअवं पुरन्दर! णिवेसीअन्तु (क)विसद्दकमलकाणणमणोहरा इदोइदो अच्छिविक्खेवा। जदो पढमं कोदंडमंडलादो प्पलअकेउदंडप्पमाणो बाणो पच्छा कोसलणरिंदणंदणस्स वअणादो वाणी णिग्गदा भअवं इंदाणीवल्लह! अस्सुदपुव्वं अदिठ्ठपुव्वं च रामचंदचरिदं ज दाणिं दसाणणस्स मंदोदरीचडुलचुंबणविलुत्तितिलअबंधे णिडीलवट्टे जअधअदंडत्तणमुवणीदो बाणो (१)।

चारणः। सुगेहिनि! सुष्टृष्टिरसि।

यस्मिन्त्र्यम्बकमम्बिकापतिरसौ देवस्तृतीयं वह-

त्याद्यं यत्र च रोचनाम्बुतिलकं न्यस्यन्ति पृथ्वीभुजः।

---

(१) भगवन् पुरन्दर! निवेश्यन्तां विशदकमलकाननमनोहरा इत-इतोऽक्षिविक्षेपाः। यतः प्रथमं कोदण्डमण्डलात् प्रलयकेतुदण्डप्रमाणो बाणः पश्चात् कोशलनरेन्द्रनन्दनस्य वदनाद्वाणी निर्गता। भगवन्निन्द्राणीवल्लभ! अश्रुतपूर्वमदृष्टपूर्वं च रामचन्द्रचरितं यदिदानीं दशाननस्य मन्दोदरीचटुलचुम्बनविलुप्ततिलकबन्धे ललाटपट्टे जयध्वज-दण्डत्वमुपनीतो बाणः।

---

(क) विशदानि विकसितानि यानि कमलवनानि तद्वत् मनो-हराः। कोदण्डमण्डलात् धनुर्मण्डलात् प्रलये कल्पान्ते उदितः यः केतुदण्डः दण्डाकृतिरुत्पातविशेषः तत्प्रमाणः तद्रूप इत्यर्थः। कोशल-नरेन्द्रनन्दनस्य रामस्य। मन्दोदरीति मन्दोदर्याश्चटुलचुम्बनेन सा-वेगचुम्बनेन विलुप्तः तिरोहितः तिलकबन्धः तिलकन्यासः यस्मात् तादृशः। जयध्वजदण्डत्वं जयपताकायष्टित्वं उपनीतः प्रापितः।

क्रोधे द्राक् भ्रुकुटीपुटेन घटते यत्र त्रिभङ्गात्मना
तत्रैव त्रिदिवद्रुहः प्रथमतो रामेण बाणोऽर्पितः ॥२२॥ (ख)

चारणी। सविषादम्। हद्धि! हद्धि! हदासदसकन्धरेण वि णिब्भरदलदिंदीवरवणाहिरामस्स रामस्स(ग) गिरिसिलाविसालं वच्छत्थलमुद्दिसिअ कअंतदाढाजरठो सरो सन्धिदो (२)।

दशरथः। कः कोऽत्र भोः! धनुर्धनुः(घ) पुरन्दरप्रसादीकृतसखिभावे सति दशरथे कथमिव रावणो रामभद्रं प्रहरतु।

(२) हा धिक्! हा धिक्! हताशदशकन्धरेणापि निर्भरदलदिन्दीवरवनाभिरामस्य रामस्य गिरिशिलाविशालं वक्षःस्थलमुद्दिश्य कृतान्तदंष्ट्राजरठः शरः सन्धितः

(ख) यस्मिन्निति। असौ देवः अम्बिकापतिः त्रिलोचन इत्यर्थः यस्मिन् ललाटपट्टे इति भावः। तृतीयम् अम्बकं नेत्रं वहति धत्ते, यत्र च पृथ्वीभुजः राजानः आद्यं प्रथमं सर्वकार्य्यात् प्रागिति शेषः रोचनाम्बु तिलकं गोरोचनाजलतिलकं न्यस्यन्ति दधति, यत्र क्रोधे सति द्राक् झटिति त्रिभङ्गात्मना त्रिभङ्गरूपेण घटते भ्रुकुट्या त्रिभङ्गं भवतीत्यर्थः। रामेण त्रिदिवद्रुहः स्वर्गशत्रोः रावणस्य तत्रैव ललाटपट्टे इति शेषः प्रथमतः अग्रतः बाणः शरः अर्पितः योजितः निक्षिप्त इत्यर्थः। शार्दूलविक्रीडितं वृत्तम्।

(ग) निर्भरेति। निर्भरं सम्यक् यथा तथा दलत् विकसत् यदिन्दीवरवनं नीलोत्पलसमूहः तद्वत् अभिरामः सुन्दरस्तस्य गिरिशिलाविशालं पर्वतशिलाविस्तारम्। कृतान्तस्य यमस्य या दंष्ट्रा दन्तः तद्वत् जरठः कठिनः।

(घ) पुरन्दरेति पुरन्दरेण देवराजेन प्रसादीकृतः सखिभावः सख्यं यस्य तादृशे देवराजसहाये इति भावः सति वर्त्तमाने।

पुरन्दरः। सखे दशरथ! द्वन्द्वयुद्धमिदं तदनुचितं(ङ) क्षत्रधर्मस्य दिव्यभावस्य च यदद्वन्द्ववृत्तिरपि यत्नं गृह्णाति।

दशरथः। तत् कथयतु वन्द्यः(च) किमत्र साम्प्रतम्।

पुरन्दरः। यदत्र साम्प्रतमसाम्प्रतं वा राघवधुरन्धरो वामदेव एव तद्वेद।

चारणः।

यन्मैथिलीमदनतल्पतलं यदात्त-
मारीचरत्नमृगचर्म शिलाघनं च।
रामस्य वक्षसि चिरोज्झितहारदाम्नि
तस्मिन्नयं दशमुखेन शरो निखातः॥ २३ ॥(छ)

दशरथः। कथं रावण! निपुणोऽसि यदेकेन बाणेन हृदये द्वयं ताडितं रामो दशरथश्च।

चारणः।

मन्दोदरीस्तनविसृत्वरकुङ्कुमं य-
द्दत्ताश्मघातकणचूर्णविकीर्णहारम्।

---

(ङ) क्षत्रधर्मस्य क्षत्रियाचारस्य दिव्यभावस्य देवत्वप्राप्ततायाश्च। अद्वन्द्ववृत्तिः यो द्वन्द्ववृत्तिर्न भवति स इत्यर्थः द्वन्द्वयुद्धे उभयोरेव यत्न-ग्रहणनियमः न तु कस्यापि तत्र साहाय्यकरणावकाश इति भावः।

(च) वन्द्यः पूज्यः। साम्प्रतं युक्तम्।

(छ) यदिति। यत् वक्षः मैथिल्याः सीतायाः मदनतल्पतलं काम-शय्यास्थानम्। यत् आत्तं धृतं मारीचस्य रत्नमृगस्य चर्म येन तथोक्तं शिलाघनं पाषाणवत् कठिनञ्च, दशमुखेन रावणेन रामस्य चिरेण उज्झितं त्यक्तं हारदाम हारभूषणं येन तादृशे तस्मिन् वक्षसि अयं शरः निखातः निक्षिप्तः। वसन्ततिलकं वृत्तम्।

लङ्केश्वरस्य हृदि तत्र भवद्भुवाऽपि
मारीचरक्तपिहितो निहितः पृषत्कः ॥ २४ ॥(ज)

चारणो । सचमत्कारम् ।(झ)आअषाकट्टिदकोदंडमंडलनिग्गलंतसरधोरणीणीरंधणिरुध्धभुअणकंदरो सुट्ठु क्खु रामरावणाणं णिब्भरो समरसंरम्भो अहह ! का वि लक्खणजेट्ठस्स दसरहणंदणस्स धाणुक्कदा जेण अदिक्कमिअ रहवरकेउदण्डं सरच्छडा पअट्टंति (१) ।

पुरन्दरः । सखे महीमहाराज! अमुना (ञ)रामशरविद्यावैशारद्येन देवं त्रिपुरान्तकरं शङ्करमनुस्मारितोऽस्मि ।

---

(१) आकर्णाकृष्टकोदण्डमण्डलनिर्गलच्छरधोरणीनीरन्ध्रनिरुद्धभुवनकन्दरः सुष्ठु खलु रामरावणयोर्निर्भरः समरसंरम्भः । अहह ! कापि लक्ष्मणज्येष्ठस्य दशरथनन्दनस्य धानुष्कता येनातिक्रम्य रथवरकेतुदण्डं शरच्छटाः प्रवर्त्तन्ते ।

---

(ज) मन्दोदरीति । हे राजन् ! भवद्भुवा तथात्मजेनापि रामेण यत् मन्दोदर्य्याः स्तनयोः विस्फुरितं विमृष्टं कुङ्कुमं येन तथाभूतं यत्र वज्रघातस्य कुलिशप्रहारस्य कणचूर्णेन विकीर्णः विरचितः हारो यस्मिन् तादृशं तत्र लङ्केश्वरस्य हृदि मारीचस्य रक्तेन पिहितः मारीचघातीत्यर्थः पृषत्कः शरः निहित. निक्षिप्तः । वसन्ततिलकं वृत्तम् ।

(झ) आकर्णेति । आकर्णाकृष्टं यत् कोदण्डमण्डलं धनुर्मण्डलं तस्मात् निर्गच्छन्तीभिः शरधोरणीभिः वाणपरम्पराभिः नीरन्ध्रं यथा तथा निरुद्धम् आच्छन्नं भुवनकन्दरं जगदभ्यन्तरं यस्मिन् तादृशः निर्भरः निरतिशयः । धानुष्कता धनुःशिक्षेत्यर्थः । रथवरस्य रथश्रेष्ठस्य पुष्पकस्येत्यर्थः केतुदण्डं ध्वजयष्टिम् । शरच्छटाः वाणपरम्पराः ।

दशरथः। रावणावलोकनाटितकेन। कथं रामभद्रचरितप्रमोदवते भगवते महेन्द्रायापि कुप्यति दशास्यः। कर्णं दत्त्वा आकाशे। किमाह रावणः?।

स्मर्त्तुं युक्तः स तव समयः संयतं त्वां विमोक्तुं
शच्या यस्मिन्नहमतिशुचा याचितो भर्त्तृभिक्षाम्।
यद्वा क्षुद्रो जन इव कथं कथ्यतां राक्षसेन्द्रः
पाणौ यस्य स्मयगरजुषामौषधं चन्द्रहासः॥२५॥(ट)

अपि च रे(ठ) कपिललोमशबाहो अहल्याजार!
बाणान् स्यन्दनकेतुयष्टिसुहृदो रामस्य नामाङ्कितान्
दृष्ट्वा वासव! किं दृशां दशशती निःशल्यमुत्फुल्लति
सद्यस्तापसकामिनोऽस्य विमतेराज्ञो तु कृत्वा शिरस्
त्वां कारागृहदत्तगाढनिगडं कर्त्ता पुरो रावणः॥२६॥(ड)

---

(ञ) रामेति। रामस्य शरविद्यायां यत् वैशारद्यं वैचक्षण्यं तेन।

(ट) स्मर्त्तुमिति। स समयः तव स्मर्त्तुं युक्तः स्मरणीय इत्यर्थः। यस्मिन् समये शच्या तव पत्न्या अतिशुचा अतिशोकार्त्तया संयतं कारानिरुद्धं त्वां विमोक्तुम् अहं भर्त्तृभिक्षां याचितः। यद्वा अथवा क्षुद्रो जनइव राक्षसेन्द्रः रावणः कथं कथ्यताम् लोकैरिति शेषः क्षुद्रं जनम् आत्मश्लाघिनं यथा लोकाः कथयन्ति तथा रावणं मा कथयन्तु इति भावः। यस्य रावणस्य पाणौ स्मयगरजुषां गर्वविषसेविनां गर्वितानामित्यर्थः औषधं दमन इति भावः चन्द्रहासः तदाख्यः असिः विद्यते इति शेषः।

(ठ) कपिलौ पिङ्गलौ लोमशौ बाहू यस्य तथोक्तः तत् सम्बुद्धौ, अहल्यायाः गोतमपत्न्या जारः उपपतिः तत्सम्बुद्धौ जारस्तूपपतिः समावित्यमरः।

(ड) बाणानिति। रे वासव! इन्द्र! रामस्य नामाङ्कितान् स्यन्द-

रावणः । भूय आकाशे कर्णं दत्त्वा । किमाह वत्सो मे रामभद्रः ? अहो ! (ढ) वालिबालवयस्य पौलस्त्य ! भवादृशेभ्यो वीरवरपरिभाषाः प्रवर्त्तन्ते तत् किमिदं नाम यदन्यः प्रतिपक्षोऽन्यस्मै कुप्यते तदेहि मामेव योधय । यद्दुर्म्मार्गमार्गणाद् दाशरथिना क्षत्रियेण भवान् विनेय एव । विचिन्त्य । किमाह रावणः ? रेरे मानुषीपुत्र अयमसावक्षत्रियो रावणः स भवान् क्षत्रियो रामः तद् दृश्यतां कतरो विनेयः कतरो विनेतेति । किमाह रामभद्रः ? हंहो अमानुषीपुत्र ! अयमसौ क्षत्रियो रामः स भवानक्षत्रियो रावणस्तदत्र दृश्यतां कतरो विनेयः कतरो विनेतेति ।

---

नकेतुयष्टिसुहृदः रथध्वजदण्डनिपातिन इत्यर्थः शाणान् शरान् दृष्ट्वा तव दृशां दशशती सहस्रं नयनानीत्यर्थः निःशल्यम् उद्धृतहृदयशल्यमिति भावः यथा तथा किं कथम् उत्फुल्लति विकसति आनन्देनेति भावः । रावणः आजौ युद्धे अस्य विमतेः दुर्बुद्धेः तापसस्यासौ कामी चेति तथोक्तस्य तपश्चरणेऽपि स्पृहासक्तेरिति भावः रामस्य सद्यः सहसा शिरः कृत्त्वा छित्त्वा प्रगे प्रातःकाले त्वां कारागृहे दत्तं गाढं कठिनं दुर्भेद्यमिति यावत् निगडं यस्य तादृशं कर्त्ता करिष्यति । शार्दूलविक्रीडितं वृत्तम् ।

(ढ) वालीति । वालिनो वानरराजस्य बाल्यवयस्य ! बाल्यसुहृन्मित्र ! वा शैशवमित्र ! शैशवे स्थितो वाली त्वां सन्ध्यायां लाङ्गूलेनाकृष्य सप्तसु सागरेषु जलं पाययामासेति प्रसिद्धिरिति सोल्लुण्ठनोक्तिः । यद्वा वालिनः बालानां लोम्नां वयस्यः तत्सम्बन्धी वाली त्वां स्वगात्रलोमान्तर्गतं कृत्वा सन्ध्यामुपासाञ्चक्रे इति च प्रसिद्धिरिति बोध्यम् । भवादृशेभ्यः महद्भ्यः इति भावः वीरवराणां वीरश्रेष्ठानां परिभाषाः

बाणः । विलोक्य । कथममर्ष(ण)दर्पिताभ्यां रामरावणाभ्यां परस्परं प्रत्युपक्रान्तमिषुवर्षाद्वैतम् ।

बाणी । ससम्भ्रमम् । सुरपरमेस्सर ! भीषणं वट्टदि । जदो (त)णिविडपाडिदपडाआवडा विधुरिदबंधुरधुरावंधा तक्खणदो खंडिदक्खदंडा ताडणभंगिभंगुरिदप्पगहपरिग्गहा णिम्मिहीदगमणप्पवणचक्कचंकमणा उद्दामुद्दलिदहीकूवरप्पवरा इमाणं असमाणा परिप्फुरंति दोह्णमाणा बाणा। अविअ पडिक्खलिदजक्खपक्खा भग्गचारणसंचरणा मंथरिदणिरवज्जविज्जाहरविहारा रभसुम्मूलिदसुरासुर-

---

नियमाः प्रवर्त्तन्ते प्रचलन्ति महान्तो यूयं यादृशं वीरजनकर्त्तव्यमुपदिशथ तथैवान्ये समाचरन्ति, अत्र तु द्वन्द्वयुद्धे उभयोरेव परस्परं प्रति कोपः समुचितः नान्यं प्रतीति भावः । उन्मार्गगमनात् कुपथप्रवर्त्तनादित्यर्थः दाशरथिना दशरथनन्दनेन । विनेयः शिक्षणीय एव ।

विनेता शिक्षयिता ।

(ण) अमर्षेण क्रोधेन । उपक्रान्तम् आरब्धम् इषुवर्षाद्वैतम् अद्वितीयबाणवृष्टिरित्यर्थः ।

(त) निविड़ेति निविड़ं दृढं यथा तथा पाटिताः कर्त्तिताः पताकापटा ध्वजपटाः यैः तथाभूताः । विधुरितेति विधुरितः खण्डितः बन्धुरः उन्नतः आनतश्च धुरायाः रथाग्रभागस्य बन्धः बन्धनं यैः तथोक्ताः । खण्डितेति खण्डिताः अक्षदण्डाः रथावयवविशेषा यैः तथाविधाः । ताड़नेति ताड़नस्य प्रहारस्य भङ्ग्या वैचित्र्येण भङ्गुरिताः क्षयिताः विभ्रंशिता इत्यर्थः । प्रग्रहाणां रश्मीनां परिग्रहा यैः तथारूपाः । निम्मथीतेति निम्मथीतं निवारितं गमनप्रवणं प्रयाणोन्मुखानां चक्राणां रथाङ्गानां चङ्क्रमणं यैः तथोक्ताः । उद्दा-

प्पसरा विसस्सापत्रअप्पवत्तविवडवित्यारा णिठ्ठुरणिद्दाविदगंधव्ववग्गा प्पअडविध्वंसिदसिध्वसंघा गअणंगणुत्तासिदसउन्तसंताणा कहिं दाणिं उण इमाणं ण प्पसरिदा सरसंघाआ।(४)

---

(४) सुरपरमेश्वर ! भीषणं वर्त्तते यतो निविष्टपाटितपताकापटा विधुरितबन्धुरधुरावन्धास्ततत्त्वणतः खण्डिताच्चदण्डास्ताडनभङ्गिभङ्गुरितप्रग्रहपरिग्रहा निगृहीतगमनप्रवणचक्रचङ्क्रमणा उद्दामदलितदीर्घकूबरप्रवरा अनयोरसमानाः परिस्फुरन्ति दीर्घप्रमाणा वाणाः। अपिच परिस्खलितयक्षपक्षा भग्नचारणसञ्चरणा मन्थरितनिरवद्यविद्याधरविहारा रभसोन्मूलितसुरप्रसरा विषण्णपन्नगप्रपन्नविवरविस्तरा निष्ठुरनिस्तापितगन्धर्ववर्गाः प्रकटविध्वंसितसिद्धसङ्घाः गगनाङ्गणोत्त्रासितशकुन्तसन्तानाः क इदानीं पुनरेतयोर्न प्रसृताः शरसङ्घाताः।

---

मेति। उद्दामम् उच्छृङ्खलं यथा तथा दलिताः खण्डिताः दीर्घा महान्तः कूबरप्रवराः युगन्धरश्रेष्ठा यैः तथाभूताः अनयोः रामरावणयोः असमाना निरुपमाः परिस्फुरन्ति प्रवर्त्तन्ते दीर्घप्रमाणाः बृहन्तः वाणाः शराः। परिस्खलितेति। परिस्खलिताः इतस्ततः पतिताः यक्षाणां देवयोनिविशेषाणां पक्षाः गणाः येभ्यः तादृशाः। भग्नेति। भग्नं रहितं चारणानां देवयोनिभेदानां सञ्चरणम् अन्तरीक्षे विचरणं यैः तथाविधाः। मन्थरितेति मन्थरिता मन्दीकृताः निरवद्याः सुन्दराः विद्याधराणां विहाराः गगनविहरणानि यैः तथोक्ताः। रभसेति रभसेन वेगेन उन्मूलिताः निराकृताः सुराणां देवानां प्रसराः गतयः यैः तथारूपाः। विषण्णेति विषण्णैः भीतैः पन्नगैः भुजङ्गैः प्रपन्नाः

चारणः। सश्लाघमाव्य। अतिहि सुदूरमन्तरं(ध)कार्मुककर्मणि विरिञ्चिविरोचनकुलतिलकयोरनयोर्हस्तलाघवस्य तथाहि।

रघुपतिवदनेन्दौ कार्मुकैः पङ्क्तिसंख्यै-
र्दश विकिरति बाणान् यातुधानप्रधानः।
दशभिरपि च काण्डैरेककोदण्डबाहो
प्रहरति दशवक्त्रीं राघवो रावणस्य ॥ २७ ॥ (द)

---

प्राप्ताः आश्रिता इत्यर्थः विवरविस्तरः गर्त्तसमूहः येभ्यः तथोक्ताः। निष्ठुरेति। निष्ठुरं निर्दयं यथा तथा निःशेषेण तापिताः गन्धर्वनगर्यः यैः तथाविधाः। प्रकटेति। प्रकटं सम्यक् विभ्रमिताः स्थानात् च्याविताः सिद्धानां सङ्घाः समूहाः यैः तथाभूताः। गगनेति। गगनाङ्गणेषु उत्त्रासिताः शकुन्तानां पक्षिणां सन्तानाः निवहाः यैः तथोक्ताः। क कुत्र, प्रसृताः चलिताः। शरसङ्घाताः शरश्रेणयः। एतयोः रामरावणयोः।

(ध) सुदूरम् अति महत् अन्तरं प्रभेदः। कार्मुककर्मणि धनुर्व्यापारे। विरिञ्चिः ब्रह्मा विरोचनः सूर्यः तयोः कुलतिलकयोः वंशभूषणयोः अनयोः रावणदाशरथ्योरित्यर्थः हस्तलाघवस्य हस्तयोः क्षिप्रकारिता।

(द) रघुपतीति। यातुधानप्रधानः राक्षसश्रेष्ठः रावणः पङ्क्तिसंख्यैः दश वाम हस्तधृतैरित्यर्थः कार्मुकैः धनुर्भिः रघुपतेः रामस्य वदनेन्दौ मुखशशिनि दशबाणान् विकिरति विक्षिपति। राघवः रामः एककोदण्डबाहो एकधनुर्धरः सन् दशभिः काण्डैः शरैः अपि च अपिशब्दोऽत्र एवार्थकः। रावणस्य दशानां वक्त्राणां समाहारः तां दशवक्त्रीं दशमुखानीत्यर्थः प्रहरति विध्यति। मालिनीवृत्तम्।

अपिच। सुरचक्रवर्त्तिन्! इह हि कामिनामनुरागपरिग्रहो(ध)गुणलवलाभलोभेन दोषप्रमोषमावहति तथाहि।

रामच्छिप्तान् प्रतीच्छत्ययमिह विशिखान् वक्षसा राक्षसेन्द्रः
सीताहस्ताब्जजाग्रार्पितमलयभवस्थासकान्मन्मथान्धः।
सोल्लासं हारवल्लीकवचपरिचिते ते तु तस्मिन् विशन्तः
स्वेदाम्भःप्रारभन्ते पुलकमुपनयन्त्युद्धतिं चार्पयन्ति ॥२८॥(न)

आकाशे कर्णं दत्त्वा। किमाह (प) सविचिकित्साक्रोधं रामः? न केवलममुना समबाणवर्षेण रावणप्रमार आर-

---

(ध) अनुरागस्य परिग्रहः ग्रहणम् अनुरागितेतिभावः। गुणलवस्य गुणलेशस्य स्वल्पस्याऽपि गुणस्येत्यर्थः लाभे यः लोभः लालसा तेन दोषाणां प्रमोषम् अपहरणम् आवहति करोति कामिनः सदोषमपि वस्तु अनुरागभाजनस्य इष्टं वस्तु मन्यन्ते इति भावः

(न) रामक्षिप्तानिति। इह संग्रामे अयं मन्मथान्धः कामान्धः राक्षसेन्द्रः वक्षसा रामेण क्षिप्तान् प्रहितान् सीताया हस्त एव अम्बुजं तस्य अग्रेण अर्पितं न्यस्तं मलयभवं चन्दनमित्यर्थः स्थासकं वर्णविशेषः येषु तान् विशिखान् शरान् प्रतीच्छति गृह्णाति सीतानुरागितया तत्प्रियवस्तूनामपि प्रियत्वात् सादरग्रहणमितिभावः। ते तु शराः हारवल्ली हारावली सा एव कवचं वर्म तेन परिचिते न्यस्ते हारालङ्कारे इत्यर्थः तस्मिन् वक्षसि सोल्लासं सानन्दं विशन्तः प्रविशन्तः सन्तः स्वेदाम्भः स्वेदजलं प्रारभन्ते निःसारयन्ति पुलकम् रोमाञ्चम् उपनयन्ति जनयन्ति, उद्धतिम् औद्धत्यं सौभाग्यगर्वमित्यर्थः अर्पयन्ति ददति च। रामशराणां सीताहस्तानुलिप्त गन्धचूर्णतया रावणहृदि तत्स्पर्शात् स्वेदरोमाञ्चौ सात्त्विकभावौ सौभाग्यगर्वश्च उदित इति भावः। स्रग्धरावृत्तम्।

(प) सविचिकित्साक्रोधं विचिकित्सा संशयः विचिकित्सा तु संशय

भ्यते अपितु एतस्य जानकीकरतलस्पर्शकेलिसम्भावनीयगा त्रेषु पत्तिषु रोमाञ्चकञ्चुकं यावदामोच्यते तावत् विश्वामित्रोपदिष्टमन्त्रैर्दिव्यास्त्रैरमुमायोधयामि ।

सारणी । सचमत्कारम् । किं उण एदं (फ) [illegible]मूलफलिदप्फुलिंगजडिलजालावलीविलीणतुहिणसरणिसारणीपूरिज्जमाणमंदाइणीचंदभाआपहुदिणदीसत्थमंथरिदवित्थारो सअलकुलसेलचक्कवट्टी कुबेराधिट्ठिदं दिसमधिव-

---

इत्यमरः क्रोधश्च ताभ्यां सहितं यथा तथा । रावणप्रमारः रावणविनाश । जानकीति जानक्याः करतलस्पर्श एव केलिः तेन सम्भावनीयानि आदरणीयानि गात्राणि अवयवाः येषां तादृशेषु पत्तिषु शरेषु रोमाञ्चकञ्चुकं सत्त्वगुणोद्रेकात् रोमाञ्चरूपमावरणं यावत् आमोच्यते त्रियते, तावत् विश्वामित्रेण उपदिष्टो मन्त्रो येषां तादृशैः दिव्यास्त्रैः अमुं रावणम् आयोधयामि ।

(फ) आमूलेति । आमूलात् फलिता प्रसृता स्फुलिङ्गैः अग्निकणैः स्त्रियां स्फुलिङ्गोऽग्निकण इत्यमरः । जटिला व्याप्ता या ज्वालावली शिखासमूहः तया विलीना विलयं गता गलिता इत्यर्थः याः तुहिनसरणीसारण्यः तुषारमयरथ्यारूपा नद्यः ताभिः पूर्यमाणानां मन्दाकिनीचन्द्रभागाप्रभृतीनां नदीनां सार्थैः सङ्घैः मन्थरितः आर्द्रीकृतः विस्तरः आभोगः यस्य तथाभूतः सकलानां कुलशैलानां चक्रवर्ती अधीश्वरः कुवेरेण अधिष्ठितां दिशम् उत्तरामित्यर्थः अधिवसन् अधितिष्ठन् हिमवान् । सन्तपनेति सन्तपनेन सन्तापेन उत्तरलानां गलितानां शिलाजतूनां शैलेयाख्य गन्धौषधिविशेषाणां निस्यन्दनिर्भरेण दह्यमानैः चरणैः पदैः सङ्क्रमणेन आक्रान्दितानाम् उन्मदितकरीन्द्राणां प्रवेशेन सङ्क्षुभ्यताम् आलोड्यमानानां स्रोतसां सलिलैः क्षालितेभ्यः प्रतिहतेभ्यः तटान्तेभ्यः निपततां प्रस्तराणां विसारा(व)

संतो हिमवंतो संतव णुत्तरलसिलाजदुणिसंदणिज्झरद-
हिज्जंतचरणचंकमणक्कंदिअकरिन्दप्पवेससमूससंतसोत्तस-
लिलम[illegible]लिदतडंतणिवतडप्पत्थर वित्थारप्पअट्टसद्दसंदो-
हभरिद[illegible]रगुरुगुहाकुहरमज्झो विंझो सिमिसिमाअं-
तसंततसिरिखंडमंडलोप्पब्भट्टभुअङ्गभोअभरिज्जंततंबव-
ण्णीसोत्तसंत्तासिदसिप्पिसंपुडमुहपलोट्टमोताहलकरंबिद-
तंबण्णीपवणविच्छिण्णणिअंबडंबरालंकिददक्खिणमहीवलओ
मलओ डाहकुविदकुंभसंभवमहामुणिगेहिणीदिण्णविव-

---

बाहुल्यात् प्रवृत्तः उद्भूतः यः शब्दसन्दोहः शब्दसमूहः तेन भरितं पूरितं गुरु महत् गुहाकुहराणां कन्दराभ्यन्तराणां मध्यं यस्य तथाविधः विन्ध्यः विन्ध्यगिरिः । सिमेति सिमसिमायमानानां सन्तापेन तादृग्ध्वनतामित्यर्थः सन्ततानाम् अविरलानां श्रीखण्डानां चन्दनानां मण्डलीभ्यः श्रेणिभ्यः भ्रष्टा विच्युता ये भुजगाः सर्पाः तेषां भोगैः शरीरैः उत्तापितैरिति भावः भ्रियमाणा पूर्यमाणा या ताम्रपर्णी तन्नाम्नी नदीविशेषः तस्याः स्रोतसि प्रवाहे सन्त्रासितानां भीतानां भुजङ्गेभ्य इति भावः शुक्तीनां जलचरविशेषाणां सम्पुटमुखेभ्यः आवरणयुगलाग्रेभ्यः पतितैः निःसृतैः मुक्ताफलैः करम्बितेन खचितेन युक्तेनेत्यर्थः ताम्रपर्णीपवनेन तदाख्यनदीवातेन विच्छिन्नः भग्नः यः नितम्बडम्बरः मध्यप्रदेशविस्तरः तेन अलङ्कृतं शोभितं दक्षिणं महीवलयं पृथिवीभागः येन तथाभूतः मलयः तदाख्यो गिरिः । दाहेति दाहेन अग्निसन्तापेन कुपिता या कुम्भसम्भवस्य महामुनेरगस्त्यस्य गेहिनी पत्नी लोपामुद्रा इत्यर्थः तया दत्तानां विषमदृष्टीनां कटाक्षपातेन विक्षेपसमूहेन सङ्कुचितानां कुण्ठितानां शापभयादिति भावः । चटुलानां चपलानां जालकानां रत्नाकरान्वेषिणां किरातभेदानां उत्पीडात्

सद्दिठ्ठिच्छडाकडप्पसंकोडिदचडुलजालुप्पीडपीडापरिह-
रिज्ज माणमाणिक्कचक्कवालवेल्लिअलदाभवणगब्भसंभाविद-
हुदवह च्छेदमुहुत्तसुहपसुत्तविज्जाहरमिहुणजणिदमण-
मोहणो रोहणो। (५)

(५) किं पुनरिदमामूलफलितस्फुलिङ्गजटिलज्वालावलीविलीनतु-
हिनसरणिसारणीपूर्यमाणमन्दाकिनीचन्द्रभागाप्रभृतिनदीसार्थमन्यरित-
विस्तरः सकलकुलशैलचक्रपतिः कुबेराधिष्ठितां दिशमधिवसन् हिमवान्
सन्तपनोत्तरलशिलाजतुनिस्यन्दनिर्झरदह्यमानवरणचङ्क्रमणाक्रन्दितक-
रीन्द्रप्रवेशसमुत्कसत् स्रोतःसलिलस्फालिततटान्तनिपतत्प्रस्तरविस्ता-
रप्रवृत्तशब्दसन्दोहभरितगम्भीरगुरुगुहाकुहरमध्यो विन्ध्यः सिमसिमा-
यमानसन्तप्तश्रीखण्डमण्डलीभ्रष्टभुजगेन्द्रभोगभिद्यमानताम्रपर्णीस्रोत-
स्सन्तापितशुक्तिसम्पुटमुखपतितमुक्ताफलकरम्बितताम्रपर्णीपवनविच्छिन्न
नितम्बडम्बरालङ्कृतदक्षिणमहीवलयो मलयो दाहकुपितकुम्भसम्भव-
भक्षाशनिगेहिनीदत्तविवर्तदृष्टिच्छटाकलापसङ्कुचितचटुलजालकोत्पीड-
परिह्रियमाणमाणिक्यचक्रवालवेल्लितलताभवनगर्भसम्भावितहुतवहोच्छे-
दमूहूर्तसुखसुप्तविद्याधरमिथुनजनितमनोमोहनो रोहणः।

उत्पाटनात् उद्धरणादिति यावत् या पीडा क्लेशः तया परिह्रियमाणैः
माणिक्यचक्रवालैः माणिक्याख्यरत्नसमूहैः वेल्लितानि यानि लताभव-
नानि तेषां गर्भेषु अभ्यन्तरेषु सम्भावितः निश्चितः हुतवहस्य अग्नेः
छेदः खण्डः यैः माणिक्यानाम् अग्निवदुज्ज्वलत्वादिति भावः।
तादृशानां मुहूर्त्तसुखप्रसुप्तानाम् अल्पकालसुखनिद्रितानां विद्याधर-
मिथुनानां जनितं उत्पादितं मनसः मोहनं येन तादृशः रोहणः
तदाख्यगिरिरित्यर्थः। इदं पुनः किम्? कथमित्यर्थः? इत्यन्वय.।

पुरन्दरः । ध्रुवं शस्त्रमाग्नेयमामन्त्रितं (ञ) पौलस्त्यदमनविधावस्त्रतन्त्रेण रामचन्द्रेण । यतः ।

रामनर्त्तितमहाधनुर्मुखा-
द्यत्र यत्र निपतन्ति सायकाः ।
तत्र तत्र जलधेर्जलोच्चये
कार्य्यतो विरचयन्ति वाडवम् ॥ २९ ॥ (भ)

अपिच ।

सद्यः कल्पद्रुमाणां मणिकुसुमवतां वर्त्तते दावदाहः (म)
क्रन्दन्त्युत्तप्तधारासुतिकृतकरकावृष्टयस्तोयवाहाः ।
रामस्योच्चण्डचापप्रणिहितहुतभुङ्मार्गणार्चिःप्रपञ्चै-
स्तूर्णोत्तीर्णः समुद्रं सरति च विसरो मेरुहेमद्रवस्य ॥३०॥

---

(ञ) आमन्त्रितम् आहूतं पौलस्त्यस्य रावणस्य दमनविधौ शासनव्यापारे । अस्त्रतन्त्रेण अनलसेन सोत्साहेनेति यावत् ।

(भ) रामेति । रामेण नर्त्तितम् आस्फालितं यत् महाधनुः, तस्य मुखात् सायकाः शराः यत्र यत्र निपतन्ति, तत्र तत्र जलधेः समुद्रस्य जलोच्चये जलराशौ कार्य्यतः दहनव्यापाररूपकार्य्यवशात् वाडवं विरचयन्ति प्रणयन्ति वाडवानलवत् समुद्रजलानि दहन्तीति भावः । इन्द्रवज्रावृत्तम् ।

(म) सद्य इति । रामस्य उच्चण्डात् प्रचण्डात् चापात् धनुषः प्रणिहितस्य प्रक्षिप्तस्य हुतभुङ्मार्गणस्य आग्नेयशरस्य अर्च्चिषां ज्वालानां प्रपञ्चैः विस्तरैः मणिकुसुमवतां रत्नपुष्पशालिनां कल्पद्रुमाणां देवतरुविशेषाणां सद्यः दावदाहः दवानलसन्तापः वर्त्तते । तोयवाहाः मेघाः उत्तप्तानां धाराणां सुत्या स्रावेण कृता जनिता करकावृष्टिः शिलावृष्टिर्येषां तादृशाः सन्तः अत्युत्तापकाल एव करका-

चारणः । आकाशे कर्णं दत्त्वा । किमाह रावणः ? कथं दिव्यास्त्रसमरसमारम्भो रामस्तदहमपि समारभे । यतः ।

आग्नेयास्त्रं हृदयदवथुर्वारुणं हन्त शस्त्रं
धाराबाष्पं पवनशरतां यान्ति च श्वासदण्डाः ।
तज्जानक्या किमिव न कृतं रक्षसां स्वामिनो मे
दिव्यैरस्त्रैर्यदयमपरं तापसः कर्त्तुकामः ॥ ३१ ॥ (य)

चारणी । (र) आमूलुद्दलिअपारिआअतरुराइणो उक्कंपिदाणप्पकप्पपादवा विसुत्तिदसंताणअतरुसंताणा विमद्दि-

---

दृष्टिप्रसिद्धेरिति भावः । क्रन्दन्ति रुदन्तीवेति प्रतीयमानोत्प्रेक्षा अचेतनानां जलदानां रोदनासम्भवादिति ध्येयम् । किञ्चेति चार्थः मेरोः सुमेरुपर्वतस्य हेम्नां द्रवस्य विसरः प्रसरः विस्तर इत्यर्थः समुद्रं तूर्णं यथा तथा उत्तीर्य सन् सरति व्याप्नोतीत्यर्थः । स्रग्धरावृत्तम् ।

(य) आग्नेयास्त्रमिति । हन्त खेदे । हृदयदवथुः हृदयस्य सन्तापः आग्नेयास्त्रं धाराबाष्पम् अनवरताश्रुधारा वारुणं शस्त्रं श्वासदण्डाः दण्डवदायता इत्यर्थः निश्वासाः पवनशरतां वायव्यास्त्रत्वं यान्ति च । जानक्या रक्षसां स्वामिनो मे मम तत् किमिव न कृतं सर्वमेव आग्नेयास्त्रादिकार्यं कृतमित्यर्थः अननुरागादिति भावः अयं तापसो रामः दिव्यैरस्त्रैः यत् अपरं कर्त्तुकामः चिकीर्षुरित्यर्थः । जानकीनिमित्तं सर्व एव आग्नेयास्त्रादिप्रहारसदृशः सन्तापादिर्मया सोढः तापसेनान्यत् किं कर्त्तुं शक्यते इति तात्पर्यार्थः ।

(र) आमूलेति । आमूलं मूलपर्य्यन्तम् उद्दलिता उत्पाटिताः भग्ना वा पारिजाततरुराजाः यैः तथोक्ताः । उत्कम्पितेति उत्कम्पितास्चालिता अनल्पा बहवः कल्पपादपाः कल्पतरवः यैः तथा-

दामंदमंदारदुमा णिदलिदणंदणवणहरिश्चंदणा इमे आसु-
त्तिदसत्तभुअणावसाणा पवमाणा पवट्टति (६)

पुरन्दरः । (ल)नूनमात्मनि कार्शानवमस्त्रमसमर्थं समर्थयता त्रिभुवनाभोगभङ्गनिमित्तमग्निमारुतसंयोग इति सामीरणमासूत्रितं राक्षसराजेन तथाहि ।

दिव्यानां यानपङ्क्तीर्दिशि दिशि विकिरन् भग्नचक्राक्षदण्डं
पत्त्रानां स्वर्द्रुमाणाममरमधुलिहां रुग्णशाखाप्रकाण्डः ।
भञ्जन् बर्हावतंसं हरसुतशिखिनः पिच्छविच्छेदनाभि- (व)
र्वायुर्वात्येष चण्डो जलधितटरुहां मर्दनो विद्रुमाणाम् ॥ ३२ ॥

(६) आमूलोद्दलितपारिजाततरुराजा उत्कम्पितानल्पपादपा विस्खलितसन्तानतरुसन्ताना विमर्दितामन्दमन्दारद्रुमा निर्गलितनन्दनवनहरिचन्दना इमे आस्खलितसप्तभुवनावसानाः पवमानाः प्रवर्त्तन्ते ।

---

विधाः विस्खलितेति । विस्खलिताः भञ्जिताः सन्तानतरूणां देवतरुविशेषाणां सन्तानाः सङ्घाः यैः तादृशाः । विमर्दितेति विमर्दिता अमन्दा उत्कृष्टाः मन्दारद्रुमा यैः तथाविधाः । निर्गलितेति । निर्गलिताः पतिताः नन्दनवनस्य हरिचन्दनाः चन्दनविटपा येभ्यः तद्रूपाः । आस्खलितेति आस्खलितं विनाशितं सप्तानां भुवनानाम् अवसान ध्वंसः येभ्यः तथोक्ताः पवमानाः वायवः प्रवर्त्तन्ते वहन्ति ।

(ल) नूनं मन्ये निश्चितं वा । कार्शानवं कृशानोरिदं कृशानुदैवतं वा आग्नेयमित्यर्थः अस्मदीयम् अस्त्रं सोढुमिति शेषः । समर्थयता सम्भावयता त्रिभुवनस्य आभोगभङ्गनिमित्तं विस्तारविध्वंसनार्थं सर्वसंहारार्थमिति यावत् अग्निमारुतयोः संयोगः इति विविच्येति भावः सामीरणं वायव्यम् आसूत्रितं प्रयुक्तम् ।

(व) दिव्यानामिति । दिव्यानां खेचराणां यानपङ्क्तीः विमा-

वारणी । किं उण (ग) मसिणवट्टिदराअवट्टसिणिद्धमुद्धसामलच्छाएण वि च्छाइज्जइ गअणङ्गणं दुद्दिणेण आवज्जिज्जइ कलकलरवुक्कंठाविसंठुलकंठाहिं तंडवाडंबरो सिहं-

---

नानि इत्यर्थः भग्नं चिह्नं लक्षणं येषां तादृशाः उरवः महान्तः दण्डाः ध्वजयष्टयः यस्मिन् तद् यथा तथा दिशि दिशि विकिरन् विक्षिपन् अमरा मरणरहिता मधुलिहः भ्रमराः येषु तादृशानां तदीयमधुनः अमृतस्वरूपत्वेन तेषां दिव्यत्वादिति भावः । पञ्चानां स्वर्द्रुमाणां देवतरूणां मन्दारपारिजातसन्तानकल्पतरुहरिचन्दनानामित्यर्थः रुग्णाः भग्नाः शाखाः प्रकाण्डाः स्कन्धाश्च येन तथाभूतः शाखाः प्रकाण्डांश्च रुजन्नित्यर्थः । पिच्छानां विच्छेदनाभिः छेदनैः हरसुतस्य कार्त्तिकेयस्य यः शिखी मयूरः तस्य वर्हावतंसं पिच्छरूपं भूषणं भञ्जन् खण्डयन् तथा जलधितटरुहां समुद्रतटजातानां विद्रुमाणां प्रवालानां द्रुमविशेषाणां वा मर्दनः दलनः चण्डः प्रचण्डो वायुः याति वहति । स्रग्धरावृत्तम् ।

(ग) मसृणेति । मसृणं कोमलं वर्त्तितं परिष्कृतं यत् राजपट्टं नीलवर्णमणिविशेषः तद्वत् स्निग्धं मुग्धं सुन्दरञ्च तेन श्यामला छाया कान्तिर्यस्य तथाभूतेन दुर्दिनेन मेघावरणेनेति यावत् मेघाच्छन्नेऽह्नि दुर्दिनमित्यमरः । अपि गगनाङ्गणम् अन्तरीक्षाभोगः छाद्यते आव्रियते । आवर्ज्यते आह्रियते कर्त्तुमारभ्यते इति यावत् । कलेति कलः मधुरास्फुटः यः कलरवः केकारव इत्यर्थः तस्मिन् या उत्कण्ठा औत्सुक्यं तया विसंष्ठुलः व्यग्रः कण्ठो यासां तादृशीभिः शिखण्डिनां मयूराणां मण्डलीभिः श्रेणिभिः ताण्डवानां नृत्यानाम् आड़म्बरः उद्योगः । निविडायते नीरन्ध्रायते न विच्छिद्यते इत्यर्थः । मृणालेति मृणालदण्डा इव पाण्डुराः शुभ्राः ताभिः । मण्डितेति मण्डिता शोभिता आच्छादिता वा ब्रह्माण्डकन्दरा त्रिभुवनान्तरं याभिः

डिमंडलीहिं णिबिडिज्जइ मिणालदंडपंडुराहिं मंडिदब्रह्मंडकंदराहिं जलधाराधोरणीहिं गज्जिज्जइ णिविडुल्लासिअवंसकरिकरिल्लविदरिल्लेहिं फारफ्फालिदगंभीरभेरीभीषणेहिं जलहरेहि (७)।

पुरन्दरः। मन्ये पवनोद्दीपितदहनास्तशान्तये जलधरास्त्वमिदमाहृतं रामभद्रेण तथाहि।

तैलस्निग्धान्ध्रनारीचिकुरविरचनामेचकाः शक्रचाप-
ज्योतिर्लक्ष्माण एते निचुलपरिचिताम्रातकाचान्तवाराः।
न्यस्यन्तः कैतकीनां मुकुलपरिकरं केकिनां नृत्यकारा (८)
स्तारावर्त्मोन्नमन्तः कमलकवलनाः पूरयन्त्यम्बुवाहाः॥ २२॥

---

(७) किं पुनर्मसृणवर्त्तितराजपट्टस्निग्धसुग्धेन श्यामलच्छायेनापि छाद्यते गगनाङ्गणं दुर्दिनेन। आवर्ज्यते कलकलरवोत्कण्ठाविसंष्ठुलकण्ठाभिस्ताण्डवाडम्बरः शिखण्डिमण्डलीभिः। निबिडायते मृणालदण्डपाण्डुराभिर्मण्डितब्रह्माण्डकन्दराभिर्जलधाराधोरणीभिः। गर्ज्यते निबिडोल्लासितवंशकरीरैः करीन्द्रसदृशैः स्फारोत्स्फारितगम्भीरभेरीभीषणैर्जलधरैः।

---

तादृशीभिः जलधाराणां धोरणीभिः परम्पराभिः। निविडेति निविडं घनं यथा यथा तया उल्लासिता उद्भाविताः वंशानां करीराः अङ्कुराः यैः तादृशैः करीन्द्रसदृशैः गजराजतुल्यैः। स्फारेति स्फारं प्रकटं यथा तथा उत्स्फारिताः ताड़िताः या गम्भीरभेर्यः तद्वत् भीषणाः प्रचण्डध्वनय इत्यर्थः तैः।

(८) तैलेति। तैलेन स्निग्धा अन्ध्रनारीणां अन्ध्रदेशीयकामिनीनां ये चिकुराः कुन्तलाः चिकुरः कुन्तलो वालः कचः केशः शिरोरुह इत्य-

मतश्च। रोदसीकन्दराभोगमानयष्टिसमक्रमैः।
क्रियतेऽर्णवमग्नेव धाराम्भोभिर्जगत्त्रयी ॥ ३४॥(स)

दारणी। पेक्खदु देवो(ह) अस्रोस्सजुज्झंतजलहत्थिसत्था कल्लोलकेलिणिलक्कंतगिरिपक्खिणो लक्ख् खिज्जंततिअसेंदसिंधुरबंधवा समुल्लसंतपोऊससेसा दोसंतदेवद्दुमपादवालवाला अवलोइज्जंतणाराअणसूअरसमुध्धरिदधरिणिवेढणिलुक्कणठ् ठाणा वित्थरंतकोत्थुहसगोत्तमणिकरंबिदपा-

---

मरः। तेषां विरचना विन्यासा इव मेचकाः श्यामलाः शक्रचापस्य इन्द्रधनुषः ज्योतिः लक्ष्म येषां तादृशाः शक्रधनुषालङ्कृता इत्यर्थः निचुलैः स्थलवेतसैः परिचिताः मेघोदये एव तेषामुद्भवादिति भावः चातकैः पक्षिभेदैः आचान्तं पीतं वाः जलं येषां तथोक्ताः केतकीनां मुकुलपरिकरं बकुलनिचयं न्यस्यन्तः अर्पयन्तः, केकिनां मयूराणां नृत्यकाराः नर्त्तनकारिणः कमलकवलनाः पद्मविध्वंसिनः अम्बुवाहाः मेघाः तारावर्त्मसु अन्तरीक्षेषु उन्नमन्तः उद्यन्तः सन्तः पूरयन्ति आच्छादयन्ति जगन्तीति शेषः। स्रग्धरावृत्तम्।

(स) रोदसीति। रोदस्योः द्यावाभूम्योः यः कन्दराभोगः अभ्यन्तरविस्तारः तस्य मानयष्टेः परिमाणदण्डस्य समः क्रमः अवयव येषां तादृशैः दिवो भुमेश्च कियदन्तरम् इति दिदृक्षयेव मानयष्टिरूपधारिभिरिति भावः धाराम्भोभिः जलधाराभिरित्यर्थः जगतां त्रयी त्रिभुवनम् अर्णवमग्नेव समुद्रपूरितेव क्रियते।

(ह) अन्योन्येति। अन्योन्यं परस्परं युध्यमानाः जलहस्तिनां सार्थाः सङ्घाः येषु तथोक्ताः। कल्लोलकेलये तरङ्गविहाराय निक्रान्ताः उड्डीनाः गिरिपक्षिणः सपक्षकपर्वतयासिपतङ्गा येभ्यः तादृशाः। लक्ष्यमाणाः दृश्यमानाः विदशेन्द्रस्य देवराजस्य सिन्धुरस्याभ्रया

पाआलजंबाला उच्छलंतलच्छीबालविलासुद्देसा सप्पपंचपंचजणजणणीसंखिणीसणाहा ससंभमब्भमंतकच्छवडिंभगब्भा पच्चडिज्जंतदामोदरणिद्दाविमद्दसअणिज्जसेसरमणिज्जा माहवमच्छातिमिगोत्तगिलिज्जंततिमिंगिला णिब्भरं भरंति भुअणाइं इमे समुद्दा (८) ।

---

(८) प्रेक्षतां देवः । अन्योन्ययुध्यमानजलहस्तिमार्थाः कल्लोलकेलिनिरस्तक्रान्तगिरिपक्षिणो लक्ष्यमाणत्रिदशेन्द्रसिन्धुरबान्धवाः समुल्लसत्पीयूषघोषा दृश्यमानदेवद्रुमपादपालवाला अवलोक्यमाननारायणसूकरसमुद्धृतधरणिपृष्ठनिलयनस्थाना विस्तार्यमाणकौस्तुभसगोत्रमणिकरम्बितपातालजम्बाला उच्छलल्लक्ष्मीबालविलासोद्देशा सप्रपञ्चपञ्चजनजननीशङ्खिनीसनाथाः ससंभ्रमभ्रमत् कृष्णकच्छपडिम्भगर्भाः

---

उच्चैःश्रवः सहचरा येषु तथाविधाः । समुल्लसन् प्रकाशतां गच्छन् पीयूषस्य अमृतस्य घोषः येषु तथाविधाः । दृश्यमानाः देवपादपानां देवतरूणाम् आलवालाः जलवेष्टनानि येषु तादृशाः । अवलोक्यमानं दृश्यमानं नारायणसूकरेण आदिवराहेण समुद्धृतस्य धरणीपृष्ठस्य भूतलस्य निलयनस्थानं निमज्जनप्रदेशः येषु तथाविधाः । विस्तार्यमाणाः प्रकाशमानाः कौस्तुभसगोत्रैः कौस्तुभरत्नसजातीयैः मणिभिः करम्बिताः पूरिताः पातालजम्बालाः रसातलपङ्का येषु तथाविधाः । उच्छलन् प्रकाशतां गच्छन् लक्ष्म्याः कमलायाः बालविलासस्य शैशवक्रीडनस्य उद्देशः स्थानं येषु तथोक्ताः सप्रपञ्चा सवंशा पञ्चजनस्य तदाख्यस्य महासुरस्य जननी माता या शङ्खिनी तया सनाथाः सहिताः । ससंभ्रमम् आकुलं यथा तथा भ्रमन्तः कृष्णकच्छपस्य कच्छपरूपिणः पातालवासिनो नारायणस्य डिम्भगर्भाः शावकसङ्घा येषु तद्रूपाः ।

पुरन्दरः । नूनमात्मनि वारुणास्त्रमप्यतन्त्रं (च) मन्यमानेन त्रिभुवनाभोगगर्भमहाकन्दरप्लावनाय जलं जलसंपृक्तं महाजलाय कल्पते इत्यौदन्वतमस्त्रमाहृतं पौलस्त्येन तथाहि ।

कुर्वन्तो वाडवाग्नेर्द्रुतकरिमकरग्रासमर्चिःप्रचारं (क)
दैत्यस्त्रीमुक्तहाहारवचकितवलच्छुक्तिनिर्मुक्तमुक्ताः ।
पश्चात्क्षेपेण चण्डोड्डमरितपयसः पक्षिणां क्ष्माधराणां
त्रीन् लोकान् प्लावयन्ति प्रसभविरचितावर्त्तमुद्राः समुद्राः ३५

प्रकटायमानदामोदरनिद्राविमर्दशयनीयशेषरमणीया माधवमहातिमिगोत्रैर्गिल्यमानतिमिङ्गिला निर्भरं भरन्ति भुवनानीमे समुद्राः ।

प्रकटायमानः प्रका[शा]मानः दामोदरस्य विष्णोर्निद्राविमर्दस्य निद्रार्थं देहपातनस्य शयनीयं शय्याभूत इत्यर्थः यः शेषः अनन्तनागः तेन रमणीयाः सुदर्शनाः । माधवस्य महातिमेः मत्स्यरूपिणो नारायणस्येत्यर्थः गोत्रैः कुलैः वंशीयैरित्यर्थः गिल्यमानाः तिमिङ्गिलाः जलचरविशेषा येषां तथाभूता इमे समुद्राः भुवनानि जगन्ति निर्भरम् अत्यर्थं भरन्ति व्याप्नुवन्ति ।

(च) अतन्त्रं सोढुमक्षयम् । त्रिभुवनाभोगस्य गर्भं उदरमेव महाकन्दरं महागुहा तस्य प्लावनाय युगपत् सर्वसंहारायेति भावः । जलं वारुणास्त्रसम्भूतमिति भावः जलेन सामुद्रेण सम्पृक्तं संयुक्तं महाजलाय जलप्लावनाय इत्यर्थः कल्पते प्रभवति इति विविच्य औदन्वतम् उदन्वतः समुद्रस्य इदम् तद्दैवतं वा अस्त्रं सामुद्रास्त्रमित्यर्थः ।

(क) कुर्वन्त इति । द्रुतः सत्वरः करिणां जलहस्तिनां मकराणाञ्च ग्रासो यस्य तादृशं वाडवाग्नेः अर्चिषां ज्वालानां प्रचारं प्रसारं

चारणौ। भअवं (ख)दससदच्छख! पेक्ख पेक्ख कलिदकलिकालकवलणा सत्तसाअरपाणप्पवीणा णिव्वाणणअरराअमग्गा धम्मद्दुममहारामा कोधपाअवप्पसरपरसुणो णिविडिदजडाजूटबंधा कमंडलुमंडिदहत्था पअडिदजोअपट्टा बंह्मसुत्तपवित्तिदखंधबंधा भअवंतो अगत्थिमहेसिणो लक्खसंखा संचरंति (१)।

---

(१) भगवन् दशशताक्ष! प्रेक्षस्व प्रेक्षस्व कलितकलिकालकवलनाः सप्तसागरपानप्रवीणा निर्वाणनगरराजमार्गा धर्मद्रुममहारामाः क्रोधपादपप्रसरपरशवो निबिडितजटाजूटबन्धाः कमण्डलुमण्डितहस्ताः प्रकटितयोगपट्टा ब्रह्मसूत्रपवित्रितस्कन्धबन्धा भगवन्तोऽगस्त्यमहर्षयो लक्षसंख्याः सञ्चरन्ति।

---

कुर्वन्तः। दैत्यस्तोमैः पातालवासिनोभिरिति भावः सुक्तेभ्यः हाहारवेभ्यः हाहेति शोकजनकचीत्कारेभ्यः चकितं सभयं वलन्तीभ्यः चलन्तीभ्यः शुक्तिभ्यः जलचरविशेषेभ्यः निर्मुक्ताः निर्गताः मुक्ताः येषु तथोक्ताः। पक्षिणां पक्षवतां क्ष्माधराणां पर्वतानां मैनाकादीनां समुद्रवर्त्तिनामिति भावः पक्षाणाम् उत्क्षेपेण आस्फालनेन यथाञ्च यथा तथा उद्भमरितानि उच्छलितानि पयांसि जलानि येषां तथाभूताः। तथा प्रसभं सहसा विरचिताः उत्थापिता आवर्त्तमुद्राः भ्रमिविलासा येषु तथाविधाः समुद्राः त्रीन् लोकान् जगन्ति प्लावयन्ति व्याप्नुवन्तीत्यर्थः। सम्भ्रान्तत्वम्।

(ख) दशशताक्ष! सहस्रलोचन! कलितेति कलितं कृतं कलिकालस्य कवलनं भक्षणं विनाश इत्यर्थः यैः तादृशाः अगस्त्याध्युषिते देशे कलिर्न प्रभवतीतिभावः। सप्तेति सप्तानां सागराणां पाने

पुरन्दरः। मन्ये (ग) त्रिभुवनपरिप्लावनपयः पाननिमित्तमगस्त्योपदिष्टमगस्त्यास्त्रं धनुषि संहितं रघुकुलराजपुत्रेण तथाहि।

लोपामुद्रानिबद्धोपचरणविधयो धौतवल्कोत्तरीया
रत्नानामाधिराज्ये विरचितरतयो ब्रह्मसूत्राञ्चितांसा
एते निर्यान्त्यगस्त्याश्चलचुलकपुराचान्तसप्ताब्धिवारो (घ)
रुद्राक्षाक्षावलीभिर्द्विगुणवलयिता बिभ्रतः कर्णपालौ॥३६॥

---

प्रवीणाः विचक्षणाः पीतसप्तसागरा इत्यर्थः निर्वाणनगरस्य मोक्षपुर्याः राजमार्गाः राजपथाः मोक्षधर्मोपदेशिन इति भावः। धर्मद्रुमस्य धर्मतरोः महान्तः आरामाः उपवनानि धर्मक्षेत्रभूता इत्यर्थः क्रोधपादपानां कोपतरूणां प्रसारस्य विस्तारस्य परशवः छेदनास्त्राणि जितक्रोधा इत्यर्थः निविडिता निविडं निबद्धा जटाजूटस्य जटाकलापस्य बन्धः यैः तादृशाः निबद्धजटाकलापा इत्यर्थः। कमण्डलुभिः जलपात्रविशेषैः मण्डिता अलङ्कृता हस्ता येषां तादृशाः कमण्डलुपाणय इत्यर्थः प्रकटितं प्रकाशितं योगपट्टं योगसाधनोपकरणविशेषः यैः तथाभूताः योगपट्टधारिण इत्यर्थः ब्रह्मसूत्रेण यज्ञोपवीतेन पवित्रितः शोभितः स्कन्धबन्धः येषां तथोक्ताः यज्ञोपवीतवन्तः इत्यर्थः तस्य संख्या बहव इत्यर्थः।

(ग) त्रिभुवनेति। त्रिभुवनस्य परिप्लावनस्य व्यापनसमर्थस्य इत्यर्थः पयसः सलिलस्य पाननिमित्तं पानार्थम् अगस्त्येनोपदिष्टं शिक्षितम् अगस्त्यास्त्रम् अगस्त्यदैवतम् अस्त्रम्।

(घ) लोपेति। लोपामुद्रया स्वपत्न्या निबद्धः कृतः उपचरणविधि सेवाविधिर्येषां तादृशाः लोपामुद्रया परिसेविता इत्यर्थः धौतं क्षालितं वल्कोत्तरीयं येषां तादृशाः धौतवल्कलोत्तरीयवन्त इत्यर्थः

चारणः। (ङ)सविस्मयम्। नमुचिमथनमन्थरितमन्यो! शतमन्यो! दिव्येनास्त्रजातेन दिव्यमस्त्रजातं विजित्य तत् किमपि कृतं रक्षोलक्ष्मीविरामेण रामेण यदनिशं विमृशतोऽपि मे न चेतः प्रत्येति न वाच उच्चरन्ति। निरङ्कुशा दशाननस्याज्ञा। विभाव्य सावष्टम्भम्। यद्दिदं निवेद्यते।

विश्वाश्वादानदक्षाचरमुखरमुखं चन्द्रहासोपपाद्य-
च्छेदक्रीडारसज्ञं तदिदमनवधिक्रोधहुङ्कारधारि।
सार्धं शुद्धान्तनारीनयनजपयसासूयितं देवदारैः (च)
राकण्ठाद्दाशकण्ठं भुवि पतति शिरो रामभल्लाग्रलूनम्॥ ३७॥

---

रत्नानां आधिराज्ये साम्राज्ये विरचिता कृता रतिः वासना यैः तादृशाः रत्नाधिराज्यार्थिन इत्यर्थः अक्षसूत्रेण अञ्चिताः पूजिताः अंसाः स्कन्धा येषां तथाभूताः रुद्राक्षाणाम् अक्षावलीभिः जपमालाभिः द्विगुणं यथा तथा वलयिताः वेष्टिताः कर्णपालीः कर्णपाशान् बिभ्रतः दधानाः एते अगस्त्याः चलेन चञ्चलेन चुलुकपुटेन गण्डूषोदरेण आचान्तानि पीतानि सप्तानाम् अब्धीनां वारि जलानि यैः तथाभूताः पीतसप्तसागरसलिला इत्यर्थः सन्तः निर्यान्ति निर्गच्छन्ति॥ स्रग्धरावृत्तम्।

(ङ) नमुचिमथन! नमुचिर्नामासुरविशेषः तस्य मथनः निसूदनः तत्सम्बुद्धौ। मन्थरितमन्यो! मन्थरितः मन्दः मन्युः क्रोधः शोको वा यस्य तत्सम्बुद्धौ हे क्रोधशोकविवर्जित! दिव्यत्वादितिभावः। शतमन्यो! शतं मन्यवः यज्ञा यस्य तादृशः तत्सम्बुद्धौ हे शताश्वमेधयाजिन्नित्यर्थः। रक्षोलक्ष्मीविरामेण राक्षसश्रीध्वंसिना इत्यर्थः विमृशतः विचारयतः प्रत्येति विश्वसिति। निरङ्कुशा अव्याहता इत्यर्थः। सावष्टम्भं सधैर्य्यम्।

(च) विश्वेति। विश्वेषां जगतां आश्वादाने दक्षैः निपुणैः

पुरन्दरः । हंहो ! (झ) ऐन्दुमतेय ! अतिदुष्करं कृतं रामभद्रेण यतः ।

शम्भोरग्रे निजकरचरचन्द्रहासप्रसूतां
लङ्कानाथः किमपि सुबहोर्विस्मरन्नेष कालात्
धाराज्योतिस्तरलितशिखैः साम्प्रतं रामबाणैः
कण्ठच्छेदव्यतिकररुजं लम्भितः स्मारितश्च ॥ ३८ ॥(ञ)

---

अक्षरैः सुखराणि सुखानि यस्य तादृशं चन्द्रहासेन तदाख्येन असिना उपपाद्या निष्पाद्या याः छेदक्रीड़ाः शत्रुच्छेदनरूपाणि क्रीड़नानि तासां रसज्ञं आस्वादाभिज्ञं अनवधिना अशेषेण क्रोधेन हुङ्कारं कारयतीति तथोक्तं सुद्धान्तनारीणां हठहृतानां निर्जितान्तःपुर-नारीणां नयनजपयसा अश्रुणा सार्द्धं देवदारैः देवाङ्गनाभिः बन्दी-भूताभिरितिभावः अभ्यूयितम् असूयया निरीक्षितमिति यावत् । आकण्ठात् रामभद्रस्य अस्त्रविशेषाग्रेण लूनं दशकण्ठं रावणीयं शिरः भुवि पतति । स्रग्धरावृत्तम् ।

(झ) ऐन्दुमतेय ! इन्दुमती अजराजपत्नी तस्या अपत्यं पुमान् ऐन्दुमतेयः दशरथः ततसम्बुद्धौ ।

(ञ) शम्भोरिति । सुबहोः अतिदीर्घात् कालात् अतिक्रान्त-बहुकालव्यापारादिति यावत् हेतोः शम्भोः हरस्य अग्रे समक्षं तदाराधनार्थमिति यावत् निजकरे चरन् तिष्ठन् यश्चन्द्रहासः तेन प्रसूतां तच्छेदनसमुद्भूतामित्यर्थः कण्ठच्छेदानां व्यतिकरेण परम्प-रया रुजं पीड़ां किमपि अचिन्त्यकारणं यथा तथा तादृशव्यापारस्य अविस्मरणीयत्वादिति भावः । विस्मरन् एषः लङ्कानाथः दशकण्ठः धाराज्योतिषा तरलिताः चञ्चलिताः शिखाः अग्राणि येषां तादृशैः रामबाणैः साम्प्रतं लम्भितः प्रापितः स्मारितश्च तां पीड़ामिति शेषः । मन्दाक्रान्तावृत्तम् ।

दशरथः । शौर्य्यगाम्भीर्य्ये त्रिभुवनातिशायिनी राक्षसराजस्य यदित्थं(झ)गतेऽपि न चलितं प्राचाहङ्कारेण तथाहि ।

एतल्लूनं दशमुखशिरः स्रंसते कण्ठपीठा-
च्चक्षुर्धत्ते धनुषि समरे चैतदुग्राट्टहासम् ।
एतद्रामं प्रति च कुरुते धिक्शतं क्रोधवाचा-
मेतल्लङ्कामभि च भवति स्त्रीजनाश्वासनाय ॥३९॥(ञ)

चारणी । विहस्य । ता अज्जपहुदि दसाणणं णवाणणं(ट) वाहरिस्सामो (२) ।

चारणः । प्रिये मञ्जुवादिनि ! जानाम्यद्यैव निरान-

(२) तदद्यप्रभृति दशाननं नवाननं व्याहरिष्यामः ।

(झ) इत्थं गतेऽपि एवमवस्थायामपि प्राचा पूर्वेण ।

(ञ) एतदिति एतत् दशमुखस्य रावणस्य शिरः लूनं छिन्नं सत् कण्ठपीठात् स्रंसते पतति । एतत् उग्रः अट्टहासः यस्मिन् तादृशं शिरः समरे धनुषि चक्षुः धत्ते । एतत् शिरः रामं प्रति क्रोधवाचां धिक् शतं कुरुते च । एतत् शिरः स्त्रीजनानां हृतभर्तृ-स्त्रीणामितिभावः आश्वासनाय लङ्कामभि लङ्काभिमुखमित्यर्थः भवति च । मन्दाक्रान्तावृत्तम् ।

(ट) नवाननं छिन्नैकमुखत्वादितिभावः । व्याहरिष्यामः कथयिष्यामः । मञ्जुवादिनि ! मधुरभाषिणि ! । निराननं निर्मस्तकं सर्वेषामेव छेत्स्यमानत्वादितिभावः अभिधास्यसि कथयिष्यसि । ओङ्कारः प्रणवः रावणस्य शिरोमण्डलस्य छेद एव विद्या तस्याः यथा विद्यायाः आद्यः प्रणवः तथैतत् एकशिरश्छेदनं सर्वशिरश्छेदनात् प्रथम इति भावः ।

नमप्यभिधास्यसि नन्वयमोङ्कारो रावणशिरोमण्डलच्छेदविद्यायाः ।

दशरथः । प्रतिगृहीता (ठ) प्रतिभोदयिनी दिव्यवाक् बद्धो वाससि ग्रन्थिः ।

चारणः । कर्णं दत्त्वा आकाशे । किमाह रामभद्रः ?। रे रे राक्षसीपुत्र !

यद्गौरीचरणाब्जयोः प्रथमतस्त्यक्तप्रणामक्रियं
प्रेमार्द्रेण सविभ्रमेण च पुरा येनेक्षिता जानकी ।
लूनं ते तदिदं च राक्षसशिरो जातं च शान्तं मनः
शेषच्छेदविधिस्तु सम्प्रति परं स्वर्बन्दिमोक्षाय मे ॥४०॥(ड)

पुनः कर्णं दत्त्वा आकाशे । किमाह रावणः ?। रे रे क्षत्रि-

---

(ठ) प्रतिगृहीता साभिनिवेशादरं श्रुतेतिभावः प्रतिभोदयिनी प्रतिभा स्फुरन्ती मतिः तस्या उदयिनी उदयवतीत्यर्थः दिव्या वाक् चारणवाणीत्यर्थः । वाससि वस्त्रे ग्रन्थिः बद्धः दिव्यवाचः सत्यार्थमितिभावः ।

(ड) यदिति । यत् शिरः प्रथमतः पूर्वं गौर्य्याः पार्वत्याः चरणाब्जयोः पादपद्मयोः त्यक्ता प्रणामक्रिया येन तादृशम् । पुरा प्रेमार्द्रेण सविभ्रमेण च सविलासेन च येन शिरसा जानकी ईक्षिता दृष्टा, हे राक्षस ! तत् इदं शिरः लूनं छिन्नम् मयेति शेषः । मनश्च शान्तं जातं ममेति शेषः सम्प्रति मे मम इति कर्त्तरि षष्ठी । शेषाणां नवानां शिरसां छेदविधिस्तु परं केवलं स्वर्बन्दिनां वन्दीकृतानां सुराङ्गनानां मोक्षाय मोचनाय भविष्यतीति शेषः । शार्दूलविक्रीडितं वृत्तम् ।

थापुत्र ! (ढ) सुलभविभ्रमचर्मचक्षुरसि तदवलोकय कत-मद्य लूनं शिरः ।

दशरथः । विस्मय । श्रमणामम् । सकलभूर्भुवःस्वस्त्रैकवोर ! (ण)शुनासोर ! मायाविनिर्मितलङ्केश्वरशिरोदर्शनेन विलक्षं क्रुद्धो रामः शितकाण्डमण्डलीभिरकाण्डचण्डाभिरन्तरितमार्त्तण्डमण्डलाभिरखण्डोड्डमरितत्रिभुवनाभोगाभिरभिवर्षितुं प्रवृत्तः ।

चारणौ । देव ! पेक्ख ख पेक्ख (त)निविडभिउडीकोडिकुडिललाडवट्टाइं जरढदाढदंडवरणिठ्ठुरदठ्ठाहरठ्ठाइं रहसणीसरंतदीहहुंकारदारुणणासावंसविवरंतराइं

(ढ) सुलभः सहजः विभ्रमः भ्रान्तिः यस्य तादृशं चर्मचक्षुः चर्मनिर्मितं चक्षुर्यस्य तादृशः । अवलोकय पश्य ।

(ण) शुनासीरः इन्द्रश्रवाः शुनासीरः पुरुहूतः पुरन्दर इत्यमरः । विलक्षं लक्षणरहितं यथा तथा महापुरुषस्य कोपलक्षणानुदयादिति भावः । शितकाण्डमण्डलीभिः निशितशरनिकरैः अकाण्डचण्डाभिः सहसा प्रचण्डाभिः । अन्तरितम् आच्छादितं मार्त्तण्डमण्डलं सूर्यमण्डलं याभिः तथोक्ताभिः । अखण्डं सम्यक् उड्डमरितः व्यथितः त्रिभुवनस्य आभोगः अन्तरं याभिः तादृशीभिः ।

(त) निविडेति । निविडाभिः घनाभिः भ्रुकुटीनां भ्रूभङ्गीनां कोटिभिरग्रैः कुटिलानि ललाटपट्टानि येषां तानि । जरठैः परिणतैः कठिनैरित्यर्थः दंष्ट्रादण्डवरैः दशनदण्डप्रवरैः निष्ठुरं दृढं यथा तथा दष्टाः अधरोष्ठा येषां तथोक्तानि । रभसेन वेगेन निःसरद्भिः दीर्घैः हुङ्कारैः दारुणानि भीषणानि नासावंशविवराणाम् अन्तराणि अभ्यन्तरभागा येषां तादृशानि । रामशरधाराधोरणीभिः रामप्रहितशरपरम्पराभिः छिन्नानि अतएव विवर्णानि मलिनानि ।

रामसरधाराधोरणीहिं चउद्दिसं झत्ति निवडंति छिस-
विवस्साइं लंकेसरसिराइं (२)।

दशरथः। चमत्कृत्य।

यस्यां यस्यां ककुभि रभसस्पृष्टदंष्ट्राकरालं
लङ्काभर्तुर्निपतति शिरो भल्लनिर्लूनकण्ठम्।
तस्यास्तस्यास्तरलितदृशा स्वर्गिवर्गेण नष्टं
प्राक्संस्कारक्रमभयवता योजनानां शतानि ॥४१॥(थ)

सङ्कसावलोक्य। अहो मायाविता राक्षसस्य।

रामबाणक्षतः पातो न यावदवधार्य्यते।
क्रियते तावदुद्भेदो मूर्ध्नो रावणमायया ॥ ४२ ॥ (द)

---

(२) देव प्रेक्षस्व प्रेक्षस्व निबिडभ्रुकुटीकोटिकुटिलललाटपट्टानि जरठदंष्ट्रादण्डदर्निष्टरदष्टाधरोष्ठानि रभसनिस्सरद्दीर्घहुङ्कारदारुणा-
नासावंशविवरान्तराणि रामशरधाराधोरणीभिश्चतुर्दिशं झटिति निपतन्ति छिन्नविवर्णानि लङ्केश्वरशिरांसि।

---

(थ) यस्यामिति। रभसेन वेगेन स्पृष्टाभिः दंष्ट्राभिः करालं भीषणं भल्लेन निर्लूनः निःशेषेण छिन्नः कण्ठो यस्य तादृशं लङ्का-भर्त्तुः रावणस्य शिरः यस्यां यस्यां ककुभि दिशि पतति, स्वर्गिवर्गेण स्वर्गवासिसमूहेन तरलिते चकिते भयार्दिते भावः दृशौ नेत्रे यस्य तथाभूतेन तस्याः तस्याः ककुभः दिशः प्राक्संस्कारस्य पूर्वानुभवस्य क्रमेण भयवता भयशालिना सता योजनानां शतानि नष्टं पलायितम्। मन्दाक्रान्तावृत्तम्।

(द) रामेति। रामस्य बाणेन क्षतः पातः यावत् न अवधार्य्यते

अतश्च।

लङ्कावीरस्य मायाचयचतुरमतेर्मैथिलीनाथचाप-
व्यापारोद्दाम्तबाणव्रणनधृतरुषः स्वां प्रतिज्ञां विवक्षोः।
ग्रीवागर्भप्रणालीसरणिसमुदितैकैकवर्णक्रमेण (ध)
च्छिन्नोद्भिन्नैर्मुखाब्जैःकथमपिहि गिरामिति पङ्क्तिःसमाप्तिम्॥४

कर्णं दत्त्वा आकाशे किमाह रामभद्रः?। प्रतिकूलं हि दैवं (न) स्वारब्धमपि कार्य्यं विपर्य्यासयति तथाहि।

यत्नुध्वंसः किल जनकजासङ्गमस्यैकहेतु-
स्तेनारब्धं दशमुखवधाडम्बरं राघवेण।

---

निश्चीयते, तावत् रावणस्य मायया मूर्द्ध्नां शिरसाम् उच्छेदः क्रियते। छेदपातसमकालमेव पुनःशिरोयोजनमिति भावः।

(ध) लङ्केति। मायाचयेषु मायाविस्तरेषु चतुरा मतिर्यस्य तादृशस्य अतिमायिन इत्यर्थः। मैथिलीनाथस्य सीतापतेः रामस्य चापव्यापारात् धनुर्योजनात् उद्दाम्ताः निर्गताः ये बाणाः शराः तैः व्रणनेन क्षतेन धृतरुषः आतक्रोधस्य स्वां निजां प्रतिज्ञां प्राणात्ययेऽपि सीताया अप्रत्यर्पणरूपामिति भावः विवक्षोः वोढुमिच्छोः लङ्कावीरस्य रावणस्य छिन्नानि पुनरुद्भिन्नानि तैः मुखाब्जैः वदनकमलैः उच्चरितेति शेषः गिरां वाचां पङ्क्तिः श्रेणिः ग्रीवाया गर्भेषु या प्रणाली एव रथ्या तत्र समुदितानाम् एकैकवर्णानां क्रमेण कथमपि अतिकष्टेनेत्यर्थः समाप्तिं निष्पत्तिं सम्पूर्णतामित्यर्थः एति प्राप्नोति छिन्नोत्थितानि शिरांसि युगपत् राम निर्भर्त्सनार्थं प्रयुक्तेन एकैकवर्णेन सम्पूर्णैकवाक्यं समापयामासुरिति भावः।

(न) स्वारब्धं सुष्ठु आरब्धम्। विपर्य्यासयति विपरीतं करोति।

छिन्नं छिन्नं पतति च शिरो जायते चान्यदन्य-
ल्लङ्काभर्त्तुस्तदिह करवै हा ! कथं मन्दभाग्यः ॥४४॥(प)

पुनराकाशे । किमाह रावणः ? हंहो ! राम ! (फ)
किमलीकशिरःखण्डनाडम्बरेण विडम्बयसि आत्मानं क्व
पुनः स्वेच्छाजन्मनां रावणावयवानां विच्छेदः ।

पुनराकाशे किमाह रामः ? । रावण ! अयं मे प्रीतये
भवज्जम्भकभावः (ब) । तथाहि ।

यन्मूलतो दशशिरांसि भवन्ति यच्च
च्छेदेषु तानि शतशोऽथ सहस्रशश्च ।
यत् साधु राक्षसपते ! कथमन्यथाऽय-
मुत्सृज्यतां जनकजाहरणापवादः ॥ ४५ ॥ (भ)

---

(प) शत्रुध्वंस इति । शत्रोः रावणस्य ध्वंसः विनाशः जनकजायाः सीतायाः सङ्गमे प्राप्तौ एकः अद्वितीयः हेतुः कारणं विना रावणवधं सीतां न प्राप्स्यामीति भावः तेन हेतुना राघवेण मया दशमुखस्य वधाडम्बरं वधोद्योगः आरब्धं कृतम् । लङ्काभर्त्तुः रावणस्य शिरः छिन्नं छिन्नं सत् पतति च, अन्यत् अन्यत् तत् शिरः जायते च, अतः इह विषये मन्दभाग्यः हतभाग्यः अहं ह इति खेदे, कथं करवै केन प्रकारेण कार्य्यं साधयामीत्यर्थः । मन्दाक्रान्तावृत्तम् ।

(फ) अलीकानां मायारचितानामित्यर्थः शिरसां खण्डनाडम्बरेण छेदनप्रयासेन । विडम्बयसि प्रतारयसि । स्वेच्छाजन्मनां स्वेच्छया निजेच्छामात्रेणेत्यर्थः जन्म येषां तादृशानां रावणस्य अवयवानां विच्छेदः विध्वंसः ।

(ब) भवतः जम्भकभावः मायावित्वं वा साम्यस्थम् ।

पुनराकाशे किमाह रावणः ? । आः (म) क्षत्रियखेट ! कापटिकतापस ! धनुरारोपणसमयप्रथमगृहीतां सीताम- भिलषन्नपपतिरिव शीर्षच्छेद्योऽसि ।

पुनराकाशे । किमाह रामः ? । रेरे पिशाचापसद !

रम्भोपभोगरभसेन निरर्गलोऽसि
नो मैथिलीहरणनामसहोऽपि रामः ।
नन्वस्मि भास्करकुलप्रभवो द्युभूषा
पूषा स एव हि निजान्वयकर्मसाक्षी ॥ ४६ ॥ (य)

---

(भ) यदिति । मूलतः मूलादारभ्य इत्यर्थः यत् दश शिरांसि छिन्नानीति शेषः भवन्ति, यच्च छेदेषु अपि शतशः अथ सहस्रशश्च तानि पुनरुद्भवन्तीति शेषः, हे राक्षसपते ! तत् साधु भद्रम् । अन्यथा अयं जनकजाहरणापराधः सीताहरणदुःखमिति यावत् कथं उत्सृज्यतां त्यज्यतां मयेति शेषः सकृत् छेदने मम दुःखशान्तिर्नास्ति पुनः पुनस्तत्र शिरसां छेदने एव तद्दुःखशान्तिर्भवतीति भावः । वसन्ततिलकं वृत्तम् ।

(म) क्षत्रियखेट ! क्षत्रियापसद ! कापटिकतापस ! धूर्त्ततपस्विन् ! धनुरारोपणस्य धनुर्भङ्गस्य समये प्रथमं गृहीता मयेति शेषः ।

(य) रम्भोपभोगेति । रम्भायाः स्नुषायाः नलकूवरभार्य्याया उपभोगेन यः रभसः हर्षः रभसो वेगहर्षयोरित्यमरः । साहसं वा तेन निरर्गलः दुष्कार्यकरणे निर्बाध इति भावः असि भवसि । रामः मैथिल्या हरणस्य नामसहो नो नामापि सोढुं न शक्नोतीत्यर्थः । ननु भोः ! भास्करकुलप्रभवः सूर्यवंश्यः अस्मि, स द्युभूषा दिवः अन्तरीक्षस्य भूषा अलङ्कारभूत इत्यर्थः पूषा सूर्य एव निजान्वयस्य स्ववंशस्य कर्मणां साक्षी साक्षात् द्रष्टा हि ।

(र) तदित्थमभिदधानमपवित्रं वक्त्रमितो निर्विशतु ते शुद्धिम् ।

चारणः । विभाव्य संत्रस्य च । किमपि (ल) निरुपमानं राघवकोदण्डशाण्डित्यमसदृशाकारश्च पौलस्त्यपुरुषकारः ।

यतः ।

छिन्नं शिरो निपतदन्तरतस्तदेत-
दादाय देव ! निजमेव दशाननेन ।
मुक्तं च वक्षसि ककुत्स्थकुलध्वजस्य
जातश्च कुड्मलितपङ्कजचारुचक्षुः ॥ ४७ ॥ (व)

दशरथः । हा वत्स रामभद्र ! कतरदिदं प्रहरणं (श) यदमुनापि मूर्च्छितोऽसि ।

---

(र) तत् तस्मात् इत्थम् एवम्प्रकारं सीतामभिलषन्नुपपतिरिव शोभितोऽस्मीति वचनमिति भावः अभिदधानं वदत् अतएव अपवित्रं ते वक्त्रं मुखम् इतः अस्मात् मत्तः सकाशादितियावत् । शुद्धिं प्रायश्चित्तं निर्विशतु भुनक्तु निर्वेशो भृतिभोगयोरित्यमरः ।

(ल) निरुपमानम् अतुल्यं किमपि अनिर्वचनीयमित्यर्थः राघवस्य रामस्य कोदण्डशाण्डित्यं धनुर्विद्यावैचक्षण्यम् । असदृशाकारस्य निरुपमस्य पौलस्त्यस्य रावणस्य पुरुषकारः पराक्रमः ।

(व) छिन्नमिति । हे देव ! वासव ! दशाननेन रावणेन छिन्नं रामेण खण्डितं अतएव निपतत् तदेतत् निजमेव स्वमेव शिरः अन्तरतः मध्यात् आदाय गृहीत्वा ककुत्स्थकुलध्वजस्य रामस्य वक्षसि मुक्तस्य निक्षिप्तस्य कुड्मलिते सङ्कुलिते पङ्कजे इव चारुणी मनोज्ञे चक्षुषी यस्य तादृशः राम इति शेषः जातश्च । छिन्नमुण्डप्रहारेण मूर्च्छितश्च इति भावः । वसन्ततिलकं वृत्तम् ।

(श) प्रहरणम् अस्त्रम् । अमुना अस्त्रेण मुण्डरूपेणेतिभावः ।

पुरन्दरः । सखे दशरथ ! रामभद्रं प्रति (ष) कृतं करुणावाणीभिर्नन्वेष सकलवीरप्रकाण्डचन्द्रचूडकोदण्डस्य दलयिता ।

चारणः । कर्णं दत्त्वा आकाशे । किमाह रामः ? । तदवयवान्तरच्छेदपुरःसरं शिरःखण्डनकर्म विरचयामि मा कश्चन नियतप्रतिबन्धो मायाविधिः स्यात् ।

चारणः । न केवलमभिहितमनुष्ठितं च । पुनराकाशे कर्णं दत्त्वा । किमाह रामः ? ।

छिन्नोद्गतो वहति कार्मुकमस्य मुष्टि-
र्लूनोदितः शरवरं च करो बिभर्त्ति ।
कृत्तोत्थितं च मुखमर्पितदृष्टि लक्ष्ये
धिक् तन्ममैष विफलोऽम्बुधिसेतुबन्धः ॥ ४८ ॥ (स)

---

(ष) करुणावाणीभिः कृतम् अलं रामभद्रं शोकसूचकं वाक्यं न प्रयोक्तव्यमिति भावः । सकलवीराणां प्रकाण्डस्य श्रेष्ठस्य चन्द्रचूडस्य हरस्य यत् कोदण्डं धनुः तस्य दलयिता भङ्क्ता । अवयवान्तराणाम् अन्येषामङ्गानां छेदपुरःसरम् अन्यानि अङ्गानि छित्त्वेत्यर्थः शिरःखण्डनकर्म शिरश्छेदनव्यापारं विरचयामि करोमि नियतः निश्चितः प्रतिबन्धः मायारूप इत्यर्थः यस्य तथाविधः मायाविधिः ऐन्द्रजालिकव्यापारः कश्चन मा स्यात् न प्रभवतु अयं भावः यदि कापि माया स्यात् यत् शिरश्छेदनेऽपि पुनस्तदुद्भवः, तदन्येषामङ्गानामग्रतः खण्डने तत्प्रभावस्य व्यपगमसम्भवादिति भावः ।

(स) छिन्नोद्गत इति । अस्य रावणस्य मुष्टिः छिन्नः पुनरुद्गतः सन् कार्मुकं वहति । लूनः छिन्नः पुनरुदितः उत्थितश्च करः शरवरं

इन्द्रः। (ङ) सद्यश्छिद्यमानमुण्डमण्डलीमायाप्रपञ्चवञ्चितराघवशरलाघवमनच्छमवगच्छन्नेष विंशत्यर्द्धकन्धरो दुर्धरधनुर्धरोऽत्युच्चण्डचित्रकवचसज्जनिजशरीरसहस्रनिर्माणच्छद्मकर्मणि परां प्रवीणतामुपदर्शयति तन्न विद्मः किमत्र प्रतिपत्स्यते रामभद्रः।

पुरन्दरः। यत् (च) कुलाचलसन्दोहदहनकर्मणि भगवान् कालाग्निरुद्रः।

---

विभर्त्ति च। मुखं लक्ष्मं छिन्नं पुनरुत्थितञ्च लक्ष्ये शरव्ये मयीति भावः अर्पिता दृष्टिर्येन तथोक्तं भवतीति शेषः तत् तस्मात् धिक् मामिति शेषः एषः मम अम्बुधौ सेतुबन्धः विफलः निष्फलः। वसन्ततिलकं वृत्तम्।

(ङ) सद्य इति। सद्यः छिद्यमाना या मुण्डमण्डली शीर्षावलिः सा एव मायाप्रपञ्चः मायाविस्तरः तेन वञ्चितस्य प्रतारितस्य राघवस्य शरलाघवं शरवर्षणे क्षिप्रहस्ततामनच्छं व्यर्थमिति यावत् अवगच्छन् जानन् एषः विंशत्यर्द्धकन्धरः दशाननः दुर्धरम् अन्यैर्धर्त्तुमशक्यं धनुर्धरतीति तथाभूतः सन् अत्युच्चेन अतिमहता चित्रेण कवचेन वर्मणा सज्जानां सज्जितानाम् आवृतानामित्यर्थः निजशरीराणां सहस्रस्य निर्माणं विरचनमेव छद्मकर्म मायाव्यापारः तस्मिन् परां महतीं प्रवीणतां पाण्डित्यं दक्षतामित्यर्थः उपदर्शयति प्रदर्शयति कायव्यूहेन युध्यते इति भावः। प्रतिपत्स्यते प्रतिविधास्यति करिष्यतीति यावत्।

(च) कुलेति। कुलाचलानां कुलपर्वतानां हिमाद्रिप्रभृतीनां सन्दोहस्य सङ्घस्य दहनकर्मणि भस्मीकरणव्यापारे भगवान् कालाग्निरुद्रः कल्पान्ते संहाररूपी अग्निमयो रुद्रः यत् प्रतिपद्यते इति शेषः; राम. तत् प्रतिपत्स्यते इति योज्यम्।

चारणः। ससंभ्रमम्। यदादिशति (क) त्रिदशचक्रवर्त्ती पश्य।
यावन्तो भुवि चाम्बरे च ककुभां कोणोपकोणेषु च
व्यावल्गन्ति धनुर्धराः कवचिनो मायामया रावणाः।
रामः स्वर्गजनाशिषां पदमसावेकोऽपि कोपोद्धत-
स्तावद्भा प्रतिवक्त्रयोजितशरश्रेणीभिरालक्ष्यते ॥ ४८ ॥ (ख)

दशरथः। अद्य फलितं मे पुरन्दरप्रसादेन यत् समरसीमनि वत्सरामभद्रं दशाननादुत्कर्षवन्तं पश्यामि।

चारणः। कर्णं दत्त्वा आकाशे। किमाह रामः ?। भवतु भगवतः कुशिकनन्दनाज्जृम्भकास्त्रप्रदानप्रसङ्गोपात्तं (ग) मायाहरमस्त्रं सन्दधामि।

चारणः। सम्यगवलोक्य। दशरथं प्रति। महाराज! कारय चक्षुषोपारणं दृश्यतां द्रष्टव्यम्।

---

(क) त्रिदशचक्रवर्त्ती देवेन्द्रः।

(ख) यावन्त इति। भुवि पृथिवीतले च अम्बरे आकाशे च ककुभां दिशां कोणोपकोणेषु कोणेषु उपकोणेषु च यावन्तः धनुर्धराः कवचिनः मायामयाः रावणाः व्यावल्गन्ति विचरन्ति युध्यमाना इति शेषः। स्वर्गजनाशिषां देवगणाशीर्वादानां पदं स्थानं देवगणैराशीर्भिरभिनन्द्यमान इत्यर्थः असौ एकोऽपि रामः कोपोद्धतः क्रोधस्फीतः सन् प्रतिवक्त्रं प्रतिमुखं रावणानामिति भावः योजिताभिः निक्षिप्ताभिः शरश्रेणीभिः शरनिचयैः तावद्भा तावत्परिमाणः आलक्ष्यते प्रतीयते यावन्तः रावणाः तावन्त एव रामा लक्ष्यन्ते इति भावः। शार्दूलविक्रीडितं वृत्तम्।

(ग) जृम्भकेति। जृम्भकाणाम् अस्त्रविशेषाणां प्रदानप्रसङ्गे उपात्तं शिक्षितं गृहीतमित्यर्थः मायाहरम् इन्द्रजालक्षयकरमित्यर्थः।

मायाहरशरन्यासादेष नक्तञ्चरेश्वरः
एकशेषशिराः सम्प्रत्येकशेषो रथे स्थितः ॥ ५० ॥ (घ)

सर्वतोऽवलोक्य । (ङ) रावणभयशरणागतसमग्रनाकिनि पिनाकिनि त्रिभुवनस्वस्त्ययननिमित्तमुदाहृतब्रह्मणि ब्रह्मणि निरन्तरचिन्तानिश्चेतसि प्रचेतसि सम्भावितजगन्नाशे कीनाशे समुपालब्धविधौ भगवति विधौ परिम्लायति रिपुग्रामनिधनदे धनदे दूरोत्क्षिप्तरणे समीरणे विगलितवसौ विभावसौ दुरपत्यजननिन्दितपुलस्त्येऽगस्त्ये कल्याणमनुध्यायति ध्यानचक्षुषि मुनिवरिष्ठे वशिष्ठे गायति साम विश्वाम्बुजविकाशमित्रे विश्वामित्रे भयालापस्फुरिताधरे

---

(घ) मायेति । एषः नक्तञ्चरेश्वरः रावणः मायाहरस्य शरस्य न्यासात् निक्षेपात् सम्प्रति एकशेषम् एकावशिष्टं शिरो यस्य तादृशः तथा एक एव शेषो यस्य तथाभूतः निःसहाय इत्यर्थः रथे स्थितः ।

(ङ) रावणेति । रावणभयात् शरणागताः समग्रा नाकिनः देवाः यस्य तादृशे पिनाकिनि हरे । त्रिभुवनेति त्रिभुवनस्य त्रिजगतः स्वस्त्ययननिमित्तं मङ्गलार्थम् उदाहृतम् उच्चारितं ब्रह्म वेदः येन तादृशे ब्रह्मणि । निरन्तरेति । निरन्तरा सार्वकालिकी या चिन्ता उद्वेगः तया निर्नास्ति चेतः चित्तं यस्य तादृशे अचेतने प्रचेतसि वरुणे प्रचेता वरुणः पाशीत्यमरः । सम्भावितेति सम्भावितः चिन्तितः जगतां नाशो येन तादृशे कीनाशे यमे कीनाशो यमदैवयोरिति शेषः । समुपालब्धेति । समुपालब्धः तिरस्कृतः विधिः दैवं येन तादृशे विधौ चन्द्रमसि । परिम्लायति परितो म्लानिं गच्छति रिपुग्रामाणां शत्रुसङ्घानां निधनदे विनाशदायिनि धनदे कुबेरे । दूरात् उत्क्षिप्तः परित्यक्तः रणो येन तादृशे समीरणे वायौ । विगलितं

विद्याधरे निर्वाणोद्यतचारण हाहारवमुखरवृन्दारकवृन्दे भुवनाभोगं विदधता जीवितनिरपेक्षेण राक्षसराजेन निजस्यन्दनं सविधीकृत्य समुद्भ्रान्तसारथिर्दाशरथिरथः सपदि दोर्दण्डमण्डलेन धूर्बन्धे विधृतो भ्रामितश्च।

दशरथः। साकूतं प्रणम्य। भगवत्यो रघुकुलदेवता दशरथमनुगृह्णीत भगवन्निन्द्र! गृहाण (च) दम्भोलिमम्भोधरलाञ्छनं धनुर्वा नन्वेष कवलीक्रियते रामचन्द्रो रावणराहुणा। इति मूर्च्छति।

---

वसु दौर्निर्यस्य तथाभूते विभावसौ अग्नौ सूर्ये च दुरपत्यजननेन कुसन्तानोत्पादनेन निन्दितः पुलस्त्यः येन तादृशे अगस्त्ये। कल्याणं जगतां मङ्गलमनुध्यायति चिन्तयति ध्यानचक्षुषि समाधिना सर्वदर्शिनि मुनीनां वरिष्ठे श्रेष्ठे वशिष्ठे। गायति उच्चारयति साम वेदविशेषं विश्वानि अम्बुजानीव तेषां विकासे मित्रः सूर्यः तथाभूते विश्वामित्रे महर्षौ। भयालापेन सभयवचनेन स्फुरितोऽधरो यस्य तादृशे विद्याधरे देवयोनिविशेषे। निर्वाणेति निर्वाणे जये उद्यतं प्रवृत्तं जयोन्मुखमित्यर्थः चारणानां देवयोनिविशेषाणां हाहाकाररवेण मुखरं वृन्दारकाणां देवानां वृन्दं गणः यत्र तादृशं भुवनाभोगं जगदभ्यन्तरं विदधता कुर्वता। जीवितनिरपेक्षेण जीवनं प्रति निस्पृहेण। निजस्यन्दनं स्वं रथं सविधीकृत्य समीपीकृत्य समुद्भ्रान्तः भयविह्वलः सारथिर्यस्य तथाविधः दाशरथिरथः रामस्य स्यन्दनं सपदि सहसा दोर्दण्डमण्डलेन बाहुदण्डसमूहेन धूर्बन्धे युगकाष्ठबन्धनस्थाने विधृत भ्रामितः घूर्णितश्च।

(च) दम्भोलिं वज्रम्। अम्भोधरेषु मेघेषु लाञ्छनं चिह्नं यस्य तादृशम्। कवलीक्रियते ग्रस्यते।

पुरन्दरः । प्रियवयस्य ! किमाकुलोऽसि कियत्कालं जलदतिरस्करिणी (छ) मार्त्तण्डमण्डलमन्तरयति ।

दशरथः । ससंभ्रममवलोकयन् हस्तमुद्यम्य । समरसुन्दर ! पुरन्दर ! पश्य पश्य ।

वत्सस्य साश्वः सासूतः सचक्रध्वजधूर्युगः ।
व्योम्नि भ्रमरकभ्रामं भ्राम्यतेऽनेन हा । रथः ॥ ५१ ॥ (ज)

इति पतति ।

पुरन्दरः । अये ! किमपि महाबलपराक्रमो राक्षसराजः ।

दशरथः । कियद्वा (झ) वर्णनमर्णवस्यागं मकरालय इति ।

वेल्लद्विद्युल्लतालीच्छुरितपरिकरैरम्बुदैर्वा ... र्भि-
र्दिव्यानां व्योमयानैर्भयचकितवधूवल्गमुक्तार्त्तनादैः ।
लङ्केन्द्रे ... हस्तभ्रमितरथपथप्रस्थितैस्तारकाणा-
मुत्तालैश्चक्रवालैरिव च विरचिता वक्रनीराजनश्रीः ॥ ५२ ॥ (ञ)

---

(छ) जलद एव तिरस्करिणी जवनिका ... विशेष इत्यर्थः मार्त्तण्डमण्डलं सूर्य्यबिम्बम् अन्तरयति आवृणोति ... दिक् रणप्रा-ङ्गणस्थं रावणस्य न चिरायेति भावः ।

(ज) वत्सस्येति । हा इति खेदे अनेन रावणेन वत्सस्य साश्वः एवः सरथाङ्गविशेषः सचक्रध्वजधूर्युगः चक्रध्वजधूर्युगैः सहितः रथः व्योम्नि आकाशे भ्रमरकभ्रामं भ्रमरो यथा भ्रमति तद्वदित्यर्थः भ्राम्यते घूर्ण्यते ।

(झ) कियदिति । अर्णवस्य समुद्रस्य कियत् वर्णनम् ? यतोऽसौ मकरालयः मकराणां हिंस्रजलचरजन्तुविशेषाणाम् आलयः आश्रयः । रावणो हि समुद्रवत् दुर्द्धर्ष इति भावः ।

(ञ) वेल्लदिति । वेल्लन्तीभिः स्फुरन्तीभिः विद्युल्लताभिः

नेपथ्ये कलकलानन्तरम्।

यद्वक्त्राणां दशानामिव दश ककुभः शासितुं सृष्टिरासी-
द्विंशत्या यश्च दोर्भिर्दशगुणितमिव प्राप्तवान् वीरधर्मम्।
लङ्केन्द्रः संयतेन्द्रो रणभुवि दशभिर्मैथिलीवल्लभेन (ट)
ज्योतिर्दीप्तैः क्षुरप्रैः स खलु विरचितो निर्विबन्धः कबन्धः॥ ५३

दशरथः। आकर्ण्य। कः पुनरयमकारणबन्धुः श्रवणामृतवर्षिणा वचनेनास्मानाश्वासयति।

चारणः। नेयमाश्वासना किं पुनर्विभीषणप्रियकरणाय लङ्कावैतालिक एष निवेदयति।

सौदामिनीपरम्पराभिः कुटिलाः व्याप्ताः परिकराः अवयवाः येषां तादृशैः धान्तवार्भिः जलवर्षिभिः अम्बुदैः मेघैः, भयचकितानां भयार्त्तानां वधूनां देवाङ्गनानां वक्त्रैः मुखैः मुक्तः आर्त्तनादो येषु तादृशैः दिव्यानां स्वर्गिणां व्योमयानैः विमानैः लङ्केन्द्रेण रावणेन अयमस्तशमितस्य रथस्य यः पन्थाः तस्मिन् प्रस्थिते तारकाणां नक्षत्राणाम् उत्तालैः महद्भिः चक्रवालैः मण्डलैश्च वक्त्रस्य रावणमुखस्येत्यर्थः नीराजनश्रीः विरचितेव। स्रग्धरावृत्तम्।

(ट) यदिति। दश ककुभः दिशः शासितुमिव दशानां यस्य वक्त्राणां सृष्टिरासीत्। यश्च विंशत्या दोर्भिर्भुजैः दशगुणितमिव वीरधर्मं वीर्यमित्यर्थः प्राप्तवान्। मैथिलीवल्लभेन रामेण रणभुवि संयतः कारानिरुद्धः इन्द्रो येन तादृशः स रावणः ज्योतिर्दीप्तैः ज्योतिषा ज्वलद्भिरित्यर्थः क्षुरप्रैः अस्त्रविशेषैः निर्विबन्धः नास्ति विशेषेण बन्धः यस्य तादृशः निरर्गल इत्यर्थः कबन्धः छिन्नशिराः कायः विरचितः कृतः खलु। निहत इति भावः। स्रग्धरावृत्तम्।

दशरथः। तत् किमिव नेदं सहस्रचक्षुषापि भगवता (ठ) नयनाञ्जलिपुटपेयीकृतम्।

चारणः। शृणु यथा।

यावल्लोलाश्वचक्रध्वजहरितरलालातचक्रायमाणं
भूगोलास्फालहेतोर्भ्रमयति नभसि स्यन्दनं राक्षसेन्द्रः।
दोर्दण्डैश्चण्डवेगोद्धृतहरगिरिभिः—

दशरथः। किञ्चिदुत्थाय। सुप्रपाता रावणकरान्दोलित-स्यन्दनभ्रमणभङ्गिस्तद्दारय धारय वत्सम्।

चारणः। सहर्षम्।—द्राक् क्षुरप्रेण तावत्
तस्यैवाकर्ण्य वाणीं दशममपि शिरश्छिन्नवान्नाम रामः॥५४॥ (ड)

---

(ठ) नयनाञ्जलिपुटपेयीकृतं नयनरूपेण अञ्जलिपुटेन अपेयं पेय कृतं पेयीकृतम्। दृष्टमित्यर्थः।

(ड) यावदिति। राक्षसेन्द्रो रावणः यावत् नभसि आकाशे भूगोलस्य भूमण्डलस्य आस्फालहेतोः विध्वंसनार्थमित्यर्थः लोलाश्चञ्चलाः अश्वाः रथावयवर्भ्य...पा. चक्राणि ध्वजाः केतवश्च हरयः अश्वाश्च यस्मिन् तत् अतएव अलातचक्रायमाणम् अङ्गारमण्डलाकारं स्यन्दनं रथं चण्डवेगेन प्रबलवेगेन उद्धृतः उत्क्षिप्तः हरगिरिः कैलासः यैः तादृशैः दोर्दण्डैः बाहुयष्टिभिः भ्रामयति घूर्णयति, सुप्रपाता सुखेन अनायासेन अवलीलया पात्यते इति सुप्रपाता रामोपरि सुखेन पातनीया इत्यर्थः। रावणस्य करैः आन्दोलितस्य स्फीतस्य स्यन्दनस्य रथस्य भ्रमणभङ्गिः घूर्णनचातुरी। घूर्ण्यमानं स्यन्दनं राक्षसराजेन रामचन्द्रमुद्दिश्य यदि पात्यते तर्हि महाननर्थः स्यात् तत् वत्सं रामभद्रं धारय परित्रायेति सन्दर्भार्थः। तावत् रामः तस्य रावणस्य वाणीं दुर्वचनम् आकर्ण्यैव श्रुत्वैव क्षुरप्रेण अस्त्रविशेषेण द्राक् झटिति दशममपि शिरः छिन्नवान् नाम अकर्त्त खलु। स्रग्धरा वृत्तम्।

पुरन्दरः । विहस्य । ग्राङ्के भवत एव(ढ)शब्दवेधित्वं शिक्षितमभ्यस्तं च रामभद्रेण किंपुनरुपाध्यायादधिकः संवृत्तः ।

विहस्य । तदेतदुद्दामरामक्षुरप्रप्रवेशिनो ब्रह्मास्त्रस्य भूर्भुवःस्वस्तितयडामरं सूदितदशकन्धरमदं भद्रमाजृम्भितम् ।

दशरथः । तत् प्रियं नः ।

चारणी । ता किन्न (ण) पडुपडहझल्लरीविदुरिल्लं सवंसकंसतालमिस्सं णिस्संखसंखं भूरिभेरीविपंचीप्पपंचभांकारझंकारभंगिगभ्भिणीकुसुमवरिसपुव्वं अणवच्छिण्णमप्फालिदो देवदाहिं विजअदुंदुही (१) ।

---

(१) तत् किमिति न पटुपटहझल्लरीमिश्रं सवंशकांस्यतालमिश्रं निःशङ्खशङ्खं भूरिभेरीविपञ्चीप्रपञ्चभाङ्कारझङ्कारभङ्गिगर्भं कुसुमवर्षपूर्वकमनवच्छिन्नमास्फालितो देवताभिर्विजयदुन्दुभिः ।

---

(ढ) शब्दवेधित्वं शब्दमनुसृत्य लक्ष्यं विध्यतीति शब्दवेधी तस्य भावः तत्त्वम् । अधिकः शिक्षाधिक इत्यर्थः । उद्दामे अतिभीषणो रामस्य क्षुरप्रे प्रवेशिनः प्रविष्टस्य आविर्भूतस्य इत्यर्थः । भूर्भुवः स्वस्तितये त्रिजगत्यामित्यर्थः डामरम् उद्वेलम् अतिप्रबलमित्यर्थः सूदितः नाशितः दशकन्धरस्य रावणस्य मदः गर्वः येन तादृशं भद्रं सुन्दरम् आजृम्भितं विचेष्टितम् ।

(ण) पटुभिः महद्भिः पटहैः झल्लरीभिश्च वाद्यभेदैरित्यर्थः मिश्रं सवलितम् । तथा सवंशेन वेणुसहितेन कांस्यतालेन मिश्रं सहितं निःशङ्काः शङ्खाः शङ्कुस्वना इति यावत् यत्र तत्, भूरयः बहुलाः भेरीणां वाद्यविशेषाणां विपञ्चीनां वीणाविशेषाणाञ्च ये प्रपञ्चाः विस्ताराः तेषां भाङ्काराणां झङ्काराणाञ्च या भङ्गयः वैचित्र्याणि ता

धारवः। शृणु यथा।

हेलाखण्डितचण्डहेमहरिणैर्बाणैः कुलं रक्षसां
शेषीभूतविभीषणं गुणनिधौ कृत्वापि रामे स्थिते।
प्रत्युज्जीवनशङ्कया यमजितो लङ्कापतेः कातरै-
र्नो मुक्ताः कुसुमस्रजो न च सुरैरास्फालितो दुन्दुभिः ५५ (त)

नेपथ्ये।

बाणैर्लाञ्छितकेतुयष्टिशिखरो मूर्च्छानमत्सारथि-
र्मांसास्वादनलुब्धगृध्रविहगश्रेणीभिरासेवितः।
रक्षोनाथमहाकबन्धपतनक्षुण्णाक्षदण्डो हयै-
रुत्क्षिप्त्वा सृतमन्दुरास्थितिविहृतैर्लङ्कां रथो नीयते ॥५६॥(थ)

---

गर्भे यस्य तत् तथा कुसुमवर्षपूर्वं पुष्पवृष्टिपुरःसरम् अनवच्छिन्नं निरवच्छिन्नम् अनवरतमित्यर्थः आस्फालितः ताडितः।

(त) हेलेति। गुणनिधौ गुणाकरे रामे हेलया अक्लेशेन खण्डितः नाशितः चण्डः भीषणः हेमहरिणः सुवर्णमृगरूपी मारीचो नाम राक्षस इत्यर्थः यैः तथोक्तैः बाणैः रक्षसां कुलं शेषीभूतः विभीषणो यत्र तादृशं विभीषणमात्रशेषमित्यर्थः कृत्वा स्थितेऽपि यमजितः अन्तकजयिनः लङ्कापतेः रावणस्य प्रत्युज्जीवनशङ्कया पुनर्जीवनभयेन कातरैः मन्देः भयाकुलैरित्यर्थः सुरैः देवैः कुसुमस्रजः पुष्पमाल्यानि नो मुक्ताः पुष्पवृष्टिर्न कृतेति भावः दुन्दुभिः न आस्फालितः वादितश्च। शार्दूलविक्रीडितं वृत्तम्।

(थ) बाणैरिति। बाणैः रामशरैः लाञ्छितं क्षतमिति यावत् केतुयष्टेः ध्वजदण्डस्य शिखरम् अग्रं यस्य तथाभूतः मूर्च्छया नमन् पतन् सारथिर्यस्य तादृशः, मांसास्वादने मांसभक्षणे लुब्धानां लालसानां गृध्राणां विहगानाम् अन्येषां पक्षिणाञ्च श्रेणीभिः आसेवितः व्याप्तः रक्षोनाथस्य रावणस्य यः महान् कबन्धः देहः तस्य पतनेन

पुरन्दरः। सखे ! दशरथ ! अयमनन्यसदृशाकारो रामभद्रपुरुषकारः। अतश्च।

निर्दग्धत्रिपुरेन्धनोऽस्तु गिरिशः क्रौञ्चाचलच्छेदने
पाण्डित्यं विदितं गुहस्य किमु तावज्ञातयुद्धौ सखी।
लूत्वा पङ्कजलावमाननवनं चैतस्य लङ्कापते-
र्वीराणां चरिताद्भुतस्य परमे रामः स्थितः सीमनि॥५७॥(ट)

चारणः। विहस्य। अवगतदशकन्धरवधैर्विबुधैरिदानीं मत्वरैर्दाशरथौ (ध) हर्षपुष्पवर्षमारभ्यते। नेपथ्ये।

सर्वा गीर्वाणवन्द्यो ! व्रजत निजगृहान् बभ्रमाधोरण ! द्राक्
स्वर्गेभस्तम्भशालां नय सुरकरिणं यामिका ! यात देवाः ! ।

---

कुण्ठः चूर्णितः अग्र अवयवविशेषः दण्डः ध्वजस्य यस्य तादृशो रथः रावणस्येति भावः हयैः अश्वैः स्तम्भया मन्दुरायां वाजिशालायां स्थित्वा हृतैः आक्रुष्टैः सद्भिः हेषित्वा हेषारवं कृत्वा लङ्का नीयते। शार्दूलविक्रीडितं वृत्तम्।

(ट) निर्दग्धेति। गिरिशः शिवः निर्दग्धं निःशेषेण भस्मीकृतं त्रिपुरमेव इन्धनं काष्ठं येन तथाविधः अस्तु भवतु। गुहस्य पाण्डित्यं पराक्रमवैचक्षण्य क्रौञ्चाचलस्य क्रौञ्चपर्वतस्य छेदने विदारणे विदितं ज्ञातम्। तौ गिरिशकार्त्तिकेयौ अज्ञातयुद्धौ तृसखौ क्वचिदित संग्रामविधौ किमु ? नैवेतिभावः। किन्तु रामः एतस्य लङ्कापतेः रावणस्य आननवनं शिरोमण्डलं पङ्कजलावं कमलवनसिवंसर्वः लूत्वा छित्त्वा वीराणां चरितं अद्भुतचारित्रस्य परमे सीमनि स्थितः। शम्भुः स्कन्दश्च वीरश्रेष्ठौ परं राघवः सर्ववीरश्रेष्ठ इति भावः। शार्दूलविक्रीडितं वृत्तम्।

(ध) दाशरथौ रामे।

भूयो दिव्यद्रुमाणां ननु भवतु वने नन्दने सन्निवेशो
द्वारि क्षिप्तं यदैन्द्रे दशवदनशिरः किङ्करैरन्तकस्य ॥ ५८ ॥ (न)

चारणः । (प)नाकनरलोकनायकौ दिष्ट्या वर्धेथे पुरन्दरप्रतीहारवचनेन अपरिमितेन च रामशरीरसौन्दर्य्येण । तथाहि

रणरसिकसुरस्त्रीमुक्तमन्दारदामा
स्वयमयवतीर्णो लक्ष्मणन्यस्तहस्तः ।
विरचितजयशब्दो वन्दिभिः स्यन्दनाङ्का-
द्दिनकरकुललक्ष्मीवल्लभो रामचन्द्रः ॥ ५९ ॥ (फ)

इति निष्क्रान्ताः सर्वे । रावणवधो नाम नवमोऽङ्कः ॥

---

(न) सर्वा इति हे गीर्वाणवन्द्यः वन्दीकृताः ! सुरनार्य्यः ! सर्वाः स्वं निजमन्दिरान् व्रजत गच्छत । हे आधोरण ! हस्तिपाल ! द्राक् झटिति सुरकरिणम् ऐरावतं बन्धुं स्वर्गभस्तम्भशालाम् ऐरावतबन्धनालयं नय प्रापय । हे धार्मिकाः ! प्रहरिणः देवाः ! यात गच्छत स्वान् स्थानानीति शेषः । नन्दने वने भूयः पुनः दिव्यद्रुमाणां पारिजातादीनां सन्निवेशः स्थितिः भवतु ननु । यत् यस्मात् अन्तकस्य यमस्य किङ्करैः दूतैः दशवदनस्य रावणस्य शिरः ऐन्द्रे द्वारि देवराजभवनद्वारे क्षिप्तं पातितम् ।

(प) नाकनरलोकनायकौ इन्द्रदशरथौ । पुरन्दरस्य इन्द्रस्य प्रतीहारवचनेन दौवारिकवाक्येन पूर्वोक्तेन सर्वा इत्यादिना ।

(फ) रणेति । रणरसिकाभिः संग्रामप्रियाभिः सुरस्त्रीभिः मुक्तं दत्तं मन्दारदाम मन्दारपुष्पमाल्यं यस्मै तथाविधः लक्ष्मणेन न्यस्तः धृतः हस्तः यस्य तथाभूतः वन्दिभिः स्तुतिपाठकैः विरचितः कीर्त्तितः जयशब्दो यस्य तथाभूतः दिनकरस्य सूर्य्यस्य या कुललक्ष्मीः तस्याः वल्लभः प्रियः अयं रामचन्द्रः स्यन्दनाङ्कात् रथोत्सङ्गात् स्वयं अवतीर्णः अवरोहतीत्यर्थः । मालिनीवृत्तम् ।

# ॥ अथ दशमोऽङ्कः ॥

——०ः०ः००——

अतः परं राघवानन्दो भविता ।

ततः प्रविशति सशोका लङ्का ।

लङ्का । हा ! (क) दुद्धरतवविसेसपरितोसिदारविन्दासण ! तिहुअणेक्कमल्ल ! दसकण्ठ ! हा हेलाबन्दीकिदमहिन्द ! मेहणाद ! हा समरसंरम्भसुप्पसण्ण ! कुम्भअण्ण ! कहिंसि देहि मे पडिवअणम् (१) ।

प्रविश्य सत्वरा अलका । पुरोऽवलोक्य । कथमियं लङ्काऽस्तमितेऽपि (ख) सञ्चरितकुण्ठे दशकण्ठे दुःखिता । विमृश्य ।

---

(१) हा ! दुर्द्धरतपोविशेषपरितोषितारविन्दासन ! त्रिभुवनैकमल्ल ! दशकण्ठ ! हा हेलाबन्दीकृतमहेन्द्र ! मेघनाद ! हा समरसंरम्भसुप्रसन्न ! कुम्भकर्ण ! कासि देहि मे प्रतिवचनम् ।

---

(क) दुर्द्धरेति । दुर्द्धरेण दुश्चरेण तपोविशेषेण परितोषितः अरविन्दासनः कमलासनः ब्रह्मा येन तादृश तत्सम्बुद्धौ । हेलया अवलीलया वन्दीकृतः महेन्द्रः येन तत्सम्बुद्धौ । समरसंरम्भे युद्धव्यापारे सुप्रसन्न ! प्रीत ! प्रियसंग्राम इत्यर्थः ।

(ख) अस्तमिते नाशं गमिते । सञ्चरितं कुण्ठं यस्मिन् तादृशे । दुश्चारितस्य नाशे आह्लाद एव भवति लोकानां इयन्तु न तथेति अपि

परिपालना हि भृत्यान् स्वामिनः स्मारयति न गुणग्रामः।
प्रकाशम्। सखि लङ्के! वलीमुखबलबलात्कारमाकर्ण्य निखिलनाकतलतिलकायमानयाऽमरावत्या मर्त्त्यमण्डलशौण्डया चोज्जयिन्या रसातलभोगभङ्गिभूतया च भोगवत्या तदनुचरेणच त्रिभुवनवासिनाऽपि पुरीचक्रेण कुशलप्रश्नाय भवतीं प्रति प्रहिता। अहं च सखीस्नेहादागतास्मि।

छिन्ना न दिव्यतरवस्तव कच्चिदारात्?
कच्चिद् भृता न परिखाः कनकाम्बुजिन्यः।?
प्लुष्टानि कच्चन न रत्नमहाट्टहाणि?
कच्चिन्न काञ्चनमयो दलितश्च सालः?॥ १॥ (ग)

---

शब्दार्थः। परिपालना प्रतिपालनम्। वलीमुखानां वानराणां बलेन बलात्कारं स्वाक्रमणं तवेतिभावः। निखिलनाकतलस्य समग्रस्वर्गराज्यस्य तिलकायमानया ललाटभूषणस्वरूपया अमरावत्या इन्द्रपुर्य्या। मर्त्त्यमण्डलेषु शौण्डया अत्युज्ज्वलया। रसातलस्य पातालस्य यः भोगः सुखं तस्य भङ्गिभूतया वैचित्र्यस्वरूपिण्याः भोगवत्या पातालपुर्य्या इत्यर्थः। पुरीचक्रेण नगरीसमूहेन। प्रहिता प्रेरिता।

(ग) छिन्नेति। तव आरात् समीपे स्थिता इति शेषः। दिव्यतरवः सुरद्रुमाः पारिजातादयः कच्चित् न छिन्नाः? कनकाम्बुजिन्यः स्वर्णपद्मवत्यः परिखाः प्राकारवृत्तिभूताः जलराशयः कच्चित् न भृताः न पूरिताः? अवस्करनिचयैरितिभावः। रत्नमहाट्टहाणि रत्ननिर्मितानि महान्ति अट्टहाणि कच्चन न प्लुष्टानि न दग्धानि?।

लज्जा सवाक्तम्भम् । (घ) सहि कैलासुच्छङ्गवासिणि ! कुवेरसञ्चरिदे ! देवणिलये ! अलए ! किं णाम ण संपणं ? तधा अ तेण केसरिकलत्तसंभवेण समीरसंभूदेण वाणरेण सुउमारकामिणीकरअलकोमलेहिं किसलयेहिं लाडलल-णाहरोठ्ठमञ्जिठ्ठे कुसुभअकुसुमत्थवएहिं बन्दीकिदसुर-सुन्दरीचरणप्पहारदोहलअसंकन्तालत्तअलंछिदेहिं उकव बन्धेहिं लीलामन्दिरं मअरधधअस्स कुलभवणं मलअम-मापअट्टिणो दक्खिणसमीरणस्स विस्सामठ्ठाणं हिअअस्स पढमणिलओ णिअं वसन्तस्स पेरन्तणिवेसिदकप्पपाअव-प्पहुदिपंचविहदेवदुमा असोअवणिआ सव्वा संचुणिआ पाआलपरिचुंबी परिहापरिक्खेवोवि त्थलत्थिदिं लंभिदो

---

काञ्चनमयः स्वर्णमयः सालः प्राकारश्च कश्चित् न दलितः विध्वंसित-श्च ? । वसन्ततिलकं वृत्तम् ।

(घ) सवाक्स्तम्भं निःशङ्कं अनुच्चैरितिभावः । कैलासस्य उत्सङ्गे क्रोड़े वसतीति तथाभूते कुवेरेण सञ्चरिते सुष्ठु सेविते ! देवनिलये ! देवावासभूते ! । किं नाम न सम्पन्नं न घटितम् ? सर्वमेव मम घटितमित्यर्थः । केसरिकलत्रसम्भवेन केसरिणः तदाख्यस्य वानरस्य यत् कलत्रं पत्नी अञ्जना इत्यर्थः ततसम्भवेन तद्गर्भजातेन समीरस-म्भूतेन वायुपुत्रेण वानरेण हनुमता इत्यर्थः । सुकुमारेति । सुकुमा-राणि कोमलानि यानि कामिनीनां करतलानि तद्वत् कोमलैः मृदुलैः किसलयैः पल्लवैः । लाटेति । लाटललनानां लाटदेशीयकामि-नीनां अधरोष्ठवत् याः मञ्जिष्ठा लताविशेषाः ताभिः एकसुभगः अतिसुन्दरं इत्यर्थः स्तवकः येषां तादृशैः । बन्दीकृतेति बन्दी-

अविच्छिण्णसंचरणचदुरेणवि मत्तण्डमण्डलेण अलङ्घणिज्जं कणअपाआरचक्कं सुमरणसेसं संपादिदं मणिभवणविध्धंसणदंसणे उण णिक्करुणस्स वि जणस्स किं भणिअदि अम्सुधाराधोरणी किं उण सिणेहमइं पिअसहिं समासदुअ प्पाणपरिच्चअणववसाएहिं विरइदह्मि (२)।

---

(२) सखि ! कैलासोत्सङ्गवासिनि ! कुबेरसङ्गरिते ! देवनिलये अलके ! किं नाम न सम्पन्नं ? तथा च तेन केसरिकलत्रसम्भवेन समीरसम्भूतेन वानरेण सुकुमारकामिनीकरतलकोमलैः किसलयैर्लाटललनाधरोष्ठमञ्जिष्ठैः कुसुमगुस्तबकैर्बन्दीकृतसुरसुन्दरीचरणप्रहारदोहदकसंक्रान्तालक्तकलाञ्छितैश्च स्तबकैर्लीलामन्दिरं मकरध्वजस्य कुलभवनं मलयमार्गप्रवर्त्तिनो दक्षिणसमीरणस्य विश्रामस्थानं हृदयस्य प्रथमनिलयो नित्यं वसन्तस्य पर्यन्तनिवेशितकल्पपादपप्रभृतिपञ्चविधदेवद्रुमाऽशोकवनिका सर्वा सञ्चूर्णिता पातालपरिचुम्बी परिखाप्रतिक्षेपोऽपि स्थलस्थितिं सम्भितोऽविच्छिन्नसञ्चरणचतुरेणापि मार्त्तण्ड मण्डलेनालङ्घनीयं कनकप्राकारचक्रं स्मरणशेषं सम्पादितं मणिभवनविध्वंसनदर्शने पुनर्निष्करुणस्यापि जनस्य किं भण्यतेऽश्रुधाराधोरणी । किं पुनः स्नेहमयीं प्रियसखीं समासाद्य प्राणपरित्यजनव्यवसायेभ्यो विरताऽस्मि ।

---

कृतानां सुरसुन्दरीणां चरणप्रहारः पादताडनमेव दोहदकं वृक्षपोषकौषधविशेषः तेन संक्रान्तानि यानि अलक्तकानि तैः लाञ्छिताः शोभिताः तैः स्तबकैः पादपावलिभिः । लीलामन्दिरं क्रीडागृहं मकरध्वजस्य कामस्य । कुलभवनं कुलक्रमागतं गृहम् । विश्रामस्थानम् आरामनिकेतनम् । प्रथमनिलयः आद्यः आवासः । पर्यन्तेति । पर्यन्तेषु प्रान्तेषु निवेशिताः रोपिताः कल्पपादपप्रभृतयः पञ्चविधाः

अलका। सखि! धर्मजेतरि (ङ) भीषणबिभीषणे बिभीषणे विनेतरि तत्रभवती किं सशोकशङ्केव तन्निधिनाथपूर्ववल्लभे! लङ्के! विरमन्तु मध्यस्थगितैकावलोकल्या बाष्पजलकणश्रेणयः। विरज्यतु च जरठकाञ्चनारकुड्मलकोटिपाटला दृष्टिः। धौतमाञ्जिष्ठपटच्चरदीनाधरमुद्रा समासादयतु स्वां लक्ष्मीं लघूभवन्तु च प्रमाणानुकृतमृणालदण्डाः श्वासदण्डाः।

---

देवद्रुमाः यस्याः तादृशी सन्तानः कल्पवृक्षश्च मन्दारः पारिजातकः। पञ्चैते देवतरवः पुंसि वा हरिचन्दनमित्यमरः। पातालपरिचुम्बी रसातलस्पर्शीत्यर्थः परिखा प्रतिक्षेपः प्राकारवेष्टनजलराशिः स्थलस्थितिं स्थलस्य या स्थितिः मर्यादा तां लम्भितः प्रापितः अवस्करादिभिः पूरित इत्यर्थः। अविच्छिन्नेति। अविच्छिन्नम् अविश्रामं यत् सञ्चरणं भ्रमणं तत्र चतुरेण निपुणेनापि मार्त्तण्डमण्डलेन सूर्यबिम्बेन अलङ्घनीयम् अनतिक्रमणीयं कनकप्राकारचक्रं स्वर्णमयप्राकारमण्डलं शरणशेषं नामशेषमित्यर्थः पञ्चादिना हतं भग्नमित्यर्थः। मणिभवनस्य रत्नगृहस्य विध्वंसनदर्शने विध्वंसं दृष्ट्वेत्यर्थः। किं भण्यते? कथ्यते? अश्रुधाराधोरणी नेत्रसलिलवृष्टिः। किं पुनः वक्तव्यमिति शेषः। प्रियसखीं त्वामिति शेषः। समासाद्य प्राप्य प्राणपरित्यजनव्यवसायेभ्यः जीवनविसर्जनचेष्टितेभ्यः विरता निवृत्ता।

(ङ) धर्मजेतरि धर्मेण लब्धविजये भीषणानां भयानकानां शत्रूणामिति भावः। भीषणे दमने इत्यर्थः विनेतरि शासितरि, सशोकशङ्का शोकशङ्कासहिता। निधिनाथस्य कुबेरस्य पूर्ववल्लभे पूर्वप्रियतमे पूर्वं लङ्कायाः कुबेराध्युषितत्वादिति भावः। विरमन्तु निवर्त्तन्तां मध्ये वक्षसि इत्यर्थः स्थगिता स्थिता या एकावली एकसरो हारविशेषः

कञ्चा । जं तिणेत्तमित्तस्स (च) णअरी भणदि (१) ।

नेपथ्ये ।

रुद्राणि ! लक्ष्मि ! वरुणानि ! सरस्वति ! द्यौः !
सावित्रि ! धात्रि ! सकलाः कुलदेवताश्च ! ।
शुद्धयर्थिनी विशति शुष्मणि रामरामा
तत्सन्निधत्त सहसा सह लोकपालैः ॥ २ ॥ (छ)

---

(१) यत् त्रिनेत्रमित्रस्य नगरी भणति ।

---

तत्कल्पाः तादृश्य इत्यर्थः वाष्पजलकणानां श्रेणयः धाराः । मा कदिहीति भावः । विरज्यतु निवर्त्ततां जरठस्य परिणतस्य विशुद्धस्ये-त्यर्थः काञ्चनस्य आरकूटस्य च या कोटिः तद्वत् पाटला रक्ता । शौत कालितं माञ्जिष्ठं मञ्जिष्ठारागः यस्मात् तादृशं पटच्चरं वसनं तद्वत् दीना विषादपूर्णेति भावः । अधरमुद्रा अधराभोगः स्वां निजां स्वाभा-विकीमित्यर्थः । लक्ष्मीं शोभां समासादयतु प्राप्नोतु । लघूभवन्तु अल्पाः स्वाभाविका भवन्तु इत्यर्थः प्रमाणेन परिमाणेन अनुन्नताः मृणाल-दण्डाः यैः तादृशाः श्वासदण्डाः दीर्घनिश्वासा इत्यर्थः ।

(च) त्रिनेत्रः शिवः तस्य मित्रं कुवेरः तस्य ।

(छ) रुद्राणीति । हे रुद्राणि ! पार्वति ! लक्ष्मि ! वरुणानि ! वरुणभार्य्ये ! सरस्वति ! द्यौः ! स्वर्गाधिष्ठात्रि देवते इत्यर्थः सावित्रि ! धात्रि ! पृथिवि ! सकलाः सर्वाः कुलदेवताश्च ! । रामस्य रामा कान्ता जानकी शुद्धयर्थिनी शुद्धिकामा सती शुष्मणि अग्नौ विशति, तेन् तस्मात् लोकपालैः इन्द्रादिभिः सह सहसा सत्वरं सन्निधत्त सम्-पस्थिता भवत । वसन्ततिलकं वृत्तम् ।

लङ्का । आकस्मिकेन । किं उण विसुद्धिकारणम् ? (४) ।

अलका । राक्षसगृहवासः किल । विचिन्त्य । वि-हस्य च ।

कालुष्यहेतुर्वैदेह्या न राक्षसगृहस्थितिः ।
ध्वान्तवन्दीकृताऽपीन्दोर्न कला जातु नीलति ॥ ३ ॥ (ज)

लङ्का । ता एहि गदुअ पेक्खह्म (५) ।

अलका । कुबेरप्रसादादिहस्थैव दिव्येन चक्षुषा पश्यामि ।

लङ्का । ता ममावि प्पिअसही णिवेददु (६) ।

अलका । इयं रामराज्ञी(झ)स्वाहावल्लभे भगवत्यात्मान-

---

(४) किं पुनर्विशुद्धिकारणम् ? ।
(५) तदेहि गत्वा प्रेक्षामहे ।
(६) तन्ममापि प्रियसखी निवेदयतु ।

---

(ज) कालुष्येति । राक्षसगृहे स्थितिः वैदेह्याः सीताया न कालुष्यस्य मालिन्यस्य हेतुः कारणम् । ध्वान्तेन तिमिरेण वन्दीकृता आक्रान्ता इत्यर्थः अपि इन्दोश्चन्द्रस्य कला जातु कदाचित् न नीलति न मलिनीभवति । अत्र कालुष्य हेतुर्नीलति इति वेति एकस्यैव साधारणधर्मस्य पृथक् निर्दिष्टत्वात् प्रतिवस्तूपमालङ्कारः तदुक्तं प्रतिवस्तूपमा सा स्यात् वाक्ययोर्गम्यसाम्ययोः । एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथगिति ।

(झ) रामराज्ञी रामस्य राज्ञी सीता स्वाहावल्लभे स्वाहा नाम अग्नेः पत्नी तस्या वल्लभे अग्नौ कुररीव पक्षिणीविशेष इव करुणः

माहृतीकुर्वाणा कुररीव करुणक्रेङ्कारकातरया गिरा देवीवाचमभिसन्धाय स्तौति विशुद्धिकारणं च ब्रूते ।

लङ्का । किं विअ सुणावेदु (७) ।

अलका ।

यद्गीर्वाणाः क्रतुबलिलिहो यत्स्मरश्चित्तजन्मा
सोमोन्माथी न च यदुदधिर्जुह्वते यच्च विप्राः ।
यः कृत्स्नस्य प्रलयदिवसो ये च ये च प्रकाशाः
कृत्स्नः सोऽयं जयति महिमा पावकः पावकस्य ॥४॥(ज)

किञ्च

मित्रं मन्त्री गुरुः शिष्यः स्वामी भृत्यश्च मे सदा ।
राम एव यथा नान्यस्तथा मां पातु पावकः ॥ ५ ॥ (ट)

---

(७) किमिव आवेदयतु ।

---

शोकजनको यः क्रेङ्कारः स्वरविशेषः तेन कातरया दीनया देवीं भारतीं वाग्देवीं सरस्वतीमित्यर्थः अभिसन्धाय उद्दिश्य ।

(ज) यदिति । गीर्वाणा देवा यत् क्रतुबलिलिहः यज्ञीयांश-भोक्तारः, स्मरः कामः यत् चित्तजन्मा मनसिजः, उदधिः समुद्रः यत् न सीमोन्माथी सीमानं वेलामित्यर्थः नातिक्रामतीत्यर्थः विप्राश्च यत् जुह्वते हव्यं प्रक्षिपन्ति, कृत्स्नस्य जगत इति शेषः यः प्रलय-दिवसः संहारदिनं ये च ये च प्रकाशाः तेजोमया इत्यर्थः सोऽयं कृत्स्नः समग्रः पावकस्य सर्वस्य अग्नेः महिमा जयति सर्वोत्कर्षेण वर्त्तते इत्यर्थः । मन्दाक्रान्तावृत्तम् ।

(ट) मित्रमिति । यथा राम एव सदा मे मम मित्रं बन्धुः, मन्त्री

लङ्कां प्रति। नातः परमवज्रहृदयैः (ठ)श्रोतुं द्रष्टुं च शक्यते।

लङ्का। तं भणिअं जणअणन्दिणीए जेण रावणप्पदीणं वि दलिआइं हिअआइं गअणङ्गणादो वि बाहविन्दुसन्दोहा णिवडन्ति। तदोतदो ? (८)।

अलका। ततश्च।

वह्निर्ज्वालाः सृजति कियतीर्जानकी किं विधत्ते
कीदृक् छाया रघुपतिमुखे कर्म्म किं लक्ष्मणस्य।
इत्थं यावद्विमृशति जनः कौतुकोत्तानिताक्ष-
स्तावच्छन्नं गगनमखिलं द्योतमानैर्विमानैः॥ ६॥ (ड)

---

(८) तद् भणितं जनकनन्दिन्या येन रावणपत्नीनामपि दलितानि हृदयानि। गगनाङ्गणादपि वाष्पविन्दुसन्दोहा निपतन्ति। ततस्ततः ?।

---

सचिवः, गुरुः आचार्य्यः, शिष्यः अन्तेवासी भृत्यः सेवकः भर्त्ता ना नान्यः अपरो नेत्यर्थः तथा पावक. मा पातु रक्षतु शोधयतु इत्यर्थः।

(ठ) अवज्रहृदयैः मृदुहृदयैरित्यर्थः।

(ड) वह्निरिति। वह्निः कियतीः ज्वालाः शिखाः सृजति विस्तारयति, जानकी किं विधत्ते करोति, रघुपतेः रामस्य मुखे कीदृक् छाया कान्तिः ? लक्ष्मणस्य किं कर्म्म लक्ष्मणः किं करोतीत्यर्थः ? जनः तत्रत्यो लोकः कौतुकेन औत्सुक्येन उत्तानिते विकसिते अक्षिणी यस्य तादृशः सन् इत्थं यावत् विमृशति तर्कयति, तावत् द्योतमानैः विराजमानैः विमानैः व्योमयानैः अखिलं समस्तं गगनम् अन्तरीक्षं छन्नं परितम्। सुराः सर्वे द्रष्टुमागता इति भावः। मन्दाक्रान्तावृत्तम्।

ततश्च।

सीतामुदीक्ष्य सुमुखीं शिखिनः प्रवेशे
मुक्तास्तथा सुमनसः सुरसुन्दरीभिः।
स्रग्विक्रयः सकलखेचरमालिकानां
जातो यथा चिरतरं त्रिदिवे महार्घः॥ ७॥ (ढ)

ततश्च। (ण) प्रोद्घुष्टमरुन्धतीप्रभृतिभिरन्तरिक्षाभिः
पतिव्रताभिः।

यत्पौलस्त्यगृहोषिता प्रविशति त्वां देव! शुद्धार्थिनी
सीतेयं प्रथमा सतीषु कुरु तज्ज्योतिर्जलार्द्रांजडम्।
घर्मम्लानमृणालकाण्डमृदुलान्यङ्गानि दग्धानि चेत्
गतस्याः क्व नु शोधकोऽपि भगवन्! संशुद्धये यास्यसि॥ ८(त

(ढ) सीतामिति। शिखिनः अग्ने: प्रवेशे प्रवेशसमये अग्नौ प्रविशन्तीमित्यर्थः सुमुखीं सीताम् उदीक्ष्य दृष्ट्वा सुरसुन्दरीभिः तथा सुमनः पुष्पाणि मुक्ताः सृष्टाः यथा त्रिदिवे स्वर्गे सकलानां खेचरमालिकानां खेचरमालाकाराणां महार्घः महामूल्यः स्रग्विक्रयः पुष्पमाल्यविक्रयः चिरतरं बहुकालं जातः। वसन्ततिलकं वृत्तम्।

(ण) प्रोद्घुष्ट प्रकर्षेण उद्घोषितम् अरुन्धती वशिष्ठपत्नी तत्प्रभृतिभिः तत्प्रमुखाभिः।

(त) यदिति। हे देव! अग्ने! यत् यस्मात् इयं सतीषु साध्वीषु प्रथमा अग्रगण्या सीता पौलस्त्यस्य रावणस्य गृहे उषिता कियत्कालं स्थिता अतएव शुद्धार्थिनी सती त्वां प्रविशति, तत् तस्मात् ज्योतिः स्व तेजः जलार्द्रांजडं जलार्द्रम् आजडं सम्यक् मन्दं कुरु। चेत् यदि घर्मेण निदाघेन म्लानाः ये मृणालकाण्डाः तद्वत् मृदूनि अति-

बटुः। अहो! देवदाणं वि सीदापक्खवादो अधवा सव्वो [illegible]णेसु रज्जदि ण सरीरेसु (ध)।

वटुका। अहो! खलु भोः पतिव्रतामयं ज्योतिरनभिभवनीयं ज्योतिरन्तरैः (थ)। यतः।

[illegible] क[illegible]न्त्या चितावह्निं जानक्या परिशुद्धये।
भेदः कोऽपि न निर्णीतः पयसः पावकस्य वा ॥९॥(द)
हाहा! किमपि निष्करुणचेता हिरण्यरेताः (ध)।
विशुद्धये प्रविष्टाऽसौ वैदेही हव्यवाहनम्।
अभ्रंलिहानां ज्वालानां चक्रेण च तिरोहिता॥१०॥(न)

---

(ध) अहो! देवतानामपि सीतापक्षपातोऽथवा सर्वो गुणेषु रज्यते न शरीरेषु।

---

कोमलानि एतस्याः अपि अङ्गानि दग्धानि त्वयेति शेषः, हे भगवन्! शोधकः शुद्धिकारकस्त्वं संशुद्धये शुद्धयर्थं क नु कुत्र खलु यास्यसि? तव शुद्ध्यर्थं गन्तव्यस्थानलोपः भविष्यतीति भावः। शार्दूलविक्रीडितं वृत्तम्।

(थ) ज्योतिरन्तरैः अपरैः ज्योतिर्भिरित्यर्थः।

(द) प्रविशन्त्येति। परिशुद्धये विशुद्ध्यर्थं चितायाः ज्वलत्काष्ठनिचयस्य वह्निं मध्यं प्रविशन्त्या जानक्या सीतया पयसः जलस्य पावकस्य अग्नेश्च कोऽपि भेदः न निर्णीतः न निश्चितः जलवत् अग्निरनुभूत इति भावः।

(ध) हिरण्यरेता अग्निः।

(न) विशुद्धये इति। विशुद्धये हव्यवाहनम् अग्निं प्रविष्टा असौ

लङ्का। (प) कंकेल्लिकेलिकाणणदहणो णिक्करुणाणं पढमोदाहरणं हुदवहो। अलकां प्रति। तदोतदो ? (१०)।

अलका। सखि लङ्के ! अतिक्रान्तासु (फ) च कतिपयीषु कालकलासु।

वह्नेः शुद्धिविधायिनो भगवतस्तेजोभिरत्युद्धतै-
रम्लानामनसूयया विरचितां मौलिस्रजं बिभ्रती।
पादाङ्गुष्ठनखाग्रदत्तनयना नीरन्ध्रविन्यासत-
स्तोकालक्ष्यमुखी चितावलयतो द्राङ् मैथिली निर्गता॥११॥(ब)

---

(१०) कङ्केलिकेलिकाननदहनो निष्करुणानां प्रथमोदाहरणं हुतवहः। ततस्ततः ?।

---

वैदेही सीता अभ्रंलिहानां गगनस्पर्शिनीनां ज्वालानां शिखानां चक्रेण समूहेन तिरोहिता अन्तर्हिता च।

(प) कङ्केलीनाम् अशोकानां केलिकाननस्य क्रीडोपवनस्यापि दहनः दाहकः। निष्करुणानां निर्दयानां प्रथमम् उदाहरणं दृष्टान्तभूतः हुतवहः अग्निः।

(फ) अतिक्रान्तासु गतासु कालकलासु अल्पक्षणेषु इत्यर्थः।

(ब) वह्नेरिति। शुद्धिविधायिनः शोधकस्य भगवतः वह्नेः अत्युद्धतैः अतिप्रबलैः तेजोभिः अपिरम्लाध्याहार्यः। अम्लानाम् अनसूयया अत्रिपत्न्या विरचितां मौलिस्रजं शिरोदाम बिभ्रती धारयन्ती मैथिली पादाङ्गुष्ठस्य नखाग्रे दत्ते न्यस्ते नयने यया तादृशी नीरन्ध्रः अविरलः यः विन्यासः लोकानामवस्थानमिति यावत् तस्मात् स्तोकम् अल्पम् आलक्ष्यं मुखं यस्याः तथाभूता सती चितावलयतः अग्निमण्डलात् द्राक् झटिति निर्गता चलिता। शार्दूलविक्रीडितं वृत्तम्।

नादौ न मध्ये नान्ते च सीताया हव्यलेहिनि।
शुद्धस्येव सुवर्णस्य जातो वर्णविपर्य्ययः॥ १२॥ (भ)

लङ्का। अणुचिदआरी हुदवहो जं जणअतणयासुद्धि-कारणं भोदि (११)।

अलका। सखि! (म) सर्वाङ्गहिरण्मयि! यथा।

[शु]द्धाया: क इवात्र शोधनविधिः? स्वःसैन्धवीनामपां
[पू]तानां परिपूतये किमपरं? तत्ते सखी मन्यते।
[ल]ावण्यामृतसारणीसरणिभिर्निर्वाणरोचिर्लतो (य)
[नि]र्दग्धुं कलयाऽपि हन्त! न शिखी शक्तोऽभवन्मैथिलीम्॥१३॥

---

(११) अनुचितकारी हुतवहो यज्जनकतनयाशुद्धिकारणं भवति।

---

(भ) नेति। सीताया हव्यलेहिनि अग्नौ शुद्धस्य सुवर्णस्येव वर्ण-विपर्य्ययः वर्णस्य अन्यथाभावः मालिन्यमिति भावः आदौ न मध्ये न अन्ते च न जातः।

(म) सर्वाङ्गहिरण्मयि! स्वर्णमयसर्वशरीरे इत्यर्थः लङ्कायाः स्वर्ण-भूमित्वप्रसिद्धेरिति भावः।

(य) शुद्धाया इति। अत्र जगति शुद्धायाः स्वत इति भावः। सीतायाः शोधनविधिः क इव? पूतानां स्वतः शुद्धानां स्वःसैन्धवीनां स्वर्गसिन्धुभवानाम् अपां मन्दाकिनीपयसामित्यर्थः परिपूतये विशुद्धये अपरम् अन्यत् किं तत् ते तव सखी अहमिति भावः मन्यते? न किमपीत्यर्थः। शिखी अग्निः लावण्यामृतानां याः सारण्यः नद्यः तासां सरणिभिः प्रवाहैः सीताया इति भावः निर्वाणाः शमिताः रोचिर्लताः ज्वालानिचया यस्य तथाभूतः अतएव हन्त हर्षे कलयापि अंशतोऽपि ईषदपीत्यर्थः मैथिलीं निर्दग्धुं न शक्तोऽभवत् न शशाक। शार्दूलविक्रीडितं वृत्तम्।

नेपथ्ये।

योगीन्द्रश्च नरेन्द्रश्च यस्याः स जनकः पिता।

लङ्का। ता किं तिस्स (१२)।

नेपथ्ये।

सा शुद्धा रामच्छहिणी वह्नौ दशरथस्नुषा॥ १४॥ (र)

ततश्च।

बद्धः सेतुर्लवणजलधौ क्रोधवह्नेः समित्त्वं

नीतं रक्षःकुलमधिगताः शुद्धिमन्तश्च दाराः।

तेनेदानीं विपिनवसतावेष पूर्णप्रतिज्ञो

दिष्ट्याऽयोध्यां व्रजति दयिताप्रीतये पुष्पकेण॥ १५॥ (ल)

तद्भोः (व)प्लवङ्गयूथपतयः! सर्वे गोलाङ्गूलसेनानायका! नि

शेषाच्छभल्लचमूपालकाश्च! महाराजसुग्रीवो वः समाज्ञा

(१२) तत् किं तस्याः।

(र) योगीन्द्रइति। योगिनामिन्द्रः प्रवरश्च नरेन्द्रश्च सः प्रसिद्ध जनकः यस्याः पिता, सा दशरथस्य स्नुषा पुत्रवधूः रामच्छहिणी सीता वह्नौ शुद्धा।

(ल) बद्ध इति। लवणजलधौ सेतुः बद्धः, रक्षसां कुलं क्रोध वह्नेः क्रोधाग्नेः समित्त्वं काष्ठत्वं दाह्यत्वमिति भावः। नीतं राक्षस निहता इति भावः। शुद्धिमन्तः अग्निविशुद्धाश्च दाराः पत्नी अधि गताः प्राप्ताः। तेन हेतुना इदानीं विपिनवसतौ वनवासे दिष्ट्या भाग्येन पूर्णप्रतिज्ञः एषः रामः दयितायाः सीतायाः प्रीतये सन्तो षाय पुष्पकेण तदाख्येन विमानेन अयोध्यां व्रजति गच्छति मन्दा क्रान्तावृत्तम्।

(व) प्लवङ्गयूथपतयः! वानरसेनापतयः! गोलाङ्गूलसेनानायकाः

यति यदुत सज्जीभवन्तु भवन्तस्त्रिभुवनैकमङ्गलकलसेन रघुवंशमुक्तामणिना चात्रधर्म्मरक्षाविधिसिद्धमन्त्रेण रामदेवेन सममयोध्यां गन्तुम्।

सम्प्रेषितश्च हनुमान् भरतस्य पार्श्वं
लङ्काङ्गनाचकितनेत्रनिरीक्षितश्रीः।
यात्येष वारिनिधिलङ्घनदृष्टसारो
राज्याभिषेकसमयोचितकार्य्यसिद्ध्यै॥ १६॥ (ग्र)

अलका। तदावामपि रामभद्रदर्शनसुखमनुभवावः।

इति निष्क्रान्ते। विष्कम्भः।

ततः प्रविशतो विमानयानेन रामलक्ष्मणौ सीतात्रिजटे सुग्रीवविभीषणौ च।

रामः। सीतां प्रति।

---

गोलाङ्गूलानां वानरविशेषाणां सेनानायकाः सेनापतयः॥ निःशेषाः सर्वे अच्छभल्लानां भल्लूकानां चमूपालकाः सेनाध्यक्षाः॥ त्रिभुवनस्य एकः अद्वितीयः मङ्गलकलसः माङ्गलिकपूर्णकुम्भः तेन। रघुवंशस्य मुक्तामणिना मौक्तिकरत्नेन उज्ज्वलकारिणेत्यर्थः। चात्रधर्मस्य रक्षाविधेः पालनव्यापारस्य सिद्धः फलवान् मन्त्रः तेन।

(ग्र) सम्प्रेषित इति। वारिधेः समुद्रस्य लङ्घनेन दृष्टः सारः बलं सामर्थ्यमित्यर्थः यस्य तादृशः अतएव भरतस्य पार्श्वं सम्प्रेषितश्च एष हनुमान् लङ्काङ्गनाभिः राक्षसीभिरित्यर्थः चकितनेत्रं पुनरयं किं करोति वेति सभयनयनं यथातथा निरीक्षिता दृष्टा श्रीः यस्य तादृशः सन् राज्याभिषेकस्य समये उचितानि यानि कार्य्याणि, तेषां सिद्ध्यै सम्पादनाय याति गच्छति। वसन्ततिलकं वृत्तम्।

यत्सख्युः शशिशेखरस्य धनदाल्लङ्केश्वरेणाहृतं
तन्मन्थाच्च विभीषणे परिहृतं दत्तं च तेनाऽपि नः ।
किञ्चिन्न्यञ्चितकन्धरेण शिरसा धृत्वा प्रसन्नां दृशं
तद्भक्त्या ललिताङ्गि ! पुष्पकमिदं वन्दस्व मोदस्व च॥१७॥(भ)

सीता वन्दते ।

रामः । पश्चादवलोक्य ।

यस्यामजर्जरित चन्द्रिकमर्कपादै-
स्त्रासान्निशाचरपतेरुषसि व्यभासि ।
व्यावर्त्त्य वक्त्रकमलं कमलाक्षि ! पश्य
लङ्केति तां नवविभीषणराजधानीम् ॥ १८ ॥ (स)

---

(भ) यदिति । लङ्केश्वरेण रावणेन शशिशेखरस्य हरस्य सख्युः धनदात् यत् आहृतं निर्जित्य लब्धं तस्य मन्थात् नाशात् यत् विभीषणे परिहृतं विभीषणेन लब्धमिति भावः तेनापि विभीषणेनापि नः अस्मभ्यं दत्तञ्च, हे ललिताङ्गि चार्वङ्गि ! किञ्चित् ईषत् न्यञ्चिता नता कन्धरा ग्रीवा यस्य तादृशेन शिरसा प्रसन्नां दृशं धृत्वा प्रसन्ननयनेन इत्यर्थः भक्त्या तदिदं पुष्पकं विमानरत्नं वन्दस्व मोदस्व च आनन्दमनुभव च । शार्दूलविक्रीड़ितं वृत्तम् ।

(स) यस्यामिति । हे कमलाक्षि ! यस्यां लङ्कायाम् अर्कस्य सूर्य्यस्य पादैः किरणैः पादा रश्मङ्घ्रितुर्य्यांशा इत्यमरः । निशाचरपतेः रावणस्य त्रासात् भयात् उषसि प्रभाते अजर्जरिता अक्षीणाश्चन्द्रिका यस्मिन् तद् यथा तथा व्यभासि विभासितं विराजितमित्यर्थः । सूर्य्यः उषसि तथा रश्मीन् विस्तारयितुं समर्थ आसीत् यथा रावणाभिमतचन्द्रिकायां मालिन्यं न स्यादिति भावः । वक्त्रकमलं

सीता। अवलोक्य। एसा (ङ) सा विणआणन्दणसमाणीदमेरुमहाजम्बूसाहासमुप्पणा सुणीअदि (१३)।

रामः। आम् मैथिलि ! एवं पुराविद आचक्षते। पुरो दर्शयन्।

अग्रे विलोकय कृशाङ्गि ! कुतूहलेन
दत्त्वा दृशं तरुणकेतकपत्रदीर्घाम्।
नानास्त्रमन्त्रणपरं कपिराक्षसानां
युद्धं कचाकचि तल ञलि च प्रवृत्तम्॥ १८॥(च)

अन्यतो दर्शयन्।

अत्रासीत् फणिपाशबन्धनविधिः शक्त्या भवद्देवरे
गाढं वक्षसि ताड़िते हनुमता द्रोणाद्रिरत्राहृतः।

(१३) एषा सा विनतानन्दनसमानीतमेरुमहाजम्बूशाखासमुत्पन्ना श्रूयते।

सुखपद्मं व्यावर्त्त्य उत्तोल्य लङ्केति तां नवविभीषणराजधानीं पश्य अवलोकय। वसन्ततिलकं वृत्तम्।

(ङ) विनतानन्दनेन गरुड़ेन समानीता मेरोः सुमेरोः महाजम्बुवृक्षस्य शाखया समुत्पन्ना। पुरा किल गरुत्मान् मेरोः जम्बुवृक्षस्य शाखामानीय इमां लङ्कां विरचितवानिति पुराणम्।

(च) अग्रे इति। हे कृशाङ्गि ! तरुणं नवं यत् केतकपत्रं तद्वत् दीर्घाम् आयतां दृशं दत्त्वा अग्रे पुरतः कुतूहलेन कौतुकेन कपिराक्षसानां नानास्त्रमन्त्रणपरं विविधशस्त्रवर्षणसमन्वितं कचाकचि केशाकेशि तलातलि चपेटाचपेटि च प्रवृत्तं युद्धं युद्धक्षेत्रं विलोकय। वसन्ततिलकं वृत्तम्।

दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं लम्भितः
केनाप्यत्र मृगाक्षि! राक्षसपतेः कृत्ता च कण्ठाटवी॥२०(क)

सीता विहस्य। अज्जउत्तो जाणदि को उण एसो (१४)।

रामो लज्जते।

सर्वे स्मयन्ते।

सुग्रीवः।

लङ्केन्द्रानुज एष मैथिलि! महान् योऽयं कबन्धः पुरो
वारां भर्त्तरि शैलसेतुरपरः प्रोतो यथा राजते।
निद्रालोरतितुन्दिलस्य खलतेः चीवस्य घोणासृजा-
मोघेनास्य भयस्पृशोऽपि निभृतं स्वर्वासिनो हासिताः२१(ख)

---

(१४) आर्य्यपुत्रो जानाति कः पुनरेषः।

---

(क) अत्रेति। हे मृगाक्षि! अत्र फणिपाशबन्धनविधिः नागपाशास्त्रबन्धनम् आसीत् अत्र भवत्या देवरे लक्ष्मणे शक्त्या तदाख्येन अस्त्रेण वक्षसि अवच्छेदे समप्ती। गाढं दृढं यथा तथा ताड़िते सहृते रावणेनेति शेषः हनुमता द्रोणाद्रिः गन्धमादनगिरिः आहृतः आनीतः। अत्र दिव्यैः लक्ष्मणस्य शरैः इन्द्रजित् लोकान्तरं लम्भितः नीतः। अत्र केनापि जनेन राक्षसपतेः रावणस्य कण्ठाटवी कण्ठकाननं कृत्ता छिन्ना च स्वमुखेन आत्मोत्कर्षस्य अनौचित्यात् रामेणात्र केनापीति भङ्ग्या विन्यस्तमिति ध्येयम्। शार्दूलविक्रीडितं वृत्तम्।

(ख) लङ्केन्द्रानुज इति। हे मैथिलि! पुरः अग्रतः योऽयं महान् कबन्धः छिन्नशिराः कायः वारां भर्त्तरि वारिधौ प्रोतः बद्धः अपरः शैलसेतुर्यथा पर्वतनिर्मितसेतुरिव राजते, एष लङ्केन्द्रस्य राव-

सीता। अज्जउत्तेण देवा वि(ग)प्पहसणणट्टं पेक्खाविदा(१५)।

रामः। किञ्चित् स्मित्वा पुष्पकं प्रति। हंहो विमानराज! विमुच्य(घ)वसुधासविधवर्त्तिनीं गतिं किञ्चिदुच्चैर्भव कुतूहलिनी जानकी दिव्यदर्शनव्यतिकरस्य।

ऊर्द्धगतिनाटितकेन।

रामः।

यथायथा रोहति बद्धवेगं
व्योम्नः शिखां पुष्पकमानताङ्गि!।
महाम्बुधीनां वलयैर्विशालै-
स्तथातथा सङ्कुचतीव पृथ्वी॥ २२ ॥ (ङ)

---

(१५) आर्य्यपुत्रेण देवा अपि प्रहसनन्टत्यं प्रेक्षायिताः।

---

णस्य अनुजः कुम्भकर्णः। निद्रालोः अतिनिद्राशस्य अतितन्द्रिलस्य अतिस्थूलोदरस्य खलतेः निष्कोशशिरसः जीवस्य मत्तस्य अस्य घोणाया नासिकाया असृजां शोणितानां नासाच्छेदभवानामिति भावः ओघेन प्रवाहेण भयस्पृशोऽपि भीता अपि स्वर्गवासिनः देवाः निभृतं गूढं हासिताः। शार्दूलविक्रीडितं वृत्तम्।

(ग) प्रहसनन्टत्यं प्रहसनं हास्यरसं नाटकं तस्य न्टत्यं नर्त्तनं प्रेक्षायिताः दर्शिताः।

(घ) वसुधासविधवर्त्तिनीं पृथिवीसमीपचारिणीम्। दिव्यानां वस्तूनां दर्शनस्य व्यतिकरः सम्बन्धः तस्य।

(ङ) यथायथेति। हे आनताङ्गि! बद्धवेगं धृतरयं पुष्पकं यथा यथा व्योम्नः अन्तरीक्षस्य शिखाम् अग्रं रोहति उत्पतति तथा तथा पृथ्वी महाम्बुधीनां महासमुद्राणां विशालैः महद्भिः वलयैः

सीतां प्रति। सुरचारणकिन्नरविद्याधरसङ्कुलं गगन-
मीक्षतां मैथिली।

प्रविश्य विद्याधरः। रामभद्र! महेन्द्रादेशादेष रत्नशेखरो
विद्याधरकुमारस्ते दिव्यचरितं व्यनक्ति।

रामभद्रः। अहो! महान् प्रसादोऽस्मासु देवराजस्य।

रत्नशेखरः। सीतां प्रति।

बन्धे वारिनिधेः कृतेऽपि गिरिभिः सोढः शिरोमण्डल-
च्छेदो राक्षसपुङ्गवेन समरे यस्याः किमन्यत् कृते।
कीदृक् सा जनकात्मजेति रभसाद्विद्याधरैर्द्वन्द्वशः
पाणिच्छन्ननिवारितार्ककिरणैस्त्वं कौतुकाद् दृश्यसे २२ (च)

सीता। अपवार्य।

विद्याधराः सहचरीचतुरोक्तिमार्गे
रागस्पृशो मन्मथगर्भयथेष्टचेष्टाः।

---

मण्डलैः सह सङ्कुचतीव खर्वीभवतीव दूरपतितत्वात् क्षुद्रवत् विभा-
तीति भावः। उपजातिवृत्तम्।

(च) बन्धे इति। वारिनिधेः समुद्रस्य बन्धे कृतेऽपि समुद्रबन्धने-
ऽपि तस्य चैतन्योदयो नाभूदित्यपि शब्दार्थः। यस्याः कृते निमित्तं
राक्षसपुङ्गवेन रावणेन समरे युद्धे शिरोमण्डलच्छेदः सोढः दशशि-
रांसि छिन्नानि सोढानि इत्यर्थः किमन्यत् किमपरं वक्तव्यमिति शेषः
सा जनकात्मजा कीदृक् इति रभसात् वेगात् द्वन्द्वशः विद्याधरैः विद्या-
धरमिथुनैरित्यर्थः पाणिभ्यां छन्ना अतएव निवारिताः अर्ककिरणाः
आतपाः यैः तथाभूतैः सूर्यकिरणान् हस्ताभ्यामाच्छादयद्भिरित्यर्थः
त्वं दृश्यसे अवलोक्यसे। शार्दूलविक्रीडितं वृत्तम्।

निस्तल्पमल्पसमयं निविडाभ्रखण्ड-
कुञ्जान्तरेष्विह रताद्भुतमाद्रियन्ते ॥ २४ ॥ (छ)

रामः । प्रिये पृथ्वीपुत्रि ! (ज)नीरन्ध्रबन्धमपि वारिवाह-व्यूहं द्विधा विधाय पुष्पकं प्रवर्त्तते विलोक्य विहस्य ।

क्षिप्तं त्वया काञ्चनकान्तिदाम
यन्मत्तवारणमुपेत्य कुतूहलिन्या ।
तेनामुना जलधरोऽयमरालकेशि !
सद्यस्तडिद्वलयवानिव पश्य जातः ॥ २५ ॥ (झ)

अपि च ।

हस्ते त्वया हारिणि हारयष्टिभि-
र्विमानवातायनतः कुतूहलात् ।

---

(छ) विद्या[illegible]रा इति । विद्याधराः देवयोनिविशेषाः सहच[illegible]रीणां स्वप्रियाणां विद्याधरीणां चतुराणां सविभ्रमाणाम् उक्तीनां वचनानां मार्गे पथि वचनचातुर्य्यामिति भावः । रागस्पृशः अनुरागा-विष्टाः अतएव गगनगर्भेषु गगनाभोगेषु यथेष्टचेष्टाः स्वेच्छाविहा-रिणः सन्तः इह एषु निविडानि घनानि अभ्रखण्डान्येव मेघशकला-न्येव कुञ्जान्तराणि भित्त्यभ्यन्तरप्रदेशाः तेषु अल्पसमयं किञ्चित्कालं निस्तल्पं शय्यारहितम् अतएव रताद्भुतम् अद्भुतं सुरतम् आद्रियन्ते सेवन्ते । वसन्ततिलकं वृत्तम् ।

(ज) नीरन्ध्रबन्धं निविड़बन्धं वारिवाहव्यूहं मेघनिचयम् ।

(झ) क्षिप्तमिति । हे अरालकेशि ! कुटिलचिकुरे ! त्वया कुतू-हलिन्या कौतुकवत्या मत्तवारणं [illegible]मुपेत्य प्राप्य मत्वेति यावत् यत् काञ्चनकान्ति कनकप्रभं दाम माल्यं क्षिप्तम्, तेन अमुना दाम्ना अयं जलधरः मेघः सद्यः सहसा तडिद्वलयवान् विद्युन्मण्डलशालीव जातः पश्य अवलोकय । इन्द्रवज्रावृत्तम् ।

कृते विदध्यात्सदृशीं प्रतिक्रिया-
मितीव धाराम्बु घनो निरस्यति ॥ २६ ॥ (ञ)

सीता । अज्जउत्त ! किं उण एदं(ट)करिदन्तच्छेदपण्डुरं पुव्वपच्छिमसिन्धुबन्धोभअपेरन्तं तदुत्तरदिसाकुहरपूरण-धुरन्धरं दीसदि (१६)

रत्नशेखरः । जनकनन्दिनि ! किमत्र रावणारिणा(ठ) रत्नशेखरं पृच्छ । हिमालयः खल्वयम् ।

सीता । किं जो सो(ड)विन्दारअबिन्दवन्दिदरुद्दचरणप्प-

---

(१६) आर्यपुत्र ! किं पुनरिदं करिदन्तच्छेदपाण्डुरं पूर्वपश्चिमसिन्धुबद्धोभयपर्यन्तं तदुत्तरदिशाकुहरपूरणधुरन्धरं दृश्यते ।

---

(ञ) हस्ते इति । त्वया कुतूहलात् विमानस्य यत् वातायनं गवाक्षः तस्मात् हारयष्टिभिः हारिणि मनोहरे हस्ते कृते मेघस्पर्शनार्थं तदुपरि निहिते सति घनः मेघः सदृशीं प्रतिक्रियां विदध्यात् कुर्य्यात् इतीव धाराम्बु वारिधारा निरस्यति उद्‌गिरति । तव स्पर्शमसहमान इव वारिधारया तव हस्तमभिवर्षतीति भावः । वंशस्थ-विलं वृत्तम् ।

(ट) करिदन्तच्छेदवत् हस्तिदशनखण्डमिव पाण्डुरं शुभ्रं पूर्व-पश्चिम सिन्धुबद्धोभयपर्य्यन्तं पूर्वापरसमुद्रावगाढ़ोभयप्रान्तं उत्तरदिशायाः कुहरस्य अभ्यन्तरभागस्य पूरणे व्यापने धुरन्धरं समर्थतरं तदिदं किं वस्तु इति शेषः ।

(ठ) रावणारिणा रामेण पृष्टेन इति शेषः । रत्नशेखरं तदाख्य विद्याधर कुमारम् ।

(ड) वृन्दारकेति । वृन्दारकवृन्दैः देवगणैः वन्दितस्य अर्चितस्य

डिबिम्बचुंबिदसिलुच्छङ्गो (ढ) गङ्गासोत्तसीमन्तिदणिअंबो हेरम्बदन्तमुसलुल्लिहिदमेहलाबन्धो णिवडिदहरवसहवर-खुरखण्डिदधरणिपुठ्ठो चित्तसिहण्डिमण्डलावचिदमन्दा-रकुसुमप्पसरो गोरीगुरुत्ति णिव्विग्घं महग्घं घिदो सुणी-अदि (१७)।

रत्नशेखरः। स एवायम्।

श्रीकण्ठश्वशुरः स एष भगवान् मेनापतिः पर्वतः

पुत्रीवानुमया पुरः किमपरं हेरम्बमातामहः।

---

(१७) किं च एष वृन्दारकवृन्दवन्दितरुद्रचरणप्रतिबिम्बचुम्बित-शिलोत्सङ्गो गङ्गास्रोतःसीमन्तितनितम्बो हेरम्बदन्तमुषलोल्लिखितमे-खलाबन्धो निपतितहरवृषभवरखुरखण्डितधरणिपृष्ठश्चित्रशिखण्डि-मण्डलावचितमन्दारकुसुमप्रसरो गौरीगुरुरिति निर्विघ्नमहार्घितः श्रूयते।

---

रुद्रस्य चरणप्रतिबिम्बेन पदचिह्नेन चुम्बितः स्पृष्टः शिलोत्सङ्गः प्रस्तरतलं यस्य तादृशः।

(ढ) गङ्गेति। गङ्गायाः स्रोतसा सीमन्तितः नितम्बः मध्यभागः यस्य तथाभूतः। हेरम्बेति हेरम्बस्य गणेशस्य दन्तमुषलेन मुषला-कृतिना दन्तेन उल्लिखितः उद्घृष्टः मेखलाबन्धः कटिबन्धः यस्य तथाविधः। निपतितेति। निपतितस्य निपन्नस्य हरवृषभस्य शिव-वाहनस्य वरैः महद्भिः खुरैः खण्डितं दलितं धरणीपृष्ठं भूमिभागः यस्य तादृशः। चित्रेति चित्रशिखण्डिनां सप्तर्षीणां मण्डलैः गणैः अवचितः मन्दारकुसुमानां देवतरुविशेषपुष्पाणां प्रसरो यस्मिन् तथा-भूतः। निर्विघ्नं निर्बाधं सर्ववादिसम्मततयेतिभावः महार्घितः महा-मूल्यः सर्वजनादरणीय इति भावः।

यस्यायं महिमा यदत्र शमिनः श्यामाकमुष्टिम्पचाः
स्वास्वेवाश्रमभूषु दिव्यवपुषः क्रीडन्ति कामाज्ञया ॥२७॥(ण)

अपिच ।

स्त्रीणां जन्ममहातरोः किमपरं सौभाग्यलाभोत्सव-
स्याप्तेरधिदैवतं गिरिसुता साप्यस्य कुञ्जान्तरे ।
एकाङ्गुष्ठनिपीडितक्षिति तपस्तप्त्वा सहस्रं समा-
श्चन्द्रापीडशरीरसंविभजनप्रेमाणमापद्यत ॥ २८ ॥ (त)

सीता । अज्जउत्त! इधज्जेव अध्धनारीस्सरो हरो संवुत्तो (१८) ।

---

(१८) आर्यपुत्र ! इहैवार्द्धनारीश्वरो हरः संवृत्तः ।

---

(ण) श्रीकण्ठेति । पुरः अग्रतः स एषः उमया पुत्रीवान् गौरीदुहितृक इत्यर्थः हेरम्बस्य गणेशस्य मातामहः मेनायाः पतिः श्रीकण्ठस्य हरस्य श्वशुरः पर्वतः । किमपरं वक्तव्यमितिशेषः । यस्य पर्वतस्य अयं महिमा एतादृक् माहात्म्यं यत् अत्र पर्वते श्यामाकमुष्टिम्पचाः श्यामाकधान्यमुष्टिकृतवृत्तयः शमिनः तापसाः स्वासु एव आश्रमभूषु दिव्यवपुषः दिव्यदेहाः सन्तः कामाज्ञया मदनादेशेन क्रीड़न्ति । शार्दूलविक्रीड़ितं वृत्तम् ।

(त) स्त्रीणामिति । स्त्रीणां जन्म एव महातरुः तस्य सौभाग्यं स्वामिवाल्लभ्यं तस्य लाभ एव उत्सवः तस्येतिशेषः किमपरं नान्यत् किमपीत्यर्थः । गिरिसुता पार्वती तस्य फलस्य प्राप्तेः अधिदैवता अधिष्ठात्री देवी गिरिसुताप्रसादमन्तरेण स्त्रीणां सौभाग्यस्य अप्राप्तेरितिभावः । सापि गिरिसुता अस्य पर्वतस्य कुञ्जान्तरे कुञ्जमध्ये एकाङ्गुष्ठेन निपीड़िता क्षितिः यस्मिन् तद् यथा तथा सहस्रं समाः वत्सरान्

रत्नशेखरः। श्रां (थ) वासुन्धरेयि !

अत्रोढायां गिरिदुहितरि प्रीतिमानिन्दुमौलिः
प्रेमावेशाज्झटिति भगवानर्द्धनारीश्वरः सन्।
मन्दं देवैः प्रणतचरणः प्रत्यभिज्ञानलेशा-
द्वामे पाणौ तदितरकरं ताडयित्वा जहास ॥ २८ ॥ (द)

रामः। किमुच्यते सर्वाश्चर्य्यनिधानं हि नीहार-महागिरिः।

रत्नशेखरः। यथाज्ञातं विराधविध्वंसनेन।

अस्मिन्नूढा मृडानी द्युमरिदिह धृता दन्तिदैत्योऽत्र भिन्न
श्छिन्नं ब्राह्मं शिरोऽस्मिन्निह गुरुनिधने निर्मिता मातरश्च।

---

तपः तत्वा चन्द्रापीड़स्य हरस्य शरीरं संविभज्यते अनेनेति तथाभूतं प्रेमाणम् आपद्यत प्राप्तवती प्रेम्णा हरस्य अर्द्धाङ्गहारिणी अभूदिति भावः। शार्दूलविक्रीड़ितं वृत्तम्।

(थ) वासुन्धरेयि ! वसुन्धराया अपत्यं स्त्रीति तत्सम्बुद्धौ।

(द) अत्रेति अत्र पर्वते गिरिदुहितरि पार्वत्यां ऊढायां परिणीतायां सत्यां भगवान् इन्दुमौलिः हरः प्रीतिमान् प्रेमावेशात् प्रणयातिरेकात् अर्द्धनारीश्वरः अर्द्धांशेन नारी अर्द्धांशेन ईश्वरः पुरुषः युगलरूपधारी सन् देवैः मन्दं क्रमशः प्रणतचरणः वन्दितपदः प्रत्यभिज्ञानस्य पूर्वानुभवस्य लेशात् अल्पत्वात् ज्ञानादितिभावः। वामे पाणौ नार्य्याः करे इति भावः तदितरकरं दक्षिणं हस्तं पौरुषमितिभावः ताड़यित्वा पूर्वं यथा आनन्देन हस्ताभ्यां वाद्यमकरोत् तथेतिभावः। जहास सर्वसमक्षं अप्रतिभतां हासव्याजे जुगोपेति भावार्थः। मन्दाक्रान्तावृत्तम्।

दृक्श्रोत्रप्रीतिपेयं दलितसुरपुरीदुर्गमद्वारमुद्रं (ध)
सिद्धानां पूर्वसिद्धैरिति हरचरितं वर्ण्यते चित्रमत्र ॥३०॥

सीता। इह हिमवन्तमहीहरे चन्दसेहराहिं मअरधअणिद्दहणं (न) रहुउलमहत्तरीआओ प्पसंसंतीओ आसि ता कहिं उण तम् (१८)।

---

(१८) इह हिमवन्महीधरे चन्द्रशेखरान्मकरध्वजनिर्दहनं रघुकुलमहत्तरिकाः प्रशंसन्त्य आसन् तत् क्व पुनस्तत्।

---

(ध) अस्मिन्निति। अस्मिन् पर्वते मृडानी पार्वती ऊढ़ा परिणीता हरेणेति सर्वत्र योज्यम्। इह द्युसरित् गङ्गा धृता शिरसीति शेषः। अत्र दन्तिदैत्यः गजासुरः भिन्नः दलितः। अस्मिन् ब्राह्मं शिरः छिन्नं पूर्वं ब्रह्मणः पञ्च मुखानि आसन् ततः केनचित् कारणेन भगवान् हरः क्रुद्धः तेषामेकं शिरश्चिच्छेदेति पुराणकथात्रानुसन्धेया। इह गुरोः श्वशुरस्य दक्षस्य निधने निधनार्थमित्यर्थः मातरः ब्राह्मीत्याद्याः निर्मिताः सृष्टाश्च। अत्र सिद्धानां पूर्वसिद्धैः अतिपुरातनैः सिद्धपुरुषैः दृशां चक्षुषां श्रोत्राणाञ्च प्रीत्या आनन्देन पेयं दृश्यं श्राव्यञ्च इत्यर्थः दलिताः खण्डिताः सुरपुरीणां तिसृणामसुरनगरीणां दुर्गमा द्वारमुद्रा द्वारार्गलाः यस्मिन् तादृशं चित्रम् अद्भुतम् इति पूर्वोक्तं हरचरितं वर्ण्यते कीर्त्त्यते गीयते वा। स्रग्धरावृत्तम्।

(न) रघुकुलमहत्तरिकाः रघुकुलस्य महामाननीयाः अस्माकं श्वश्रू इति भावः। क्व कुत्र?। मरकतेति मरकतमणीनां मरीचिवीचिभिः मयूखप्रभाभिः। वंशकरीराणां वंशाङ्कुराणां नीलकान्तिभिः श्यामप्रभाभिः। परिकल्पितं रचितमिव अनूरुसारथेः सूर्यस्य रथयोजितानां तुरङ्गाणां हरितामितिभावः रोमराजिभिः श्यामवर्णश्लोमनिवहैः। शितिकण्ठानां मयूराणां याः कण्ठमण्डल्यः तासामिव

दत्तशेखरः। यदिदं निर्मितमिव मरकतमणिमरीचिवीचि-भिराच्छादितमिव वंशकरीरनीलकान्तिभिः परिक-ल्पितमिवानूरुसारथिरथतुरङ्गमरोमराजिभिरुत्पादितमिव शितिकण्ठकण्ठमण्डलीमेचकरुचिसञ्चयैस्तरुभिराश्रमपदं भगवतो वृषभध्वजस्य।

एतत्सुन्दरि! देवदारुविपिनं शैलस्य गौरीगुरो-
रस्मिन् वासवशासनेन रहयन् सद्यः समाधिक्रियाम्।
प्रत्यक्षं गिरिजन्मनः सुरजने स्तोत्राय सज्जाञ्जलौ
रुद्रस्याम्बकपावकेन मदनो वेगादनङ्गीकृतः॥ २१॥

सीता। परमेसरसरीरपरिक्खिदतिक्खविसिहस्स मअरधअस्स कदमो उण णिवेसो (२०)।

---

(२०) परमेश्वरशरीरपरीक्षिततीक्ष्णविशिखस्य मकरध्वजस्य कतमः पुनर्निवेशः।

---

मेचकाः श्यामलाः ये रुचिसञ्चयाः प्रभावल्यः ताभिः तरुभिरुप-लक्षित मिति शेषः।

(प) एतदिति। हे सुन्दरि! गौरीगुरोः शैलस्य एतत् यदित्य-ध्याहार्य्यं देवदारुविपिनं देवदारुवनं अस्तीति शेषः अस्मिन् मदनः कामः वासवस्य इन्द्रस्य शासनेन आदेशेन समाधिक्रियां हरस्य समाधिव्यापारं रहयन् प्रतिबध्नन् गिरिजन्मनः पार्वत्याः प्रत्यक्षं समक्षं सुरजने देववृन्दे स्तोत्राय सज्जाञ्जलौ स्तोत्रं कुर्वत्यपीतियावत् रुद्रस्य अम्बकपावकेन नेत्राग्निना वेगात् सद्यः सपदि अनङ्गीकृतः भस्मीकृतः। शार्दूलविक्रीड़ितं वृत्तम्।

(फ) परमेश्वरस्य शरीरेण परीक्षितम् अनुभूतं तीक्ष्णं विशिखं शरः यस्य तादृशस्य निवेशः स्थानम।

रत्नशेखरः ।

एतन्मैथिलि ! मन्मथाश्रमपदं रत्या स्वयं वर्द्धितै-
लीलाशाखिभिरञ्चितान्तिकमितः केलीशकुन्ताश्रयैः ।
शृङ्गारस्य रसो मधुश्च समयो देवश्च ताराधिपो
रागः पञ्चमसंज्ञकश्च ललितैस्ते यत्र सिद्धा व्रतैः ॥३२॥ (ब)

सीता । सकौतुकम् । (भ) पुञ्जोकिदअज्जउत्तकित्तिसंताणाणुआरी रासीभूदहरट्टहाससरिसरिवेसो प्पलआणलपिण्डोकिदक्खोरसमुद्दुद्दुक्करप्पडिरूवो कदरो उण एस महिहरो (२१) ।

---

(२१) पुञ्जीकृतार्य्यपुत्रकीर्त्तिसन्तानानुकारी राशीभूतहराट्टहाससदृशनिवेशः प्रलयानलपिण्डीभूतक्षीरसमुद्रदुग्धोत्करमतिरूपः कतरः पुनरेष महीधरः ।

---

(ब) एतदिति । हे मैथिलि ! इतः अस्मिन् प्रदेशे रत्या कामपत्न्या स्वयं वर्द्धितैः केलीशकुन्तानां क्रीडापक्षिणां आश्रयैः आश्रितक्रीडाशकुन्तैरित्यर्थः लीलाशाखिभिः केलितरुभिः अञ्चितं शोभितम् अन्तिकं यस्य तादृशम् एतत् दृश्यमानमितिभावः मन्मथस्य कामस्य आश्रमपदं यत्र शृङ्गारः रसश्च, मधुः वसन्तः समयश्च, देवः ताराधिपः चन्द्रश्च, पञ्चमसंज्ञकः पञ्चमनामा रागश्च ते सर्वे परिचारका इति शेषः ललितैः मनोहरैः व्रतैः नियमैः सिद्धाः सिद्धिं गताः सर्वेषां मनांसि हरन्तीतिभावः । शार्दूलविक्रीड़ितं वृत्तम् ।

(भ) पुञ्जीकृतेति पुञ्जीकृतस्य राशीकृतस्य आर्य्यपुत्रकीर्त्तिसन्तानस्य राघवयशस्तोमस्य अनुकारी सदृशः । राशीभूतस्य हराट्टहासस्य सदृशः

रामः । रुद्रावासः कैलास इति मे तर्कः ।

रत्नशेखरः । यथावगतं ताडकाताडनेन ।

कैलासः स्फटिकाद्रिरेष भगवानेनं भवानीसखः

सख्यादैलबिलस्य भक्तिजनितान्नित्यं शिवः सेवते ।

किञ्चास्मिन्ननुमेखलं नखमुखच्छेदैः समावेद्यते

हेलोत्पाटनपूर्वकालनिहितैर्लङ्कापतेर्विक्रमः ॥३३॥(म)

अत्र च ।

कैलासाचलकर्णिकेयमलका नेत्रैकपेया पुरी

देवस्य द्रविणप्रभोः किमपरं शृङ्गारसारस्य भूः ।

यस्यामस्तमितेऽद्य राक्षसपतौ यक्षाङ्गनानाममी

वर्त्तन्ते प्रतिचत्वरं प्रतिगृहं प्रत्यापणं चोत्सवाः॥३४॥ (य)

---

निवेशः यस्य तादृशः । प्रलयानलेन कल्पान्तवह्निना पिण्डीभूतस्य घनीभूतस्य क्षीरसमुद्रस्य यः दुग्धानामुत्करः समूहः तस्य प्रतिरूपः अनुरूपः ।

(म) कैलास इति । एषः स्फटिकाद्रिः स्फटिकमणिमयः अचलः कैलासः, भगवान् भवानीसखः शिवः भक्तजनितात् ऐलविलस्य कुबेरस्य सख्यात् हेतोः एनम् अचलं नित्यं सेवते आश्रयति । किञ्च अस्मिन् अनुमेखलं प्रतिमध्यभागम् हेलया अवलीलया उत्पाटनेन पूर्वकालं प्राक् रावणकर्तृ[illegible]त्तासोद्धरणसमये इत्यर्थः निहितैः कृतैः नखमुखानां नखाग्राणां [illegible]ाद्यते । [illegible]ण्डैः लङ्कापतेः रावणस्य विक्रमः समावेद्यते सम्यक् विज्ञ[illegible] कैलासार्धविक्रीडितं वृत्तम् ।

(य) कैलासेति [illegible]मा शृङ्गारस[illegible]र्णिका कर्णावतंसविशेषभूता नेत्रैकपेया दर्शनमनोर[illegible]ोः धनपते[illegible]य भूः क्षेत्रं विलासैकभूमिरिति भावः देवस्य द्रविणप्रभ[illegible] [illegible]श्वरस्य पुरी इयम् अलका नाम ।

रामः । पुरोऽवलोक्य । कः पुनरस्तमिताखिलककुद्बन्धः सलिलस्कन्धः (र) ।

रत्नशेखरः । उत्पत्तिसदनं(ल)कलहंसवयसामाकरः कनकारविन्दानां विलासदीर्घिका देवदेवस्य समवगाढतरान्तरसमदमहोष्मणा हेरम्बेण रभसाचान्तवीतवीचिभङ्गं गगनाङ्गपरिभ्रमिणा चन्द्रहरिणेन लीढलीढसीकरकणं कूलकुलायकारिणा कुमारमयूरेण प्रसारितकराकृष्यमाणार्णकं करिमकरत्रासादैरावतेभसेवितशाद्वलोपकण्ठं नीलकण्ठवृषेण समध्यासितपरिसरं सन्तानकारण्ये नारायणवराहेण वर्णितवैभवं वैकुण्ठकमठेनाभिलषितगर्भं पद्मनाभमहामत्स्येन नीतनीरं विसम्भ्यमरुन्धतीकराकलितकमलिनीपलपालैरानन्दितपुरन्दरमानसं मानसं नाम दिव्यं सरः ।

सीतां प्रति ।

---

विभ्रमरं वलव्यमया इति शेषः अद्य राक्षसमतौ अस्तमिते निहते यस्याम् अलकायां प्रतिवत्वरम् अङ्गने अङ्गने प्रतिगृहं गृहे गृहे प्रत्यापणम् आपणे आपणे च यक्षाङ्गनानाम् उत्सवाः वर्त्तन्ते । शार्दूलविक्रीडितं वृत्तम् ।

(र) अस्तमितेति । अस्तमिताः [illegible] ता अखिलानां ककुदां [illegible]ष्ठवस्तूनां बन्धाः प्रसराः येन तथो[illegible] [illegible]र्षपरिभावीत्यर्थः सलि[illegible]लस्कन्धः जलराशिः ।

(ल) उत्पत्तिसदनं ज[illegible] [illegible]हंसवयसां [illegible] हंसविशेषरूपपक्षिणां कलहंसा यस्मात् जायन्ते इ[illegible]यः । आकरः [illegible]रः उत्पत्तिस्थानं कनकारविन्दानां स्वर्णकमलानाम् विलासदीर्घिका क्रीड़ावापी देवस्य

एतन्मानिनि! मानसं सुरसरो निर्लूनहेमाम्बुजं
पार्वत्या प्रियपूजनार्थममुतो गङ्गा सरिन्निर्गता।
अस्माच्चित्रशिखण्डिभिश्च परमे पर्वण्युपादीयते
स्नानोत्तीर्णवृषाङ्कभस्मरजसां सङ्गात्पवित्रं पयः॥३५॥(ब)

---

देवस्य हरस्य। समरगाढेति। समरगाढगरेण सलिलेषु अतिनिमग्नेन अन्तरसमदेन अप्रकटमदेन महोष्मणा महदन्तस्तापेन हेरम्बेण गणेशेन रभसेन वेगेन आचान्तः पीतः अतएव वीतः विगतः वीचीनां तरङ्गाणां भङ्गः यस्य तथाविधम्। गगनाङ्गणपरिभ्रमिणा अन्तरीक्षे भ्रमता इत्यर्थः चन्द्रहरिणेन चन्द्रस्य क्रोडस्थितेन मृगेण लीललीढाः अतिशयेन लीढा इत्यर्थः सीकरकणाः जलकणाः यस्य तादृशम्। कूले तटे कुलायकारिणा नीडकारिणा कुमारस्य कार्त्तिकेयस्य मयूरेण प्रसारितेन करेण आकृष्यमाणानि अर्णांसि पयांसि यस्य तथाविधम्। करिभ्यः जलहस्तिभ्यः मकरेभ्यश्च त्रासात् ऐरावतेन इभेन हस्तिना सेवितः अध्युषितः शाद्वलस्य शादहरितस्य उपकण्ठः समीपं यस्य तथाभूतम्। नीलकण्ठस्य हरस्य वृषेण समध्यासितः आश्रितः परिसरो यस्य तथोक्तम्। सन्तानकानां देवतरुविशेषाणाम् अरण्ये कानने एतत्तटवर्त्तिनि इति भावः। नारायणवराहेण आदिवराहेण स्थितेनेति शेषः वर्णितं व्याख्यातं वैभवं यस्य तथाभूतम्। वैकुण्ठकमठेन आदिकच्छपेन अभिलषितः गर्भः अभ्यन्तरवासः यस्य तादृशम्। पद्मनाभमहामत्स्येन मीनावतारेण भीरिणा नीतं नीरं जलं यस्य तथाविधम्। त्रिसन्ध्यं तिसृषु सन्ध्यासु सायं प्रातर्मध्याह्नेषु अरुन्धत्याः करेण आकलितैः गृहीतैः कमलिनीपत्रपात्रैः आनन्दितं पुरन्दरस्य देवराजस्य मानसं यस्य तादृशम्।

(ब) एतदिति। हे मानिनि! एतत् सुराणां सरः सरोवरं मानसं पार्वत्या प्रियस्य हरस्य पूजार्थं निर्लूनानि हेमाम्बुजानि

सीता । को उण एसो (घ) णिच्चतरुणतरुमण्डलीचुम्बि-दमहाणिअम्बणिवेसो मत्तण्डचण्डेक्करहचक्कचुम्बणमसिण सुवण्णसिहरो महीहरो दीसदि (२२) ।

रत्नशेखरः ।

नेत्रं वासुकिरत्र केशवभुजैः सन्दानितोऽयं पुरा
चक्रं वल्लवतां परिभ्रमविधावेतस्य देवासुराः ।
मन्थाः सोऽयमभूत्समुद्रकलशे तन्नीयतां कौतुका-
देष श्रोत्रपरम्परापरिचितो दृग्गोचरं मन्दरः ॥३६॥ (ङ)

---

(२२) कः पुनरेष नित्यतरुणतरुमण्डलीपरिचुम्बितमहानितम्ब-सन्निवेशो मार्त्तण्डचण्डैकरथचक्रचुम्बनमसृणसुवर्णशिखरो महीधरो दृश्यते ।

---

स्वर्णकमलानि यस्मात् तथाविधम् । पार्वती यस्मात् देवदेवपूजार्थं कनकपद्मानि चिनोतीति भावः । गङ्गासरित् अस्तः अस्मात् सरसः निर्गता । यस्माच्च चित्रशिखण्डिभिः देवर्षिभिर्मरीच्यादिभिः परमे उत्कृष्टे पर्वणि स्नानात् उत्तीर्णस्य वृषाङ्कस्य हरस्य भस्मरजसां सङ्गात् पवित्रं पयः जलम् उपारीयते स्वाद्यते । शार्दूलविक्रीडितं वृत्तम् ।

(घ) नित्येति । नित्यं सततं तरुणाभिः अभिनवाभिः तरुमण्डलीभिः वृक्षराजिभिः परिचुम्बितः आश्लिष्टः महतो नितम्बस्य सन्निवेशः संस्थानं यस्य तादृशः । मार्त्तण्डेति । ... ... चण्डं महत् यत् एकं रथस्य चक्रं तस्य चुम्बनेन घर्षणेन मसृ[illegible] [illegible]क्ष्णं सुवर्णशिखरं यस्य तादृशः ।

(ङ) नेत्रमिति । अत्र महीधरे पुरा समु[illegible]ने द्रुत्यर्थः

रामं प्रति। इतो विषनिष्यन्दिनीं विद्वेषिषु (स) प्रसा-
दामृतवीचिमालिनीं सुहृत्सु निवेशय दृशम्।
क्षीराब्धाः परितोऽयमर्णवपतिर्जातं मृगाङ्कादिकं
पीयूषावधि रत्नजातममुतः किं चास्य तीरान्तरे।
मुक्त्वा कल्पभृतः स्वयंवरसुरान् सौभाग्यदानाग्रणी-
र्लक्ष्म्याऽस्मिन् कुसुमावली वरयितुं वैकुण्ठकण्ठेऽर्पिता॥३७(ह)

---

वासुकिः नागराजः नेत्रं मन्थनरज्जुरासीदिति शेषः, अयं केशवस्य नारायणस्य भुजैः बाहुभिः सन्दानितः संयमितः देवासुराः एतस्य परिभ्रमविधौ भ्रमणकर्मणि इत्यर्थः वल्लवतां गोपालत्वं चक्रुः गोपाला यथा मन्थनदण्डं भ्रामयित्वा दुग्धं मथ्नन्ति तथेति भावः। सः प्रसिद्धः अयं समुद्रकलसे मन्थाः मन्थनदण्डः अभूत्। तत् तस्मात् श्रोत्रपर-म्पराभिः कर्णपरम्पराभिः परिचितः न तु कदाचित् दृष्ट इति भावः। एष मन्दरः कौतुकात् दृशोः गोचरं नीयतां दृश्यतामित्यर्थः। शार्दू-लविक्रीडितं वृत्तम्।

(स) विद्वेषिषु शत्रुषु विषनिष्यन्दिनीं गरलवर्षिणीं सुहृत्सु बन्धुषु प्रसादः एव अमृतं तस्य वीचिमाला विद्यते अस्यां तादृशीं दृशं नेत्रं निवेशय साभिनिवेशं पश्य इत्यर्थः।

(ह) क्षीराब्धा इति। परितः समन्तात् अयं क्षीराब्धाः दुग्ध-जलः अर्णवपतिः समुद्रः। अमुतः अमुष्मात् मृगाङ्कादिकं चन्द्रप्रभृति पीयूषावधि अमृतपर्यन्तं रत्नजातम् उत्कृष्टवस्तुसमूहः जातौ जातौ यदुत्कृष्टं तद्रत्नमिह कथ्यते इति यादवः। जातम् उद्भूतम्। किञ्च अस्य क्षीराब्धेः तीरान्तरे तटदेशे अस्मिन् लक्ष्म्या कमलया कल्पभृतः वाञ्छितार्थप्रदातॄन् स्वयम्बरसुरान् स्वयम्बरे समागतान् सुरान् मुक्त्वा विहाय वरयितुं वैकुण्ठस्य नारायणस्य कण्ठे सौभाग्यदानाग्रणीः सौ-भाग्यं स्वामिवाल्लभ्यं तस्य दाने प्रदाने अग्रणीः तत्परा इत्यर्थः कुसु-

रामचन्द्र ! दूतदूतोऽपि दृश्यतां द्रष्टव्यम् ।

यं नित्यं भगवान् प्रदक्षिणयति भ्राम्यत्प्रभाग्रेसर-
ध्वान्तश्रेणिविभक्तवासरनिशाविन्यासरेखं रविः
धत्ते कां चन काञ्चनश्रियमसौ मेरुर्गिरीणां गुरु-
र्देवैः सार्द्धमधित्यकामधिवसत्यस्यामरग्रामणीः ॥ ३८ ॥ (ख)

सीतां प्रति ।

एतां पश्य पुरः सुमेरुशिखरे दम्भोलिपाणेः पुरीं
त्वत्कालोकनकौतुकोत्तरलितैर्व्यग्रां पुरन्ध्रीजनैः ।
यस्यास्तोरणगोपुरप्रणयिभिर्नामाङ्कितैर्मार्गणैः
पौलस्त्यस्य विनापि वर्णरचनां न्यस्ता प्रशस्तिःस्थिरा ३९ (क)

---

मावली सौभाग्यवर्द्धिनी पुष्पमाला इत्यर्थः अर्पिता दत्ता । शार्दूल-विक्रीडितं वृत्तम् ।

(ख) यमिति । भगवान् रविः सूर्यः नित्यं सततं भ्राम्यन्तीनां प्रभाणां मयूखानाम् अग्रेसराभिः ध्वान्तश्रेणिभिः तिमिरनिकरैः विभक्ता विभज्य स्थापिता वासरनिशयोः दिवसरजन्योः विन्यासस्य विभागस्य रेखा यस्मिन् तादृशं यम् अचलं प्रदक्षिणयति, प्रदक्षिणी-करोति, असौ गिरीणां पर्वतानां गुरुः श्रेष्ठः मेरुः काञ्चन अनि-र्वचनीयामित्यर्थः काञ्चनश्रियं स्वर्णकान्तिं धत्ते धारयति । अमराणां देवानां ग्रामणीः अधिराजः इन्द्रः देवैः सार्द्धम् अस्य अधित्यकाम् ऊर्द्ध्वप्रदेशम् उपत्यकाद्रेरासन्ना भूमिरूर्द्ध्वमधित्यकेत्यमरः । अधिवसति अधितिष्ठति । शार्दूलविक्रीडितं वृत्तम् ।

(क) एतामिति । पुरः अग्रतः सुमेरुशिखरे स्थितामिति शेषः त्वत्कं त्वदीयं यत् आलोकनं दर्शनं तस्मिन् कौतुकेन त्वद्दर्शनकुतूहलेन इत्यर्थः उत्तरलितैः चञ्चलितैः पुरन्ध्रीजनैः नारीगणैः व्यग्राम् औत्सुक्य-

रामः। हंहो पुष्पक! इतोऽपि किञ्चिदुच्चैर्भव न तृप्यति चेतो दिव्यदर्शनकुतूहलस्य। सर्वे विमानोर्ध्वगतिं नाटयन्ति।

सीता। केअईकेसरपराअप्पडिरूवो (ख) पक्कघणसारपं-सुप्पसरसरिच्छच्छवी मुत्ताहलविसदसोहासण्णिवेसो णिवे-सिदाणंदकंदो हिअअस्स कुदो उण एतावंतो जोह्णावि-त्थरो (२३)।

रामः। मन्ये चन्द्रलोकसमीपे वर्त्तामहे।

रत्नशेखरः। यथाह मारीचहरिणारिः (ग)।

---

(२३) केतकीकेसरपरागप्रतिरूपः पक्वघनसारपांसुप्रसरसदृशच्छवि-र्मुक्ताफलविशदशोभासन्निवेशो निवेशितानन्दकन्दो हृदयस्य कुतः पुन-रेतावान् ज्योत्स्नाप्रसरः।

---

वतीं दम्भोलिपाणेः वज्रधरस्य इन्द्रस्य एतां पुरीम् अमरावतीमित्यर्थः पश्य अवलोकय। यस्याः अमरावत्याः तोरणेषु गोपुरेषु च द्वारेषु च प्रणयिभिः प्रीतैरिति यावत् नामाङ्कितैः रावणेति नामाक्षरचि-ह्नितैः मार्गणैः शरैः वर्णरचनाम् अक्षरविन्यासं विनापि पौलस्त्यस्य रावणस्य स्थिरा दृढा अक्षया इत्यर्थः प्रशस्तिः प्रशंसालिपिरित्यर्थः न्यस्ता निहिता। शार्दूलविक्रीड़ितं वृत्तम्।

(ख) केतकीति। केतकीनां केतककुसुमानां केसरपरागस्य किञ्ज-ल्करजसः प्रतिरूपः अनुरूपः। पक्वस्य शुष्कस्य घनसारस्य चन्दनस्य यः पांसुप्रसरः रजः समूहः तस्य सदृशी छविः कान्तिर्यस्य तादृशः, मुक्ताफलस्येव विशदः [illegible]भासन्निवेशः यस्य तथाविधः। निवेशितः जनितः आनन्दकन्दः आ[illegible]न्द[illegible] मूलं येन तादृशः।

(ग) मारीचहरि[illegible] [illegible]मारीचघाती राम इत्यर्थः।

सद्यश्चन्दनपङ्कपिच्छिलमिव व्योमाङ्गणं कल्पयन्
पश्चैरावतकान्तदन्तमुषलच्छेदोपमेयाकृतिः ।
उन्मीलत्ययमच्छमौक्तिकलताप्रालम्बलम्बैः करैः
कान्तानां स्मरलेखवाचनकलाकेलिप्रदीपः शशी ॥४०॥ (घ)

सीतां प्रति ।

गौराङ्गीवदनोपमापरिचितस्ताराबधूवल्लभः
सद्यो मार्जितदाक्षिणात्यतरुणीदन्तावदातद्युतिः ।
चन्द्रः सुन्दरि ! दृश्यतामयमसौ चण्डीशचूडामणिः
संबन्धी रघुभूभुजां मनसिजव्यापारदीक्षागुरुः ॥४१॥ (ङ)

---

(घ) सद्य इति । व्योमाङ्गणम् अन्तरीक्षाभोगं सद्यः सपदि चन्दनपङ्कैः पिच्छिलमिव सिक्तमिवेति यावत् कल्पयन् रचयन् । ऐरावतस्य कान्तः रम्यः यः दन्तमुषलस्य छेदः खण्डः तस्य उपमेया आकृतिर्यस्य तादृशः । अच्छा विशदा या मौक्तिकलताः तासां प्रालम्बाः माला इव लम्बाः तैः करैः किरणैः कान्ताना कामिनीनां स्मरलेखस्य कामव्यञ्जकलिपेः वाचनकलायां पाठन क्रियायां यः केलिः विलासः तस्य प्रदीपः अयं शशी उन्मीलति उदेति । शार्दूलविक्रीडितं वृत्तम् ।

(ङ) गौराङ्गीति । हे सुन्दरि ! गौराङ्गीणां नारीणां वदनस्य या उपमा, तया परिचितः ताराणां बधूनाम् अश्विन्यादीनां वल्लभः प्रियः, सद्यः सपदि मार्जिताः परिष्कृताः दाक्षिणात्यतरुणीनां दक्षिणदेशीयाङ्गनानां ये दन्ताः तद्वत् अवदाता विशदा द्युतिर्यस्य तादृशः चण्डीशस्य हरस्य चूडामणिः रघुभूभुजां रघुवंशीयक्षत्रियाणां सम्बन्धी आदानप्रदानसम्बन्धवान् रघुवंशीयानां सूर्यकुलप्रसूतत्वात् चन्द्रवंशीयराजन्येषु चन्द्रवंशीयानां सूर्यकुलेषु च तत्तत्सम्बन्धस्य विहितत्वात् स्ववंशेषु निषिद्धत्वाच्चेति भावः । मनसिजस्य कामस्य व्यापारे दीक्षा-

अतः परमगम्या अस्माद्दृशां भुवः स च ब्रह्मलोक इति श्रूयते तत्र च किल (च) ब्रह्मर्षिपरिषत्परिवादी परमेष्ठी गरिष्ठं तपस्तप्यते ।

रामः ।

लक्ष्मीं वक्षसि कौस्तुभस्तवकिनि प्रेम्णा करोत्यच्युतो
देहार्द्धे वहति त्रिविष्टपगुरुर्गौरीं स्वयं शङ्करः ।
शङ्के पङ्कजसम्भवस्तु भगवानद्यापि बाल्यावधेः
सर्वाङ्गप्रणयां प्रियां कलयितुं दीर्घं तपस्तप्यते ॥४२॥ (क)

सर्वे स्मयन्ते ।

सीता । भअवं ! गअणपुप्फ ! पुप्फअ ! संपदं (ज) परिणमिअ अंबुरासिलंबी भव जेण थिर जलणिहिजाणपत्तं

---

गुरुः शिक्षाचार्यः अयमसौ चन्द्रः दृश्यताम् । शार्दूलविक्रीडितं वृत्तम् ।

(च) ब्रह्मर्षीति । ब्रह्मर्षीणां भृग्वादीनां या परिषद् सभा तस्याः परिवादी अधिष्ठाता । गरिष्ठम् अतिगुरुतरम् ।

(क) लक्ष्मीमिति । अच्युतः विष्णुः कौस्तुभस्तवकिनि कौस्तुभाख्यमणिभूषिते इत्यर्थः वक्षसि प्रेम्णा लक्ष्मीं करोति धारयति । त्रिविष्टपगुरुः त्रिजगद्गुरुः स्वर्गपतिर्वा शङ्करः शिवः स्वयं देहार्द्धे गौरीं वहति । भगवान् पङ्कजसम्भवः पद्मयोनिस्तु बाल्यावधेः आशैशवात् अद्यापि सर्वाङ्गप्रणयां सर्वाङ्गप्रणयवतीं प्रियाम् अलभमान इति शेषः तां कलयितुं लब्धुं दीर्घं तपः तप्यते चरति । शार्दूलविक्रीडितं वृत्तम् ।

(ज) परिणम्य अवनम्य इत्यर्थः अम्बुराशौ समुद्रे लम्बते इति तथोक्तः भव । स्थिरं निश्चलं जलनिधौ यानपात्रं पोतरूपं वाहणी-

सीमंतरेहं वारुणीतरुणीए अज्जउत्तप्पआवप्पसरप्पढममग्गं महासेउबंधं पेक्खह्म (२४)। विमानावतरणनाटितकेन ।

लङ्केश्वरः । स्वस्ति रामभद्राय साधयामि सम्प्रति । इति निष्क्रान्तः ।

त्रिजटा । सीतां प्रति । (क) णीलमणिकुट्टिमं विअ वरुणभवणङ्गणस्स णिग्गममग्गं विअ पाआलतलतिमिरचक्कवालस्स आलवालं विअ भुअणमहामहीरुहस्स गोठ्ठिठ्ठाणं विअ दिसाविलासिणीणं दप्पणं विअ गअणाभोअस्स महोअहिं पिअसहि ! पसइयमाणप्पसारिअच्छी पेक्ख (२५)।

---

(२४) भगवन् ! गगनाङ्गणपुष्प ! पुष्पक ! साम्प्रतं परिणयाम्बुराशिलक्ष्मी भव येन स्थिरं जलनिधियानपतं सीमन्तरेखां वारुणीतरुण्या आर्य्यपुत्रप्रतापप्रसरप्रथममार्गं महासेतुबन्धं पश्यामः ।

(२५) नीलमणिकुट्टिममिव वरुणभवनाङ्गणस्य निर्गममार्गमिव पातालतिमिरचक्रवालस्यालवालमिव भुवनमहामहीरुहस्य गोष्ठीस्थानमिव दिशाविलासिनीनां दर्पणमिव गगनाभोगस्य महोदधिं प्रियसखि ! प्रसृतीयमानप्रसारिताक्षी पश्य ।

---

तरुण्या वरुणदेव्याः सीमन्तरेखामिव आर्य्यपुत्रस्य रामस्य यः प्रतापप्रसरः तस्य प्रथमम् आद्यम् मार्गं पन्थानम् ।

(क) नीलमणिकुट्टिममिव समुद्रजलानां नीलवर्णत्वादिति भावः। वरुणस्य यत् भवनं गृहं तस्य अङ्गणस्य चत्वरस्य नीलकान्तमणिनिर्मितप्रदेशविशेषमिव । पातालतिमिराणां रसातलान्धकाराणां चक्रवालस्य मण्डलस्य निर्गममार्गमिव निःसरणपथमिव भुवनमेव महान्

लक्ष्मणः।

यत् खातः सगरेण मर्त्यसरितं मन्दाकिनीं कुर्वता
पूर्णो यश्च भगीरथेन गिरिभिर्बद्धो यदार्य्येण च।
तत्ते चित्रविचेष्टितं श्वशुरयोर्भर्त्तुश्च वारां निधिं (ञ)
वीक्षस्वैनमधो निधाय नलिनच्छायामुषी चक्षुषी॥४३॥

सीता। आदिकंदं (ट) लच्छीलदाकंदलीए उदयद्दिं हरचूडाचंदस्स वारीवंधमैरावणस्स महाकलसं पेऊसस्स पणमामि भअवंतमुदस्संतम् (२६)।

---

(२६) आदिकन्दं लक्ष्मीलताकन्दल्या उदयाद्रिं हरचूडाचन्द्रस्य वारीबन्धमैरावणस्य महाकलसं पीयूषस्य प्रणमामि भगवन्तमुदन्वन्तम्।

---

महीरुहः वृक्षः तस्य आलवालमिव वेष्टनविशेषमिव। दिशाः ककुभः एव विलासिन्यः तासां गोष्ठीस्थानं सम्मेलनस्थानमिव। गगनाभोगस्य दर्पणमिव आदर्शमिव। प्रकृतीयमाने करकोषसदृशे प्रमार्ष्यमाणे चक्षुषी यस्याः तादृशी सती महोदधिं पश्य।

(ञ) यदिति। हे आर्य्ये! इत्यध्याहार्य्यम्। सगरेण यत् खातः मन्दाकिनीं मर्त्यसरितं मनुष्यलोकनदीं कुर्वता भगीरथेन यश्च पूर्णः वृद्धिं नीतः, आर्य्येण रामेण गिरिभिः पर्वतैः यश्च बद्धः, तत् ते तव श्वशुरयोः सगरभगीरथयोः भर्त्तुः रामस्य च चित्रम् अद्भुतं विचेष्टितम् एनं वारां निधिं समुद्रं नलिनच्छायामुषी कमलकान्तिहारिणी चक्षुषी अधो निधाय वीक्षस्व अवलोकय। शार्दूलविक्रीड़ितं वृत्तम्।

(ट) लक्ष्मीरेव लता तस्याः कन्दली नवाङ्कुरः तस्या आदिकन्दम् आद्यवीजम्। हरचूडाचन्द्रस्य उदयाद्रिम् उदयाचलम् ऐरावणस्य

रामः।

धत्ते यत्किलकिञ्चितैकगुरुतामेणीदृशां वारुणी
वैधुर्य्यं विदधाति दम्पतिरुषां यच्चन्द्रिकार्द्रं नभः।
यत्पीयूषभुजां च मन्मथसुहृन्नित्यं वयः सम्पदां (ठ)
यल्लक्ष्मीरधिदैवतं जलनिधेस्तच्चिह्नमाचेष्टितम्॥ ४४॥

लक्ष्मणः।

वह्निं योऽम्भःसमिद्भिर्ज्वलयति जगतीद्वीपखण्डाहि यस्य
स्वादिष्ठा यत्प्रसूतिस्त्रिदशयुवतयः श्रीः सुधा वारुणी च।
सोऽपि ह्युड्डीनलीनैः शरपतनभयादद्रिभिः क्षुण्णपादै- (ड)
र्देवि! त्वद्भर्तु राज्ञामिव वहति महाशैलसेतुच्छलेन॥ ४५॥

---

ऐरावतस्य वारीबन्धं बन्धनस्थानं वारीतु गजबन्धनीत्यमरः। पीयूषस्य अमृतस्य महाकलसं महाकुम्भम्। सर्वेषामेव एषामस्मादुत्पत्तिरिति भावः।

(ठ) धत्ते इति। वारुणी सुरा एणीदृशां मृगाक्षीणां यत् किलकिञ्चितस्य विलासविशेषस्य एकगुरुताम् अद्वितीयमाचार्य्यकं धत्ते, चन्द्रिकया आर्द्रम् अभिषिक्तं चन्द्रोदयादिति भावः नभः आकाशात् यत् दम्पतिरुषां प्रणयिनोः मानापरनाम्नां कोपानां वैधुर्य्यं क्षयमिति भावः विदधाति करोति चन्द्रोदये मानिनोर्मानस्य भञ्जनादिति भावः। पीयूषभुजाम् अमृताशिनां देवानां यत् नित्यं सततम् अक्षयमित्यर्थः मन्मथस्य सुहृत् वयः यौवनम्। लक्ष्मीः सम्पदां यत् अधिदैवतम् अधिष्ठात्री देवता, तत् सर्वं जलनिधेः समुद्रस्य चिह्नम् अङ्कं तम् आचेष्टितं प्रभाव इत्यर्थः। शार्दूलविक्रीडितं वृत्तम्।

(ड) वह्निमिति। हे देवि! यः अम्भांसि जलानि समिधः

सुग्रीवः। देवि मैथिलि! किमपि (ढ) महिमातिरेक-स्त्रिभुवनजयपताकायते भगवतो भागीरथीवल्लभस्य।

या स्त्रीणामधिदैवतं गिरिसुता तत्सोदरः सानुमान्
मैनाको रजताकरः सुतनयः शैलेश्वरो येन सः।
पक्षच्छेदसमुद्यतेन्द्रकुलिशत्रासान्निलीय स्थितः
सोऽप्येतस्य करालकुक्षिकुहरे पातालजम्बालिनि ॥४६॥(ण)

विभीषणः।

हेरम्बमज्जनविधाविह दानगन्धा-
द्दन्तिनो धुतकरालकरं पतन्तः।
पश्चादुपेत्य सपदि प्रमथैर्ध्रियन्ते
रुद्राङ्कुशैर्विरचिताङ्कुशकेलयोऽमी ॥ ४७ ॥ (त)

---

काष्ठानि तैः वह्निं वाडवानलं ज्वलयति दीपयति। जगतोद्वीपखण्डा पृथिवीद्वीपमाला यस्य निश्चयेन स्वादिष्ठा स्वादुतरा अतिरम्या इत्यर्थः। त्रिदशयुवतयः देवाङ्गनाः श्रीः लक्ष्मीः सुधा अमृतं वारुणी सुरा च यत् प्रसूतिः यस्मात् प्रसूतिः उद्भवः। सोऽपि उड्डीनलीनैः कुल-पादैः अद्रिभिः महाशैलसेतुच्छलेन तव भर्त्तुराज्ञां वहतीव। स्रग्धरा-वृत्तम्।

(ढ) महिमातिरेकः प्रभावातिशयः। भागीरथीवल्लभस्य समुद्रस्य।

(ण) येति। स्त्रीणामधिदैवतम् अधिष्ठात्री देवता या गिरि-सुता पार्वती तस्याः सोदरः सहोदरः मैनाकः। येन मैनाकेन रजता-करः स शैलेश्वरः शैलराजः सुतनयः शोभनः तनयो यस्य तथाविधः। सोऽपि पक्षच्छेदे समुद्यतस्य इन्द्रस्य कुलिशत्रासात् वज्रप्रहारभयात् निलीय निगूह्य एतस्य पातालजम्बालिनि रसातलपङ्कवति कराले भीषणे कुक्षिकुहरे जठरान्तरे स्थितः। शार्दूलविक्रीडितं वृत्तम्।

(त) हेरम्बेति। इह अस्मिन् समुद्रे हेरम्बस्य गणेशस्य मज्जन-

तिर्य्यग्विमानगतिनाटितकेन ।

सीता । अखण्डिताखण्डलकोअंडमंडलप्पडिरूवो (थ) कदरो उण एसुद्देसो (२७) ।

विभीषणः ।

पश्यस्यग्रे जलधिपरिखं मण्डलं सिंहलानां
चित्रोत्तंसं मणिमयभुवा रोहणेनाचलेन ।
दूर्वाकाण्डच्छविषु चतुरं मण्डनं यद्वधूनां
गात्रेष्वम्भो भवति गमितं रजतां शुक्तिगर्भैः ॥४८॥ (द)

---

(२७) अखण्डिताखण्डलकोदण्डमण्डलप्रतिरूपः कतरः पुनरेष उद्देशः ।

---

विधौ स्नानव्यापारे दानगन्धात् हैरम्बीयमदनिःसरणगन्धात् तद्गन्ध-माघ्रायेति भावः धुताः कम्पिताः करालाः भीषणाः कराः शुण्डादण्डाः यस्मिन् तत् यथा तथा पतन्तः तत् समीपं धावन्त इत्यर्थः अमी वारि-स्तिनः जलहस्तिनः पश्चात् गणपतेः मज्जनात् परमित्यर्थः उपेत्य आगत्य प्रमथैः शिवगणैः सपदि रुद्रस्य अङ्कुशैः प्रभावैरिति भावः विरचिताः अनुष्ठिताः अङ्कुशानां हस्तिताडनदण्डविशेषाणां केलयः येषु तथाविधाः सन्तः भ्रियन्ते आक्रम्यन्ते । गणपतिं स्नानार्थमागत दृष्ट्वा तद्दानगन्धेन जातक्रोधास्तं प्रति धावन्तः जलहस्तिनः प्रमथगणैः रुद्रप्रभावेण निराक्रियन्ते इति भावः । वसन्ततिलकं वृत्तम् ।

(थ) अखण्डितस्य पूर्णस्य आखण्डलकोदण्डमण्डलस्य शक्रधनुषः प्रतिरूपः सदृशः ।

(द) पश्यसीति । अग्रे जलधिः परिखा यस्य तादृशं सर्वतः समु-द्रवेष्टितमित्यर्थः मणिमयीभूर्यस्य तादृशेन रोहणेन अचलेन पर्वतेन

किञ्च।

जनस्य वाक्सुधासूतिर्मणिसूतिश्च रोहणः।

नान्यत्र सिंहलद्वीपान्मुक्तासूतिश्च सागरः ॥४९॥ (ध)

सीता। इह किल भअवं अगत्थिमहेसी णिवसदि (२८)।

रामः। इदं हि भगवतो (न) रत्नाधिपतेरधित्यकाया-मास्रमपदं धर्माश्रमपदं पुनरस्य।

सुग्रीवः।

क्रान्त्वा स्फुटस्फुटितशुक्तिविमुक्तमुक्त-
मम्भोनिधिं विधुतदिक्प्रविभागमेतत्।
प्राप्ता वयं नवरसाञ्जनपुञ्जनीलं
कूलं कुलायनमकुन्ततमालमालि ॥ ५० ॥ (प)

(२८) इह किल भगवानगस्त्यमहर्षिर्निवसति।

चित्रः अद्भुतः उत्तंसः शिरोभूषणविशेषः यस्य तादृशं सिंहलानां मण्डलं लङ्कानगर्य्या राज्यमिति यावत् पश्यामि। यस्य वधूनां ...दीनां दूर्वाकाण्डच्छविषु दूर्वादलश्यामलेषु इत्यर्थः गात्रेषु शुक्तिगर्भैः शुक्ति-गर्भस्थानेनेति भावः रत्नतां गमितं प्रापितं रत्नत्वेन परिणतमि-त्यर्थः अम्भः मुक्ताफलमिति भावः। चतुरं मनोहरं मण्डनं भूषणं भवति। मन्दाक्रान्तावृत्तम्।

(ध) जन इति। सिंहलद्वीपात् अन्यत्र अन्यस्मिन् प्रदेशे वाक्सु-धासूतिः वचनामृतवर्षी जनस्य, मणिसूतिः रत्नप्रसवी रोहणः। तदाख्य पर्वतश्च मुक्तासूतिः मौक्तिकाकरः सागरश्च न अस्तीतिशेषः।

(न) रत्नाधिपतेः रत्नप्रसूतेरित्यर्थः रोहणस्य अधित्यकायां ऊर्द्ध-भूमौ भगवतः अगस्त्यस्य।

(प) क्रान्त्वेति। स्फुटं सम्यक् स्फुटिताभ्यः विकसिताभ्यः शुक्तिभ्यः

सीतां प्रति ।

चटुचटुलनिमीलस्पर्शलीलातिमील-

नयनयुगमतङ्गारब्धनिद्राविनोदम् ।

शुकहरितनितम्बं पश्य वंशीवनान्तै-

रचलमखिलपृथ्वीमाल्यवन्माल्यवन्तम् ॥ ५१ ॥ (फ)

सीता । जहिं किल तुम्हाणं (ब) वासारत्तो अदिक्कंतो (२८) ।

रामः ।

आं वैदेहि !

द्युतिजितकरवालः स्तवंशीप्रवालः

स्फुटितकुटजमालः स्पष्टनीलतमालः ।

---

(२८) यत्र किल युष्माकं वर्षर्तुरतिक्रान्तः ।

---

विसृक्ताः निःसृताः शुक्ताः यस्य तादृशं विधुतं अनिश्चितं दिशा प्रविभागो यत्र तथाभूतम् अम्भोनिधिं समुद्रं क्रान्त्वा उत्तीर्य्य वयं नवरसाञ्जनपुञ्जवत् नीलं श्यामवर्णं कुलायगताः नीड़स्थिताः शकुन्ता यासु तादृश्यः यास्तमालानां वृक्षविशेषाणां मालाः श्रेणयः ता विद्यन्ते अस्मिन्निति तथोक्तम् एतत् कूलं प्राप्ताः । वसन्ततिलकं वृत्तम् ।

(फ) चट्विति । चटुचटुलस्य अतिचपलस्य इत्यर्थः निमीलस्य स्पर्श-लीलया आवेशव्यापारेण अतिमीलन्ती नयनयुगे यस्य तादृशेन मतङ्गेन तदाख्येन मुनिना आरब्धः प्रवर्त्तितः निद्रया विनोदः प्रीतिः यस्मिन् तादृशं शुकैः पक्षिविशेषैः हरितः श्यामलः नितम्बो मध्यभागो यस्य तादृशं वंशीवनान्तैः वेणुवनविभागैः उपलक्षितमिति शेषः अखिलायाः पृथ्व्याः माल्यवत् माल्यमिव माल्यवन्तम् अचलं पर्वतं पश्य अवलोकय ।

(ब) वर्षर्त्तुः वर्षाकालः । अतिक्रान्तः अतिवाहितः ।

इह हि गतमराल: केतकालीकराले
शिखरिणि मम कालः सोऽभवन्मेघकालः ॥ ५२ ॥(भ)

पुरो दर्शयन्।

अयं स ते चण्डि! शिखण्डिपुत्रको
गिरेस्तटात्तत्क्षणमूर्ध्वकन्धरः।
निरीक्ष्य नौ स्नेहरसार्द्रया दृशा
प्रियां पुरस्कृत्य करोति ताण्डवम् ॥ ५३ ॥ (म)

सीता। पुत्त! एहि उड्डिऊण विमानसिहरं समारुह (३०)।

---

(३०) पुत्र! एहि उड्डीय विमानशिखरं समारोह।

---

(भ) द्युतीति। इह अस्मिन् केतकानां आलीभिः राजिभिः कराले व्याप्ते शिखरिणि पर्वते द्युतिभिः प्रभाभिः जिताः करवाला येन तादृशः अतिश्याम इत्यर्थः स्रुताः उत्पन्ना वंशीनां प्रवालाः अङ्कुरा यत्र तथाविधः स्फुटिता विकसिताः कुटजानां पुष्पविशेषाणां मालाः श्रेण्यः यस्मिन् तथोक्तः स्पष्टं सम्यक् नीलन्तः नीलीभवन्तः तमालाः यस्मिन् तथाविधः गता मानसं प्राप्ता मराला हंसा यस्मिन् तादृशः जलधरसमये मानसं यान्ति हंसा इति कविसमय प्रसिद्धिः। सः मेघकालः जलदश्यामलः कालः मम अभवत् अतिक्रान्त इति शेषः। अत्र स्थित्वा वर्षामत्यवाहयमितिभावः मालिनीवृत्तम्।

(म) अयमिति। हे चण्डि! कोपने मानिनीत्यर्थः चण्डस्त्वत्यन्त कोपन इत्यमरः। अयं स ते तव शिखण्डिपुत्रकः पुत्रीकृतः मयूर इत्यर्थः गिरेस्तटात् तत्क्षणं सपदि ऊर्द्ध्वकन्धरः उत्क्षिप्तग्रीवः सन् स्नेहरसेन आर्द्रया सम्पृक्तया दृशा कृपया नौ आवां त्वां माञ्च-

रामः। अतिसुमुखा जानकी।

सुग्रीवः। सीतां प्रति।

गुणवति ! फणिवीरुन्नद्धपूगप्रकाण्डः

प्रचुरमरिचवल्लीवल्लरीकः पुरस्तात्।

मलय इह महाद्रिर्नन्दनश्चन्दनाना-

मयमधिलुठदेलाश्लिष्टकङ्कोलयष्टिः॥ ५४॥ (य)

सीता। रणरणअकारणं (र) कामिमिहुणाणं माणिणीमा-णगण्ठिणिट्ठवणो जत्तो किल समीरणो प्पअट्टदि (२१)।

---

(२१) रणरणककारणं कामिमिथुनानां कामिनीमानग्रन्थिनिस्तपनो यतः किल समीरणः प्रवर्त्तते।

---

त्यर्थः निरीक्ष्य प्रियां स्वकान्तां मयूरीं पुरस्कृत्य अपेक्षत्य ताण्डवं नृत्यं करोति। वंशस्थविलं वृत्तम्।

(य) गुणवतीति। हे गुणवति ! इह पुरस्तात् अग्रतः फणिनः भुजङ्गा इव वीरुधः लताः ताभिः नद्धा वेष्टिता पूगानां गुवाकानां वृक्षभेदानां प्रकाण्डाः स्कन्धाः यत्र तादृशः प्रचुराः बह्वः मरिचवल्लीनां मरिचलतानां वल्लर्यः मञ्जर्यः यत्र तथोक्तः चन्दनानां नन्दनः चन्दनतरुनिलय इत्यर्थः अधिलुठन्तीभिः सञ्चरन्तीभिः एलाभिः आश्लिष्टा आलिङ्गिताः कङ्कोलयष्टयः तदाख्यवृक्षविशेषा यस्मिन् तथाविधः अयं महाद्रिः महाशैलः मलयः वर्त्तते इति शेषः। मालिनीवृत्तम्।

(र) रणरणककारणम् उत्कण्ठाहेतुः कामिमिथुनानां कामिनां कामिनीनाञ्च इत्यर्थः। कामिनीनां मानग्रन्थिं दृढ़ं मानमित्यर्थः निःशेषेण तपति खण्डयतीति तथोक्तः। एतत् समीरणस्य मानिनीनां मानक्षयकरत्वादिति भावः।

रामः। देवि! यथा श्रुतवत्यसि।

ये दोलाकेलिदानव्यतिकरगुरवो ये लतागर्भकाराः
कोदण्डाभ्यासविद्याविधिषु विजयिनो ये स्मरस्वेदवाराम्।
तन्वन्तश्चैत्रमैत्रं मलयशिखरिणस्ते विनिर्यान्त्यमुष्मा- (ल)
दाकैलासं समीराः सुरतमहमहासाक्षिणो दाक्षिणात्याः॥५५

अपि च पुनः पश्य।

रत्नप्रसूरिति समस्ततरङ्गिणीषु
वारां निधेर्भगवतः सुभगं कलत्रम्।
अस्मिन्निरन्तरनितम्बिनि! ताम्रपर्णी
चक्षुःपथं व्रजतु मौक्तिककामधेनुः॥ ५६ ॥ (व)

---

(ल) ये इति। ये समीराः दोलया यः केलिः क्रीड़नं तस्य दानव्यतिकरे प्रदान सम्बन्धे गुरवः वसन्तवायौ वहति विलासिनः दोलया क्रीड़न्तीति प्रसिद्धिः। ये लतानां गर्भकाराः गर्भाधानकारिणः वसन्तवातस्पर्शात् लतानां पुष्पोद्गमादिति भावः। तथा ये कोदण्डाभ्यासविद्याविधिषु धनुर्विद्याभ्यासेषु अस्मिन् समये वीरसन्ताना धनुर्विद्यामभ्यस्यन्तीति प्रसिद्धेरिति भावः। स्मरस्वेदवारां कामजनित घर्मजलानां विजयिनः अपनेतार इत्यर्थः। चैत्रेण वसन्तमासेन सह मैत्रं सख्यं तन्वन्तः सुरतमेव मह उत्सवः तस्य महासाक्षिणः दाक्षिणात्याः ते समीराः अमुष्मात् मलयशिखरिणः मलयाचलात् आकैलासं कैलासपर्वतपर्य्यन्तं विनिर्यान्ति वहन्ति। स्रग्धरावृत्तम्।

(व) रत्नप्रसूरिति। हे निरन्तरनितम्बिनि! निबिड़नितम्बे! अस्मिन् समये रत्नानां प्रसूः उत्पत्तिस्थानमिति समस्तासु तरङ्गिणीषु नदीषु मध्ये भगवतो वारां निधेः समुद्रस्य सुभगम् अतिप्रियं कलत्रं

अस्यां (ग) पुनरिदं सौभाग्यकारणम्।

रोधोरेखे चन्दनारण्यरूपे
वारि स्वाद्यं नारिकेलाम्भसोऽपि।
यत्रैवान्यः सम्भवो मौक्तिकानां
तेनाम्भोधेर्वल्लभा ताम्रपर्णी॥ ५७॥ (घ)

विमानवेगनाटितकेन रामः। पुरोऽवलोक्य।

दन्तोलूखलिभिः शिलोञ्छिभिरियं कन्दाशनैः फेनपैः
पर्णप्राशनिभिः कुटीचरकुलैः काले च पक्वाशिभिः।
नीवारप्रसृतिम्पचैश्च परितः पूतं मुनेराश्रमं
पश्यन्तो भव पावना भगवतः पातुर्निधेरम्भसाम्॥५८॥(ङ)

---

पत्नी मौक्तिकाना कामधेनुः यथाकामप्रसविणी इयं ताम्रपर्णी तदाख्या नदी चक्षुःपथं दृष्टिपथं तवेतिशेषः। व्रजतु गच्छतु ताम्रपर्णीं पश्येत्यर्थः।

(ग) अस्यां ताम्रपर्ण्यां पुनः अधिकं सौभाग्यस्य प्रियवाल्लभ्यस्य कारणं हेतुः।

(घ) रोध इति। चन्दनारण्यरूपे चन्दनवनावयवे रोधोरेखे कूलरेखायां तटप्रदेशे इत्यर्थः अस्याः स्थितमितिशेषः वारि जलं तटोपान्तवर्त्ति सलिलमित्यर्थः नारिकेलाम्भसः नारिकेलजलादपि स्वाद्यं सुस्वादम्। यत्र अन्यः अपरः मौक्तिकानां सम्भवः समुत्पत्तिरस्या इति शेषः तेन ताम्रपर्णी अम्भोधेः समुद्रस्य वल्लभा प्रिया। गुणाः प्रियत्वे हेतुरितिभावः। शालिनीवृत्तं मात्तौ गौ चेच्छालिनी वेदलोकैरिति लक्षणात्।

(ङ) दन्तेति। दन्त एव उलूखलं दन्तोलूखलं तत् विद्यते येषां तैः दन्तेन उलूखलव्यापारं विदधद्भिरित्यर्थः। शिलोञ्छिभिः च्युताद्

हस्तमुन्नम्य ।

इंहो पुष्पक ! वायुवेग ! मुनिना धूमः पुरः पीयते
छायां मा कुरु कोऽप्ययं दिनमणावेकाग्रदृष्टिः स्थितः ।
दूरादत्र भव प्रदक्षिणगतिः स्थाणोरिदं मन्दिरं
किञ्चित्तिष्ठ तपस्विनस्तव पुरो यावत्प्रयान्त्यन्यतः ॥५८॥(ह)

सीता । अज्जउत्त ! (च) होमोहिज्जंतहुदवहा विवरिज्जंतकथमुत्ता पठिज्जन्तबटुचरणा वक्खिज्जन्तधम्मसात्था

---

पतितानां धान्यगुच्छानां चयनं शिलम्, एकैकधान्योच्चयनम् उञ्छः तौ विद्येते येषां तादृशैः शिलवृत्त्या उञ्छवृत्त्या जीवद्भिरित्यर्थः कन्दाशनैः मूलभोजिभिः फेनपैः वत्समुखगलितदुग्धफेनपायिभिरित्यर्थः पर्णप्राशनिभिः पत्रभोजिभिः काले यथा समये पक्वाशिभिः सिद्धान्नभोजिभिश्च नीवारप्रसृतिम्पचैः नीवारधान्यमुष्टिपाकेन जीवद्भिश्च कुटीचरकुलैः तापसगणैः परितः समन्तात् पूतं पवित्रीकृतं परिवृतमिति भावः अम्भसां निधेः समुद्रस्य पातुः गण्डूषेण पीतसमुद्रस्य भगवतः मुनेरगस्त्यस्य आश्रमं पश्यन्ती सती पावना जगत्पवित्रकारिणी भव । शार्दूलविक्रीडितं वृत्तम् ।

(ह) इंहो इति । इंहो वायुवेग ! पुष्पक ! पुरः अग्रतः मुनिना केनापीति शेषः धूमः पीयते । छायां मा कुरु, कोऽपि अयं मुनिः दिनमणौ सूर्ये एकाग्रा दृष्टिर्यस्य तादृशः सन् स्थितः, दूरात् प्रदक्षिणगतिः भव, इदं स्थाणोः शिवस्य मन्दिरं तव पुरः अग्रतः तपस्विनः यावत् अन्यतः प्रयान्ति, तावदत्र किञ्चित् तिष्ठ न खलु तेषां लङ्घनं कदापि कार्य्यमिति भावः । शार्दूलविक्रीडितं वृत्तम् ।

(च) होमाय उह्यमाना आह्रियमाणाः हुतवहा अग्नयः यैः तादृशाः विव्रियमाणायां व्याख्यायमानायां कथायाम् आख्यायिकायां युक्ताः अभिनिवेशिनः पठ्यमानाः बहवः चरणाः वेदशाखाविशेषा यैः तादृशाः वर्ण्यमानं कीर्त्त्यमानं धर्मशास्त्रं यैः तथाभूताः उपदिश्य-

उअदिसिज्जंतसमाधिमग्गा वरिवसिज्जंतअदिहिवग्गा पस्स-सालासण्णिवेसं अन्हारीसाणां संसारगंण्ठिणिठ्ठवस्सा(३२)

रामः । प्रकृष्टं हि तपः किमपि (क) कामदुघम् । अग्रतो दर्शयन् ।

एते व्योमनि शोषयन्ति हरिणत्रासाच्चिरं चीवरे
सन्ध्याचामविधौ कमण्डलुमिमं पश्यन्ति रिक्तं कृतम् ।
भिक्षन्ते च फलान्यमी करपुटीपात्रे वनानोकहा- (ख)
न्येषामर्घविधौ च सन्निधिगताः पुष्यन्त्यकाण्डे लताः ॥६०॥

---

(३२) हूयमानहुतवहा विक्रियमाणकथायुक्ताः पठ्यमानवल्कल-वसना वर्ण्यमानधर्मशास्त्रा उपदिश्यमानसमाधिमार्गा वरिवस्यमानाति-थिवर्गाः पर्णशालासन्निवेशमस्मादृशानामपि संसारग्रन्थिनिष्टपनाः ।

---

मानः शिक्ष्यमाणः समाधिमार्गः योगाचारः यैः तथाभूताः । वरि-वस्यमानाः परिचर्यमाणा अतिथिवर्गाः यैः तथोक्ताः । पर्णशाला-सन्निवेशम् आश्रिता इति शेषः । संसारग्रन्थेः भवबन्धनात् निष्टपनाः निस्तारकाः ज्ञानोपदेशेनेति भावः ।

(क) किमपि अचिन्तनीयं कामदुघम् अभीष्टप्रसवि इत्यर्थः ।

(ख) एते इति । एते तापसाः हरिणत्रासात् मृगेभ्यः त्रासात् मृगाश्छिन्दन्ति वा भक्षयन्तीति भयादिति भावः व्योमनि आकाशे चिरं चीवरे कौपीने वल्कले वा आर्द्रे इति भावः शोषयन्ति शुष्कं कुर्वन्ति । सन्ध्यायाम् आचामविधौ आचमनक्रियायां रिक्तं कृतं शून्यी-कृतं मृगैरिति भावः इमं दृश्यमानं कमण्डलुं जलपात्रविशेषं पश्यन्ति । अमी च करपुटीपात्रे वनानोकहान् वनतरून् फलानि भिक्षन्ते याचन्ते । एषाञ्च अर्घविधौ पूजाविध्यर्थमित्यर्थः सन्निधिगताः समीपव-

समन्तादवलोक्य। कारय चक्षुषी (ग) पारणमवलोकय कु-म्भसम्भवमुनेराश्रमतरून्।

स्वाध्यायान्ते बटुपरिषदां येषु विश्रान्तिसौख्यं
लोपामुद्राकरपुटजलैः प्रत्यहं येऽवसिक्ताः।
आगस्त्येऽस्मिन् विधुतरजसामाश्रमे पादपानां
केऽप्युत्कर्षा यदतिथिकृते सर्वकालं फलन्ति ॥६१॥ (घ)

लक्ष्मणः। भ्रमति हि तपस्विसङ्कुरा (ङ) भुवः।

रामः। हंहो विमानराज! कश्चिदेकदेशमलङ्कुरु (च)

---

सिन्यः लताः अकाले पुष्यन्ति विकसन्ति च। शार्दूलविक्रीडितं वृत्तम्।

(ग) पारणम् उपवासान्तभोजनम् अदृष्टचरवस्तुदर्शनादिति भावः। कुम्भभवमुनेः अगस्त्यस्य।

(घ) स्वाध्यायान्ते इति। येषु तरुषु स्वाध्यायान्ते वेदपाठावसाने बटुपरिषदां ब्राह्मण बालकसमूहानां शिष्याणामित्यर्थः विश्रान्तिसौख्यं विश्रामजनितं सुखं भवतीति शेषः वटवः वेदपाठान्ते येषां तलेषु विश्रम्यन्तीत्यर्थः। ये तरवः लोपामुद्रया अगस्त्यभार्यया करपुटजलैः हस्ताहृतसलिलैः प्रत्यहम् अभिषिक्ताः। अस्मिन् आगस्त्ये आश्रमे विधुतानि अपनीतानि रजांसि रजोगुणधर्माः रागद्वेषादय इत्यर्थः उत्कर्षाः प्रभावाः, यत् अतिथिकृते अभ्यागतानां परिचर्यार्थं सर्वकालम् असमयेऽपीति भावः फलन्ति फलानि जनयन्ति। मन्दाक्रान्ता-वृत्तम्।

(ङ) तपस्विसङ्कुराः तापससङ्कीर्णाः भुवः प्रदेशाः।

(च) अलङ्कुरु भूषय। अग्निमारुतसम्भवम् अगस्त्यम् अनुवर्त्ते अनुसरामि अभिवादनार्थं समीपं गच्छामीत्यर्थः।

यावदहमग्निमारुतसम्भवं मुनिमनुवर्त्ते । सर्वे विमानावरोहणं नाटयन्ति ।

सुग्रीवविभीषणौ । देव ! त्वय्येतामेष(छ) मैत्रावरुणो विकङ्कततरुतले भगवत्या लोपामुद्रया समममस्मान् वीक्षमाणस्तिष्ठति ।

ततः प्रविशत्यगस्त्यो लोपामुद्रा च ।

अगस्त्यः । भगवति ! धर्मसुते ! (ज) लोपामुद्रे ! ।

प्रीतिस्निग्धैः खेचरैरर्च्यमानो

विभ्रद्व्योम्नः सीम्नि वैमानिकत्वम् ।

सेतोर्बन्धाद्राक्षसानां निरोधा-

द्दिष्ट्या रामो दृश्यते पूर्णकामः ॥ ६२ ॥ (झ)

रामः । उपसृत्य सपादोपग्रहम् ।

काशपुष्पप्रतीकाश ! वह्निमारुतसम्भव ! ।

---

(छ) मैत्रावरुणः अगस्त्यः ।

(ज) धर्मसुते ! धर्मस्य प्रजापतेः सुता तत्सम्बुद्धौ ।

(झ) प्रीतीति । प्रीत्या आनन्देन विश्वकण्टकरावणविनाशजनितेनेति भावः स्निग्धैः स्नेहवद्भिः अनुरागिभिरित्यर्थः खेचरैः स्वर्गिभिः अर्च्यमानः पूज्यमानः स्तूयमान इत्यर्थः व्योम्नः आकाशस्य सीम्नि प्रदेशे वैमानिकत्वं विमानचारित्वं विभ्रत् दधानः सेतोर्बन्धात् राक्षसानां निरोधात् सेतुं बद्धा राक्षसकुलविध्वंसनादित्यर्थः पूर्णकामः कृतार्थः रामः दिष्ट्या भाग्येन दृश्यते आवाभ्यामिति शेषः । शालिनीवृत्तम् ।

मित्रावरुणयोः पुत्र ! कुम्भयोने ! नमोऽस्तु ते ॥ ६३ ॥ (ञ)

सर्वे प्रणमन्ति ।

अगस्त्यः ।

का दीयतां तव रघूद्वह ! सम्यगाशी-

र्निष्कण्टकानि विहितानि जगन्ति येन ।

आशास्महे ननु तथापि सह स्ववीरै-

र्भूकाश्यपोपमसुतद्वितया वधूः स्यात् ॥ ६४ ॥ (ट)

रामः । परमनुगृहीतं रघुकुलम् ।

लोपामुद्रा ।

एह्येहि वत्स रघुनन्दन ! रामचन्द्र !

चुम्बामि तेऽद्य वदनं करचूचुकेन ।

सीताः कथं कथय ते दशकण्ठबाणा-

श्छिन्नानि रावणशिरांसि कथं च तानि ? ॥ ६५ ॥

---

(ञ) काशेति । काशपुष्पप्रतीकाश ! काशकुसुमवत् श्वेतवर्ण इत्यर्थः । अन्यत् स्पष्टम् ।

(ट) केति । हे रघूद्वह ! रघुश्रेष्ठ ! तव का सम्यक् आशीः दीयताम् ? कया आशिषा अहं त्वां वर्द्धयामीत्यर्थः । येन त्वया जगन्ति निष्कण्टकानि विहितानि कृतानि रक्षः कुलक्षयादिति भावः । ननु भोः तथापि आशास्याभावेऽपीत्यर्थः । स्ववीरैः निजैः वीरैः सुग्रीवविभीषणादिभिरिति भावः । सह आशास्महे अत्र तथा यथेति पदद्वयमूह्यं तथा आशिषं कुर्मः यथा वधूः जानकी भूकाश्यपोपमं पृथिवीन्द्रसदृशं सुतद्वितयं पुत्रद्वयं यस्यास्तथाभूता स्यात् । वसन्ततिलकं वृत्तम् ।

(ठ) एह्येहि हे वत्स ! रघुनन्दन ! रामचन्द्र ! अद्य करचूचुकेन

रामो लज्जते । अम्ब ! महानुभावापि लोपामुद्रा स्त्रीस्वभावसुलभं ब्रूते ।

लोपामुद्रा । रामं शिरसि स्पृष्ट्वा ।

अभ्युद्धृतैर्गिरिभिरम्बुधिसेतुहेतोः
श्वश्रूरियं भगवती कुपिता किमुर्वी ? ।
कुम्भोद्भवस्य कथितं न पुनः किमस्य
जाता यदेकचुलुकेन चतुःसमुद्री ॥ ६६ ॥ (ड)

अगस्त्यः । सुतपस्विनि ! लोपामुद्रे ! वसिष्ठप्रतिष्ठितो (ढ) राज्याभिषेकसमयो नातिदूरवर्त्ती तद्विसर्ज्जय रामभद्रम् ।

---

कराग्रेण इत्यर्थः यद्यपि चूचुकन्तु कुचाग्रं स्यादित्यभिधानात् चूचुकशब्देन कुचाग्रं बुध्यते, तथाप्यत्र तथात्वासम्भवात् अग्रमात्रमवसीयते इति बोध्यम् । ते तव वदनं चुम्बामि स्पृशामीत्यर्थः । दशकण्ठस्य बाणाः शराः ते त्वया कर्त्तरि षष्ठी कथं सोढाः, तानि च रावणशिरांसि कथञ्च छिन्नानि ? कथय । वसन्ततिलकं वृत्तम् ।

(ड) अभ्युद्धृतैरिति । अम्बुधिसेतुहेतोः समुद्रे सेतुबन्धनार्थम् अभ्युद्धृतैः गिरिभिः पर्वतैः भगवती श्वश्रूः इयम् उर्वी किं कुपिता ? पर्वतानामुद्धरणेन त्वया कोपिता किम् इत्यर्थः । अस्य कुम्भोद्भवस्य पुनः किं न कथितं समुद्रपारगमनार्थमिति भावः त्वयेति शेषः यत् एकचुलुके एकस्मिन् गण्डूषे चतुर्णां समुद्राणां समाहारः चतुःसमुद्री न जाता । यदि त्वया अस्मै समुद्रार्थं न्यवेदयिष्यथाः तदासौ एकचुलुकेन समुद्रम् अपास्यत् तदज्ञात्वा वृथा पर्वतोद्धरणेन पृथिव्याः मनःक्षोभं दत्तवानसीति भावः । वसन्ततिलकं वृत्तम् ।

(ढ) वशिष्ठप्रतिष्ठितः वशिष्ठेनोपक्रान्तः ।

लोपामुद्रा । गच्छ रामचन्द्र ! गच्छ सगरभगीरथसदृशो भव ।

सर्वे । समुत्थाय विमानावरोहं नाटयन्ति ।

सीता । दिट्ठिआ संपदं वसुमदी दीसदि (२२) ।

रामः । तत्रापि द्रविडाः ।

पर्णं नागरखण्डमार्द्रसुभगं पूगीफलैलास्तथा
कर्पूरस्य च यत्र कोऽपि चतुरस्ताम्बूलयोगक्रमः ।
देशः केरल एष केलिसदनं देवस्य शृङ्गारिण- (थ)
स्तद् दृष्ट्वा कुरु कोमलाङ्गि ! सफले द्राघीयसी लोचने ॥ ६७

किञ्च ।

नेत्रयात्राघरक्षेपैस्त्र्यम्बकस्यापि ताडनी ।
भ्रूलता द्रविडस्त्रीणां द्वितीयं कामकार्मुकम् ॥ ६८ ॥ (त)

---

(२२) दिष्ट्या साम्प्रतं वसुमती दृश्यते ।

---

(थ) पर्णमिति । हे कोमलाङ्गि ! यत्र पर्णं पत्रं ताम्बूलीलताया इति भावः आर्द्रसुभगं नागरखण्डं चूर्णविशेषः पूगीफलानि गुवाकफलानि एलाश्च तथा कोऽपि चतुरः रम्यः कर्पूरस्य ताम्बूलयोगक्रमः सकर्पूरताम्बूलस्य योगे अभ्यवहारे क्रमः नियमः वर्त्तते इति शेषः अत्रत्याः सर्वे कर्पूरचूर्णगुवाकैलासहितं ताम्बूलमभ्यवहरन्तीति भावः । देवस्य शृङ्गारिणः कामस्य केलिसदनं क्रीडागृहम् एष केरलो नाम देशः, तत् तस्मात् दृष्ट्वा एतं देशमिति शेषः द्राघीयसी अतिदीर्घे लोचने नयने सफले कुरु । शार्दूलविक्रीडितं वृत्तम् ।

(त) नेत्रेति । द्रविडस्त्रीणां द्राविडाङ्गनानां नेत्रयात्राः नयन-

सुग्रीवः । दक्षिणतो दर्शयन् देव ! सप्तगोदावरीतीरे (थ) भीमो भगवान् भर्गः । प्रणम्यतामयम् ।

रामः ।

नमो नागावलीबद्धमहाधवलमूर्त्तये ।
जटापल्लवकम्प्राय हरचन्दनशाखिने ॥ ६९ ॥ (द)

सर्वे प्रणमन्ति ।

रामः ।

वाक्सत्त्वाङ्गसमुद्भवैरभिनयैर्नित्यं रसोल्लासतो
वामाङ्ग्यः प्रणयन्ति यत्र मदनक्रीडामहानाटकम् ।
अत्रान्ध्रास्तव दक्षिणेन त इमे गोदावरीस्रोतसां　(ध)
सप्तानामपि वार्निधिप्रणयिनां द्वीपान्तराणि स्थिताः ॥ ७० ॥

---

विक्षेपाः कटाक्षा इति यावत् त एव शरक्षेपाः तैः त्र्यम्बकस्य हरस्यापि किमन्येषामिति भावः । ताडनी मोहिनीत्यर्थः भ्रूलता भ्रूवल्लीद्वितीयम् अपरं कामस्य कार्मुकं धनुः । कामधनुषा शरनिक्षेपेणैव हरसमाधिभङ्गस्य जातत्वादित्याशयेन त्र्यम्बकस्यापि ताडनीत्युक्तं वेदितव्यम् ।

(थ) सप्तगोदावरीतीरे यत्र गोदावर्य्याः प्रवाहाः सप्तधा विभज्य प्रवहन्ति तादृश्याः गोदावर्य्यास्तटे । भीमः भीषणमूर्त्तिः । भर्गः शिवः ।

(द) नम इति । नागावलीभिः भुजगश्रेणीभिः बद्धा वेष्टिता महाधवला अतिश्वेता मूर्त्तिर्यस्य तादृशाय जटा एव पल्लवाः कम्प्राः कम्पमाना यस्य तथाभूताय हरिचन्दनशालिने हरिचन्दनाक्तदेहाय इत्यर्थः तुभ्यमिति शेषः नमः ।

(ध) वागिति । हे सुन्दरि इत्यध्याहार्य्यं यत्र अन्ध्रेषु तदाख्येषु देशेषु वामाङ्ग्यः सुन्दर्य्यः रसस्य शृङ्गारापरनाम्नः भावविशेषस्य उल्लासतः उद्रेकात् वाक् वचनं सत्त्वं मन इत्यर्थः अङ्गं शरीरं तेभ्यः समु-

किं वा।

हरनेत्राग्निदग्धस्य केतौ मकरलक्ष्मणः।
दृष्टिरन्ध्रपुरन्ध्रीणां सज्जा सञ्जीवनौषधिः॥ ७१ ॥ (न)

विभीषणः। उभयकूलप्ररूढनारिकेलनिकरक्रमुककुल-पालीच्छिन्ना कावेरी सरिदियम् (प)।

रामः।

कावेरी कबरीव भामिनि! भुवो देव्याः पुरो दृश्यतां
पूगैर्नागलताश्रितैरुपदिशत्याश्लेषविद्यामिव।
कर्णाटीजनमज्जनेषु जघनैर्यस्याः पयः प्लावितं (फ)
पीत्वा नाभिगुहाभिरात्तरुचिभिः प्राचीं दिशं नीयते॥७२॥

---

ङ्गैः वाचिकैः सात्त्विकैः आङ्गिकैश्च इत्यर्थः अभिनयैः चेष्टाविशेषैः नित्यं प्रतिदिनं मदनक्रीड़ा सुरतोत्सव एव महानाटकं महत् अभिनेय-काव्यमित्यर्थः प्रणयन्ति, रचयन्ति अत्र तव दक्षिणेन दक्षिणस्यां दिशि सप्तानामपि वार्निधिप्रणयिनां समुद्राभिगामिनां गोदावरीस्रोतसां द्वीपान्तराणि द्वीपविशेषान् आश्रिताः ते इमे अन्ध्राः दृश्यन्ते इति शेषः। शार्दूलविक्रीडितं वृत्तम्।

(न) हरेति। हरस्य नेत्राग्निना दग्धस्य भस्मीकृतस्य केतौ ध्वज-दण्डे मकरलक्ष्मणः मकरचिह्नस्य मकरध्वजस्य कामस्य इत्यर्थः सज्जा योग्या इत्यर्थः सञ्जीवनस्य ओषधिः अन्ध्रपुरस्त्रीणाम् अन्ध्रदेशीयका-मिनीनां दृष्टिः। ताः कामिन्यः नेत्रपातेन कामस्तं जयन्तीति भावः।

(प) उभयेति। उभयकूलेषु प्ररूढैः जातैः नारिकेलनिकरैः नारिकेलतरुचयैः क्रमुककुलपालीभिः पूगश्रेणिभिश्च छिन्ना शोभिता इत्यर्थः।

(फ) कावेरीति। हे भामिनि! सुन्दरि! पुरः अग्रतः कावेरी

किञ्च।

कर्णाट्यो यत्र यत्रैव विक्षिपन्ति दृशो दिशि।
विक्षेपाग्रेसरः कामस्तत्र तत्रैव धावति ॥ ७३ ॥ (ब)

सुग्रीवः। भरताग्रज! अयमग्रे महाराष्ट्रविषयः।

रामः।

यत् क्षेमं त्रिदिवाय वर्त्म निगमस्याङ्गं च यत्सप्तमं
स्वादिष्ठञ्च यदैक्षवादपि रसाच्चक्षुश्च यद्वाङ्मयम्।
तद्यस्मिन् मधुरं प्रसादि रसवत् कान्तं च काव्यामृतं
सोऽयं सुभ्रु! पुरो विदर्भविषयः सारस्वतीजन्मभूः ॥ ७४ ॥ (भ)

---

नदी भुवो देव्याः पृथ्वीदेव्याः कबरीव केशपाश इव दृश्यतां कबरी केशपाशोऽस्त्रियामित्यमरः। एषा नागलताश्रितैः भुजगलतावेष्टितैः पूगैः क्रमुकैः पूगः क्रमुकवृन्दयोरित्यमरः आश्लेषविद्यामिव आलिङ्गनव्यापारमिव उपदिशति केन प्रकारेण आलिङ्गनं कर्त्तव्यं तद् शिक्षयतीत्यर्थः। यस्याः पयः सलिलं कर्णाटीजनानां कर्णाटाङ्गनानां मज्जनेषु अवगाहनेषु जघनैः प्लावितं क्षालितम् अतएव आसक्तचित्ताभिः गृहीताभिलाषाभिः नाभिगुहाभिः नाभिगह्वरैः कर्णाटीनाभिरिति भावः। पीत्वा प्राचीं पूर्वां दिशं नीयते। कावेर्याः पूर्वभागस्थैव कर्णाटत्वादिति भावः। शार्दूलविक्रीडितं वृत्तम्।

(ब) कर्णाट्य इति। कर्णाट्यः कर्णाटदेशाङ्गनाः यत्र यत्र दिशि दृशः नयनानि। विक्षिपन्ति कटाक्षेपयन्ति इत्यर्थः। कामः तत्र तत्रैव दिशि विक्षेपस्य नयनविस्फारस्य अग्रेसरः सन् धावति।

(भ) यदिति। हे सुभ्रु! यत् त्रिदिवाय स्वर्गाय क्षेमं कुशलं स्वर्गसाधनप्रदर्शकमित्यर्थः वर्त्म पन्थाः. यच्च निगमस्य वेदस्य सप्तमं शिक्षाकल्पादिषट्कभिन्नम् अङ्गं शिक्षाकल्पौ व्याकरणं निरुक्तं छन्दो

राम।

रतविद्याविदग्धानां विभ्रमोल्लेखलम्पटः।
नित्यं कुन्तलकान्तानां किङ्करो मकरध्वजः॥७५॥ (म)

सीता। जहिं उप्पणा मे पिदामहससुरस्स घरिणी इंदुमदी (२४)।

त्रिजटा। संस्कृतमाश्रित्य।

कीदृक् केलिकलस्य किल भवति सखि! सुखधाम।

---

(२४) यत्रोत्पन्ना मे पितामहश्वशुरस्य गृहिणीन्दुमती।

---

ज्योतिषमिति षडङ्गानि वेदार्थप्रतिपत्तौ यथा साधकानि तथा अयम् अपीति अस्य देशस्य निर्गमीयसमप्रमाङ्गत्वं वेदार्थप्रचारणकुशलब्राह्मणाभिज्ञानादिति भावः। यत्र ऐक्षवात् इक्षुजातात् रसादपि स्वादिष्टं सुमिष्टं रम्यतरमित्यर्थः। यत्र वाङ्मयं चक्षुः सततशास्त्रपर्यालोचनादिति भावः। यस्मिंश्च तत् प्रसिद्धं मधुरं चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते इति लक्षणोक्तमाधुर्यगुणयुक्तम्। प्रसादि चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः। स प्रसादः समस्तेषु रसेषु रचनासु चेति लक्षणोक्तप्रसादगुणयुक्तं रसवत् शृङ्गारादिरससंवलितं कान्तं रमणीयं काव्यामृतम् आस्वाद्यते इति शेषः सः अयं पुरः अग्रतः सारस्वतोजन्मभूः विद्योत्पत्तिस्थानं विदर्भविषयः विदर्भाख्यः देशः दृश्यते इति शेषः। शार्दूलविक्रीडितं वृत्तम्।

(म) रतेति। अत्र त्वध्याहार्यम्। यत्र देशे मकरध्वजः कामः रतविद्यासु सुरतव्यापारेषु विदग्धानां निपुणानां कुन्तलकान्तानां कुन्तलीनामित्यर्थः नित्यं सततं विभ्रमोल्लेखे विलासप्रकटने लम्पटः आसक्तः अतएव किङ्करः सेवक इवेति प्रतीयमानोत्प्रेक्षा।

का च सुता शशितिलकस्य विन्ध्यमहीधरधाम ॥ (य)

सीता। संस्कृतमाश्रित्य। नर्मदा।

त्रिजटा। इयं णम्मदा दीसदि (३५)।

सीता। इदो अम्हाणं अज्जसुमंतो णिवुत्तो (३६)।

रामः। अपवार्य।

अप्यस्मदग्रकरयन्त्रनिपीडितानां
धाराम्भसां स्मरसि मज्जनकेलिकाले ?।
सुभ्रु ! त्वया निजकुचावरणैकयोग्य-
मताब्जवल्लिदलमावरणाय दत्तम् ॥ ७६ ॥ (र)

---

(३५) इयं नर्मदा दृश्यते।

(३६) इतोऽस्माकमार्य्यसुमन्त्रो निवृत्तः।

---

(य) कीदृगिति। हे सखि। केलिकलस्य लीलया अस्फुटमधुरध्वनेः सुखधाम सुखनिकेतनं कीदृक् ?। शशितिलकस्य चन्द्ररूपललाटभूषणस्य विन्ध्यमहीधरधाम विन्ध्यपर्वताश्रया इत्यर्थः सुता कन्या का च ? नर्मदा। नर्मदाया जलस्य अव्यक्तमधुरत्वात् सुखधामत्वं सोमोद्भवत्वं विन्ध्यपर्वतनिःसृतत्वञ्चेति भावः।

(र) अयीति। अयि सुभ्रु ! अत्र मज्जनकेलिकाले जलावगाहनक्रीडायाम् अस्मदग्रकरयन्त्रनिपीडितानां मदीयकराग्ररूपेण यन्त्रेण निपीडितानां धाराम्भसां सलिलधाराणां त्वदङ्गप्रक्षिप्तानामिति भावः आवरणाय आच्छादनाय त्वया निजकुचावरणैकयोग्यं केवलस्तनमात्राच्छादनयोग्यम् अब्जवल्लिदलं पद्मलतापत्रं दत्तं स्तनयोर्निक्षिप्तं स्मरसि ?। वसन्ततिलकं वृत्तम्।

किञ्च।

तदिह कलहकेलौ सैकते नर्मदायाः
स्मरसि सुतनु ! कच्चिन्नौ पराधीनसुप्तम्।
उपसजलसमीरप्रेङ्खणाचार्य्यकार्य्यं
तदनु मदनमुद्रां तच्च गाढोपगूढम्॥ ७७॥ (ल)

विभीषणः। वामतो दर्शयन्। अयमसावितो विश्वम्भ- (व)
राशिरःशेखर इव लाटदेशः।

रामः।

यद्योनिः किल संस्कृतस्य सुदृशां जिह्वासु यन्मोदते
यत्र श्रोत्रपथावतारिणि कटुर्भाषाक्षराणां रसः।
गद्यं चूर्णपदं पदं रतिपतेस्तत्प्राकृतं यद्वच-
स्तांल्लाटांल्ललिताङ्गि ! पश्य नुदती दृष्टे र्निमेषव्रतम् ७८ (श)

---

(ल) तदिति। हे सुतनु शुभाङ्गि ! इह नर्मदायाः सैकते पुलिने नौ आवयोः कलहकेलौ केलिकलहे इत्यर्थः तत् पराधीनसुप्तं पराधीनं शयनम् उपसजलं जलसहितस्य सैकतस्य समीपे इत्यर्थः यत् समीरप्रेङ्खनं पवनम्रहनं तदेव आचार्य्यकार्य्यं गुरुकरणं यस्य तत् मानं त्यजेति शिक्षारूपमिति भावः तदनु ततः परं मदनमुद्रां कामावेशं तच्च गाढोपगूढं गाढालिङ्गनं कच्चित् स्मरसि ?। मालिनीवृत्तम्।

(व) विश्वम्भरेति। विश्वम्भरायाः पृथिव्याः शिरःशेखर इव शिरोभूषणमिव।

(श) यदिति। हे ललिताङ्गि चार्वङ्गि ! यत् संस्कृतस्य योनिः उत्पत्तिस्थानं यस्मात् संस्कृतभाषा उत्पन्नेति भावः। सुदृशां सुनय-

किञ्च ।

लक्षीकर्त्तुं प्रवृत्तोऽपि लाटीलडहवीक्षितैः ।

लक्षीभवति कन्दर्पः स्वेषामेवात्र पत्रिणाम् ॥ ७९ ॥(ष)

सुग्रीवः । अयमुज्जयिनीनिवासो भगवान् महाकाल-नाथः ।

रामः । अञ्जलिं बद्धा ।

यन्मनस्ताडनाद्वक्रः कामकेतकसायकः ।

स्थितः शशिच्छलेनैव मौलौ स जयतीश्वरः ॥ ८० ॥(स)

---

नानां नारीणा जिह्वासु यत् वचः मोदते हृष्यति लोकान् आनन्दयतीति भावः यत्र वचसि श्रोत्रपथावतारिणि सुते इत्यर्थः भाषान्तराणाम् अन्येषामिति शेषः रसः स्वादः कटुः तीव्रः अनुभूयते इति शेषः । रतिपतेः कामस्य पदं स्थानं कामव्यञ्जकमित्यर्थः तत्प्रसिद्धं चूर्णपदं चूर्णानि अल्पशः विरचितानि पदानि यत्र तादृशं गद्यं छन्दोवर्ज्जितं प्राकृतं यत् वचः, तत् लाटात् उद्भूतमिति शेषः दृष्टेः निमेषव्रतं नुदती अपरत्नो सती पश्य निर्निमेषमवलोकय इत्यर्थः अमुं लाटदेशमिति शेषः । शार्दूलविक्रीड़ितं वृत्तम् ।

(ष) लक्षीकर्त्तुमिति । यत्र लाटजनपदे लक्षीकर्त्तुं शरव्यीकर्त्तुं प्रवृत्तः स्वशरैः प्रहर्त्तुमुद्यतोऽपि कन्दर्पः लाटीनां लाटाङ्गनानां लडहवीक्षितैः सविलासदृष्टिभिः स्वयमेव स्वेषां पत्रिणां शराणां लक्षीभवति । लाटीनां नयनवाणविद्धः स्वयमेव सकामो भवतीति भावः ।

(स) यदिति । कामकेतकसायकः कामस्य केतककुसुममयः शरः यस्य मनस्ताड़नात् मनसि प्रहरणात् वक्रः कुटिलः सन् शशिच्छलेन चन्द्रकलाव्याजेन मौलौ शिरसि स्थितः स ईश्वरः शम्भुः जयति ।

सीतां प्रति ।

खेले सञ्चरितुं तरङ्गतरलभ्रूलेखमालोकितुं
रम्यं स्थातुमनादरार्पितमनोमुग्धं च सम्भाषितुम् ।
सन्त्यज्योज्जयिनीजनीर्विवदितुं हृद्यं च हे जानकि !
प्रत्यङ्गार्पणसुन्दरं च न जनो जानाति रन्तुं परः ॥८१॥(ङ)

किञ्च ।

चकोर्य्य एव चतुराश्चन्द्रिकाचामकर्म्मणि ।
आवन्त्य एव निपुणाः सुदृशो रतनर्म्मणि ॥ ८२ ॥ (च)

सीता । संस्कृतमाश्रित्य ।

---

(ङ) खेले इति । हे जानकि ! उज्जयिनीजनीः उज्जयिन्यां जनीः उत्पत्तीः जनिरुत्पत्तिरुद्भव इत्यमरः । सन्त्यज्य उज्जयिन्यां जन्म विनेत्यर्थः परः जनः लोकः अन्यदेशीय इत्यर्थः खेले क्रीड़ने सञ्चरितुं विहर्त्तुमित्यर्थः तरङ्गवत् तरला चपला भ्रूलेखा यस्मिन् तत् यथा तथा आलोकितुं निरीक्षितुं सकटाक्षं द्रष्टुमित्यर्थः रम्यं स्थातुम् अनादरेण अयत्नेन अर्पितं जनितं मनसः मुग्धं मोहनं यस्मिन् तद् यथा तथा सम्भाषितुं वक्तुं हृद्यं मनोरथं विवदितुं तर्कान् प्रयोक्तु-मित्यर्थः प्रत्यङ्गार्पणेन सुन्दरं सर्वाङ्गे सुन्दरमिति यावत् रन्तुञ्च न जानाति । उज्जयिनीवासिन एव एतत् सर्वं जानन्तीति भावः । शार्दूलविक्रीडितं वृत्तम् ।

(च) चकोर्य्य इति । चकोर्य्यः पक्षिणीविशेषा एव चन्द्रिकायाः चामकर्म्मणि पानविधौ चतुराः निपुणाः । आवन्त्यः अवन्तीदेशभवाः सुदृश एव रतनर्म्मणि सुरतलीलायां निपुणा दक्षाः । अत्र गम्यसाम्ययो-र्वाक्ययोरेकस्यैव सामान्यधर्म्मस्य पृथङ्निर्द्देशात् प्रतिवस्तूपमालङ्कारः । तदुक्तं प्रतिवस्तूपमा सा स्याद् वाक्ययोर्गम्यसाम्ययोः । एकोऽपि धर्म्मः सामान्यो यत्र निर्द्दिश्यते पृथगिति ।

प्रावृषेण्यं हि शस्यानां किं समुत्पत्तिकारणम्।(क)

त्रिजटा। प्रतिसंकेतेन। मालवाः।

सीता।

दृश्यन्ते लोचनानन्दहेतवस्तु इमे जनाः॥ ८३॥ (ख)

रामः।

एतन्मालवमण्डलं विजयते सौजन्यरत्नाकरैः
सम्यग्विभ्रमधामभिः किमपरं शृङ्गारसारैर्जनैः।
यत्राकृष्य विचित्ररत्नवलभीर्नानाविलासद्मनां (ग)
नीयन्ते जलदोदयेषु दिवसाः कान्तासखैः कामिभिः॥८४॥

सीता। वेणियठ्ठिव्व (घ) वसुंधरापुरंधीए णीसंदपंकव्व

---

(क) प्रावृषेण्यमिति। प्रावृषेण्यं प्रावृषि वर्षासु भवं प्रावृषेण्यम्। वर्षासु कुत्र शस्यानां न प्राचुर्य्येण समुत्पत्तिरितिभावः।

(ख) दृश्यन्त इति। ते इमे लोचनानन्दहेतवः जना मालवीया इत्यर्थः दृश्यन्ते।

(ग) एतदिति। सौजन्यरत्नाकरैः अतिसुजनैरित्यर्थः सम्यग्विभ्रमस्य सुविलासस्य धामभिः आश्रयैः शृङ्गारसारैः शृङ्गाररसलालसैः जनैः उपलक्षितमितिभावः एतत् मालवमण्डलं मालवदेशः विजयते शोभते। किमपरं किमन्यत् वक्तव्यमितिशेषः। यत्र मालवे जलदोदयेषु वर्षासु इत्यर्थः कान्तासखैः कान्तासहचरैः कामिभिः विलासिभिः नानाविलासद्मनां विविध प्रस्तरमयगृहाणां विचित्रा रत्नवलभी रत्नखचिताः चाद्रोपरिगृहाणि आकृष्य आश्रित्य दिवसाः नीयन्ते अतिवाह्यन्ते।

(घ) वेणियष्टिरिव केशपाश इव वसुन्धरापुरन्ध्र्याः पृथ्वी-

गअणस्स इंदणीलकंठिअव्व उत्तरदिसाए पुरदो कालिंदी दीसदि (३७)।

रामः।

सेयं सुभ्रु ! पुरः कलिन्दतनया गीर्वाणसिन्धोः सखी
वासः कालियपन्नगस्य यमुना दृग्गोचरे वर्त्तते।
वन्दस्वार्य्यमणीमिमां दुहितरं वैवस्वतस्यानुजां
यस्याः स्वर्णपरीक्षणक्षमदृषत्तापी स्वसा सोदरी ॥८५॥(ङ)

सीता। प्रणमति।

लक्ष्मणः। आर्य्ये ! अदूरवर्त्तिनी (च) भगवत्ययोध्या। इमेऽन्तर्वेदीभूषणं पञ्चालाः।

---

(३७) वेणियष्टिरिव वसुन्धरापुरन्ध्र्या निस्यन्दपङ्कमिव गगनस्येन्द्रनीलकण्ठिकेवोत्तरदिशः पुरतः कालिन्दी दृश्यते।

---

र्टाहृणया। निस्यन्दपङ्कं निःसृतकर्दममिव गगनस्य गगनस्य नीलवर्णत्वादियमुत्प्रेक्षेति बोध्यम्। इन्द्रनीलकण्ठिकेव नीलकान्तमणिनिर्मितकण्ठहार इव पुरतः अग्रतः कालिन्दी यमुना।

(ङ) सेयमिति। हे सुभ्रु ! पुरः अग्रतः कलिन्दस्य सूर्य्यस्य तनया कन्या गीर्वाणसिन्धोः मन्दाकिन्याः सखी सहचरी कालियपन्नगस्य कालियाख्यभुजङ्गस्य वासः निकेतनं सा इयं यमुना दृग्गोचरे वर्त्तते दृश्यते इत्यर्थः स्वर्णानां परीक्षणे क्षमा समर्था दृषत् प्रस्तरः निकषोपलमित्यर्थः यत्र तादृशी तापी नाम नदी यस्याः सोदरी सहोदरी स्वसा भगिनी तामिमां वैवस्वतस्य यमस्य अनुजां कनीयसीम् आर्य्यमणीम् अर्य्यम्णः इयम् आर्य्यमणी तां सावित्रीं दुहितरं कन्यां यमुनां वन्दस्व प्रणम। शार्दूलविक्रीड़ितं वृत्तम्।

(च) आर्य्ये अदूरवर्त्तिनी निकटवर्त्तिनी। अन्तर्वेदीभूषणं अन्तर्वे-

रामः। सीतां प्रति।

यत्रार्य्ये न तथानुरज्यति कविर्ग्रामीणगीर्गुम्फने
शास्त्रीयासु च लौकिकीषु च यथा भव्यासु नव्योक्तिषु।
पञ्चालास्तव पश्चिमेन त इमे वामा गिरां भाजना-
स्त्वद्दृष्टे रतिथीभवन्तु यमुनां त्रिस्रोतसं चान्तरा॥८६॥(च)

किञ्च।

प्रपञ्चितकलातन्त्रे पाञ्चालीकेलिकर्मणि।
सर्वास्त्रमोक्षं लभते युगपत् कुसुमायुधः॥ ८७॥ (छ)

---

टीनां नदीद्वयमध्यवर्त्तिदेशानां भूषणम् अलङ्कारः नदीद्वयान्तर्गतदे-
शानां मध्ये पञ्चालाः श्रेष्ठा इति भावः।

(छ) यत्रेति। यत्र पञ्चालेषु कविः कवयिता आर्य्ये शोभने ग्रामी-
णानां ग्रामवासिनां गीर्गुम्फने वचनरचनायां तथा न अनुरज्यति
अनुरक्तो भवति यथा शास्त्रीयासु शास्त्रसम्बन्धिनीषु लौकिकीषु व्यव-
हारिणीषु भव्यासु सुन्दरीषु नव्योक्तिषु नवीनासु उक्तिषु च, अन्यत्र
कवयः ग्राम्यकथां तथा नाद्रियन्ते यथा शास्त्रीयादिकमितिभावः। ते
इमे तव पश्चिमेन पश्चिमायां दिशीत्यर्थः गिरां वाचां वामाः सुन्दराः
भाजनाः पात्राणि शोभनवचना इत्यर्थः पञ्चालाः यमुनां त्रिस्रोतसं
गङ्गाञ्च अन्तरा गङ्गायमुनयोर्मध्ये इत्यर्थः त्वद्दृष्टेः तव चक्षुषः
अतिथीभवन्तु त्वया दृश्यन्तामित्यर्थः। शार्दूलविक्रीड़ितं वृत्तम्।

(ज) प्रपञ्चितेति कुसुमायुधः कामः प्रपञ्चितं प्रकटितं कलानां
चतुःषष्टिकामविद्यानां तन्त्रं समूहः यस्मिन् तादृशे पाञ्चालीनां
पाञ्चालाङ्गनानां केलिकर्मणि विलासकर्मणि युगपत् समकालं
सर्वेषां अस्त्राणां पञ्चानामेव शराणामिति भावः मोक्षं प्रक्षेपं
लभते प्राप्नोति। पञ्चशरस्य पञ्चशरकार्य्यं समकाल एव पाञ्चालीनां
विलास इति भावः।

लक्ष्मणः। इदं पुनस्ततोऽपि (झ) मन्दाकिनीपरिक्षिप्तं महोदयं नाम नगरं दृश्यते।

रामः।

शश्वत्सुधामवसुधामहितं द्विषद्भि-
र्नो गाहितं भवति गाधिपुरं पुरस्तात्।
वैदेहि! देहि शफरीसदृशं दृशं त-
दस्मिन्नितम्बिनि! नितम्बवहद्युसिन्धौ॥ ८८॥ (ञ)

इदं दयं सर्वमहापवित्रं
परस्परालङ्करणैकहेतुः।
पुरं च हे जानकि! कान्यकुब्जं
सरिच्च गौरीपतिमौलिमाला॥ ८९॥ (ट)

---

(झ) मन्दाकिनीपरिक्षिप्तं मन्दाकिन्या गङ्गया परिक्षिप्तं वेष्टितम्। महोदयं महान् उदयः वृद्धिः उन्नतिरित्यर्थः यस्य तादृशम् अन्वर्थनामेत्यर्थः।

(ञ) शश्वदिति। हे नितम्बिनि प्रशस्तनितम्बे वैदेहि! शश्वत् निरन्तरं शोभनानि धामानि गृहाणि यत्र तादृशं वसुधायां पृथिव्यां महितं पूजितं प्रशंसितमित्यर्थः द्विषद्भिः शत्रुभिः नो गाहितं न प्रविष्टं गाधेः राजवरस्य विश्वामित्रपितुः पुरं नगरं पुरस्तात् अग्रतः भवति लक्ष्यमिति शेषः। तत् तस्मात् नितम्बे मध्यभागे वहतीति तथोक्ता द्युसिन्धुर्गङ्गा यस्य तादृशे अस्मिन् पुरे शफरीसदृशं प्रोष्ठीसमां दृशं देहि अर्पय। वसन्ततिलकं वृत्तम्।

(ट) इदमिति। हे जानकि! कान्यकुब्जं तदाख्यं पुरं नगरञ्च गौरीपतेः हरस्य मौलिमाला शम्भुशिरःसञ्चारिणी गङ्गा सरिच्च

अपि च।

यो मार्गः परिधानकर्मणि गिरां यः सूक्तिमुद्राक्रमो
भङ्गिर्या कबरीचयेषु रचनं यद्भूषणालीषु च।
दृष्टं सुन्दरि! कान्यकुब्जललनालोकैरिहान्यच्च य-
च्छिक्षन्ते सकलासु दिक्षु तरसा तत्कौतुकिन्यः स्त्रियः॥९०॥(ठ)

विमानवेगनाटितकेन लक्ष्मणः। आर्य्ये! दिव्यसरितोर्गङ्गा-यमुनयोरयमग्रे सङ्गमः

रामः। सीतां प्रति।

न्यग्रोधोऽयं वन्द्यतां श्यामनामा
शम्भोर्भ्रष्टा शेखराज्जाह्नवीयम्।
कालिन्दी च प्लाविता तत्पयोभि-
स्तीर्थं ह्येतत् स्वर्गमार्गः प्रयागः॥९१॥(ड)

---

इदं इयं सर्वेषु जगत्सु महापवित्रम् अतिविशुद्धं परस्परालङ्करणस्य हेतुश्च कान्यकुब्जं गङ्गामलङ्करोति गङ्गा च कान्यकुब्जमित्यर्थः। उपेन्द्रवज्रावृत्तम्।

(ठ) य इति। हे सुन्दरि! परिधानकर्मणि यः मार्गः रीतिः, गिरां वाचां यः सूक्तिमुद्रायाः सुप्रयोगविधेः क्रमः नियमः, कबरीचयेषु केशपाशेषु या भङ्गिः कुटिलविन्यासः भूषणावलीषु अलङ्कारनिचयेषु यत् रचनम् अङ्गेषु परिधानक्रमः, अन्यच्च यत् सकलासु दिक्षु कौतुकिन्यः कौतुकवत्यः विलासिन्यः इत्यर्थः स्त्रियः तरसा यत्नेन शिक्षन्ते अभ्यस्यन्ति तत्सर्वं कान्यकुब्जललनालोकैः कान्यकुब्जीयनारीभिः इह अस्मिन् कान्यकुब्जे दृष्टं नान्यत्र कुत्रापि ईदृशं वैचित्र्यं दृश्यते इति भावः। शार्दूलविक्रीडितं वृत्तम्।

(ड) न्यग्रोध इति। अयं श्यामनामा न्यग्रोधः वटः, शम्भोः

सर्वे वन्दन्ते।

लक्ष्मणः। पूर्वतो दर्शयन्। इयमितो भगवतो भर्गस्य (ढ) केलिवासो वाराणसी।

यद्वाचंयमवृत्तयः किमपरं नीवारमुष्टिम्पचाः
सत्यं ज्योतिरुपासते सुकृतिनो द्राक् संवदन्ते च नः।
नित्यासन्नतयाच खण्डपरशोर्वाराणसीवासिनः
सम्भोगैरपि सुभ्रुवां तदजरं विन्दन्ति नन्दन्ति च॥८२॥(ण)

सीता। दशकण्ठसूदन! वाराणसीसंकित्तर्नेन सुम-

---

शेखरात् भ्रष्टा च्युता इयं जाह्नवी तत्पयोभिः गङ्गासलिलैः प्लाविता संयुता कालिन्दी यमुना च वन्द्यतां हि यतः एतत् स्वर्गमार्गः प्रयागो नाम तीर्थं पुण्यक्षेत्रम्। इन्द्रवज्रावृत्तम्।

(ढ) भर्गस्य हरस्य केलिवासः क्रीडास्थानम्।

(ण) यदिति। किमपरं किमन्यत् वक्तव्यमिति शेषः। वाचंयमा वाक्संयमकारिणी वृत्तिर्नियमः येषां तादृशाः मौनव्रतधरा इत्यर्थः नीवारमुष्टिम्पचाः नीवाराणाम् अरोपितवनजातधान्यविशेषाणां मुष्टिं पचन्तीति तथोक्ताः यथाकाले मुष्टिमितेन नीवारेण जीविनः इत्यर्थः सुकृतिनः पुण्यवन्तः यत् सत्यं ज्योतिः परमात्मानम् उपासते आराधयन्ति द्राक् झटिति न च संवदन्ते न च सिद्धिं लभन्ते, अत्र वाराणस्यां खण्डपरशोः शम्भोः नित्यासन्नतया सततावस्थानेन काशीवासिनः सुभ्रुवां नारीणां सम्भोगैरपि तत् अजरम् अक्षयं ज्योतिः विन्दन्ति लभन्ते नन्दन्ति सुखेन वसन्ति च। भोगनिर्वाणयोरनुपमं धाम वाराणसीति भावः। शार्दूलविक्रीडितं वृत्तम्।

राविदम्हि अज्जिआणन्दं (त) जणणीभूदं मिहिलं महाण-
अरिं (३८) ।

रामः । भगवन् विमानराज ! दर्शय सीतायै तत्र-
भवतो जनकस्य राजधानीम् ।

किञ्चिद्दूर्द्धगतिनाटितकेन रामः ।

अन्तेवासी यदधिवसति स्वर्मणेर्याज्ञवल्क्यो
यत्त्रायन्ते निमिकुलभुवः प्रत्यहं भूमिपालाः ।
तत्ते चक्षुर्विंशतु मिथिलामण्डलं जन्मभूमिं
यत्रोढासि त्रिनयनधनुःखण्डनाडम्बरेण ॥ ८३ ॥ (थ)

सीता । भअवदि ! मिहिलाणअरि ! समं गुरुअणेण
एसा प्पणमिज्जसि (३९) ।

---

(३८) दशकण्ठसूदन ! वाराणसीसङ्कीर्त्तनेन कारितास्मि अक्ष्या-
नन्दां जननीभूतां मिथिलां महानगरीम् ।

(३९) भगवति ! मिथिलानगरि ! समं गुरुजनेनैषा प्रणम्यसे ।

---

(त) अक्ष्यानन्दां नेत्रानन्ददायिनीम् ।

(थ) अन्तेवासीति । स्वर्मणेः त्रिदिवरत्नस्य सूर्य्यस्येत्यर्थः अन्ते-
वासी शिष्यः याज्ञवल्क्यः यत् अधिवसति अधितिष्ठति, निमिकुलभुवः
निमिवंशीया भूमिपालाः यत् प्रत्यहं त्रायन्ते पालयन्ति, यत्र त्रिनय-
नस्य हरस्य यत् धनुः, तस्य खण्डनाडम्बरेण भङ्गप्रयासेन ऊढासि
परिणीतासि मयेति शेषः । ते तव चक्षुः तत् जन्मभूमिम् उत्पत्तिक्षेत्रं
मिथिलामण्डलं विशतु प्रविशतु पश्यतु इत्यर्थः । मन्दाक्रान्तावृत्तम् ।

विभीषणः। इह किल रामदेवेन सातेयान्तकरणस्य भङ्गो (द) भार्गवमुनेर्दत्तः।

सुग्रीवः।

अपां फेनेन तृप्तोऽसौ स्नातश्चन्द्रिकयाऽपि सः।
यदप्रसूतकौशल्यं चत्रं चपितवान्मुनिः॥ ९४ ॥(ध)

रामः। लज्जमानः सीतां प्रति।

यत्रार्थातिशयोऽपि सूत्रितजगन्मर्य्यादया मोदते
सन्दर्भश्च समासमासलवदप्रस्तारविस्तारितः।
उक्तिर्योगपरम्परापरिचिता काव्येषु चक्षुष्मतां
सा रम्या नवचम्पकाङ्गि! भवतु त्वन्ने त्वयोः प्रीतये ॥९५॥(न)

---

(द) भङ्गः पराभवः।

(ध) अपामिति। असौ मुनिः भार्गवः अपां फेनेन तृप्तः, स मुनिः चन्द्रिकयापि स्नातः। कृतस्नानः यत् अप्रसूता अजननी कौशल्या यस्य तादृशं चत्रं चपितवान् नाशितवान्। पिपासुर्जनः यथा जलमप्राप्य तत्फेनेनैव तृषां निवारयति, यथा च चन्द्ररूपे सरसि स्नानार्थी तदलाभे तच्चन्द्रिकया परितुष्यति तथा रामे अशक्तः इतरान् चत्रियानसौ सञ्जहारेतिभावः।

(न) यत्रेति। हे नवचम्पकाङ्गि! यत्र उक्तौ अर्थातिशयोऽपि अर्थकाठिन्यमपीत्यर्थः सूत्रितया विरचितया जगतां मर्य्यादया स्थित्या मोदते हृष्यति आनन्दयतीत्यर्थः यत्र सन्दर्भः प्रस्तावश्च समासमासल-वदप्रस्तारविस्तारितः सा काव्येषु योगपरम्परया परिचिता चक्षुष्मतां रम्या उक्तिः त्वन्नेत्रयोः प्रीतये भवतु यादृशेषु काव्येषु दुरूहार्थनिवेशेन भावगाम्भीर्य्यम् अर्थकाठिन्यञ्च तानि काव्यानि त्वं पश्य इदन्तु पूर्वश्लोकोक्तार्थस्य काठिन्येन जानक्या अर्थावगमविरहादुक्तमिति ध्येयम्।

सीता । दूरादवलोकनं नाटयित्वा । लंघिदसाअरादो हणु मंतादो वि दूरदेसदंसिणी दिठ्ठी सिग्घत्ति प्पडिहाअदि (४०) ।

ततः प्रविशति हनूमान् ।

हनूमान् । प्रणम्य । देव ! मत्तः श्रुतवृत्तान्तो वसिष्ठः समं भरतशत्रुघ्नाभ्यामन्याभिश्च प्रकृतिभिस्त्वदभिषेकसज्जस्तिष्ठति । सर्वे परिक्रामन्ति ।

रामः । पुरोऽवलोक्य प्रणम्य च ।

राज्ञां रवेः प्रभवतां कुलराजधानी-
मालोकयामरपुरीप्रतिमामयोध्याम् ।
वार्भिः शरच्छशिकरद्युतिभिः सरय्वा
या पूर्वपार्थिवयशोभिरिवावभाति ॥ ८६ ॥(प)

सर्वे प्रणमन्ति ।

रामः । पुरोऽवलोक्य विमानराज ! वसिष्ठादयोऽपि

---

(४०) लङ्घितसागराद्धनुमतोऽपि दूरदेशदर्शिनी दृष्टिः शीघ्रेति प्रतिभाति ।

---

(प) राज्ञामिति । रवेः सूर्यात् प्रभवतां जायमानानां राज्ञां कुलराजधानीम् अमरपुरीप्रतिमाम् अयोध्याम् आलोकय पश्य । या: शरदः ये शशिकराः चन्द्रकिरणाः तेषामिव द्युतिर्येषां तादृशैः शुभ्रैरित्यर्थः सरय्वाः नद्याः वार्भिः सलिलैः पूर्वपार्थिवानां पूर्वतनभूपालानां यशोभिरिव आभाति शोभते । वसन्ततिलकं वृत्तम् ।

मां प्रत्युत्थातुकामास्तन्ननु (फ) नरेन्द्रराजकुलेऽस्मिन्नवत-
रामः । सर्वेऽवतरणं नाटयन्ति ।

ततः प्रविशति वसिष्ठो भरतशत्रुघ्नौ च ।

वसिष्ठः । वत्स भरत ! शत्रुघ्न !

शिष्ये शम्भोर्व्यधित यदयं यच्च धातुः प्रपौत्रे
कस्तेनास्मिन् जगति न जनो विस्मितः सस्मितश्च ।
[illegible]ं वयमपि ततो रामभद्रं प्रवृत्ता
दिष्ट्या [illegible] दशरथकुलं श्वेतमानं यशोभिः ॥८७॥ (ब)

सर्वे परिक्रामन्ति ।

रामः । सविनयमुपसृत्य सपादोपग्रहम् ।

इक्ष्वाकूणां कुलगुरुं श्रेष्ठं चित्रशिखण्डिनाम् ।
अरुन्धतीपतिमृषिं राम एषोऽभिवन्दते ॥८८॥ (भ)

---

(फ) तत् तस्मात् ननु भोः अस्मिन् नरेन्द्रराजकुले नरेन्द्रस्य राज-मार्गे ।

(ब) शिष्ये इति । अयं रामः शम्भोः शिष्ये भार्गवे यत्, धातुः ब्राह्मणः प्रपौत्रे रावणे यच्च व्यधित कृतवान् भार्गवं दशाननञ्च जितवानित्यर्थः को जनः तेन व्यापारेण भार्गवदशाननजयरूपेणेत्यर्थः अस्मिन् जगति न विस्मितः चमत्कृतः सस्मितः आनन्दितश्च, सर्व एव एव विस्मितः आनन्दितश्चाभवदित्यर्थः । ततः कारणात् वयमपि रामभद्रम् अभ्युत्थातुं प्रत्युद्गन्तुं प्रवृत्ताः चलिताः । दिष्ट्या भाग्येन दशरथस्य कुलं यशोभिः श्वेतमानं धवलीभवत् दृष्टम् । मन्दाक्रान्ता-वृत्तम् ।

(भ) इक्ष्वाकूणामिति । एष रामः इक्ष्वाकूणां कुलगुरुं चित्रशि-

वसिष्ठः। क्ता दीयतां तव इत्यादि पठति।

रामः। आर्षं (म) हि वचनं विभिन्नवक्तृकमपि न विसंवदति यदगस्त्यवाचा भगवान् वसिष्ठोऽपि ब्रूते।

सीता प्रणमति।

वसिष्ठः। जनकराजपुत्रि! (य) रामाशिषैवाशीस्ते। किन्तु।

अन्ययोगव्यवच्छेदादुपास्ते यदरुन्धती।
संविभक्तं त्वया पुत्रि! तत्सम्प्रति सतीव्रतम्॥८८॥ (र)

लक्ष्मणः। काकुत्स्थकुलगुरो! मैत्रावरुणे! लक्ष्मणोऽभिवादयते।

वसिष्ठः। वत्स! लक्ष्मण! जितेन्द्रजितस्तव(ल)किमाशास्महे।

---

ऋषिभूतानां देवर्षीणां मरीच्यादीनां श्रेष्ठम् अग्रगण्यम् अरुन्धत्याः पतिम् ऋषिं वशिष्ठम् अभिवन्दते प्रणमति।

(म) आर्षम् ऋषिसम्बन्धि विभिन्नः वक्ता यस्य तादृशमपि न विसम्वदति न विरुध्यते इत्यर्थः। अगस्त्यवाचा अगस्त्यस्य वाचा क्ता दीयतामिति पद्यवचनेन पूर्वोक्तेनेत्यर्थः।

(य) रामाशिषा रामभद्रस्य या आशीः तयैव ते तव आशीः, रामस्य मङ्गलेनैव तव मङ्गलमिति भावः।

(र) अन्येति। हे पुत्रि! अरुन्धती मम भार्या अन्ययोगव्यवच्छेदात् यत् सतीव्रतं पातिव्रत्यम् उपास्ते सेवते, सम्प्रति त्वया संविभक्तं तत् सतीव्रतम् उपास्ते। पूर्वं सतीव्रते अन्यासां योगो नासीत् केवलं अरुन्धत्येव पतिव्रता ख्यातिं लेभे इदानीं त्वमपि अरुन्धतीव पतिव्रतासीति भावः।

(ल) किम् आशास्महे आशिषं करोमीत्यर्थः।

भरतः। आर्य्य रावणविद्रावण! एष भरतोऽभिवादयते।

रामः। बाहू प्रसार्य्य। एह्येहि वत्स भरत!।

परिष्वजामि सोत्कण्ठो मां प्रतीपं परिष्वज।
आलिङ्गिते भ्रातृगात्रे कयोष्णः सोऽपि चन्द्रमाः॥१००॥(व)

भरतः। सीतां वन्दते।

सीता। वच्छ भरध! उठ्ठावीअदु वअणेंदू भोदु दे आणंदमंदपरिप्फंदा दिठ्ठी (४१)।

शत्रुघ्नः। आर्य्य! पादसेवाविसंवादी (श) शत्रुघ्नः प्रणमति।

रामः। शत्रुघ्नमुत्थाप्यावलोक्य च। दिष्ट्या द्वितीयलक्ष्मणो दृश्यते।

शत्रुघ्नः। सीतां प्रणमति।

सीता। वच्छ! सत्तुघ्ण! चिरं णंद जणणीजणो दे कहिं (४२)।

---

(४१) वत्स भरत! उत्थाप्यतां वदनेन्दुर्भवतु ते आनन्दमन्दपरिस्पन्दा दृष्टिः।

(४२) वत्स शत्रुघ्न! चिरं नन्द जननीजनस्ते क्व।

---

(व) परिष्वजामि इति। सोत्कण्ठः समुत्सुकः अहं परिष्वजामि आलिङ्गामि त्वामिति शेषः। त्वमपि मां प्रतीपं परिष्वज प्रत्यालिङ्ग। यः कवोष्णः ईषदुष्णः जनः, सोऽपि भ्रातृगात्रे आलिङ्गिते सति चन्द्रमाः शीतल इत्यर्थः भवतीति शेषः।

(श) पादसेवाविसंवादी चरणशुश्रूषाभिलाषी इत्यर्थः।

शत्रुघ्नः । माङ्गलिक्यपाणिरन्तःपुरग्रीवे तिष्ठति ।

लक्ष्मणो भरतं वन्दते ।

भरतः ।

हे लक्ष्मण ! सलक्ष्मीक ! परिष्वज महाभुज ! ।
आर्य्यसेवापवित्राणि गात्राणि सुखयन्तु माम् ॥१०१॥ (स

शत्रुघ्नः । लक्ष्मणं परिष्वज्य । निर्विघ्ननिर्वाहितरामदेवा
देशे (छ) त्वयि द्विगुणं स्निह्यति मनः ।

रामः । भगवन्मन्मैत्रावरुणे ! किष्किन्ध्यापतिरेष सुग्रीव
(च)भास्करिरयं च लङ्कापरमेश्वरो विभीषणः पौलस्त्योऽभि
वन्दते ।

वसिष्ठः । दीर्घप्रशस्तिस्तम्भाविमौ (क ) भवतां भवतः

रामः । भरत ! परिष्वजस्वैतौ सीतादेवरौ (ख)।

(घ) माङ्गलिक्यपाणिः माङ्गलिक्यं माङ्गलिकद्रव्यं पाणौ यः
तादृशः । अन्तःपुरस्य ग्रीवे द्वारे ।

(स) हे लक्ष्मण ! इति । हे महाभुज! दीर्घबाहो ! सलक्ष्मीक
लक्ष्मीमन् ! लक्ष्मण ! परिष्वज आलिङ्गस्व आर्य्यस्य रामस्य सेवा
पवित्राणि गात्राणि तवेतिशेषः मां सुखयन्तु सुखीकुर्वन्तु ।

(छ) निर्विघ्नेति निर्विघ्नं यथा तथा निर्वाहितः सम्पादितः रा
देवस्य आदेशः येन तादृशे ।

(च) भास्करिः भास्करस्य अपत्यं भास्करिः सूर्य्यनन्दनः ।

(क) दीर्घप्रशस्तेः दीर्घाया महत्याः प्रशस्तेः प्रशंसारूपस्येतिभा
स्तम्भौ गृहावलम्बन साधन भूतौ पदार्थ विशेषौ ।

(ख) सीतादेवरौ सीताया देवरभूतौ सुग्रीव विभीषणौ ।

भरतसुग्रीवविभीषणाः परस्परं परिष्वजन्ते ।

वसिष्ठः ।

रामो दान्तदशाननः किमपरं सीता सतीष्वग्रणीः
सौमित्रिः सदृशोऽस्तु कस्य ? समरे येनेन्द्रजिन्निर्जितः ।
किं ब्रूमो भरतं च रामविरहे तत्पादुकाराधकं ?
शत्रुघ्नः कथितोऽग्रजस्य च गुणैर्वन्द्यं कुटुम्बं रघोः ॥१०२॥(ग)

रामं प्रति । वत्स ! दाशरथे ! रामचन्द्र ! प्रशस्तो मुहूर्त्तो वर्त्तते तदध्यास्व पित्र्यं सिंहासनमेषोऽभिषिच्यसे ।

रामः । तथा कुरुते ।

वसिष्ठवर्ज्जं सर्व्वे साष्टाङ्गं प्रणमन्ति । नेपथ्ये मङ्गलगीतध्वनिर्नान्दीवाद्यं च आकाशे ।

आराधितो रघुकुलोद्वह ! पुष्पकं प्राक्-
* यमि चिरादिदमदत्त पतिः पशूनाम् ।

---

(ग) राम इति । रामः दान्तः निहतः दशाननो येन तादृशः । अपरं किम् अस्य वक्तव्यं रावणवध विधानेनैवास्य सर्वश्रेष्ठत्व प्रकटनादितिभावः । सीता सतीषु साध्वीषु अग्रणीः श्रेष्ठा । सौमित्रिः लक्ष्मणः कस्य सदृशः अस्तु भवतु ? न कस्यापीत्यर्थः येन समरे इन्द्रजित् निर्जितः । रामस्य विरहे तस्य रामस्य पादुकाराधकं भरतञ्च किं ब्रूमः ? किं कथयामः ? येन प्राप्तमपि राज्यं विहाय ज्येष्ठ भक्त्या कठोरं व्रतमाचरितं तस्य किं वर्णयाम इति भावः । शत्रुघ्नः अग्रजस्य लक्ष्मणस्य गुणैः कथितः यादृशः अग्रजः तादृशः कनिष्ठोऽपीतिभावः तस्मात् रघोः कुटुम्बं परिवारः वन्द्यं सर्वथा प्रशंसनीयमित्यर्थः शार्दूलविक्रीडितं वृत्तम् ।

तस्य प्रभुस्त्वमिह सम्प्रति तत्प्रयच्छ
त्वां याचते धनद ! एष वृषाङ्कमित्रम् ॥ १०३ ॥ (घ)

वसिष्ठः । वत्स रामभद्र ! धन्योऽसि यस्य ते तत्रभवा-न्नाम कुवेरोऽर्थी ।

रामः । विमानराज ! भगवता धनदेन प्रार्थ्यसे सम-र्प्यसे च । ऊर्ध्वमवलोक्य । कथं धनदमुपस्थातुं विमान-राजः प्रतिष्ठते ।

वसिष्ठः । रामं प्रति । किं ते भूयः प्रियमुपकरोमि ।

रामः । अतः परमपि प्रियमस्ति ।

रुग्णं चाजगवं नचापि कुपितो भर्गः सुरग्रामणीः
सेतुश्च ग्रथितः प्रसन्नमधुरो दृष्टश्च वारां निधिः ।
पौलस्त्यश्च हतः स्थितश्च भगवान् प्रीतः श्रुतीनां कविः
प्राप्तं यानमिदं च याचितवते दत्तं कुवेराय च ॥१०४॥(ङ)

---

(घ) आराधित इति । हे रघुकुलोद्वह ! रघुश्रेष्ठ ! प्राक् आराधितः मयेतिशेषः पशूनां पतिः इदं पुष्पकं यानं अदत्त दत्तवान् मह्यमितिशेषः । सम्प्रति इह जगति त्वं अस्य प्रभुः स्वामी, तत् प्रयच्छ देहि मह्यमितिशेषः एषः वृषाङ्कस्य हरस्य मित्रं धनदः कुवेरः त्वां याचते प्रार्थयते । वसन्ततिलकं वृत्तम् ।

(ङ) रुग्नमिति । आजगवं तदाख्यं हरधनुः रुग्णं भग्नं सुरग्रामणीः देवदेवः भर्गः न च कुपितः प्रियधनुर्भङ्गादपीति भावः । सेतुः ग्रथितः बद्धः प्रसन्नः मधुरः सौम्यश्च वारां निधिः समुद्रः दृष्टश्च सेतुबन्धनेऽपि नास्य कोप इति भावः । पौलस्त्यः रावणः हतश्च भगवान् श्रुतीनां कविः वेदप्रणेता ब्रह्मा प्रीतश्च प्रपौत्रवि[illegible]ऽपि न

तथापीदमस्तु।

सम्यक् संसारविद्याविपदमुपनिषद्भूतमर्थाङ्गतानां
ग्रथ्नन्तु ग्रन्थिबन्धं वचनमनुपतत्सूक्तिमुक्ताः सुयुक्ताः।
सन्तः सन्तर्पितान्तःकरणमनुगुणं ब्रह्मणः काव्यमूर्त्ते-
स्तत्त्वं सात्त्विकैश्च प्रथमपिशुनितं भावयन्तोऽर्चयन्तु १०५(च)

इति निष्क्रान्ताः सर्वे।

॥ राघवानन्दो नाम दशमोऽङ्कः ॥

---

कुपित इति भावः। इदञ्च प्राप्तं रावणात् लब्धं यानं पुष्पकं याचितवते अर्थिने कुबेराय दत्तञ्च। शार्दूलविक्रीडितं वृत्तम्।

(च) सम्यगिति। सुयुक्ताः अभिनिवेशवन्तः अनुपतन्त्यः सञ्चरन्त्यः सूक्तयः शोभना उक्तयएव मुक्ताः येषां तथाभूताः सन्तः अर्थाङ्गतानाम् अङ्गतानाम् अर्थानाम् उपनिषद्भूतं रहस्यस्वरूपं संसारविद्याया भवव्यापारस्य विपदं भयनाशकरमित्यर्थः ग्रन्थिबन्धं वचनं ग्रन्थिरूपं वाक्यं ग्रथ्नन्तु रचयन्तु काव्यमूर्त्तेः काव्यशरीरस्य ब्रह्मणः वेदस्य सन्तर्पितं प्रीणितम् अन्तःकरणं येन तथाभूतम् अन्तःसन्तोषकरमित्यर्थः। अनुगुणं सुसदृशं सात्त्विकैः सत्वगुणवद्भिः कविभिः प्रथमं पिशुनितं सूचितं निबद्धमित्यर्थः। तत् प्रसिद्धं तत्त्वं भावयन्तः चिन्तयन्तः सन्तः अर्च्चयन्तु प्रशंसन्तु च। साधवः स्वयं संसारबन्धमोक्षाय ब्रह्मतत्त्वोद्भावकं प्रबन्धं रचयन्तु वा अन्यैः निबद्धम् अनुशीलयन्तः प्रशंसन्तु इति तात्पर्य्यार्थः। स्रग्धरावृत्तम्।

दशमोऽङ्कः समाप्तः।

इति श्रीजीवानन्दविद्यासागर भट्टाचार्य्यविरचिता
बालरामायण-नाटक-व्याख्या
सम्पूर्णा।
॥ समाप्तोऽयं ग्रन्थः ॥

প্রিণ্টর

শ্রীউদয়চরণ পাল।

নং ৩৯ শিবনারায়ণ দাসের লেন।

নূতন বাঙ্গালি যন্ত্রে মুদ্রিত